

3254

साहित्य–अकादमी- पारितोषिकेण पुरस्कृतम्

श्रीमत्प्रतापराणायनं महाकाव्यम्



महाकविः

पण्डित ओगेटि परीक्षित शर्मा

Published with the financial assistance from the Ministry of Human Resource Development, Government of India.

१९८९

Published by : Smt. S.P. Sharma
c/o S.K. Kanchne
1204/18 Shivaji Nagar
Pune-411004

Pt. Ogeti Parikshit Sharma
10/1/1, Sakal Nagar, Baner Road,
Pune 411 007.

Price : Rs. ~~20~~/- 300/00

Printed at :
Vaidika Saṁśodhana Maṇḍala Mudraṇālaya,
T. M. V. Nagar,
Pune 411 037.

ŚRĪMAT-PRATĀPA-RĀṆĀYANAM
MAHĀ-KĀVYAM

Recipient of Sāhitya-Akādemī Award.



Mahākav

Pt. Ogeti Parikshit Sharma

RGCSLIB
03254

Published with the financial assistance from the Ministry of Human Resource Development, Government of India.

1989

समर्पणा

श्री चल्लुवंशाब्धिसुधाकराय
श्री सत्यनारायणशास्त्रिणे च ।
प्रतापराणायनकाव्यमेतत्
समर्पितं श्रीगुरवे सहर्षम् ॥

पुरस्कारः ॥

सुरस-सुरवागुपनिबद्ध-नानाविधरसभावसमन्वित-ललितगीतालहरी-अक्षय-गीतरामायण – यशोधरामहाकाव्य – परीक्षिन्नाटकचक्र–जानपदनृत्यगीतमञ्जरी–सौन्दर्यमीमांसेत्यनेकानवद्यकाव्यनाटकादिप्रणेतृभिः तद्वशाच्च अपारे काव्य-संसारे प्रथितयशोभिः श्रीमद्भिः ओगेटि परीक्षिच्छर्मभिः राणाप्रतापनृपतिचरित-मत्यद्भुतम् उररीकृत्य प्रत्यग्रविरचितं प्रतापराणायनं नाम महाकाव्यं ससंतोषं पुरस्कर्तुं ननु वाचामगोचरं मानसमानन्दममन्दमनुभवामः ।

वस्तुतस्तु नेदं महाकाव्यम् । राणायनमपीदं रामायणादिवत् काण्डेषु विभक्तं सत् सर्गबद्धम् ऐतिह्यम् आर्षकाव्यमित्यभिधां बिभ्रदेवाभिख्यां कामपि पुष्णीयादिति निःशङ्कं प्रतीमः ।

यद्यपि यथावृत्तस्येतिहासस्य क्रमशः केवलं रूक्षं वर्णनं न काव्यप्रयोजनं भवितुमर्हति, इतिहासादिग्रन्थेभ्य एव तत्सिद्धेः । अथापि रुचिररससमन्वितेऽपि विविधवर्णनवर्णच्छटाभास्वरेऽपि अस्मिन् काव्ये न कविना क्वचिदपीतिहासः विकृतिमापादितः । कार्नाल्टोड्लिखितस्य राजस्थानेतिहासग्रन्थस्य प्रधानतः प्रमाणत्वेनाश्रितत्वात् । अत एवायं काव्यग्रन्थः सन्नपि रूक्षविवेचनवर्जितः भावानुबन्धी रसस्यन्दी इतिहासोऽपि भवति ।

प्रायशस्त्रिंशतवर्षेभ्यः प्राक् परकीयमोगलसाम्राज्यावलितभीषणपारतन्त्र्य-क्रकचपाशवशात् अनल्पपीडिताया बहुव्यथिताया अतिनिर्विण्णाया भारतमातुः कन्धरां विमोचयितुं कराङ्गुलिपरिमेया एव नृपतयः संस्कृतेर्जीवातुभूता इव, प्रयत्नानां परां काष्ठां व्यदधुः । तेषु अन्यतमः महाराष्ट्रेषु लब्धजनिः स्वनामधन्यः शाहसूनुः छत्रपतिः शिवः । तत्पूर्वं च राजस्थानराजपुत्रः स्वप्रताप–पराभावित-पारतन्त्र्यध्वान्तः राणाप्रतापः । विरलतरा हि एतादृशानां महाप्रभावाणां पुरुषा-णाम् आविर्भावा भवन्ति, ये हि क्षणमात्रमपि अविश्रम्य, सोढ्वा च शारीरानपि क्लेशान् बहुतरान्, स्वातन्त्र्य-यज्ञ-कुण्डेषु तिलशः स्वात्मविसर्जनं कुर्वन्तः

स्वदेशार्थमात्महोमं विदधते। शिवछत्रपतिमुद्दिश्य प्रणिन्यिरे महाकाव्यानि सुललितानि सुरभारत्या इतः पूर्वं महाकविभिः। किन्तु चतुःशतवर्षेभ्यः प्राक् देवभूयं गतेऽपि महाप्रतापे राणाप्रतापे, प्रातःस्मरणीयं तच्चरितमत्युद्भटम् आश्रित्य न संस्कृतसारस्वतवर्त्मना काव्यं निरमायि केनापि कविनेत्यद्यापि अरुचिरार्था अचरितार्था चापि किल संस्कृतभारतीति कल्पनयैव अन्तर्व्यथया उत्कथितहृदयोऽयं कविः समकल्पयत्–

'राणाजीवितमुद्दिश्य काव्यं नास्तीति संस्कृते।
अपवादात्मकं वाक्यं निरस्तुं कवयाम्यहम् ॥' (पृ. ११ श्लो. ५) इति।

एवं समुच्छलित-काव्यसर्जनसंकल्पः कविरयं राष्ट्रभक्तस्य मृत्युंजयस्य चरित्रनायकस्य विक्रमैकरसं प्रत्यवाय-संकटं चरितमत्यद्भुतमतिपावनं हृदि ध्यायं ध्यायं, राणासमीपतां समासादितुमिव तन्निवास-परिपाचितपांसूनि चितोड-उदयपुरादि-दिगन्तराणि, तत्पूजित-एकलिङ्गेश्वरादि-देवतामन्दिराणि, तद्विहित-पराक्रमस्थानानि हल्दिघाटाद्याख्यानि च दर्शं दर्शं, तत्रत्येभ्यः ग्रामवृद्धेभ्यश्च राणाप्रतापस्य वीराद्भुतकथायुताः गाथाश्च श्रावं श्रावं, प्रत्नमपि ऐतिह्यासिकं घटना-क्रमं नितान्त-तृषितेन संवेदनक्षमेण तन्मयेनेव हृदयेन मनश्चक्षुषा च साक्षादिव अन्वभूत्। स एवानुभवो, वस्तुगत्या वाचामगोचरोऽपि, अर्थसार्थः शब्द-राशिरभवदस्मिन् महाकाव्ये। किंबहुना– 'स्थाने राणायन–कविः देवीं वाचमवीवृधत्' इत्येव वक्तुं सांप्रतं नासांप्रतं स्यात्। ननु काव्यकलाकोविदैः चिराय प्रतीक्षितं प्रतापस्य चिरत्नं चरित्ररत्नमधुना अमरवाङ्निबद्धं सत् चिरन्त-नत्वं प्रतिपद्येतेति महदिदमुत्सवकारणं संपन्नम्।

काव्येऽस्मिन् कथावस्तु ननु ऐतिह्यक्रमेण अव्युत्क्रमं क्रमते मन्दं मन्दं मेत्राडोदयारण्य–दिल्ली–हल्दिघाट–विजयाख्यकाण्डकृतकूलद्वये, कुल्यानियन्त्रितं कूलंकषमदेवमातृकमिव पयः।

पुण्यप्रतापस्य धीरोदात्तस्य कथानायकस्य व्यक्तिचित्रणमपि कविना –

"धीरोदात्तैः गुणैर्युक्तः राणा शत्रुभयंकरः।
धर्मभीरुः स्थितप्रज्ञाः संग्रामे भीमविक्रमः ॥

अयं धीरः प्रसन्नात्मा त्यागी राष्ट्रहितेच्छुकः ।
भुवैकसां समाराध्यः साक्षात् रामविभुः स्वयम् ॥

एकोनविंशद्वर्षाणि युयुधे शत्रुभिः सह ।
एतादृशः कष्टभोगी नास्ति कुत्रापि भूतले ॥" (पृ. १०० श्लो. ५-८)

इत्यादिभिः ललितवचोभिः यथावद् व्यधायि । वीरपत्न्याः पाटेश्वर्याः राणाप्रतापं प्रति प्राप्तकालः कर्तव्योपदेशः (पृ. ३८५) तस्याः मानिनीत्वमवगमयति । अक्बरस्य व्यक्तित्वेऽपि तस्य राजकीये कर्मणि निकृतिपरत्वमित्र, संगीतादावासक्तिः, धर्मपरायणत्वमिति नैके दोषगुणाः अपक्षपातमवर्णि । एवमेव अन्यान्यपि संविधानकथितानि पात्राणि प्रातिस्विकगुणदोषवर्णनपुरःसरं काव्येऽस्मिन् पार्थक्येनावभासन्ते ।

काव्यकलानिष्णातस्य माधुर्यलोलुपस्यास्य कवेः नैसर्गिकी प्रतिभा निसर्ग-वर्णनादिषु सविशेषं नवनवोन्मेषशालिनी भूत्वाऽऽवर्जयति काव्यकोविदानां रसिकानां मनांसि । तत्र अरण्यवर्णनम् (पृ. १७१–१७५), वसन्तागमः (पृ.१८९) इत्यादि निदर्शनम् ।

'दुरोदरः शिशिरकुमारभूपतिः
चकार तां प्रकृतिरमां विवक्षिणीम् ।
इति स्वयं किसलयवल्लसंयुतां
नवां विरच्य भुवि ललास माधवः' ॥ (पृ. १८९ श्लो. ३)

इत्यस्मिन् पद्ये दुर्ललितोऽपि शृङ्गारः अभिनवया उत्प्रेक्षया मनोरमतां प्रपद्यते ।

एवं च क्वचित् –

'महस्तु सर्वत्र न दृश्यते खलु' (पृ. २०४.२) इत्यादयोऽर्थालङ्काराः प्रस्तुतार्थं समर्थयन्तो लक्ष्यन्ते । असफखानादीनां यमातिथिकरण–प्रकरणेषु वा, हल्दिघाटकाण्डे रणभूमिं प्रति चमूचालनसंदर्भेषु वा कवेर्लेखनी विक्रमैकरसा

भूत्वा सावेशं वीररससूक्तिं सूते। पञ्चत्वं प्रपन्नस्य चेतकाख्यस्याश्वस्य कृते विहितो विलापश्च न केवलं करुणं रसम्, अपि तु स्वाश्वं प्रति सुहृन्निर्विशेषां मनसो भावनां प्रतापस्य प्रथयति। एतादृक्षु वर्णनेषु कवेः चारुतर-पदविन्यासचातुरी प्रतिभाविष्कृतभव्यार्थसंपद्गुणेन युता किमप्यवचनीयं चमत्कारं तन्तनीति।

अशीतिसर्गेषु चतुःसहस्राधिकान् श्लोकान् त्रयस्त्रिंशद्विधछन्दोभिः रचयता कविना वृत्तवैविध्यविच्छित्तिरपि न विच्छिन्ना। तेटगीति-आटवेलदि इत्यनयोः तेलुगुभाषाप्रथितयोः छन्दसोः देवभाषायामिदंप्रथमतया नवावतारः संदृश्यतेऽस्मिन् महाकाव्ये। ओवीत्याख्यः मराठी-प्रकृतिकश्छन्दोऽप्यादृतोऽस्ति कविना। दीर्घतमपङ्क्तिनिबद्धेष्वपि वृत्तेषु 'मासं मषम्' अकुर्वताऽपि यतिभङ्गादि-वृत्तदोषाः सदक्षं परिहृताः सन्ति इति शब्दप्रभुरेव ननु छन्दःप्रभुर्भवितुम् अर्हतीत्येतस्येदं निदर्शनं खलु।

अस्मन्मते तु, काव्यकृतौ पात्रस्वभावपरिपोषः, घटनाक्रमः, कथायाः सुसूत्रितो विकासः, उत्वणपदा ललिता रीतिः, रसावस्थानसूचका विभावानुभावाः, काव्यशोभायाः कर्तारः, तदतिशयहेतवो वा गुणालङ्काराश्चेत्यादयः काव्यस्य बहूपकुर्वन्तोऽपि बाह्यत्वात् अप्रधाना भवन्ति। यत् सत्यं रेखास्विव चित्रं, एतेषु केवलं शब्दचित्रमवतिष्ठते अचेतनं; न चेमे काव्यं चेतनं विदधति। सचेतनं काव्यं हि कवेर्मनसः 'हुं' कारादात्मलाभं लभते। स एव हि मनसो हुंकारः अभिनवानां पदार्थानां स्फुरणहेतुर्भवति। तेनैव हुंकारेण कवेः प्रातिस्विकं व्यक्तित्वं कवितायाम् अभिव्यज्यते, तत्कृताश्च कवेर्मनसः विविधाः पुटाः स्तरा वा परस्परमविलग्नाः सन्तः पार्थक्येन अनुभूयमानाः स्वदन्ते रसिकाणाम्। स एव हि अन्यच्छायायोनित्वं काव्यार्थस्य परिहरति। अत्र हि रचनाकारः रचनया अद्वैतं प्रतिपद्यते। एतादृशी हि अल्पापि वाग्वृत्तिः सामाजिककर्णावतंसति। किंबहुना– 'सं दक्षेण मनसा जायते कविः' (ऋग्वेद ९.६८.५) इति भगवती श्रुतिरपि दक्षस्य मनसः एव काव्याभिव्यक्तिं प्रति कारणत्वं ब्रूते।

एवं स्थिते प्रतापरायणन–महाकाव्ये कवेर्मनसः अभिव्यक्तौ गवेष्यमाणायां, तस्य द्वे प्रवृत्ती प्राधान्येन उपलभ्येते। तत्रैका–देवीं वाचं प्रति अलोकसाधारणः प्रणयः, अपरा च भारत-मातरं प्रति सहजा सुदृढा च भक्तिः। इमे प्रवृती

काव्येऽस्मिन् तथा प्रबलत्वेन आविष्कृते स्तः, यथा तदाविष्कारं प्रति प्रतापचरित-वर्णनमुपायत्वेन प्रतीयेत ।

तथाहि – उदयकाण्डे चतुर्दशसर्गे

'हिमालयाभूषितशस्तमस्तकां पयोनिधिक्षालितपादपीठिकाम् '।

इत्युपक्रम्य –

'नमोऽस्तु ते भारतदेशदेवते भवामि संकीर्तयितुं गुणान्विताम् ।
सदा भवन्तीं सुतवत्सलां भुवि प्रसीद मां त्वं तव चिन्तने रतम् ॥

सदा त्वदीयां मधुचित्रणां हृदि विधाय संस्मार्य पवित्रसंस्कृतिम् ।
प्रदर्शयेयं भवदीयवैभवं निरन्तरं कीर्तितविश्वमण्डले ॥

विना त्वदीयं मधुरं सुजीवितं न मेऽस्ति चान्यत् बहुरोचकं भुवि ।
सदा भवत्यै कविताक्षमालया जपन् मदीयं वितरामि जीवितम् ॥'

इत्यादिभिः पद्यैरनेकैर्यदा कविरयं कथयते तदा 'काव्यं हि कवेरात्मपरिचयं ददाति' इत्युक्तिः निदर्शनं लभते ।

संस्कृतं प्रत्यपि कवेरादरो दरीदृश्यते बहुत्र काव्येऽस्मिन् । दृश्यन्तां तावदिमाः श्लोकपङ्क्तयः –

'पूर्वजन्मकृतं पुण्यं सत्यमस्मिन् युगे मम ।
संस्कृतज्ञानरूपेण फलितं काव्यभूरुहे ॥' (पृ. ६ श्लो. १) ॥

अथवा –

'यस्यां मे संस्कृतिः सर्वा विललास सुधामयी ।
तस्यां गीर्वाणभाषायां कुर्यां मे काव्यनिर्मितिम् ॥' (पृ. ७ श्लो. ३)

अथवा –

'संस्कृते पण्डितो यश्च सैव दिव्यहिमालयः ।
पण्डिताः अन्यभाषासु गिरयो ग्रामसंनिधौ' ॥ (पृ. ८ श्लो. १५) इत्येव-मादयः ॥

किं बहुना –

'जन्मजन्मनि गीर्वाणी भारती मेऽस्तु भारती
यद्यहं मानवो भूत्वा जीवेयं भारतावनौ'

इत्येवमादयः कवेरस्य काव्यपङ्क्तयः

'अन्यस्यामपि जात्यां मे त्वमेव जननी भव'

इत्यादिकां महाकविभासोक्तिं ननु स्मारयन्ति ।

एवमनेकाभिः पद्यपङ्क्तिभिः प्रतीयते यत् कविरयं प्रतिश्वासं राष्ट्रभक्तिं संस्कृतादरं च प्राणिति । तन्निबन्धनं स्वीयं प्रस्थानं स्थापयन् आयुषश्चरितार्थतां च समधिगच्छतीति ।

मान्याः मेधाधनाः सहृदयाः, कामं क्वचिदस्य काव्ये शब्दशिलाः ईषद्-घटिता विद्येरन् । बन्धश्च आडम्बररहितोऽनत्यलंकृतो वा भवेत् । तदभिव्यक्तः राष्ट्रभक्त्यादिभावान्वितार्थस्तु घृष्टचन्दन इव, तपात्यये नवजलधरधारासिक्ता धरेव भावगन्धितो भवति, नैसर्गिकं च किमपि निरागसं सहजं सौन्दर्यमावहति, अधिकमनोज्ञतां च धत्ते इति प्रकाशमाचक्ष्महे ।

अयि काव्यमर्मज्ञाः । विकटेऽस्मिन् व्यामोहसंयुते कराले कलिकाले, प्रायशः अस्तंगतमहिम्नि गीर्वाणवाणीप्रणये, अतिधूसरतामापन्ने च राष्ट्रप्रेम्णि, राष्ट्रभक्तचरितस्य प्रणयनं सुरभारत्या कुर्वाणस्य लब्धवर्णस्य कवेरनवद्यमिदं पद्यं सहृदयानां हृदयेन संवेदेत् । तेषां सुपरीक्षितप्रथितेन परितोषवचनेन च परीक्षित-सूरिरयं अतिमात्रं सभाजितो भवेदिति दृढमाशास्य तस्मै हार्दान् धन्यवादान् शतशो वितीर्य उपसंहरामः ।

दि. ९-८-१९८९

त्रि. ना. धर्माधिकारी
वै. सं. मण्डलम्, पुणे ३७.

'श्रीमत्प्रतापराणायनम्' महाकाव्य की सान्द्रता

गीर्वाणगेयकविमण्डलचक्रवर्ती महाकवि पण्डित ओगेटि परीक्षित शर्मा द्वारा प्रणीत 'श्रीमत्प्रतापराणायनं महाकाव्यम्' की प्रति मुझे दिनांक 11-8-89 को प्राप्त हुई। दो ही दिन में, मैं अतृप्त पिपासु की भाँति इस महाकाव्य का आद्यन्त आस्वादन कर गया। पद्य–संख्या की दृष्टि से प्राचीन संस्कृत महाकाव्यों में रत्नाकर के 'हरविजय' के साथ प्रतिस्पर्धा करनेवाले किन्तु सर्ग–संख्या की दृष्टि से (80 सर्ग) सर्वजयी इस महाकाव्य ने आधुनिक काल एवं संस्कृत–साहित्य–सर्जना को गौरवान्वित किया है। एक सर्वथा अधूरे विषय पर, ऐसे विशाल महाकाव्य की रचना करने का महोत्साह रखनेवाले महाकवि पं. ओगेटि परीक्षित शर्मा ने सुरभारती एवं उसके समुपासकों के समक्ष सहज ही उत्तमर्णता प्राप्त कर ली है। भारतीय इतिहास-साकाश मे मुगलकाल के दो महान् स्वतन्त्रता–प्रेमी शूरवीर–महाराणा प्रताप एवं वीरवर शिवाजी सोम-सूर्य के समान देदीप्यमान हैं। भारतीय स्वतन्त्रता–संग्राम के समय और उससे भी अधिक आज, जब हम स्वतन्त्र होकर भी स्वार्थवश मानसिक रूप से परतन्त्र होते जा रहे हैं– इन गरिमामय युगल–चरित्रों के प्रकाश से पथ–दर्शन की महती अपेक्षा है। अतीव आश्चर्य का विषय है की बीसवी शती के पूर्वार्ध में प्रथम बार राजस्थानवासी एक महान् संस्कृत–गद्यकार पं. अम्बिका दत्त व्यास ने देशभक्त स्वतन्त्रता–प्रेमी महाराष्ट्र-वीर शिवाजी के जीवन पर विशाल संस्कृत उपन्यास 'शिवराजविजय' की सर्जना की थी और इसी शताब्दी के उत्तरार्ध में आज आन्ध्रदेशीय महाकवि पं. ओगेटि परीक्षित शर्मा ने प्रथम बार राजस्थान के महावीर महाराणा प्रताप पर विशाल महाकाव्य "श्रीमत्प्रतापराणायनम्" की रचना

का पुणे (महाराष्ट्र) से प्रकाशन किया है। राजस्थान और महाराष्ट्र के इन वन्दनीय देशभक्त वीरों का, इन प्रदेशोंके साहित्यकारों द्वारा किया गया यह कार्य परस्परभावन–सभाजन मात्र नहीं है प्रत्युत भारत की उस जीवनी-शक्ति का प्रमाण है, जिससे आक्रान्ताओं द्वारा दलित–मर्दित और खण्ड–खण्ड किया गया भी यह देश सदैव अखण्ड, अभेद्य एवं अमृत रहा है। इसी कार्य में इस देशकी उदाराशय संस्कृति की आत्मविकत्थना–विरति और पर–प्रशंसा को मूल्योंका अंकुर भी छिपा है। सत्कर्मा सूरमाओं के सच्चरित्र का यह यशोगान उनके उद्गाताओं के काव्यों को चिरयशस्विता व समादर प्रदान करनेवाला है–इसमे कोई सन्देह नहीं है।

महाकवि पं. ओगेटि परीक्षित शर्मा का यह महाकाव्य भारतीय संस्कृति के उदात्त मूल्यों की परम निधि है। इसके प्रत्येक पृष्ठ और यहाँ तक की प्रत्येक पद्य से भारतीय सांस्कृतिक मूल्यों का प्रकाशन हो रहा है। महाकवि ने इस महाकाव्य के कथा–क्रम को अतिशय कुशलता से बुना है। उनके प्राक्कथन (Prologue) से स्पष्ट है कि कथा का ऐतिहासिक पक्ष, यदि उन्होंने कर्नल टाड के राजस्थान के इतिहास से ग्रहण किया है तो भाव–पक्ष उनके द्वारा महाकाव्य के चरितनायक से सम्बद्ध प्रदेश–मेवाड़, विशेषतः चित्तौड के विविध स्थानों की यात्रा कर प्रत्यक्ष दर्शन व अनुभूति से रचा गया है। सर्वाधिक प्रभावित करता है– काव्य का सहज रूप। किसी भी विषय के उपस्थित होते ही कवि–प्रतिभा के इंगित–मात्र से भाषा और भाव मानों काव्य में थिरकने लगते हैं। गुण, अलंकार आदि काव्य–सौन्दर्य अनायास उपस्थित हो जाते हैं। संस्कृत - काव्य - शास्त्र में राजानक कुन्तक ने ऐसे ही काव्य को सुकुमारमार्ग की रचना कहा है, जिसका लक्षण इस प्रकार है–

अम्लानप्रतिभोद्भिन्ननवशब्दार्थबन्धुरः।
अयत्नविहितस्वल्पमनोहारिविभूषणः॥

भावस्वभावप्राधान्यन्यक्कृताहार्यकौशलः ।
रसादिपरमार्थज्ञमनः संवादसुन्दरः ॥
अविभावितसंस्थानरामणीयकरञ्जकः ।
विधिवैदग्ध्यनिष्पन्ननिर्माणातिशयोपमः ॥
यत्किञ्चनापि वैचित्र्यं तत्सर्वं प्रतिभोद्भवम् ।
सौकुमार्यपरिस्पन्दस्यादि यत्र विराजते ॥
सुकुमाराभिधः सोऽयं येन सत्कवयो गताः ।
मार्गेणोत्फुल्लकुसुमकाननेनैव षट्पदाः ॥

(वक्रोक्तिजीवितम् 1/25-29)

राजानक कुन्तक ने कालिदास, सर्वसेन आदि कवियों को सुकुमार मार्ग का कवि कहा है। (द्र. वक्रोक्तिजीवितम् 1-52 वीं कारिका की वृत्ति)। 'श्रीमत्प्रतापराणायनम्' महाकाव्य के कवि भी ग्रन्थारम्भ में वाल्मीकि, व्यास, कालिदास व भवभूति की ही वन्दना कर उन्हें अपना आदर्श मानते हैं (द्र. श्रीमत्प्रतापराणायनम् 1/2/2-3)।

सुकुमार मार्ग के काव्य की अन्यतम विशेषता है– उसमे रस–भाव की निर्झरिणी का अजस्र प्रवाहित होना। रस व भाव की चारुता सहृदय - हृदय की आस्वादक्षमता पर निर्भर करती है। सहृदय कौन हो सकता है– इस प्रश्न का उत्तर देते हुए आचार्य आनन्दवर्धन कहते हैं की रसज्ञता ही सहृदयता है–

किमिदं सहृदयता नाम? किं रसभावानपेक्षकाव्याश्रितसमयविशेषाभिज्ञत्वम् उत रसभावादिमयकाव्यस्वरूपपरिज्ञाननैपुण्यम्? पूर्वस्मिन् पक्षे तथाविधसहृदयव्यवस्थापितानां शब्दविशेषाणां चारुत्वनियमो न स्यात्। पुनः समयान्तरेणान्यथापि व्यवस्थापनसम्भवात्। द्वितीयस्मिंस्तु पक्षे रसज्ञतैव सहृदयत्वमिति

तथाविधैः सहृदयैः संवेद्यो रसादिसमर्पणसामर्थ्यमेव नैसर्गिकं शब्दानां विशेष इति व्यञ्जकत्वाश्रय्येव तेषां मुख्यं चारुत्वम्। (ध्वन्यालोकः, 3/16 की वृत्ति)

अतः कवि जिन रसभावविशेषों की सहृदय को अनुभूति कराना चाहता है, वह इतिवृत्त की धारा को उसी ओर मोड़ देता है। कवि एतदर्थ कथावस्तु में यथोचित परिवर्तन करने में भी समर्थ है–

कविना काव्यमुपनिबध्नता सर्वात्मना रसपरतन्त्रेण भवितव्यम्। तत्रेतिवृत्ते यदि रसाननुगुणां स्थितिं पश्येत् तदेमां भङ्क्त्वापि स्वतन्त्रतया रसानुगुणं कथान्तरमुत्पादयेत् न हि कवेरितिवृत्तमात्रनिर्वहणेन किञ्चित् प्रयोजनम् इतिहासादेव तत्सिद्धेः। (ध्वन्यालोकः, 3/14 की वृत्ति)

भारत का प्राचीन इतिहास सदैव विवादास्पद रहा है। महाराणा प्रताप के चरित्र के अनेक प्रसंग, इतिहासकारों में भी आजतक असमाधेय हैं। अतः कवि का कर्त्तव्य उन प्रश्नों का समाधान प्रस्तुत करना नहीं है और किसी काव्य से तो यह अपेक्षा की भी नहीं जा सकती है। दूसरे, सरल स्वभावी होने के कारण सुकुमारमार्गी कवि, कथनों और कथांशो के औचित्य की ओर उतना ध्यान भी नहीं दे पाता। राजानक कुन्तक ने तो महाकवि कालिदास के काव्यों में भी अनेकत्र औचित्यगुण का अभाव बताते हुए इसे इन कवियों का दोष नहीं माना है–

एतच्चैतस्येव कवेः सहजसौकुमार्यमुद्रितसूक्तिपरिस्पन्दसौन्दर्यस्य पर्यालोच्यते, न पुनरन्येषां आहार्यमात्रकाव्यकरणकौशलश्लाघिनाम्। (–वक्रोक्तिजीवितम्, 1/57 की वृत्ति) वैसे 'श्रीमत्प्रतापराणायनम्' में तो महाकवि पं. ओगेटि परीक्षित शर्मा ने महाराणा प्रताप की जीवनकथा के प्रसिद्ध अंशों का ही अधिक ग्रहण किया है।

'श्रीमत्प्रतापराणायनमू' आद्यन्त देशभक्ति से ओत-प्रोत महाकाव्य है। प्रत्यक्ष देवता सूर्य तथा देशभक्तों के प्रत्यक्ष प्रतापी देवता 'प्रताप' की श्लेष से अभिवन्दना के साथ आरम्भ हुए एवं महाराणा प्रताप के देशभक्तिमय अन्तिम उपदेश के साथ परिसमाप्त हुए इस महाकाव्य का प्रतिशब्द देश की स्वतन्त्रता, समृद्धि, सम्मान व समुन्नति की अभीप्सा का व्यंजक है। नाट्य-शास्त्री भरत द्वारा मान्य भावों में मंचीय सीमाओं आदि के कारण रति-भाव के स्वरूप का जो कान्ता-कान्त-रति-मात्र में संकोच दृष्टिगोचर होता है, उसे परवर्ती काव्यशास्त्रज्ञों ने रस-संख्या-विस्तार के भय से भले ही स्वीकार कर लिया हो किन्तु जागरूक आचार्यों ने उसे कदापि तर्कसम्मत नही माना। कान्ताकान्तरति के अतिरिक्त सभी अन्य रतियों को सदा अपुष्ट मानकर भावध्वनि कहने की मम्मट-मत-परम्परा भी युक्तियुक्त नहीं है। क्रोध-शोकादि की तरह रति को सामान्य भाव भी नही माना जा सकता—यही उसकी असाधारणता है—

तुल्ययोर्या मिथो रतिः स स्नेह प्रेमेति यावत्। निष्कामतया मिथो रतिः सा मैत्री। अवरस्य वरे रतिर्भक्तिः। सैव विपरीता वात्सल्यम्। सचेतनानामचेतने रतिसम्बन्ध इत्यादि स्वयमूह्यम्॥

(काव्यप्रकाशस्य माणिक्यचन्द्रसूरिकृता टीका, पृ. 65)

रति के प्रमोदात्मा होने पर भी पुत्ररति, मित्ररति, भगवद्रति, देशरति, के परिपाक को कभी शृंगाररस नही कहा जा सकता। ये सभी रतियाँ स्वरूपतः भिन्न हैं। इसीलिए संस्कृत काव्यशास्त्र के ही अनेक आचार्यों ने आठ या नौ रसों के अतिरिक्त प्रेयान् (रुद्रट), वत्सल (विश्वनाथ आदि), भक्ति (मधुसूदन सरस्वती, रूपगोस्वामी आदि) और यहाँ तक कि मृगया अक्षक्रीडा (द्र. दशरूपकम्) आदि रसों का निरूपण किया। इसी परम्परा में हिन्दी समीक्षक आचार्य रामचन्द्र शुक्ल ने प्रकृतिप्रेमरस की चर्चा की तथा आज

संस्कृत व अन्य भाषाओं के काव्यशास्त्रमर्मज्ञ देशभक्तिरस को स्वीकार करते हैं–

क्रीडा विशेषविषया देशभक्तिविशेषविषयाः सिद्धान्तविशेषविषयाश्चेत्या-द योऽनेके रतिप्रकाराः सम्भवन्ति। अत्र क्रीडाविशेषविषया रतिरक्ष-रत्यादिरूपा, देशविशेषविषया राष्ट्रभक्त्यादिरूपा सिद्धान्तविशेषविषया च साम्यवादादि-सिद्धान्तगतरतिरूपा। (–रसलोचनम्, ब्रह्मानन्दशर्मा, पृ. 28)

'रति' शब्द के अर्थ को रूढि से मुक्त कर व्यापक बनाने उसके लिए भी परवर्ती काव्यशास्त्री कर्णपूरगोस्वामी ने उसके स्थान पर 'प्रेम' शब्द का प्रयोग कर महाराज भोज की भाँति उसे समस्त भावों का मूल माना–

उन्मज्जन्ति निमज्जन्ति प्रेम्ण्यखण्डरसत्वतः।
सर्वे रसाश्च भावाश्च तरंगा इव वारिधौ॥

(– अलंकारकौस्तुभः, 5/पृ. 149)

प्रेम का ही एक रूप है– देशप्रेम। प्रेम, रूप-कुरूप की, जड-चेतन की गुण–अवगुण की, अनुकूल–प्रतिकूल आचरण की मीमांसा नही करता। वह प्रत्युत्तर, प्रतिदान, या प्रत्युपकार की भी अपेक्षा नही रखता। उसकी पराकाष्ठा प्रिय के लिए आत्मविस्मृति, आत्मोत्सर्ग में निहित होती है। देश-प्रेम की उत्कटता भी देश की स्वतन्त्रता व सम्मान-रक्षा के लिए दीपशिखा पर शलभ की भाँति स्वयं को न्योछावर कर देनेवाले चरित्रों में अनुभूत की जा सकती है। मातृभूमि की स्वतन्त्रता के लिए जगत् के समस्त सुखों का सहर्ष त्याग करनेवाले कष्टसहिष्णु महाराणा प्रताप जैसे धीर-वीरो की काव्यमय चरित-गाथा भला किस प्राणवान् देशप्रेमी को भावोद्रिक्त नहीं करती और इस देशप्रेम के भावकी पुष्टि किस सहृदय को देशप्रेम रस में सराबोर नहीं करती। महाकवि पं. ओगेटि परीक्षित शर्मा नें 'श्रीमत्प्रतापराणायन महाकाव्य' द्वारा

इसी अभिनव रस की स्थापना का क्रान्तिकारी कार्य किया है। स्वयं उनके मत में भी रौद्र, वीर, करुणादि रस देशप्रेमरस के आवरण या अंग रहे है।

कारुण्यवीररासिक्यं देशभक्त्या प्रपूरितम्।
राणायनं करोम्यत्र रामायणकथामिव ॥

* * * *

वीररासिक्यपद्यात्तं रौद्रवीररसावृतम्।
चैतन्यकारकं तथ्यं भाति राणायनं भुवि ॥

(–श्रीमत्प्रतापराणायनम् मेवाडकाण्डम् 8/5, 11)

कवि की राष्ट्रभक्ति ने ही उन्हें राष्ट्र की सनातनी भाषा–संस्कृत एवं राष्ट्रपुरुष महाराणा प्रताप की लोकपावनी कथा का भक्त बनाया है (द्र. राणायनम्, मेवाडकाण्डम् /5 एवं मेवाडकाण्डम् /8/32-37)। आधुनिक भारत प्राचीन देशप्रेमी भारत का बिम्ब धारण करनेवाला दर्पण बन जाये-इसी विचार से उन्होंने देशप्रेममय इस महाकाव्य का प्रणयन किया है (द्र. श्रीमत्प्रतापराणायनम्, मेवाडकाण्डम् /8/13-15)

'श्रीमत्प्रतापराणायनम्' का प्रत्येक सर्ग प्रत्यक्ष व परोक्ष रूप से देशभक्ति के भाव को सहृदय मे उद्बुद्ध करता है। आधुनिक युग में जब स्वार्थ के आवरण ने हमारी चेतना को ढक दिया है, हम रसों की अपेक्षा रसाभासों में आनन्द लेने लगे है, ऐसे काव्य ही हमारी हृदयों में छिपी देशप्रेम की चिन्गारी में चमक पैदा कर सकते हैं एवं परिस्थितिजन्य वर्तमान मनोवृत्तिगत आवरण का भंग कर देशप्रेमरस का आस्वादन करा सकते हैं। इस रस की सत्ता के विषय में देशभक्त सहृदय का अनुभव ही प्रमाण है–

'सचेतसामनुभवः प्रमाणं तत्र केवलम्।'

'श्रीमत्प्रतापराणायनम्' महाकाव्य में देशप्रेमरस की शनैः शनैः दीप्ति जगमल्ल का पट्टाभिषेक होने एवं महाराणा प्रताप द्वारा वन में जाकर मातृ-भूमि की स्वतन्त्रता के लिए भीलों को प्रबोधित करने (राणायनम् 2/6), कृष्णसिंहादि प्रियजनों को सन्देश देने (राणायनम्, 2/13) मुगलसम्राट् अकबर के सेनानायकों-आसफ़्खान, फरीदखान, अब्दुल्लाखान, कासिमखान, फिरोजखान व शाहबाजखान का वध करने (3/सर्ग सं. 6-9), राजा मान-सिंह को तर्जना देने व अवमानित करने (राणायनम्, 4/ सर्ग सं. 7-12), हल्दीघाटी में युद्ध करने (राणायनम्, 5/सर्ग 1-7), पुत्री के हाथ से मार्जार द्वारा घास की रोटी छीन ले जानेपर विचलित होकर महाराणा प्रताप द्वारा छह माह के विश्राम का पत्र भेजे जाने पर उत्तर में पृथ्वीराज के पत्र से पुनः स्वाभिमानिता को धारण करने (5/सर्ग–17), महाराणा प्रताप की विजय होने (6/सर्ग सं. 3), स्वातन्त्र्योत्सव मनाने (6/सर्ग सं. 5), एवं महाराणा प्रताप द्वारा मृत्युशय्या से दिये गये उपदेश (6/सर्ग सं. 7) में होती है। महाराणा प्रताप द्वारा दी गई जीवनाहुति को इतिहास में प्रादेशिक प्रेम के रूप में नहीं देखा जाता क्यों की अन्य राजाओं की भाँति उन्होने केवल अपने राज्य के विस्तार के लिए पड़ौसी राजाओं से युद्ध नहीं किया प्रत्युत स्वल्पशक्ति सम्पन्न होते हुए भी सर्वशक्तिमान् विदेशी भारतसम्राट् से देशस्वतंत्रता के निमित्त लोहा लिया था। महाकवि पं. ओगेटि परीक्षित शर्मा ने प्रतापचरित्र की इस मूलभावना को ही भारत–प्रेम के रूप में व्यापकतया व स्फुटतया व्यक्त किया है। देशप्रेमरसानुभुति पर कुछ स्थल यहाँ उदाहृत हैं।

युवावस्था में महाराणा प्रताप द्वारा की गई ये प्रतिज्ञाएँ, जिनका उन्होंने आजीवन पालन किया–

स्वपेयं नैव शय्यायां तावत्पर्यन्तमेव हि।
यावन्मेवाडदेशेन स्वातन्त्र्यं नैव भुज्यते॥

चितौडे राजपुत्राणां यावन्नोड्डयते ध्वजः ।
तावच्च धातुपात्रेषु नैव कुर्यां हि भोजनम् ॥
सुखवस्तूनि सेवेयं नैव निद्रां भजामि च ।
स्वातन्त्र्यसिध्दयै यत्नं तू कुर्यां शक्त्या दिवानिशम् ॥

(– श्रीमत्प्रतापराणायनम्, 2/2/58-60)

मुगल सम्राट् अकबर के प्रभाव व शक्ति का वर्णन कर महाराणा प्रताप को सम्राट् की अधीनता स्वीकार कर लेने का परामर्श देनेवाले राजा मानसिंह को दिये गये महाराणा प्रताप के प्रत्युत्तर का यह अंश किस सहृदय को आनन्द-गद्गद नही बनाता–

यः कोऽपि नाम मम भारतवंशजानाम्
आपादयेद्यदि कलंकमहं विलुप्य ।
खड्गेन नैकशकलांश्च तदीयजिह्वां
कृत्वा न दिक्षु विकिरामि विना दयां किम् ॥

आनन्त्यसस्यफलसज्जितपुण्यभूमिं
देशं त्वमत्र परहस्तगतं विलोक्य ।
नैवासि तप्तहृदयेन विभासमानः
कालुष्यभावभरितं खलु तेऽद्य चित्तम् ॥

श्वासानिलो वहति यावदिहैव देहे
तावत् प्रियो भवति दैशिकभक्तिभावः ।
आकाशपातनमपीह चिरं सहेयं
कांक्षे न चापि परशासनदास्यवृत्तिम् ॥

नैवास्ति मेऽत्र धरणीपरिपालनाशा
बाभाति दिव्यभरतावनिभक्तिभावः ।

यः कोऽपि वा भवतु भारतदेशजातः
राष्ट्रस्य पालनपरो मम योग्य एव ॥

(श्रीमत्प्रतापराणायनम्, 4/10/8-9, 12, 32)

हल्दीघाटी के प्रसिद्ध युद्ध के अवसर पर महाराणा प्रताप द्वारा अपने सैनिकों को किया गया सम्बोधन भी सहृदयों को देशप्रेमरस में मग्न कर देने-वाला है–

जयो भवेद्यदि प्रियाः मुदैव भारतं वयम्
प्रपालयेम शाश्वतं प्रजाभिरेव सौख्यदम्।
भवेत्तथा हि नैव तर्पणं क्षतांगसंस्रुतैः
विधेम भारताय रक्तवाहिनीचयैः मुदा ॥

प्रतिक्षणं तु दृग्भिरेव चावगम्य वर्तनं
परालिकर्तनं विधातुमेव यान्तु सैनिकाः।
शिलासमानचेतनाः दयाविहीनभावुकाः
निरन्तरं च मातृभूमिरक्षणे भवन्त्विह ॥

द्रुतं धियाऽत्र यान्तु मातृभूमिरक्षणात्मकाः
परालिभूमिजातभञ्जने प्रभञ्जनाशुगाः।
मदान्धशत्रुभूधरान् विदारणे पविप्रभाः
विधातुमेव देशमेनमात्मवश्यभासितम् ॥

नितान्तमातृभूमिरञ्जने च रागरञ्जिताः
पिनाकपाणिहस्तदीप्ततीक्ष्णशूलसन्निभाः।
कृतान्तबिम्बिताः महारणे च खेलनात्मकाः
चलन्तु शत्रुशीर्षकन्दुकैः प्रखेलितुं प्रियाः ॥

हल्दीघाटी के युद्ध में शत्रुओं से लड़कर घायल महाराणा प्रताप को युद्ध-क्षेत्र से ले जाते हुए चेतक का दृश्य तथा योद्धाओं के प्रति महाराणा की उक्ति किसके लिए वीररस से पोषित देशप्रेमरस को आस्वादित नहीं कराती तथा–

शूलाघातकृपाणहेतितिभिः सर्वाङ्गसंछिद्रितः
शान्तात्मा प्रविचार्य चेतकहयो भक्त्या महत्या तदा।
क्षेमेणैव जवेन भूतलमहाराजाधिराजं सुखं
राणां तद्दुःखस्थपीडिततनुं जन्यान्निनायान्यतः॥

एवं युद्धरतस्य हिन्दुधरणीराष्ट्रस्य वास्तोष्पतेः
राणा भूमिपतेश्च दैहिकदशां दृष्ट्वा परं दुःखितः।
युद्धाद्रक्षितुमेव शाश्वतमहो पारे नदं धावितः
नीत्वा तं बहुघोरहेतिदलितं चित्राङ्गकश्चेतकः॥

* * * *

सर्वो बान्धववर्ग एव समरे यातो यमस्यान्तिकं
नाहं स्थातुमहो भुवीह सुचिरं नेच्छामि भो बान्धवाः।
यावच्छक्ति रणे चरन् सुमहता यत्नेन योत्स्येऽरिणा
नान्दीभूतमिदं स्वतन्त्रसमरं तथ्यं महाभारते॥

(–श्रीमत्प्रतापराणायनम्, 5/5/44-45, 51)

अन्य रसों की अंगरूप से योजना भी महाकाव्य में यत्र तत्र प्राप्त होती है। यहाँ देशप्रेमरस के सर्वाधिक पोषक रस है– वीर व रौद्र; किन्तु इनके साथ ही करुण (5/सर्ग सं. 6), भयानक (4/6/50, 4/7/38, 4/8/36), बीभत्स (5/सर्ग सं.8) भी विविध प्रसगों से आस्वादित होते हैं। अद्भुत तो वीररस का विकृति रस ही होने से महाराणा प्रताप के प्रत्येक वीरकर्म के

साथ निबद्ध है। शृंगार के शुचि स्वरूप की अभिव्यक्ति पुत्री की क्षुधा से विचलित-हृदय महाराणा प्रताप द्वारा मुगल सम्राट् अकबर को पत्र लिखनेपर पाटेश्वरी द्वारा किये गये कर्तव्य-बोध के अवसरपर (5/सर्ग सं.12) हुई है। अन्यथा शृंगाररस (? शृंगाराभास) का चमत्कार तो विशदता से अकबर की कामपानशाला के वर्णन (4/सर्ग सं. 2) में प्राप्त होता है। सच है कि देशभक्त वीरों में सच्चारित्र्य-कलंकभूता कामुकता को कहाँ स्थान ? शृंगार के विकृति रस हास्य के लिए भी इस गम्भीरवृत्त महाकाव्य में कोई स्थान नहीं है। हल्दीघाटी में सलीम के साथ महाराणा प्रताप के युद्ध के एक ही प्रसंग में इन अंगरसों से पोषित देशप्रेमरस की छटा और उसकी अनुभूति देखिए-

रे रे मानस जर्झरोऽसि समरे सालीम किं कम्पसे
चाल्लां त्वं समरे जपस्व चपलं नास्त्येव कालः परम्।
खड्गं मे तव कण्ठकृन्तनरतं नैवास्ति रोद्धुं भुवि
चास्त्येवात्र कृतान्तराडिति परं त्वामेव संरक्षितुम्॥

प्राञ्चद्दौर्बलखड्गचालनरथः प्राधिक्यभीतावहो
खड्गाघातभरेण खण्डिततनुर्मत्तेभसंचालकः।
आक्रोशन् पृथिवीतले विपतितो रक्ताभिषिक्ताङ्गकः
पञ्चत्वं सहसा जगाम समरे घोरातिघोरं तदा॥

घोरं तत् सकलं समीक्ष्य भयदं सर्वेऽपि भील्या गताः
सालीम् श्यालयुतस्स माननृपतिः त्रस्तो महत्संगरात्।
मृत्योः भीकरगह्वरात् द्रुततमं चावां बहिर्निर्गतौ
चास्माकं किमु संगरेण चल रे भद्राणि पश्याव रे॥

* * * *

सत्यं तद्भयदं महोग्रमतुलं सद्धर्मदीक्षायुतं
युद्धं भीकरहल्दिघाटिचलितं वीक्ष्यैव शत्रुः परम्।

आहो किं कथयेयमद्य भयदं जन्यं समुद्दिश्य भोः
द्रष्टव्यं यदि विद्यते तदखिलं दृष्टं तदद्यैव मे ॥

किं शौर्यं किमु धैर्यमत्र नितरां नीतिः सुधर्मायुतः
लोके भाति महाद्भुताश्रितरसः पूर्णं प्रभावान्वितः ।

एवं ता जगदुश्च पीतवसनाः सेनाः स्वहाहारवैः
कष्टे सत्यपि नीतिबद्धचरितो राणा महाभारते ॥

(–श्रीमत्प्रतापराणायनम्, 5/5/23-25,27-28)

उपर्युक्त पद्यो में क्रमशः रौद्र, बीभत्स, भयानक, वीर एवं अद्भुत रस की अंगता से देशप्रेमरस पुष्ट हो रहा है। यह भी कहा जा सकता है कि यहाँ इन रसों की वीररस के प्रति सेनापति-तद्भृत्यवत् अंगता है तथा उपर्युक्त अंगरसों से पुष्ट देशप्रेमरस अंगी के रूप मे आस्वादनीय है।

इसी प्रकार घास की रोटी बिडाल द्वारा छीने जाने पर रोती हुई बालिका के प्रति महाराणा प्रताप व पाटेश्वरी की वत्सलता में वात्सल्यरस (5/11/34-38), अन्यत्र खड्ग लेकर शिशु अमरसिंह द्वारा संग्राम में शत्रुओं को मारने की बात कहने पर महाराणा प्रताप का उसे गोद में उठाकर चूमना तथा पितृप्रेम के पात्र अपने पुत्र के प्रति पाटेश्वरी की गर्वमिश्रित वत्सलता में भी वात्सल्यरस (5/9/50-52) एवं देवी मीरा के चरित-वर्णन में भक्तिरस (1/सर्ग सं. 10) की अंगता आस्वाद्य है। प्रकृति-प्रेमियों के लिए वसन्तागमः (3/सर्ग सं. 5), ग्रीष्मर्तुवर्णनम् (4/सर्ग सं· 13) तथा प्रावृज्जृम्भणम् (5/सर्ग सं 10) में प्रकृतिप्रेमरस की अनुभूति हो सकती है। रसयोजना की दृष्टि से विशेषता यह है कि वसन्त का वर्णन अकबर के सेनानायकों - आसफ-खान, फरीदखान, अब्दुल्लाखान, कासिमखान व शाहबाजखान के, महाराणा प्रताप द्वारा युद्ध में किये गये वध और विजय के पूर्वसूचक के रूप में किया

गया है। मुगल सम्राट् के अनुचर राजा मानसिंह के साथ महाराणा प्रताप का वाक्कलह होने पर उद्भूत अकबर के युद्धोन्माद का सूचक भीष्मर्तु का वर्णन है तथा क्षुधित पुत्री के क्रन्दन से वत्सलता-विगलित सपत्नीक महाराणा प्रताप की सूचना देने के लिए वर्षाऋतु का वर्णन प्रस्तुत किया गया है। अतः ये तीनों ऋतुवर्णन मात्र महाकाव्य की परम्परा का निर्वाह नहीं है, रस-योजना के प्रति औचित्य को धारण करने से सहृदय में महाकाव्य के अंगी रस के आस्वादन की पृष्ठभूमि तैयार करनेवाले हैं।

महाकवि पं. ओगेटि परीक्षित शर्मा द्वारा 'श्रीमत्प्रतापराणायनम्' में छन्दों का रसानुरूप प्रयोग कर महाकाव्य की रसवत्ता को अतिशय हृदयंगम बनाया गया है। वर्णन-प्रधान प्रसंगों में जहाँ उन्होंने अनुष्टुप्, इन्द्रवज्रा, उपेन्द्रवज्रा, उपजाति, वंशस्थ आदि छन्दों का प्रयोग किया है, वहीं उदयपुर-वर्णन में पुष्पिताग्रा (2/सर्ग सं. 1) का, चेतक अश्व के वर्णन में रथोद्धता का (2/सर्ग सं. 4), चित्तौड राजधानी का निर्माण करनेवाले प्रथम राजा बप्पारावल का एवं महाराणा प्रताप व राजा मानसिंह के सम्मिलन में स्वागता का (1/सर्ग सं. 5, 4/सर्ग सं. 7-9), चेतक-वियोग में वियोगिनी का (5/सर्ग सं. 6), प्रताप की विजय यात्रा में भुजंगप्रयात का (6/सर्ग सं. 3), वसन्त-वर्णन में रुचिरा का (3/सर्ग सं. 5), ग्रीष्मवर्णन मे उपजाति का (4/सर्ग सं. 13), प्रावृड्वर्णन में इन्द्रवंश का, अकबर की कामपानशाला के वर्णन में मालिनी का (4/सर्ग सं. 2), सेना के प्रयाण के लिए अकबर के आदेश में (5/सर्ग सं. 2) तथा हल्दीघाटीयुद्ध के लिए महाराणा प्रताप द्वारा अपने सैनिकों के संबोधन में पञ्चचामर का (5/सर्ग सं. 4), हल्दीघाटी के युद्ध-वर्णन में शार्दूलविक्रीडित का तथा महाराणा प्रताप के पुत्र अमरसिंह के राज्याभिषेक में प्रहर्षिणी का (6/सर्ग सं. 6), ललितोचित प्रयोग कर महाकाव्य की रसास्वादनीयता की वृद्धि की हैं।

इस काव्य में महाकवि पं. ओगेटि परीक्षित शर्मा संगीतशास्त्र का सुप्रसिद्ध रागों का नामोल्लेखन भी संदर्भानुसार करके इस काव्य को रागरञ्जित बनाया है। संगीत ज्ञानहीन पाठकों को कुछ पङ्क्तियाँ पुनरुक्ति भाँति दिखाये देती हैं। किन्तु वे पुनरुक्ती नहीं हैं। वे श्लेषालङ्कारभूषित हैं। सुन्दरकाव्य-निर्माण के लिये कवि को ललित कलाओं का ज्ञान आवश्यक होता है। विशेष रूप से कवि को संगीत का ज्ञान होने से स्वीयनिर्मितकाव्य सुन्दर, मञ्जुल, और रागनादमय हो सकता है। शायद संस्कृत साहित्य में रम्य काव्यसृष्टि को संगीतरागरञ्जित करनेवाले महाकवि पं. ओगेटि परीक्षित शर्मा अद्वितीय मालूम होते हैं। वसन्तागमः (3/सर्ग सं. 5) दिल्लचां अक्बरस्य भवने कामपानशाला (4/सर्ग सं. 2) इत्यादि स्थलों में बहुरागों का नामोल्लेख किया गया है।

अन्त में, इस सरस-मनोहर महाकाव्य के प्रति मेरी आशंसा है–

देशभक्तयशोगीतं देशभक्तेन कीर्तितम्।
देशप्रेमरसेनैनं देशं सेषिच्यतामिदम्॥

शुभं भूयात्

३२, अरविन्द निवास,
वनस्थली (विश्वविद्यालय)
(टोक राजस्थान) ३०४००२२.

डॉ. चन्द्रकिशोर गोस्वामी
अध्यक्ष : संस्कृत दर्शनशास्त्र व
वैदिक अध्ययन विभाग

षट्-पदी

नावीन्य-संस्कृत-महत्त्व-कवित्व-विश्वे
राष्ट्रीयभाव-रसनाटक-काव्यकर्ता
माध्वीक-वाग्विभव-मेदुर-संस्कृतात्मा
वाग्देवता-चरण-नीरज-चञ्चरीकः
बाभाति पण्डित-परीक्षित--शर्मनाम
गीर्वाण--गेय--कविमण्डल--चक्रवर्ती ॥

अच्युतकविः
आन्ध्रप्रदेशः

FOREWORD

Dr. Prabhakar Apte, M. A. Ph. D. LL. M. Advocate,
Editor, Sanskrit Dictionary, Deccan College, Pune.

It is my pleasure and proud privilege to present this precious publication of Pt. Parikshit Sharma before the prestigious readership of creative modern Sanskrit literature. It is a Mahākāvya on the lines of the traditional Sanskrit Mahākāvyas like Raghuvaṁśa, Śiśupālavadha, Kirātārjunīya, Naiṣadhīyacarita etc.; its title however, echoes the title of the epic Rāmāyaṇa of Vālmikī. The theme of the mahākāvya, however, is the epoch-making life-history of the great Rajput hero Rāṇā Pratāpa of Mewad who engaged himself in his life-long battle with the Mughal emperor, viz. Akbar. Unlike Shivāji the Great-his successor in the freedom-struggle of medieval India, he had to fight a stalemate, if not a losing battle against the mighty Mughal invasion on the Hindu motherland. Rāṇā Pratāpa has been a perennial fountain of inspiration for freedom fighters–generations after generations–of the Hindu race subjected to onslaughts of foreign invaders engaged in aggressive attacks on India on all its borders. Literary genius inspired by heroic deeds of patriotic warriors like Rāṇā Pratāpa, Shivājī, Krishnadevarāya and others flashed in various regional languages in the form of poems and ballads, stage–plays and lyrics, folk songs and religious festival-compositions. This tradition of literary compositions continues to live afresh in regional languages and dialects in all parts of India. Sanskrit is believed to have ceased to function as the principal medium of literary and scientific compositions and pan-Indian language of mutual communication for the elite. However, such a sweeping statement does not carry much

weight on the background of the data-investigation of the modern creative Sanskrit literary compositions published all over India during recent few decades. Sanskrit somehow occupies a unique position in India and abroad as well. One cannot think of a band of dedicated workers engaged in rendering service of upliftment of not a community or society or a country but a language! Well, Sanskrit unlike any other language, does have that devotional appeal of dedication and sacrifice. Consequently we find in various parts of our country, a band of literary genius who have taken a vow to adopt Sanskrit as a medium of their literary compositions: prose, poetry, lyrics, dramas and stage plays etc. Pt. Parikshit Sharma has created an aura of his own in the galaxy of dedicated modern Sanskrit writers.

Pt. Parikshit Sharma has been credited with allotropy of expression of his literary genius containing twentyseven short plays with an epithet 'Parīkṣin-nāṭakacakram,' a mahākāvya narrating the story of Yashodharā-the wife of Gautama Buddha, a collection of folk songs and other poetic composition, a prose work on poetics named Saundarya-Mīmāṁsā etc., all these having some literary speciality, each carving a special place for the author in the field of creative modern Sanskrit literature. Interestingly, he has used a special device of introducing his early literary presentations to the prospective readers, by incorporating the list at the end of each Kāṇḍa : Mewad, Uday, Aranya, Delhi, Haldighat and Vijay. I am aware that this new literary presentation of Pt. Parikshit Sharma is a product of refinement and maturity of his Pratibhā. Perhaps it may be described as surpassing all his prior creations certainly in quantum and I reserve my remark as far as its merit is concerned, for his august readership. As for the quantum, it has surpassed the total number of verses of Raghuvaṁśa and other Kāvyas of Kālidāsa in as much as it contains a total

number of four thousand two hundred and thirtythree verses divided into six Kāṇḍas and eighty Sargas. The number of metres used by him, namely thirtythree excels the number of metres used by the renowned traditional poets, perhaps put together. The other speciality is a fine blending of traditional metres with some modern regional metres like Marathi 'Ovī' and Telugu 'Teṭagīti and Āṭaveladi;' this is a deliberate attempt on the part of the poet to contribute his might towards cultural integration, the urgent need of present day India. When an humble attempt was made to peep into the mind of Pt. Sharma, it was revealed that there existed a dormant but turbulent urge in his mind to do some service to his motherland. The seed of patriotism, as his memory records, was sown in his deep layer of mind by the elders in his family through a Saṁskāra of impressing upon him the noble deeds of the national heroes. Incidentally,the story of Rānā Pratāpa inspired him the most. Pt. Sharma spent most of his career in Maharashtra that gave him a third dimension for appreciating the patriotic nourishment of our national character in medieval times through the acquaintance with the life-sketch of Shivājī, the great. He was impressed further by an additional information that the wife of Rāṇā Pratāpa hailed from Rajput Kshatriya families migrated to Andhra. Thus the culmination of his Pratibhā into Pratāparāṇāyanam is an outcome of several factors spread over a large span of space and time. Poetry is said to be a spontaneous overflow of powerful feelings. In the case of Rāmāyaṇa, the verse 'mā niṣāda..' etc. is the spontaneous overflow of Vālmiki's feelings; the entire epic can be said to be a steady flow of his transcendental Pratibhā. In the case of Pratāparāṇāyana, the poetic spontaneity can be pinpointed to a verse,

'Rāṇājīvitakāvyasya smaraṇe paṭhane'pi vā /
Āpādamastakam dehaḥ bhavatyatyuṣṇatāpitaḥ //'

which seed has sprouted into a banyan tree expanding over eighty branches with four thousand leaves in the form of verses. In the above verse the poet records his perennial experience of boiling of his blood at frequent reminiscence of the story of Rāṇā Pratāpa. The composition of the epic-like poetry storing the life-sketch or Rāṇā Pratāpa, according to the poet himself, has been a sort of jottings of various incidents of Pratāpa's life-haunting the poet ardently in the form of poetic beads and then weaving them together in various strings of a garland. Thus the expression of Pt. Sharma's Pratibhā can be termed as intermittant fountain of powerful but sustained feeling spread over quite some span of time. A note of appreciation has to be taken by a reader, during his journey through the Sargas of Rāṇāyana, of an undercurrent of a Rasa which may be proudly described as 'Deśabhakti Rasa' practically acting as a sap nourishing all the nine Rasas employed by the author during his poetic embellishments. The author has established himself as a distinguished Sanskrit literateur. Naturally, he has to justify a double distinction in the field of creative Sanskrit literature. His distinction from traditional Sanskrit poets lies in themes and other poetic devices reflecting various aspects of modernity. To give an example, Rāṇā Pratāpa has been described as having correct diagnosis of the weaknesses of the Indian society confronted with the attack of the Mughal disease. He has been described by the poet as having an 'X-Ray scopic' perception of the deeper layers of Akbar's heart aspiring for total annihilation of Hindu patriotism. His distinction with modern Sanskrit poets lies in his chosing a theme which others were reluctant to take up. Rāṇā Pratāpa was apparently considered by others as a hero of losing battles; Shivaji the great, was chosen by one of his contemporaries as theme for his mahākāvya Shivarājyodayam, obviously for his struggles ending in victory. We find the depiction of Rāṇā Pratāpa by the poet as more vigorous and more inspiring with his infusion of poetic power and

conviction. His naming the concluding Sarga as Vijayakāṇḍa, indicates that he regarded the decision of Akbar to let alone Rāṇā Pratāpa after a sustained struggle for two decades, as frustration for the powerful enemies of the Hindu nation and moral victory for the Hindu heroes of the generation of Rāṇā Pratāpa and of posterity. This mahākāvya would perhaps be unique in the sense that the life-sketch of Rāṇā Pratāpa covering major and minor incidents are perhaps not been covered by any other literary work in prose or poetry in any Indian or foreign language. In that regard the presentation of Pt. Sharma may establish a landmark in literary histriography, by serving a source-book for major and minor literary pieces to be construed with life-history of Rāṇā Pratāpa depicted in Sanskrit Rāṇāyanam as nucleus. Themes of traditional Sanskrit stories and romances, dramas and long poems have been a source of inspiration for parallel literary creations in regional languages. Pratāparāṇāyanam may claim that legacy with vast range of points of creative potential covered in this mahākāvya.

From the point of presentation-potential, it may successfully come up in the area of performing arts. I may envisage concerts of poetry recitation since the poet himself happens to be a master voice for singing as well as recitation. Unlike his early creation 'Jānapada Gītamañjarī' which proved its concert-potential at various poetic symposia in India and abroad, this biographic poem will have a distinct melodious beauty of its own, when presented before lovers of modern Sanskrit literature. Contentwise, various aspects of mahākāvya covered in independent sort of thematic units may prove to be the subject-matter for petty stage-performances. To cite a few examples, one may refer to the episodes of brilliant gems of ideal womanhood, namely, Rāṇī Pādminī, Saint Meera and the maid Pannā Dāsi vividly described by Pt. Sharma in the Mewaḍa-Kāṇḍa. In the other Kāṇḍas also such potential is found in the description

of the heroic horse Chetak described in Rathoddhatā metre deliberately by the poet for catching the velocity of the object of description, i. e. the galloping horse in a matching photographic verbal receptacle. In Araṇya-Kāṇḍa, with its epic-echoing, the author has taken up the challenge for modern creative Sanskritists and it is for the readers to be the best judges of his success. Two Sargas of this Kāṇḍa, namely I and V, describing the forest and the advent of spring in the forest respectively; he has chosen suiting metres: Vaṁśastha and Rucirā for that purpose. One of the Sargas of that Kāṇḍa bears an onomotopoeic title describing Pratāpa who is surrounded by several kinds of tortures, namely, Aṣṭakaṣṭapariveṣṭita. The two topics, namely, XII and XIII, give different pieces of narration, namely the festive account of the feast arranged for the guests in Delhi-Kāṇḍa and the description of the summer dominating the atmosphere thereover. In the V Kāṇḍa, named as Haldighat, the turmeric beauty of the nature has been described with delicacy, by the poet with his pen turned as if yellow-ochre or golden in its tint. The description of the Haldighat battle perhaps takes the pen of the poet to the peak of his Pratibhā. The cover-page bears the picture of confrontation of Pratāpa with Mānsingh bearing the inscription on a golden strip recording the great historical importance of the incident. The pathetic and loathsome description of the historical lake in Haldighat turned red due to massive flow of blood oozing from the bodies of slaughtered soldiers is another feat of poetic pen in depicting the Bībhatsa-Rasa emanating out of the underlying layer of Karuṇa Rasa. The description of lamentation of Pratāpa over the sudden but brave death of his heroic horse Chetak would

occupy its own place in the galaxy of Vilāpa–Kāvyas in Sanskrit literature. I leave the judgement to his esteemed readers. I may say that the Haldighat Kāṇḍa may be described as:

'Tatrāpi pañcamam kāṇḍam' of Rāṇāyanam. The sixth Kāṇḍa bears an artistic finishing touch at the hands of the author who has blended the fine threads of the life-sketch of Rāṇā Pratāpa by invariably putting his personal achievements in the national context. He has presented the historical facts with such a skill of his artistic pen that both the historian as well as a poet may join hands in nodding their heads for approval and appreciation. Perhaps if the nicities of painting of the pen-picture of Rāṇā Pratāpa's life-mission receive proper appreciation and approval from the connaisseur-critics I feel the author of Rāṇāyana will feel rewarded.

I am aware of my limits as a foreword-writer; I am neither acting as a salesman of the pen-products of the poet nor a reviewer of his creation. I have just to open out the casket of the literary creation of Pt. Parikshit Sharma and just to allow the readers some glimpses at the contents, with my own humble comparing as an aid for better appreciation. I feel it proper, at this juncture to take the readers to have a cursory glance at the contents of this epic-like poetry with six Kāṇḍas with a band-spread into eighty Sargas. Before concluding these introductory remarks, I have to record that Deśabhakti which may be termed as the Sthāyī Bhāva of the Rasa named after it i. e. the sentiment of patriotism has received full nourishment on a fairly faithful feeding of historical facts. The role of Rāṇā Pratāpa is often relegated to background by historians; the role of Akbar is often overvalued by them. Both these are presented by the poet in proper perspective by distinctly depicting Akbar's designs of subverting the patriotic personality of Hindus, and Rāṇā Pratāpa struggling to stem those conciously.

Résumé of the contents of Pratāparāṇāyanam :

Kāṇḍa I–Mewāda-Kāṇḍam :

The first Kāṇḍa is preceded by a prologue containing eight topics, namely prayer to the God, benediction to the foregone poet preceptors, brief account of poet's lineage, the praise of Sanskrit, the national language of Bhārat, the raison d'etre for composing the poetry in Sanskrit, the account of the poet's literary creations, the attitude of poet towards poetry and the submission of the poet in justification of composing the life-story of Rāṇā Pratāpa. The account presented in versified form though informative is not prosaic but contains beauty of its own. The last topic especially furnishes a clue to the selection of the theme.

The Mewad Kāṇḍa comprises sixteen topics extolling the majesty of Rajasthan with its heroes, heroines and heroic regions like Mewad and heroic castles like Chitod. The heroes described in this Kāṇḍa are Śriyaśoviṣṇuvardhana, Bappa Rawal, Rāṇā Ratnasingh, Hammir, Kumbha, Sangramasingh, Vikramajit, Udaysingh, Krishnasingh and the heroines are Rani Padmini, Meera and Panna. I may draw a special attention to the character portrayal of Bappa Rawal and Udayasingh and of Padmini and Meera. The motivation of the poet is prominently projecting on the integral perspective of the nation meticulously removing the parallax if any in placement of relevant regions in the body-politic of the nation as a whole.

Kāṇḍa II–Udaya-Kāṇḍa :

The second Kāṇḍa with fourteen Sargas begins with the picturesque description of the city of Udayapur. The topics that follow cover the personality of Rāṇā Pratāpa and Shaktisinha,

his younger brother. Then follows the description of Chetak, the beloved horse and the story picks up momentum with them fraternal feud culminating in exilement of Pratāpa to forest. It is followed by the incident of the coronation of Jagamalla in his place. The story takes turn with the marriage of Pratāpa with a bride hailing from Andhra to be followed by the coronation of Pratāpa. The poet spends a full Sarga detailing out the patriotic make up of Pratāpa's personality.

Kāṇḍa III–Āraṇya-Kāṇḍa :

This Kāṇḍa extending over five hundred verses comprises eleven Sargas and begins with the description of the forest. The main-stay of the narrative of this Kāṇḍa is the prolonged residence of Pratāpa near the vast lake named Udayasāgara. His friendship with the noble of the Bhilla tribe named Mahū is a significant landmark in the forthcoming martial ventures of Rāṇā Pratāpa. The heroic deeds of Pratāpa in this Canto are marked by the vanquishing of Asafkhan, Faridkhan, Abdulla, Kasimkhan, Firozkhan and Shabazkhan. It is in this Kāṇḍa that the turn of the fate of Rāṇā Pratāpa pushes him to a forest-refuge of torture and hardship. Pratāpa is described here by the poet to have entered into meditative retrospection.

Kāṇḍa IV–Delhi-Kāṇḍa :

This Kāṇḍa takes the readers to a venue away from that of Rāṇā Pratāpa. This Kāṇḍa begins with the character portrayal of the Mughal emperor Akbar and ends with the report submitted by Mansingh, his Rajput brother-in-law and General about the activities of Rāṇā Pratāpa. The lavish side of the life of Akbar recorded in history especially his indulgence in womanising sport is skilfully and appropriately described by the poet with proper placement needed for balancing the poetic treatment of

his theme. The portrayal of Mansingh is contrasted by him with that of Pratāpa. It is, however, an unfortunate development of the history of the Hindu society of medieval India that Rāṇā Pratāpa is met with utter failure in materialising unity of Rajput power centres. This pinching historical truth comes out as an effect of Pt. Sharma's poetic treatment of historical data contained in this Kāṇḍa.

Kāṇḍa V–Haldi-Ghāṭ-Kāṇḍa :

This Kāṇḍa consists of seventeen Sargas extending over about one thousand verses. The historic battle of Haldighat where Chetak, the martial horse of Rāṇā Pratāpa did his heroic feat and ultimately laid his life for the cause of his master and thereby the cause of the nation. The poet is often at his best at the pen in describing the battle, the aftermath of the battle, and the pathetic culmination of Rāṇā Pratāpa's plight. He has effectively painted the pen-picture of the invincible Rāṇā despite his physical setbacks at the hands of adverse fate.

Kāṇḍa VI–Vijaya-Kāṇḍa :

It is in this Kāṇḍa that the adverse fate haunting the Rāṇā offers him some solace in getting him the helping hand from Bhāmasāhi. Pratāpa thereafter proceeds with his victory march and in his declining age coronates his son and addresses his followers with a message which proves to be last of his life. The poet picks up the historical thread of emperor Akbar being frustrated in his design to vanquish Rāṇā Pratāpa. This is termed by the poet as victory and hence he named it Vijaya Kāṇḍa. He concludes the inspiring biography with the concluding Sarga entitled Conclusion of the life mission of Rāṇā Pratāpa.

1999, Sadashiv Peth,
Tilak Road, Pune 30.

Dr. Prabhakar Apte

उपोद्घात

प्रस्तुत महाकाव्य के रचयिता पं. ओगेटि परीक्षित् शर्मा संस्कृत के जाने-पहचाने कवि हैं। 'ललित-गीता-लहरि' के संस्कृत गीतों के द्वारा आपने अपना परिचय प्रस्तुत किया था और 'यशोधरा महाकाव्यम्' का प्रणयन करके महाकाव्य के क्षेत्र में भी सफलता पाई थी। वैसे पं. ओगेटि शर्मा की संस्कृत सेवा के कई आयाम है; हाल ही में 'परीक्षिन्नाटक-चक्रम्' के २७ संस्कृत नाटकों के साथ साथ 'सौन्दर्य-मीमांसा' जैसा समालोचनात्मक ग्रन्थ भी प्रकाशित करके आपने गीर्वाण-वाणी के अनुरागियों एवं समर्थकों को प्रभावित किया था। फिर भी प्रस्तुत पंक्तियों के लेखककी राय में वे मूल रूप में एक भावुक एवं प्रतिभासंपन्न कवि हैं और ८० सर्गों में प्रणीत 'श्रीमत्प्रतापराणायनं महाकाव्यम्' इसी का ज्वलन्त प्रमाण है।

इस संस्कृत काव्य पर सरासरी निगाह डालने से भी कतिपय विशेषताएँ स्पष्ट हुए बिना नहीं रहती। पहली बात तो यह है महाराणा प्रताप जैसे 'शूर वीर निर्भीकमना' एवं राष्ट्रीय भावना से ओतप्रोत नेता को विशाल काय काव्य का विषय बनाने की बात आपके दिमाग में आई और उसे आपने दो वर्षों में कार्यान्वित भी किया। इस के मूल में परमात्माकी कृपा और गुरुका अनुग्रह है अवश्य जिसकी ओर आपने प्रस्तावनामें निर्देश भी किया है। किन्तु आपकी परिश्रमशीलता का भी बहुत बड़ा हिस्सा है इसे नकारा नहीं जा सकता। महाराणा प्रताप की जीवनी के मर्म को समझने के लिए आपने कर्नल टाड प्रणीत राजस्थान के इतिहास के पन्ने टटोले; अपनी सहचरी के साथ 'एकलिङ्गेश्वर मंदिर' हल्दीघाट, चेतकसमाधि, कोमल मियर, उदयसागर तथा चितौडदुर्ग की सैर की ताकि 'आँखो देखा हाल' इस रचना में पाठकों को प्रतीत हो

माना कि इतिहास की घटनाओं को पुस्तकों की सहायता से पढा जा सकता है किन्तु आपके कविहृदय को घटनाओं से सम्बद्ध स्थलों के दर्शन ने भी प्रेरणा प्रदान की। यही कारण है कि 'चेतकस्य कृते प्रतापविलापः' जैसे सर्ग का प्रारम्भ ही

अथ किं कथयाश्चतल्लज कथमेवं कृतवानसि स्वयम्।
निवसन् मम सन्निधौ सखे अनधीतोऽसि मदीयभावनाम्॥

जैसे भावपूर्ण सम्बोधन से आप कर सके। हाँ, यह सही है कि महाराणा प्रताप के जीवनकी घटनाओं के सम्बन्ध में विद्वानों में मतभेद है और 'सुक्षत्रियाः सन्ति सदाऽऽन्ध्रदेशे राष्ट्रैकभक्ताः पटुराज्यतन्त्राः' और तेष्वेव संजातकुमारिकाऽस्ति पतीश्वरी नाम विभूषितैका' से 'हिंदुत्व-संरक्षणलग्नचेताः' राणा प्रताप ने विवाह किया इस कथन से कई आलोचक सहमत नहीं होंगे किन्तु महत्त्वपूर्ण बात तो यह है कि इसके लिए भी काव्य के सुधी प्रणेता ने कहींसे प्रमाण पाने की पूर्वसूरी के कृतियोंसे यथा सम्भव परिचय रखने की चेष्टा की है। इतिहासपर आधारित कथा के प्रसङ्गों में भावानुकूल परिवर्तन करने की स्वतंत्रता तो लेखक को प्राप्त है।

प्रस्तुत महाकाव्य की दुसरी अनूठी विशेषता है इस महाकाव्य में प्रयुक्त तैंतीस छन्दों में प्रणीत ४२३३ श्लोकों की। 'नानावृत्तमयः सर्गः' महाकाव्य की एक विशेषता रही जिसकी पूर्ति करने में पं. ओगेटि शर्माने वृत्तोंपर अपने प्रभुत्व का परिचय दिया है। वैसे आप तेलुगु भाषी एवं महाराष्ट्र-निवासी होनेके कारण तेलुगु और मराठी भली भाँति जानते हैं फिरभी अरण्यकाण्ड के ४२ वें तथा ५६ वें श्लोक को मराठी 'आट्वेलदि' तथा 'तेटगीति' इन तेलुगु छन्दों में तथा ४० वें श्लोक को मराठी के सुविदित 'ओवी' छन्दमें लिखकर निःसन्देह मौलिकता का

परिचय दिया। छन्दों की विविधता के साथ साथ 'चेतक' घोड़े के वर्णन में 'रथोद्धता' [अट्टहास इव कृतिवाससः .... पृ. ११२], चेतक के लिए राणा प्रताप के विलाप में 'वियोगिनी' [अभिमानधना भवन्ति रे .... पृ. ३४८] और अरण्यवर्णन में 'वंशस्थ' [द्विरेफमालाकलितं च पङ्कजं .... पृ. १७२] जैसे वृत्तोंको प्रयुक्त कर के औचित्य का भी निर्वाह कर लेते है। 'अनुष्टुप्' जैसे सरल वृत्त के साथ साथ 'शार्दूलविक्रीडित' जैसे लम्बे चौठे वृत्त को भी आसानी से प्रयुक्त करने की आप की कुशलता सराहनीय मानी जाएगी।

'श्रीमत्प्रतापराणायनम्' की तीसरी विशेषता भाषा में भावानुकूल परिवर्तन में है। अरण्यकाण्ड की भाषा 'उल्लूकयूथालिनितान्तभीकराः सान्तत्य-नादस्वरझिल्लिका स्वनाः' स्पष्ट रूप से वर्णनप्रधान है तो चेतक के लिए किए गए प्रतापविलाप में यह भाषा 'पलितं गलितं वयश्च मे हृदयं त्वद्गमने विदारितम्। दलितं मम राष्ट्रवैभवं त्वविचार्यैव गतोऽस्मि घोटक ॥' जैसी भावपूर्ण एवं सरल हो उठती है। अमरसिंह के राज्याभिषेक के अवसरपर 'आनन्देन परमभक्तिभावपूर्णाः भिल्लाः राजतनयमण्डलैश्च युक्ताः' जैसी आनन्द के आन्दोलनों से समन्वित शब्दों को प्रयुक्त करनेवाले पं. ओगटि शर्मा क्रुद्ध राणाप्रताप के मानसिंह को दिए गए उत्तर में।

यः कोऽपि नाम मम भारतवंशजानां
आपादयेद्यदि कलङ्कमहं विलूय।
खड्गेन नैकशकलांश्च तदीयजिह्वां
कृत्वा न दिक्षु विकिरामि विना दयां किम् ॥

वह वीरता के अनुकूल रूप धारण करती है। महाकाव्य के नायक हैं महाराणा प्रताप, इसी लिए राष्ट्रिय भावना को साकार करनेवाली।

'आकाशपातनमपीह चिरं सहेयं
काङ्क्षे न चापि परशासनदास्यवृत्तिम्'

काव्यपङ्क्तियों से प्रस्तुत काव्य ओतप्रोत है। आधुनिक काल में हमारी राष्ट्रिय भावना के साथ साथ हमारी संस्कृति पर चारों ओर से धार्मिक एवं वैचारिक आक्रमण हो रहे हैं; इसी लिए इस समय 'देशं च भारतममुं स्ववशं करोमि' जैसी सही अर्थों में स्वतंत्रता की कद्र करनेवाले 'परदास्यमग्नाः' की निर्भर्त्सना करनेवाला यह महाकाव्य अतीव सराहनीय माना जाएगा। इस महाकवि की भावना है कि 'विश्वलोकशरीरेषु रक्तं संस्कृतमेव हि' इसी लिए आपने 'राष्ट्रैक्यतत्त्वभावेन' प्रस्तुत महाकाव्य की रचना संस्कृत में की। आपके उस भाव से सहमत होते हुए 'देशभक्त्या प्रपूरित' प्रस्तुत अनूठे विशालकाय महाकाव्य के प्रणयन के लिए तथा उसे सुचारु रूप में प्रकाशित करनेवाले वैदिक संशोधन मण्डल मुद्रणालय को हृदय से धन्यवाद प्रदान करके मैं भी महाकवि के शब्दों में 'राणायन-महाकाव्यं स्फूर्तिं दद्यात् भुवौकसाम्' यही अभिलाषा अभिव्यक्त करना समीचीन समझता हूँ।

डॉ. मो. दि. पराडकर
एम्. ए., पी-एच्. डी., साहित्यरत्न
कुलपति :
बम्बई हिन्दी-विद्यापीठ
३०६/३०७, उद्योग मंदिर,
भागोजी कीर मार्ग,
माहीम, मुंबई – ४०० ०१६
दूरभाष : ४५६०११

*

Member :
Hindi Sahity Academi
Government of Maharashtra

Secretary :
Akhila Bhartiya Hindi Samstha
Sangha, New Delhi.

*

Member :
Hindi Advisory Committee
Ministry of Tourism
Govt. of India,
Ministry of Telecommunication

*

Residence :
4/11, Shah Building,
Bhagat Road, Mahim
Bombay-400016 Phone 4301964

PROLOGUE

Indeed it is a matter of pleasure and privilege that I have brought out my original composition of Epic entitled श्रीमत्प्रतापराणायनं महाकाव्यम् to all lovers of Sanskrit world. As it has been my ardent desire to compose a महाकाव्यम् in Sanskrit, I have devotedly completed the same in time with sincere endeavour.

Once I thought that if in my life I contributed anything at all to literature that should be only through the Sanskrit language. Any contribution to the ocean-like Sanskrit language is only a drop of dew added to it. But it is a matter of self-satisfaction that I have had the privilege to contribute my mite to the language which is our legacy and mirror of our culture.

By and large for an Epic in all aspects a great personality should be selected as hero of the Epic. Among the heros of the medieval India महाराणा प्रताप is supreme and famous for his royalty, loyalty, sincerity, bravery and his matchless patriotism. Among the kings, his rank is very high. He was a dauntless hero and a dynamic king. There is no comparison for him. He was unique one.

So I decided to compose a महाकाव्यम् on him. To know the facts and events and the story of शिशोदिया Dynasty, I have followed the History of Rajasthan written by Karnal Todd.

Now, I am not going to narrate the story of महाराणा प्रताप but explain some new events which are controversial among the historians. महाराणा प्रताप lived 27 years in the thick forests of Aravali mountains of Rajasthan along with his family. He faced and repelled all invasions of अक्बर, throughout his life. In accordance with the view of some scholars, (१) अब्दुल्खान् (२) महबत्खान् (३) षाबाज्खान् (४) आसफ्खान् (५) परीद्खान् etc. were not killed by महाराणा प्रताप. On the contrary they were driven by him and by his soldiers. But in the view point of some of the scholars they were killed by महाराणा प्रताप mercilessly at the battle-field.

At this juncture, in this महाकाव्यम् I have depicted that they were killed by महाराणा प्रताप. महाराणा प्रताप belonged to लव Dynasty. He was exiled by his father उदय सिंह and by entire Rajasthan kings on account of his virtuous qualities. and chivalirc activities.

At the time of महाराणा प्रताप, there were 36 dynasties of Rajputs in Rajasthan. All these 36 dynasties became slaves of अक्बर. Only the शिशोदिया Dynasty rebuked the foreign rule in India and also refused to become slave of अक्बर. The शिशोदिया Dynasty tried its level best to make India free from slavery. That time entire Rajasthan was deeply poluted in all aspects and lived in unfavourable conditions. As such महाराणा प्रताप could not get a virtuous and kingly damsel as his life partner in the state of Rajasthan. Some scholars say that he was having many wives as it was the practice of kings. It is a controversial issue.

At the time of बाप्पा रावल innumerable wars took place in Rajasthan. Entire Rajasthan was at irrepairable calamity and in great turmoil. That time, so many kingly families migrated to

other provinces of India. चौहान and भोसले Dynasties came to Maharashtra and settled down. Likewise many Singhs came over to Andhra Pradesh and other corners of India. Once R. S. S. leader पू. मा. स. गोळवलकर गुरुजी gave a public statement that महाराणा प्रताप married an Andhra Rajput lady at Vijayawada on the bank of Krishna river. This statement must be a correct one. He was not a political leader. He was exclusively a spiritual leader. His statements are very authentic and reliable ones, because he was a source of reliable information.

I took the statement as authentic and reliable, and inserted the marriage event of महाराणा प्रताप in the poetry along with other facts. I have described the marriage event as a mark of integrity of India.

By the monetary help of भामाशाहि, महाराणा प्रताप prepared and equipped the army which fought against अक्बर, and took back all the forts except (१) चित्तौड्दुर्ग: (२) अज्मीर and (३) मण्डलदुर्ग:

At the time of हल्दिघाट् war राजा मानसिंह who belonged to कुश Dynasty escaped from threshold of the death and went back to Delhi. He did not come again to face महाराणा प्रताप in the battlefield. Most of the soldiers of अक्बर, were killed by महाराणा प्रताप. Taking all these into account, अक्बर asked his army to come back to Delhi. अक्बर was amazed of the courage of महाराणा प्रताप and was also disgusted of his tenacity. At last he stated that he could not conquer महाराणा प्रताप and that he was very hard nut to crack.

On account of these incidents, historians mentioned that महाराणा प्रताप had won the victory over अक्बर. Hence, I gave the name विजयकाण्डम् to the last section of श्रीमत्प्रतापराणायनं महाकाव्यम्. These points are being treated in a nicer way in the poetry. This poetry may become a controversial one. In the life of the

great people and their achievements throughout the world there are many stories filled with innumerable controversies. To expatiate upon this is out of place.

In this Epic there are 6 main sections as (१) मेवाड-काण्डम् (२) उदय-काण्डम् (३) अरण्य-काण्डम् (४) दिल्ली-काण्डम् (५) हल्दिघाट्-काण्डम् (६) विजय-काण्डम् Each section of this epic has 8 to 17 cantos. Each canto consists of 35 to 100 verses. There are 80 cantos in total. This महाकाव्यम् consists of more than 4000 stanzas in 33 metres. It would not be any exaggeration if I claim that this is the biggest Sanskrit Epic or महाकाव्यम् in the 20th Century.

In this composition some वैदिक usages, namely, (1) गाता (a Singr) (2) दिवेदिवे (Every day) etc. and (3) काङ्क्षे (I desire) (आत्मनेपदी used by व्यास) (4) करपोळिका (bread made by palms) (5) माऽङ्गंभूयात् (do not come in my way) (6) शुभानना (7) वहा वहा (8) लज्जा (a prostitute and wealth of Goddess) (9) उपर्णांशुकम् (upper garment to cover the body) (10) ढाल् (A shield) (11) मोल् (A kind of grass which was eaten by महाराणा प्रताप in forest) are used in different contexts.

Reading these words one-sided-critics and hole-seekers may start their criticism. Hence keeping that in my mind I have given an explanation of the above words to make clear understanding.

सन्ति केचन लोकेऽस्मिन् धूम्ररेखाविलोकिनः ।
न तु प्रकाशं दीपस्य जनकल्याणकारकम् ॥

Since वैदिक age onwards the Sanskrit language has undergone many changes in syntactic level. This language has assimilated many words from other languages too. So changes are inevitable in nature.

Here in अरण्यकाण्डम् I have taken and used three kinds of metres, namely, आटवेलदि, तेटगीति from तेलुगु language and ओवी from मराठी language to enhance the beauty of the poetry.

The composition of श्रीमत्प्रतापरागायनं महाकाव्यम् has been completed within two years by the grace blessings of Goddess of muse and my teacher. I hope that the Epic will receive a very high approbation from the world of Sanskrit Scholars.

Personally, I feel that the poetic composition has made progress from one canto to another with all grace, lucidity and harmonious blend. I have the privilege to state in humble manner that I am a poet endowed with inborn great sensitivity. My style and delicacy of thought and my theme of the काव्यम् bear witness to the keenness of my perception of aesthetic sense. My unhypocratic patriotism, perseverance and love towards the Sanskrit language and my rich legacy may stand like a beacon to the dejected and desperate fellow travellers in the field of Sanskrit literature.

When the society changes, naturally the language also changes to some extent. Rapid changes have been found in the history of literature of the world. Some Sanskrit scholars of the Universities and Heads of the Institutions say that the modern Sanskrit is not Sanskrit. That is just like any other language of India. I felt, that it is a prejudicial statement. I am rather amazed to hear such statements. I do not know why and how they say like this. I am unable to understand the hidden truth behind their behaviour and their remarks towards the language. I hope that the following stanza may answer the hidden truth.

" प्रत्यक्षकविकाव्यं च
रूपं च कुलयोषितः ।
गृहवैद्यस्य विद्या च
कस्मैचित् यदि रोचते " ॥

काव्यमीमांसा

I am grateful to the Education Department of the Ministry of Human Resource Development, Government of India for sanctioning a sizable amount towards the printing cost of this महाकाव्य.

I am thankful to my wife Smt. Sheela Parikshit Sharma who accompanied me to see the (१) एकलिङ्गेश्वरमन्दिरम् (२) उदयपुरम् (३) हल्दिघाट् (४) चेतकसमाधिः (५) कोमल्मियर (६) उदयसागरः (७) चितौड्दुर्गः and gave a helping hand for the completion of this Epic.

I pay my gratitude to the scholars who spent their valuable time in writing the foreword for प्रतापराणायनम्.

I am highly obliged to the Vaidika Saṁśodhana Maṇḍala Mudraṇālaya and its Secretary Mrs. N. M. Dhadphale for correcting the script and for nice printing of this Volume in stipulated time. I am also obliged to Dr. Dharmadhikari for suggesting few alternations in the text of this Mahākāvya. I am placing the magnum opus work in the hands of Sanskrit lovers.

"गुणाः प्रमाणं न दिशां विभागः"

Pt. Ogeti Parikshit Sharma
10/11 SAKAL NAGAR,
BANER ROAD,
PUNE 411007
(MAHARASHTRA, INDIA.)

Pune
10-8-89

Bio-data of Pandit Ogeti Parikshit Sharma

Name – Ogeti Parikshit Sharma

Date of Birth : 20th August 1930

Nationality : Indian

Mother Tongue : Telugu

Traditional Tongue : Sanskrit

Languages known : Telugu, Sanskrit. English, Hindi & Marathi

Residential Address : 10/11, Sakal Nagar, Baner Road, Pune 7. Maharashtra. India.

Academic Qualifications :

1) Bhasha Praveena (Telugu & Sanskrit) Andhra University.

2) B. A. (English, Sanskrit, Hindi, Ancient Indian Culture & Archaeology), Banaras Hindu University

3) M. A. (Sanskrit & Prakrit), Bombay University.

4) M. A. (Linguistics & English), Bombay University.

Award : Recipient of All India Kalidasa Award (For Yaśodharā Mahākāvyam, 20 Cantos).

Titles : Pandit, Mahakavi & Girvāṇa-Geya-Kavimaṇḍala-Cakravarti

Experience : Twenty years of teaching experience in Telugu, Sanskrit & Hindi in different educational institutions of Madras & Bombay.

Service : Retired Divisional Assistant Director—Government of Maharashtra.

Journalism : A bona-fide student of Journalism–worked for some months in English newspaper " Free Press Journal " of Bombay and reported the performances of Sanskrit Dramas.

Committee Membership : Many years a member of Courses, Committee for South Indian Languages at S.S.C. Board, Pune–Maharashtra (India).

Papers submitted and read at various Oriental Conferences in India & Abroad.

1) Musical Melodies in Sanskrit Literature.

2) Sanskrit is the Lingua Franca of India.

3) Sanskrit and Modern Indian Languages.

4) Nāṭyaśāstra and Modern Dramatic Compositions.

5) In the Context of Sentiments, properly used Rāgas and Vṛttas give inexpressible Ecstacy.

6) The Intricacies of our Classical Dances and their Integrity, read in VI World Sanskrit Conference held at Philadelphia. U. S. A. 1984.

7) Folk Songs in Modern Sanskrit Literature, read in VII World Sanskrit Conference held at Leiden, The Netherlands, 1987. And also was the Chair-person for the Modern Sanskrit Section, in the same Conference.

Cultural Activities :

1) Gave talks in Sanskrit and sung his own Sanskrit lyrics on All India Radio, Pune & Bombay.

2) Acted in Sanskrit dramas and also directed Sanskrit musical ballets.

3) Delivered lectures on different topics in Telugu, Sanskrit English, Hindi & Marathi.

4) Participated in Sanskrit Kavi Sammelanas held at New Delhi.

5) Gave vocal musical concerts in Sanskrit, accompanied by modern orchestra at Pune and Bombay.

6) Many a time rendered own Sanskrit lyrics in schools, colleges and universities.

7) Contributed poems, articles and also reviews of Sanskrit Drama performances to various periodicals.

8) Some of the portions of his poems are prescribed for B. A. & M. A. level of University of Rajasthan and University of Nagpur.

9) Performs pujas, abhishekas, homas, marriages, thread-ceremonies, vāstuśāntis, yearly anniversaries etc.

Hobbies : Teaching, writing poetry, attending musical concerts and classical dance programmes and visiting panoramic landscape, etc.

Published (orignal) works in Sanskrit :

1) Lalita-Gīta-Laharī.
2) Yaśodharā Mahākāvyam.
3) Akṣaya-Gīta-Rāmāyaṇam.
4) Parīkṣinnāṭaka-Cakram (Twenty Seven Dramas)
5) Jānapada Nṛtya Gīta Mañjarī
6) Saundarya Mīmaṁsā (Aesthetics)
7) Śrimat-Pratāpa-Rāṇāyanam (Epic, 80 Cantos)

Unpublished (orginal) works in Sanskrit.

1) Vijayanagara Sāmrājya Mahākāvyam.
2) Rudrāṇi Mahākāvyam.
3) Te hi no Divasāḥ Gatāḥ.

श्रीमत्प्रतापराणायन महाकाव्यम्

विषयानुक्रमणिका ।

१. मेवाडकाण्डम्

विषयः	छन्दः	पृष्ठ क्र.	श्लोक संख्या
१ दैवप्रार्थना ।	अनुष्टुप् (१)	१	६
२ कविगुरुस्तुतिः ।	,,	२	१२
३ कविवंशपरिचयः ।	,,	३	२९
४ भारतभारती ।	,,	६	१६
५ संस्कृते कविता किमर्थम् ।	,,	७	२६
६ कवेः काव्यसन्ततिः ।	,,	१०	७
७ काव्यं प्रति कविसंभावना ।	,,	१०	२१
८ कविविज्ञापना ।	,,	१२	४३
			१६०

सर्ग:	विषय:	छन्दः	पृष्ठ क्र॰	श्लोक संख्या
१	राजस्थानगरिमा ।	अनुष्टुप्	१७	५१
२	मेवाडमहिमा ।	,,	२२	४८
३	चित्तौड्दुर्गवैभवम् ।	,,	२७	५२
४	श्रीयशोविष्णुवर्धनौ ।	,,	३२	५२
५	बाप्परावलः ।	स्वागत (२)	३७	६७
६	राज्ञी पद्मिनी ।	उपजाति (३)	४३	३६
७	राणारत्नसिंहः ।	अनुष्टुप्	४७	६७
८	राणाहम्मीरः ।	,,	५३	४६
९	कुम्भराणा ।	उपजाति	५८	५७
१०	देवी मीरा ।	,,	६३	४२
११	संग्रामसिंहप्रतिष्ठा ।	अनुष्टुप्	६८	५२
१२	राणाविक्रमजित् ।	,,	७३	५३
१३	पन्नाधात्री ।	,,	७८	४२
१४	उदयसिंहस्य व्यक्तित्वम् ।	,,	८२	४१
१५	कृष्णसिंहस्य चारित्र्यम् ।	,,	८६	३५
१६	उदयराणामरणानन्तरं राजसभायां वाग्विवादाः कृष्णसिंहं प्रति ।	,,	८९	५१
				७९२

२. उदयकाण्डम्

सर्गः	विषयः	छन्दः	पृष्ठ क्र.	श्लोक संख्या
१	उदयपुरवर्णनम् ।	पुष्पिताग्रा (४)	९५	४८
२	प्रतापराणाव्यक्तित्वम् ।	अनुष्टुप्	१००	७३
३	शक्तिसिंहस्य स्वभावः ।	,,	१०७	४७
४	चेतकवर्णनम् ।	रथोद्धता (५)	१११	५०
५	भ्रातृकलहः ।	शालिनी (६)	११६	६१
६	प्रतापवननिष्कासनम् ।	उपजाति	१२२	५५
७	जगमल्लस्य पट्टाभिषेकसमारम्भः ।	अनुष्टुप्	१२८	५३
८	प्रतापं प्रति कृष्णसिंहादीनां स्तुतिः ।	उपजाति	१३३	६१
९	वीरनार्या राणाप्रतापविवाहः ।	,,	१३९	५१
१०	प्रतापेन नवग्रहपूजादिकरणम् ।	अनुष्टुप्	१४४	४०
११	श्रीराणाप्रतापपट्टाभिषेकः ।	गीति (७)	१४८	५५
१२	सपत्नीकस्य राणाप्रतापस्य वनगमनम् ।	आर्या (८)	१५३	५५
१३	राणासन्देशः ।	उपजाति	१५९	५२
१४	राणाप्रतापदेशभक्तिः ।	वंशस्थ	१६४	६१
				७६२

३. अरण्यकाण्डम्

१	अरण्यवर्णनम् ।	वंशस्थ (९)	१७१	४३
२	प्रतापस्य सन्देशमाकर्ण्य कुटीरनिर्माणम् ।	आर्यागीति (१०)	१७५	४२

सर्गः	विषयः	छन्दः	पृष्ठ क्र.	श्लोक संख्या
३	उदयसागरसमीपे राणाप्रतापनिवासः।	(तेलुगुछन्दः) तेटगीति (११)	१७९	५६
४	माहुः नाम भिल्लसर्दारस्य वर्णनम्।	(तेलुगुछन्दः) आटवेलदि (१२)	१८५	४२
५	वसन्तागमः।	रुचिरा (१३)	१८९	५०
६	असफ़्खानस्य वधः।	इन्द्रवंश (१४)	१९४	५७
७	फरीद्खानस्य वधः।	(मराठी छन्दः) ओवी (१५)	२००	४०
८	अब्दुल्लाकासीम्खानयोः वधः।	वंशस्थ	२०४	४१
९	फिरोजखानस्य अपि च षाबाज्खानस्य वधः।	इन्द्रवज्रा (१६)	२१०	४०
१०	अष्टकष्टपरिवेष्टितः राणाप्रतापः।	उपेन्द्रवज्रा (१७)	२१४	४०
११	प्रतापसिंहावलोकनम्।	अनुष्टुप्	२२०	४६
				४९७

४. दिल्लीकाण्डम्

१	अक्बरस्य चारित्र्यम्।	,,	२२५	५१
२	दिल्लयां अक्बरस्य भवने कामपानशाला।	मालिनी (१८)	२३०	५५
३	अक्बरस्य परितापः।	शिखरिणी (१९)	२३९	५६
४	शत्रुपक्षे शक्तिसिंहस्य प्रवेशः।	रुचिरा	२४९	४०
५	मानसिंहस्य व्यक्तित्वम्।	अनुष्टुप्	२५४	३८
६	अक्बरमानसिंहयोः मन्त्रणा।	,,	२५८	६०

सर्ग:	विषय:	छन्दः	पृष्ठ क्र.	श्लोक संख्या
७	उदयसागरतटे मानसिंहप्रतापयोः समागमः ।	स्वागता	२६४	४३
८	प्रतापेन मानसिंहाय प्रत्युत्तरदानम् ।	,,	२६८	३५
९	अक्बरस्यौन्नत्यं निगद्य मानसिंहः राणाप्रतापं तर्जयति ।	,,	२७२	३५
१०	कृद्धेन राणाप्रतापेन मानसिंहाय प्रत्युत्तरदानम् ।	वसंततिलका (२०)	२७५	४१
११	मानसिंहं प्रति कृष्णसिंहस्योद्गारः ।	,,	२८३	३८
१२	अतिथिभोजनोत्सवे कलहः ।	द्रुतविलम्बितम् (२१)	२९०,	४६
१३	ग्रीष्मर्तुवर्णनम् ।	उपजातिः	२९४	५३
१४	राणाप्रतापवर्तनमुद्दिश्य अक्बरचक्रवर्तिने मानसिंहनिवेदनम् ।	पञ्चचामर (२२)	२९९	४०
				६३१

५. हल्दिघाट्-काण्डम्

१	हल्दिघाटस्य स्वरूपवर्णनम् ।	भूनुतवृत्तम् (२३)	३०७	३५
२	अक्बरेण समादिष्टः मानसिंहः हल्दिघाट्समराङ्गणं प्रति चमूं चालयति ।	पञ्चचामर	३१३	४७

सर्गः	विषयः	छन्दः	पृष्ठ क्र.	श्लोक संख्या
३	चमूचालनमुद्दिश्य राणाप्रतापाय भिल्लनिवेदनं ततः परं कृष्ण-सिंहादीनां मन्त्रणा च ।	आर्यागीतिः	३२१	४०
४	स्वानुचरान् संबोधयन् राणाप्रतापः चमूं चालयति हल्दिघाट्प्रदेशम् अपि च प्रयुध्यति शत्रुभिः ।	पञ्चचामर	३२५	५४
५	हल्दिघाट्रणाङ्गणम् ।	शार्दूलविक्रीडित (२४)	३३५	६१
६	चेतकस्य कृते प्रतापविलापः ।	वियोगिनी (२५)	३४५	५५
७	दास्ये संतप्तः शक्तिसिंहः हल्दिघाट्युद्धे राणाप्रतापेन सहितः मानसिंहादिभिः योद्धुं प्रतस्थे ।	अनुष्टुप्	३५१	५५
८	रक्तकासारवर्णनम् ।	उपगीतिः (२६)	३५६	५०
९	क्षतगात्रं प्रतापं गिरिगुहायां प्रवेशयन्ति विश्रान्त्यर्थं कृष्णसिंहादयः ।	उपजाति	३६१	५८
१०	प्रावृज्जृम्भणम् ।	इन्द्रवंश	३६७	६०
११	बालिकायाः हस्तात् मार्जारेणापूपापहरणं अपि च राणाप्रतापेन षण्मासकालावधिविश्रान्त्यर्थं अक्बराय पत्रप्रेषणम् ।	वसंततिलका	३७६	५३
१२	पाटेश्वरी राणाप्रतापं कर्तव्यं ब्रूते ।	वरांगि (२७)	३८५	५६
१३	दिल्ल्यां अक्बरराजसभा ।	अनुष्टुप्	३९१	१००

सर्गः	विषयः	छन्दः	पृष्ठ क्र.	श्लोक संख्या
१४	भिल्लमुखात् राणाप्रतापस्थितिं विदित्वा जोषीमाता पृथ्वीराजयोः परितापः।	गीतिः	४००	४२
१५	पृथ्वीराज़ाब्दुल्रेहमानयोः मन्त्रणा।	अनुष्टुप्	४०५	४२
१६	अब्दुल्रेहमानपृथ्वीराजयोः पत्रं श्रीराणाप्रतापाय कृष्णसिंहः श्रावयति।	प्रभातवृत्तम् (२८)	४०९	५२
१७	पत्रश्रवणानन्तरं प्रतापः न काङ्क्षे विश्रान्तिमिति अब्दुल्रेहमान-पृथ्वीराजाभ्यां पत्रं प्रेषयति।	अनुष्टुप्	४१८	६५
				९२५

६. विजयकाण्डम्

१	निर्वेदेन परिणद्धमूर्तिः राणा स्वीयभावं अनुचरान् प्रति विशदयति।	यमुना (२९)	४२५	५२
२	भामासाहिराणाप्रतापयोः मेलनम्।	वंशस्थ	४३४	१००
३	प्रतापस्य विजययात्रा।	भुजङ्गप्रयात (३०)	४५०	५१
४	राणाविजयोत्सवं समाकर्ण्य अक्बरः स्वमन्त्रिमण्डलैः मन्त्रयति।	मन्दाक्रान्ता (३१)	४५९	५२
५	स्वातन्त्र्योत्सवः।	चन्द्रगति (३२)	४६८	५५
६	अमरसिंहराज्याभिषेकः।	प्रहर्षिणी (३३)	४७८	५२

सर्गः	विषयः	छन्दः	पृष्ठ क्र.	श्लोक संख्या
७	राष्ट्रपुरुषस्य राणाप्रतापस्य अन्तिमभाषणम्।	इन्द्रवंश	४८७	५२
८	अवतारसमाप्तिः।	चन्द्रगति	४९६	५२
				४६६

सर्गाः ८० छन्दांसि ३३ समष्ट्यां श्लोकसंख्या ४२३३

।। श्रीमत्प्रतापराणायनं महाकाव्यम् ।।

मेवाड-काण्डम् ।

१. दैवप्रार्थना

श्रीमत्प्रतापराजन्तं नौमि दिव्यमहौजसम्।
सर्वलोकसमाराध्यं सूर्यं प्रत्यक्षदैवतम्॥ १

एकलिङ्गं महालिङ्गं सृष्टिस्थितिलयालयम्।
वेदघोषाभिसंपूतं जाह्नवीतोयसिञ्चितम्॥ २

विल्वपत्रालिसंश्छन्नं नित्यं भस्मविलेपितम्।
वन्दे शान्तं महालिङ्गं प्रतापार्चनभासुरम्॥ ३

सर्वलोकसमाराध्यां सिन्धुत्रयपरीवृताम्।
वन्दे मे जननीं नित्यं हिमालयकिरीटिनीम्॥ ४

प्रपद्ये व्यापृतां देवीं सर्वशुक्लां सरस्वतीम्।
ब्राह्मीं वेदपुनीताभां नौमि तां भारतीं सदा॥ ५

यस्तं प्रशास्ति नावीन्यं चेतनाचेतनं ध्रुवम्।
महिम्ना स्वप्रतापस्य स्तौमि विश्वं महेश्वरम्॥ ६

[इति मेवाडकाण्डे दैवप्रार्थना समाप्ता]

२. कविगुरुस्तुतिः ।

प्रथमं स्तौमि गैर्वाण्यां राजमान्यकवीश्वरान् ।
पण्डितान्मे गुरूंश्चैव प्राप्तुं दिव्याशिषः सदा ॥ १

प्राचेतसं समाधाय रामायणमहाकविम् ।
आद्यं सर्वकवीनां च पवित्रे मम चेतसि ॥ २

पाराशरमुनिं नित्यं सर्ववाङ्मयमूलकम् ।
कविप्रभुं कालिदासं भवभूतिं सदा हृदि ॥ ३

मुनित्रयं समभ्यर्च्य महावाङ्मयमूलकम् ।
यथाशक्ति करिष्यामि काव्यमेतद्धि नूतनम् ॥ ४

सत्यनारायणं वन्दे वेदवेदाङ्गभासुरम् ।
संस्कृताध्यापकं वाल्ये साहित्यालङ्कृतं गुरुम् ॥ ५

पराशरं पूर्वसंज्ञं कृष्णमाचार्यनामकम् ।
शिल्पनाट्यकलातज्ञं शब्दशास्त्रमहोदधिम् ॥ ६

विश्वनाथं प्रियं नौमि संस्कृतान्ध्रमहाकविम् ।
वाङ्मये चाद्वितीयं तं कविलोकसमर्चितम् ॥ ७

अनन्यप्रक्रियाख्यातं भारते कविराक्षसम् ।
प्रथितं कविसम्राजं सत्यनारायणं सदा ॥ ८

केशिराजकुले जातं भव्यसंस्काररार्जिनम् ।
आदर्शजीवितासक्तं अप्परायगुरुं सुधिम् ॥ ९

वेदुलान्वयसंभूतं क्षीराब्धिं संस्कृतान्ध्रयोः ।
व्युत्पत्तिप्रतिभायुक्तं वन्दे तं रामशास्त्रिणम् ॥ १०

चिल्कूरिवंशगलौविम्वं शब्दशास्त्रमहानिधिम् ।
राममूर्तिगुरुं वन्दे शब्दशक्त्यर्थसिध्दये ॥ ११

अन्यान्गुरुन् प्रणम्याहं नानाशास्त्रेषु पण्डितान् ।
संप्राप्यैवाशिषः तेषां पुराणं रचयामि च ॥ १२

[इति मेवाडकाण्डे कविगुरुस्तुतिः समाप्ता]

२. कविवंशपरिचयः ।

ओगेटिवंशे कौण्डिण्ये चासीद् वेल्नाडुवैदिके ।
याजुष्यां कृष्णशाखायां कृष्णय्येति पितामहः ॥ १

ओगेटिवंशजाः सान्तम् अद्वैतामृतपायिनः ।
नास्ति शाखान्तरद्वेषो वेदान्ते भारतावनौ ॥ २

पितामहस्तु शान्तात्मा कृषिकोद्योगतत्परः ।
कनिष्ठस्तस्य पुत्रेषु साम्वमूर्तिर्वभौ पिता ॥ ३

कौसल्या जननी पुत्रान् सुषुवे सद्गुणान्वितान् ।
तेषु पुत्रेषु मे भ्राता वलवानग्रजः सुधीः ॥ ४

मे पिता भारतीयात्मा वाल्ये चास्मानपाठयत् ।
संस्कृतं स्मार्तभागं च मौञ्जीधारणसुव्रतान् ॥ ५

वैभवं भाग्यसंपत्तिं न कदाप्यभ्यकाङ्क्षत ।
यदृच्छालाभसंतुष्टः जीवितं यापयन्नसौ ॥ ६

असौ नित्यं हि मौनीनां मार्गे भव्यं स्वजीवनम् ।
यापयामास धर्मात्मा लोकेऽलौकिकजीवनः ॥ ७

आर्षत्वं काङ्क्षते नित्यम् आर्षदेशीयजीवनम् ।
आर्षत्वं घोषयामास मनोवाक्कायकर्मणा ॥ ८

स्वयं संस्थापयामास चार्षधर्मसनातनीम् ।
बालिकापाठशालां सः प्राच्यधर्मप्रबोधकः ॥ ९

हिन्दूमताभिधानं च पुस्तकं व्यरचि प्रियम् ।
अनेन पितृपादेन नित्यसेवामनीषिणा ॥ १०

आबाल्यं संघसेवां तु विधास्यन् कर्मजीवनः ।
शुद्धिप्रचारकार्येण घोषयामास संस्कृतम् ॥ ११

माता दिवंगता पूर्वं अस्मान् सर्वान् विहाय च ।
अग्रजो हनुमच्छास्त्री पञ्चत्वं प्राप यौवने ॥ १२

अध्यसीष्टाग्रजः स्मार्तं संस्कृतं शैशवे मुदा ।
बहुधा कर्मशीलश्च हिन्दीभाषाऽभिभूषितः ॥ १३

प्रतापकाव्यकर्ताऽसौ परीक्षित्रामभूषितः ।
ज्येष्ठोऽभूत् दैवयोगेन कलामाधुर्यलोलुपः ॥ १४

आन्ध्रदेशे विराजन्त्यां गर्तपुर्यां सुमण्डले ।
स्वर्णपुर्यां प्रसिद्धायां भावनारायणालये ॥ १५

शैशवेऽभ्यस्तवान् कामं सप्तवर्षाणि संस्कृतम् ।
सत्यनारायणस्यान्ते गुरोर्गीर्वाणशास्त्रिणः ॥ १६

पश्चाद् गोदावरीतीरे सान्ध्रगीर्वाणमन्दिरे ।
गोपादक्षेत्रसंपन्ने चाप्परायस्य सन्निधौ ॥ १७

अधीतोऽसि दृढं तत्त्वम् आन्ध्रगीर्वाणभाषयोः ।
गुरूणां तत्त्ववेत्तृणां उपदेशेन दीक्षितः ॥ १८

पत्नी च शीलवृत्ता मे शीलानाम्नी महासती ।
कर्तव्यनिष्ठासंबद्धा विद्यालंकारभाषिनी ॥ १९

अत्यन्तस्नेहसंभारा मां नित्यं काव्यकर्मणि ।
प्रेरयन्ती मुदा हस्तं ददौ साहाय्यशालिनी ॥ २०

तस्याः स्नेहप्रदीप्तोऽहं भाववृत्त्या समाहितः ।
व्यरचं बहुकाव्यानि चिद्रूपाकृतमानसः ॥ २१

संस्कृतज्ञा लिलेखासौ मदुक्तं क्षिप्रलेखिका ।
राणायनमहाकाव्यं सुन्दराक्षरपङ्क्तिषु ॥ २२

अग्रेसरा सदा कार्ये सहकाराभिभूषिता ।
कदापि कार्ये चालस्यं सहते नैव मानिनी ॥ २३

सर्वसद्गुणसंपुष्टा सुशीला करुणान्विता ।
नितान्तदानशीलाऽसौ स्वार्थं नैव हि काङ्क्षते ॥ २४

अनुजः पण्डितश्चैव व्यवहारेषु कौशलः ।
वक्ता धारणशीलोऽयं अच्युताख्याभिसज्जित ॥ २५

कर्मशीलश्च मेधावी देशभक्तः सदाश्रयः ।
आदर्शजीवनासक्तः संस्कृतान्ध्राभिभूषितः ॥ २६

देवभाषाप्रचाराय नाट्यरूपेण जीवितम् ।
आत्मानं मनुते धन्यं विधायासौ मुदाङ्कितम् ॥ २७

पूर्वजाः शक्तिसंपन्नाः भक्तिभावैः समञ्चिताः ।
कस्यापि हानिं नाकुर्वन् वेदान्ते भव्यचिन्तनाः ॥ २८

एवं ओगेटिवंशोऽयं ख्यातः सर्वासु दिक्षु च ।
पूतसंस्कारभारत्या तृप्ताः सर्वेऽपि पूर्वजाः ॥ २९

[इति मेवाडकाण्डे कविवंशपरिचयः समाप्तः]

४. भारतभारती

पूर्वजन्मकृतं पुण्यं सत्यमस्मिन् युगे मम ।
संस्कृतज्ञानरूपेण फलितं काव्यभूरुहे ॥ १

प्राग्जन्मसञ्चितं ज्ञानं देवभाषाभिभूषितं ।
राणाप्रतापकाव्यत्वं भ्राजते प्राप्य भूतले ॥ २

न काऽपि रम्या देशेऽस्मिन् भाषा स्यादार्यवैभवे ।
दिव्यत्वे शब्दसृष्ट्यां चापुष्टा गीर्वाणभाषया ॥ ३

जीवने मधुरा वाणी श्वासे माधुर्यसौरभा ।
पवित्रे भारते देशे शाश्वता भव्यभारती ॥ ४

या वाणी भारते राष्ट्रे विरेजे रम्यभावना ।
सा ब्राह्मी पूर्वरूपं तु लब्ध्वा लास्यतु मे मुखि ॥ ५

प्रान्तीयभाषाः सर्वा हि प्रान्तीयानां भवन्त्यहो ।
किन्तु गीर्वाणभाषा तु सर्वदा लोकभारती ॥ ६

सुगमं सुन्दरं काव्यं ग्रथितुं प्रयते सदा ।
संस्कृतज्ञानहीनानां यथा काम्यं भविष्यति ॥ ७

विना गीर्वाणसंपर्कं देशभाषाः कलेवराः ।
पुष्टा गीर्वाणभारत्या भान्ति नित्यं सुवासिताः ॥ ८

भारती भामिनी कुर्यात् देशमेनं कलामयम् ।
सर्वमानवचित्तानि समैक्यं च यथा भवेत् ॥ ९

जन्मजन्मनि गीर्वाणी भारती मेऽस्तु भारती ।
यद्यहं मानवो भूत्वा जीवेयं भारतावनौ ॥ १०

नमस्तस्यै सरस्वत्यै या प्रजाः संपुनाति च ।
लोके परे सौख्यदा या वाङ्मये सुप्रतिष्ठिता ॥ ११

पूर्वजाः शाश्वतं स्थानं सत्यं प्राप्ताः कवीश्वराः ।
गीर्वाणसेवया लोके जनोऽयं प्राप्तुमीहते ॥ १२

संस्कृते कवयः सर्वे मोक्षं प्रापुर्न संशयः ।
लिलेखिषामि सर्वं हि संस्कृते मोक्षकाङ्क्षया ॥ १३

संस्कृतं नाम देवानां भाषा नास्तीति केचन ।
किन्तु दिव्यत्वसंभूताः भाषन्ते संस्कृतं सदा ॥ १४

पित्राऽर्जितं च प्राचीनं भूखण्डं वस्तुसंचयम् ।
सर्वोऽपि काङ्क्षते लोके न तु प्राचीनभारतीम् ॥ १५

दिव्यत्वे सति लोकेषु गीर्वाणी तेषु राजते ।
शृणु सर्वत्र मर्त्येषु भारती न विराजते ॥ १६

[इति मेवाडकाण्डे ' भारतभारती ' समाप्ता]

५. संस्कृते कविता किमर्थम् ।

प्राचीना ऋषयः सर्वे यस्यां काव्यं विनिर्ममुः ।
तस्यां गीर्वाणभाषायां कुर्यां मे काव्यनिर्मितिम् ॥ १

लेखनं संस्कृते भव्यं संस्कृते भणनं प्रियम् ।
श्रवणं कीर्तनं चैव कवनं मधुरं सदा ॥ २

यस्यां मे संकृतिः सर्वा विललास सुधामयी ।
तस्यां गीर्वाणभाषायां कुर्यां मे काव्यनिर्मितिम् ॥ ३

भाषेयं मम देशस्य दिव्या सर्वाङ्गसुन्दरी ।
पुनीता वेदवेदाङ्गैः सा प्रिया मे सदा भुवि ॥ ४

जनाः सदा विकाङ्क्षन्ते सुन्दराङ्गीं सुखाय च ।
भावार्थरसपूर्णाङ्गीं गीर्वाणीं नैव भूतले ॥ ५

परंपराभिसंक्रान्ता क्षुण्णमार्गा हि पूर्वजैः ।
सर्वलोकसमाराध्या निर्जरा भासिनी रुचा ॥ ६

जननी सर्वभाषाणां न च वृद्धा पुरातनी ।
नित्ययौवनलास्यन्ती त्रिदशा विश्वमोहिनी ॥ ७

मूढा भणन्ति वृद्धेति किन्तु सा दिव्यभारती ।
प्रोत्फुल्लपदसंभारा रसभावा फलान्विता ॥ ८

अनन्तशक्तिसंपन्ना नवशब्दप्रकल्पिनी ।
सदा रक्षति सर्वांश्च तां ये रक्षन्ति सर्वशः ॥ ९

शक्तिः स्याद्यदि तज्ज्ञस्य संस्कृते कवनं वरम् ।
अपभ्रंशासु भाषासु कवने किं प्रयोजनम् ॥ १०

अप्रगल्भैरपभ्रष्टैः मधुरैः जल्पनैः परम् ।
बालवत् निरतं भक्त्या तोषयिष्यामि मातरम् ॥ ११

करोमि यद्यहं नित्यं, माता मे बालभाषणम् ।
प्रौढभाषापरिव्याप्तं सत्यं प्रेम्णा करिष्यति ॥ १२

अल्पज्ञोऽहं क्रान्तदर्शी देशप्रेमी च सर्वदा ।
नैवाहं प्रभविष्यामि मातृद्रोहे कदाचन ॥ १३

लोके च बहवः सन्ति संस्कृतप्रेमिकाः परम् ।
नैव ते पाठयन्ति स्म पुत्रेभ्यः प्रियसंस्कृतम् ॥ १४

संस्कृते पण्डितो यश्च सैव दिव्यहिमालयः ।
पण्डिताः अन्यभाषासु गिरयो ग्रामसन्निधौ ॥ १५

धिक् तान् सर्वान् प्रवक्ष्यामि विषकुम्भपयोमुखान् ।
संस्कृतद्वेषिणः सत्यं लौकिकान् वञ्चकान् सदा ॥ १६

कवित्वं संस्कृते यस्य नटराजेऽत्र सैव हि ।
कवयस्त्वन्यभाषासु नटराजानुकारिणः ॥ १७

दृष्ट्वा तं नटराजं च सर्वे नाट्यं प्रकुर्वते ।
अनन्वितं हि लोकेऽस्मिन् नटराजस्य लक्षणम् ॥ १८

यस्य ज्ञानं न चैवास्ति पर्याप्तं संस्कृते भुवि ।
तस्य विद्या विभात्येव चद्रहीनेव यामिनी ॥ १९

पञ्चेन्द्रियसमानास्ताः देशभाषाश्च सर्वदा ।
शरीरमात्महीनं स्यात् इन्द्रियैः किं प्रयोजनम् ॥ २०

तस्माद्धि सर्वभाषाणाम् आत्मरूपं हि संस्कृतम् ।
आत्मानं हन्तुमिच्छन्ति दुष्टाः निन्दन्ति संततम् ॥ २१

आत्मा कथं विनष्टः स्यात् स तु सर्वत्र व्यापृतः ।
आत्मज्ञानविहीनस्तु पशुरित्यभिधीयते ॥ २२

संस्कृतज्ञानहीनानां देशभाषाः कलेवराः ।
संस्कृतज्ञानिनां सत्यं देशभाषाः रसान्विताः ॥ २३

संस्कृतं ये विनिन्दन्ति भान्ति ते महिषासुराः ।
संस्कृतं ये पठन्त्यत्र भान्ति ते भूसुराः परम् ॥ २४

संस्कृतं यदि भात्यत्र संस्कृतिर्वहति ध्रुवम् ।
विना च संस्कृतं राष्ट्रं पशुत्वं प्राप्स्यति स्वयम् ॥ २५

तस्माद्धि संस्कृतं देश्यं देश्यं सर्वत्र संस्कृतम् ।
भारतीयप्रजाभाषा राष्ट्रभाषा हि संस्कृतम् ॥ २६

[इति मेवाडकाण्डे ' संस्कृते कविता किमर्थं ' समाप्तम्]

६. कवेः काव्यसन्ततिः ।

जानपादीयनृत्यार्थं गीतानि प्रियशीर्षकैः ।
बहूनि रचितान्यासन् प्रजाऽऽमोदभराणि च ॥ १

गीतानीमानि सर्वाणि गीतान्यासन् स्वयं पुरा ।
सर्वत्र विद्यासंस्थासु रसिकानां च सन्निधौ ॥ २

विंशत्या सर्गबन्धेषु करुणारसनिस्तुलम् ।
यशोधरामहाकाव्यं व्यरचं सुकृती भुवि ॥ ३

यशोधरामहाकाव्यं नव्यसाहित्यमण्डले ।
कालिदासपुरस्कारं भ्राजितं प्रथितं भुवि ॥ ४

लालित्यपूर्णशब्देषु रामायणकथा कृता ।
एकोत्तरशतेष्वेव गीतेषु मधुरा पुरा ॥ ५

सप्तविंशतिसंख्यानां नानाविधकथायुतम् ।
परीक्षिन्नाट्यचक्रं तु व्यरचं विश्ववाङ्मये ॥ ६

सौन्दर्यज्ञानमीमांसां नानाविधकलायुताम् ।
आलङ्कारीयशास्त्रार्थां स्वयं दृष्टान्तशोभिनीम् ॥ ७

[इति मेवाडकाण्डे ' कवेः काव्यसन्ततिः ' समाप्ता]

७. काव्यं प्रति कविसंभावना ।

लोके कुत्रापि नास्त्येव वस्तु सर्वं जनप्रियम् ।
तथाप्येवं करोम्येतत् स्वार्थस्वान्तसुखाय च ॥ १

यावत् वाणी चिरं तिष्ठेत् तावद्राणायनं भुवि ।
लोके निद्राणजन्तूनां कर्तव्यं शासयन् ध्रुवम् ॥ २

यावदर्कः चरेत् शून्ये भारतं जगतीतले ।
तावद्राणायनं भूयात् लोककल्याणसिद्धये ॥ ३

देशभक्तं महावीरं कथं मे पूर्वसूरयः ।
विस्मृत्य कृतवन्तो यत् लोके काव्यचयं महत् ॥ ४

राणाजीवितमुद्दिश्य काव्यं नास्तीति संस्कृते ।
अपवादात्मकं वाक्यं निरस्तुं कवयाम्यहम् ॥ ५

चक्षुश्च्युतिं च संप्राप्य कवीनां ज्ञानचक्षुषाम् ।
मत्पूर्वकृतपुण्येन काव्यमेतन्ममागतम् ॥ ६

समस्तगुणसंपुष्टा लोकोत्तरनृपाश्रिता ।
कथं कथा पूर्वमेव रसवृत्तसमाश्रिता ॥ ७

महाकवीनां हस्तेषु रसनिर्भरचेतसाम् ।
वाणीविलासमज्ञानां न भेजे काव्यरूपताम् ॥ ८

सर्वे च कवयः सत्यं मदर्थं तत्यजुः प्रियम् ।
इति कृत्वा कथावस्तु रचयामि कृती भृशम् ॥ ९

जीवने विफलो जातः हितैषी राष्ट्रपूरुषः
तस्मात् न कोऽपि जग्राह वस्त्विदं काव्यनिर्मितौ ॥ १०

प्रतीपं जीववाहिन्याः तताराऽयं महाभुजाः ।
दैवस्याननुकूलत्वात् वैफल्यं प्राप जीवने ॥ ११

एतादृशस्य काव्यस्य कर्ता वैफल्यमाप्नुयात् ।
इति भीत्या पुरा सर्वे कवयः तन्न जगृहुः ॥ १२

अहं च जीवने तथ्यं प्रतीपगमनः सदा ।
नो चेत् दुर्गन्धसंसारे संस्कृते कविरस्ति किम् ॥ १३

वैफल्यजीवनो राणा जातः सर्वमहीतले ।
आदर्शपुरुषो नित्यम् अर्वाचीनमहीभुजाम् ॥ १४

वैफल्यकारणं तस्य दृष्ट्वा राष्ट्रे महीभुजः ।
यथानुकूलं युद्धे च जेतारो रेजिरे भृशम् ॥ १५

तस्माद्धि वन्द्यः सर्वेषां प्रियो जातः स भूपतिः ।
यदि तं विस्मरेत् कोऽपि देशद्रोही स एव हि ॥ १६

अवाप्य सौख्यं राष्ट्रेऽस्मिन् न कृतं किञ्चिदप्यहो ।
ततोऽनृणी भवाम्यत्र सततं राष्ट्रमूर्तये ॥ १७

यदृच्छाप्रासवस्त्वत्र समक्षं भ्राजते मम ।
तेनैव काव्यं कृत्वाहं भवेयमनृणी ध्रुवम् ॥ १८

प्रातःस्मरणपद्येषु स्मरणीयः प्रियो जनैः ।
तस्य स्मरणमात्रेण मुच्यते पापपङ्किलात् ॥ १९

तस्माद् धन्यमहं मन्ये गीर्वाणकविमण्डले ।
राणाप्रतापकाव्येन शाश्वतस्थानभाजिनम् ॥ २०

इति मत्वा कृतं सान्द्रं चिक्कणं स्वादुनिर्भरम् ।
राणायनमहाकाव्यम् जन्मराहित्यशोभितम् ॥ २१

[इति मेवाडकाण्डे ' काव्यं प्रति कविसंभावना ' समाप्ता]

८. कविविज्ञापना ।

इतः पूर्वं महाकाव्यं राणामुद्दिश्य भारते ।
प्रपञ्चसुरभारत्यां केनाप्येवं न निर्मितम् ॥ १

राणाजीवितकाव्यस्य स्मरणे पठनेऽपि वा।
आपादमस्तकं देहः भवत्यत्युष्णतापितः ॥ १

कायं राणामहावंशः क्व चाहं स्वल्पधीयुतः।
तथाप्यहं करोम्यत्र काव्यं भक्त्या विमोहितः ॥ ३

अनारम्भितकर्मभ्यः प्रियमारब्धकर्म हि।
भक्त्या कर्म समारब्धं फलं यच्छत्यनारतम् ॥ ४

कारुण्यवीररासिक्यं देशभक्त्या प्रपूरितम्।
राणायनं करोम्यत्र रामायणकथामिव ॥ ५

मेवाडोदयसारण्यदिल्लीतद्धाल्दिघाटयुतैः।
विजयाख्यातकाण्डैश्च निर्मितं काव्यबन्धनम् ॥ ६

चतुःसहस्रपद्यैश्च जनकल्याणकारकम्।
राणायनमहाकाव्यं ग्रथ्नामीह यथामति ॥ ७

अशीतिसर्गसंयुक्तं रञ्जितं हृदयङ्गमम्।
वृत्तत्रिंशतिबद्धं च भाति राणायनं महत् ॥ ८

नैकभावपरिव्याप्तं रसशब्दार्थनिस्तुलम्।
देशीयभावनाबद्धं जनसामान्यबोधकम् ॥ ९

शाश्वतं प्रथितं देशे रोमहर्षणकारकम्।
देशभक्त्यभिसंपूर्णं भावालङ्कारसुन्दरम् ॥ १०

वीररासिवयपद्यात्तं रौद्रवीररसावृतम्।
चैतन्यकारकं तथ्यं भाति राणायनं भुवि ॥ ११

गीर्वाणभाषासूत्रेऽस्मिन् वृत्तपुष्पितसौरभा।
सर्वलोकशिरोधार्या भावमाला कृता मया ॥ १२

तदानींतनकालस्य रूपरेखाप्रदर्शनम्।
इदानींतनकालस्य भूयात् भारतदर्पणम्॥ १३

विचिन्त्यैवं कृतं काव्यं देशभक्त्या प्रपूरितम्।
सर्वलोकसमाराध्यं भव्यं राणायनं मुदा॥ १४

राणायनकथावस्तु रामायणकथेव तत्।
कर्तव्यं देशभक्तिं च शास्तु नित्यं महीतले॥ १५

यदा पृथिव्यां देशस्य संकटं प्रविजायते।
राणायनमहाकाव्यं स्फूर्तिं दद्यात् भुवौकसाम्॥ १६

नपुंसकस्य रम्भेव गीतवत् वधिरस्य च।
अन्धस्यादर्शवल्लोके काव्यं मूर्खस्य भासते॥ १७

तस्माल्लोके लिखाम्येवं काव्यं काव्यात्मनां कृते।
स्वीकुर्वन्तु प्रियं स्तोत्रैः धिक्कुर्वन्तु विदूषणैः॥ १८

चिन्तयित्वा परं राणां दुःखाश्रुव्याप्तलोचनः।
उद्विग्नमानसो भूत्वा काव्यकर्माणि तत्परः॥ १९

मृदुले हृदयक्षेत्रे वपिताः पूर्वजैः मम।
देशीयदिव्यसंस्काराः कथारूपेण शैशवे॥ २०

अज्ञात्वा जीवितं तस्य मानवो नार्हति स्वयम्।
जीवितुं भारते देशे केवलं खाद्यलोलुपः॥ २१

तदानींतनबीजं तु स्वान्तःक्षेत्रे शनैः शनैः।
प्ररूढं वृक्षरूपेण काव्यत्वं प्राप वाङ्मये॥ २२

मादृशो भूतले कश्चित् पठित्वा पूर्णतः प्रियम्।
राणायनमहाकाव्यं तृप्तः सत्यं भवेद्यदि॥ २३

धन्यं मे जन्म लोकेऽस्मिन् मन्ये किन्तु भजाम्यहम्।
नैव तृप्तिं कदाप्यत्र स्तोत्रकैः स्तुतिपाटिनाम्॥ २४

अजानन्तश्च देशीयान् भारतीयपरंपराम्।
देशपालनमग्नाश्च प्रजा भान्त्येव भारते॥ २५

चरित्रहीना भूत्वा ते चरित्रात्मविभूषितान्।
वेदवेदाङ्गमूर्तींश्च निन्दन्ति वसुधातले॥ २६

एतस्मिन् पूयभूयिष्ठे दुर्गन्धावृतजीवने।
विलुठ्यमानदेशीयान् वोद्धुमेवं लिखाम्यहम्॥ २७

केचिल्लोके त्रपाहीनाः लुब्धाः पाशविकाः परम्।
अजानन्तश्च देशीयं सर्वज्ञा इव भान्ति ते॥ २८

जना लोकेऽभवन् व्यासाः निर्वीर्यैः स्वार्थजीवनैः।
नैव जानन्ति देशीयां नापि देशान्तरीयताम्॥ २९

उच्चभावानभिज्ञाश्च सदा राष्ट्राहितैषिणः।
बहवो भान्ति लोकेऽस्मिन् पैशाचीयधनैर्युताः॥ ३०

राणाचरित्रतप्तं मे मानसं काव्यलेखने।
प्रेरयामास शब्दार्थैः कवोष्णोद्वेगपूरितैः॥ ३१

अग्रजस्यान्तिके सर्वं राणाजीवितवैभवम्।
श्रुत्वा बाल्ये परं खिन्नः रुरोदाहं सगद्गदम्॥ ३२

युद्धेऽरीन् सूदयामीति हस्तवेत्रं महारुषा।
अभ्रामयं सुवेगेन स्वयं युध्यन् परैः भृशम्॥ ३३

अहं राणा भविष्यामि राष्ट्रभक्त्या महीतले।
अयापयं वदन्नेवं शैशवीयां दशां तदा॥ ३४

राणाप्रतापत्यागश्च देशभक्तिः स्वयं मम ।
राणायनमहाकाव्यं निर्मातुं प्रेरणां ददौ ॥ ३५

राष्ट्रीयभावसंपन्ने राष्ट्रीये परमात्मके ।
स्वयंसेवकसंघे तु ववृधे भावना मम ॥ ३६

नाहं राणाऽभवं देशे यथावज्जल्पने ध्रुवम् ।
किन्तु राणाप्रतापस्य काव्यकर्ताऽभवं भुवि ॥ ३७

सर्वेषां सर्ववस्तूनि न भवन्ति धरातले ।
कानिचिद्यान्ति वस्तूनि केषांचन यथाप्रियम् ॥ ३८

गन्धाघ्राणचणा एव घ्राणेन्द्रियबलायुताः ।
पुष्पदामसरद्गन्धं आघ्रास्यन्ति मनोहरम् ॥ ३९

तस्मात् काव्यानि सर्वाणि काव्यात्मलसतां भुवि ।
शिक्षितानां भवन्त्येव सर्वेषां न कदाचन ॥ ४०

जनसामान्यभाषा तु संस्कृतं साम्प्रदायिकम् ।
विश्वलोकशरीरेषु रक्तं संस्कृतमेव हि ॥ ४१

विश्वलोके चलद् भाति प्राणरूपेण संस्कृतम् ।
कुर्वत् पुनीतं विश्वं तु सौरवत् सर्वसारितम् ॥ ४२

तस्मात् सर्वाणि काव्यानि संस्कृते रचयामि च ।
राष्ट्रैक्यतत्त्वभावेन राष्ट्रभाषेति संस्कृतम् ॥ ४३

[इति मेवाड-काण्डे ' कविविज्ञापना ' समाप्ता]

प्रथमः सर्गः ।

१. राजस्थानगरिमा ।

श्रीरूपभाषाराष्ट्रेऽस्मिन् प्रदेशाः सद्गुणान्विताः ।
अखण्डशक्तिसंपन्नाः भान्ति वर्णा इव प्रियाः ॥ १

स्वतन्त्रभारते राष्ट्रे प्रदेशाः सन्ति पौष्टिकाः ।
अङ्गाङ्गिभावरूपेण संस्कृतात्मप्रभाविताः ॥ २

एकैकमक्षरं शक्त्या ददात्यर्थं च संस्कृतिम् ।
अन्योन्याश्रयभावेन भारताय महात्मने ॥ ३

प्रदेशाश्च विराजन्ते राष्ट्रभक्त्या प्रबन्धिताः ।
अध्यात्मसूत्रबद्धास्ते परं मणिगणा इव ॥ ४

ओङ्कारवत् प्रकर्षेण भ्राजते देशरक्षणे ।
सर्वदा वीररौद्राभ्यां राजस्थानं हि भारते ॥ ५

प्रदेशेषूत्तमं भाति राजस्थानमनारतम् ।
जीर्णशत्रुप्रभावत्वात् राष्ट्रस्य जठराग्निवत् ॥ ६

राजपुत्रकुमाराणां स्थानमासीन्महत्प्रियम् ।
शृङ्गारवीरसारस्यं सशरीरमिवावनौ ॥ ७

तस्मिन् देशे पुरः सन्ति राजपुत्रप्रतापवत् ।
मूर्तीकृता दिदृक्षूणां स्थायिभावा इवाखिलाः ॥ ८

प्रदेशेषु तथा सन्ति ग्रामाः सर्वे बलान्विताः ।
पौरुषस्य निवासास्ते यथा भूम्यां स्थिरीकृताः ॥ ९

निसर्गशीतवातेषु झंझानिलयुताः सदा ।
सुखदुःखौ समौ मत्वा स्थितप्रज्ञा इव स्थिताः ॥ १०

कार्याचरणवेलायां गीतिकारागरञ्जिताः ।
गतक्लेशा जना नित्यं बहु कर्म प्रकुर्वते ॥ ११

अश्वधाटीप्रवेगैश्च वीरसारस्यकर्मभिः ।
परालिं क्षालयन्त्येते कल्लोलायितचालनैः ॥ १२

सूर्याब्जवंशसंभूताः मारवत् रम्यरूपिणः ।
वज्रायुधसमा भूपाः राजन्ते शौर्यमूर्तयः ॥ १३

पौराः सर्वे सदा रम्यं रम्योष्णीषविभासुराः ।
स्वयं राजान एवात्र भ्राजन्ते शौर्यभूषिताः ॥ १४

राष्ट्रभक्तिप्रभावेन शत्रुधाटीविनाशकाः ।
भान्ति नित्यं पुरः सर्वे राशीभूतमहौजसः ॥ १५

ग्रामीणाः सर्वदा चर्चां कुर्वन्ति रम रणे कथम् ।
योद्धव्यं द्वन्द्वयुद्धे च भीकरे शत्रुमण्डले ॥ १६

देशभक्तिमयं गीतं तालबद्धं लयान्वितम् ।
गायन्तो ग्राममार्गेषु चैतन्यं हृत्सु कुर्वते ॥ १७

रामायणकथातत्त्वं गानरूपेण निर्मलम् ।
हृद्यवाद्यस्वरैः सार्धं व्यापयन्ति प्रियं प्रजाः ॥ १८

भारते विद्यमानानि कथावृत्तानि हेलया ।
गायन्ति रम्यं वीथ्यासु नैकपात्राभिवाचिकैः ॥ १९

अभिमन्युकथासारम् उद्रेकावृतभावुकाः ।
पद्मव्यूहादिचक्राणि बोधयन्ति च गायने ॥ २०

प्रातःस्मरणपद्येषु सर्वान् वीरवरान् प्रियम् ।
स्तुत्वा सदाऽऽह्निकं सर्वं प्रकुर्वन्ति विशेषतः ॥ २१

देशद्रोहकृतान् सर्वान् गतान् धर्मान्तरं तदा ।
तत्रस्थवीरभूपालाः मृतप्रायान् विमन्वते ॥ २२

उदात्तभावनायुक्ताः बहुसामान्यजीवनाः ।
परम्पराऽधिसंक्रान्तप्रभावाचारसंस्कृताः ॥ २३

क्षेत्रपाला दिवारात्रं क्षेत्रलक्ष्मीसमीक्षकाः ।
फलासक्ता नितान्तं ते यापयन्ति स्म जीवितम् ॥ २४

तत्र नार्यः सदा प्रातः संध्याकाले च यौवतैः ।
धातुकुम्भान् गृहीत्वाऽऽशु पानीयाहरणाय ताः ॥ २५

यान्ति दूरं मनोहर्यः कलहंससुचालनैः ।
रामाः सदा स्वसंलापैः कुर्वन्त्यः कालमुत्तमम् ॥ २६

मनोज्ञगानतालैश्च लयबद्धविचालनैः ।
संघीभावेन नित्यं ताः प्रवर्तन्ते प्रियाङ्गनाः ॥ २७

करकङ्कणनादैश्च पादनूपुरनिक्वणैः ।
शृङ्गारवीरसंलापैः चलन्ति मधुरं स्त्रियः ॥ २८

उत्तमाङ्गेषु संस्थाप्य दीपकुम्भान् वरानना: ।
सरन्ति हेलया वक्रं नागकन्या इव प्रियाः ॥ २९

मस्तकन्यस्तकुम्भास्ताः शिखादीपैः प्रकाशिताः ।
ज्वलकन्यात्वमापद्य प्रव्रजन्ति गृहाणि च ॥ ३०

अत्यन्तभावपूर्णास्याः लास्यालङ्कृतचालनाः ।
दिक्पालकान्स्वभावैस्ताः भ्रामितांश्च प्रकुर्वते ॥ ३१

राजस्थाने तु सर्वत्र कार्तिकेयस्य वाहनाः ।
गीर्वाणीदेवतायाश्च नृत्यन्ति प्रियदर्शिनः ॥ ३२

षड्जस्वरपरिव्याप्तं राजस्थानं निरन्तरम् ।
संगीतसाधनां लोके केकारूपैः करोति च ॥ ३३

समूहे गीतगानं तु सततं क्रियते जनैः ।
हल्लीसकादिनाट्यानि यौवतं कुरुते भृशम् ॥ ३४

उष्ट्राः सर्वत्र यूथेषु निषण्णाः स्वस्थमानसाः ।
अभ्यस्यन्ति च रोमन्थं ग्रीवामुद्धृत्य फेनिलम् ॥ ३५

गहनालिसमाकीर्णं नगश्रेणीविराजितम् ।
निम्नोन्नताभिसंव्याप्तं वालुकारक्षितं सुखम् ॥ ३६

विचित्रमृत्तिकाव्याप्तं प्रस्तरैः खचितं दृढम् ।
सुरम्यपत्रपतगैः राजस्थानं हि सुन्दरम् ॥ ३७

स्थायिभावस्वरूपास्ते पुरः सर्वे चमूचयैः ।
संग्रामसमये सत्यं भवन्ति रसनिर्भराः ॥ ३८

उष्ट्राधिरोहणं कृत्वा पल्लीयाः स्वीयबान्धवैः ।
ग्रामात् ग्रामान्तरं यान्ति गायन्तो राष्ट्रगीतिकाः ॥ ३९

मेषपालाश्च गोपालाः शाद्वलाकीर्णपर्वते ।
चारयन्तः स्वयूथांश्च तत्पराः वेणुपूरणे ॥ ४०

कन्दुकक्रीडया गाढं शत्रुकण्ठविलुण्ठने ।
प्रावीण्यं प्राप्तुमिच्छन्ति बालाः क्षेत्रेषु संततम् ॥ ४१

तत्र केचन वालास्तु परेषां कण्ठलुण्ठनम् ।
यथा च क्रियते तद्वत् यष्टिना घ्नन्ति कन्दुकम् ॥ ४२

सर्वत्र दुर्गमैः दुर्गैः राजस्थानं विभाति च ।
राजपुत्रकुमाराणां वर्तनैः दिव्यकीर्तनैः ॥ ४३

गूढचाराः सदाचाराः वार्ताः सर्वत्र कौशलम् ।
भिक्षुकाणां सुवेषैश्च प्रापयिष्यन्ति सत्वरम् ॥ ४४

अनेकवर्णसंयुक्तं चित्रितं विश्ववत् ध्रुवम् ।
राजस्थानं विभात्येव सर्ववर्णपरीवृतम् ॥ ४५

सिंहशार्दूलनागैश्च युध्यमाना महीभुजः ।
देशस्वातन्त्र्यलब्ध्यै ते यतन्ते कर्मयोगिनः ॥ ४६

वृक्षाग्रेषु नगाग्रेषु सौधाग्रेषु निरन्तरम् ।
पिच्छाऽऽहार्यसुरूपाङ्गाः नाट्यं कुर्वन्ति केकिनः ॥ ४७

राजस्थानमिदं सत्यं सर्वनैसर्ग्यरञ्जितम् ।
पुरुषार्थयुतं रेजे त्यागेनैकेन भूतले ॥ ४८

राजस्थानस्य माहात्म्यं भारते शिक्षितैः जनैः ।
सततं स्मर्यते सर्वैः रामायणकथा यथा ॥ ४९

राजस्थानं सुपुत्राणां वर्तनैः बहु विश्रुतम् ।
इतिहासप्रसिद्धत्वं लब्ध्वा भ्राजति शाश्वतम् ॥ ५०

खगकुलविरुतैः मधुरं पशुगणचरणैः बहुविलसितधरणी ।
संध्यारागपरीतं दिव्यं लसति राजस्थानम् ॥ ५१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' राजस्थानगरिमा ' नाम प्रथमः सर्गः समाप्तः]

द्वितीयः सर्गः ।

२. मेवाडमहिमा ।

मेवाडज्मीरूचितौडाश्च जोधपूरूदयस्तदा ।
भान्ति सर्वेऽपि सान्तत्यं पौरुषस्थानभाजिनः ॥ १

राजानस्तत्र विद्यन्ते प्रसिद्धाः सूर्यवंशजाः ।
परम्पराऽभिसंक्रान्तवंशलक्षणलक्षिताः ॥ २

अश्वोष्ट्ररथमातङ्गैः निरतं युद्धमाजिताः ।
रेजिरे सर्वभूपालाः दिक्पाला इव शक्तिभिः ॥ ३

संस्कारजातनावीन्यैः नवरत्नविभासितैः ।
नितरां हेमहारैश्च भान्ति सर्वत्र सर्वशः ॥ ४

अक्षराभ्यासकाले ते बालाः खेलन्ति मञ्जुलम् ।
कथं शत्रुविदीर्णं च कर्तव्यं छलचालनैः ॥ ५

वैविध्यपूर्णक्रीडासु शाखाचङ्क्रमणेष्वपि ।
कपिक्रीडासु सर्वासु व्यग्राः सर्वे कुमारकाः ॥ ६

युवकाः शक्तिसंपन्नाः देशचिन्तापरायणाः ।
तथापि ते मुदा सौख्ये वर्तन्ते गृहमेधिभिः ॥ ७

सौख्येषु च मतिर्नूनं वर्तते निरतं ध्रुवा ।
वरिष्ठा देशभक्तास्तु समये मरणोन्मुखाः ॥ ८

व्यायामायामवक्षास्ते तरुणाः सुन्दरा दृढाः ।
सिंहशार्दूलनागैश्च तुल्यमानपराक्रमाः ॥ ९

प्रडीनोड्डीनसंडीनैः योधाः चारुप्रशिक्षिताः ।
जानन्त्येव मनोवृत्तिं परेषां चालनेष्वपि ॥ १०

सर्वसङ्गरयोद्धारः रणरङ्गविशारदाः ।
तृणाय जीवितं मत्वा सर्वं त्यक्तुं समुत्सुकाः ॥ ११

जनन्यः सर्ववालेभ्यः वीरशान्तरसौषधम् ।
स्तन्यपाने प्रयच्छन्ति यथा तेषां परम्परा ॥ १२

डोलिकासु विनिक्षिप्य मधुरं बालबालिकाः ।
वीरगानतरङ्गाभ्यां स्वापयन्ति मतल्लिकाः ॥ १३

अश्वारोहणनैपुण्यं गजारोहणपाटवम् ।
नगारोहणपाण्डित्यं सर्वे जानन्ति शैशवे ॥ १४

हरिद्राकुङ्कुमाचूर्णैः शौर्योत्पादनकारकाः ।
सततं गृहमेधिन्यः कुर्वते रङ्गवल्लिकाः ॥ १५

एकलिङ्गेश्वरं ध्यात्वा राजानः परभीकराः ।
भीमाकारेण दृश्यन्ते शूलपाणिसमाः शिवाः ॥ १६

त्यागदानक्षमाशौर्यैः आदर्शायितजीवनैः ।
राष्ट्रभक्त्या विराजन्ते रम्यलोकोत्तरैः गुणैः ॥ १७

अक्षक्रीडासु निष्णाताः व्यूहापोहादिकैः भृशम् ।
कुमाराः सततं भान्ति शत्रुसंहरणोत्सुकाः ॥ १८

सान्तत्यधाटीसंक्षोभैः क्षुब्धं राष्ट्रं सहस्रशः ।
राजस्थानीयराजानः शतधाऽरक्षयन् भृशम् ॥ १९

स्त्रियोऽपि तत्र संग्रामे गजाश्वारोहणे रताः ।
रुद्राणीचण्डमुण्डाङ्गयः चण्डीसाम्यं भजन्ति च ॥ २०

स्वातन्त्र्यनिष्ठाः सर्वेऽपि राजानः सन्ति निश्चयम् ।
अनूच्यागामिनीं दिव्यां संस्कृतिं रक्षितुं प्रियाम् ॥ २१

अनन्तभोगसंव्याप्ताः ससौख्यं शयने रताः ।
सानन्दस्नेहभावाभ्यां वस्तुं ते तत्परा भुवि ॥ २२

षाड्गुण्यभावसंभूताः शक्तियुक्ताः परं नृपाः ।
सूर्यवंशे समुत्पन्नाः परवीरभयानकाः ॥ २३

मीरा वीरा तथान्याश्च पद्मिनी भीमसिंहकाः ।
कुम्भराणामहावीराः संभूतास्तत्र भूतले ॥ २४

प्रियं सर्वत्र राजानः संभावन्ते निरन्तरम् ।
संग्रामशास्त्रवाक्यार्थैः अन्योन्यविजिगीषया ॥ २५

न जानन्ति भृशं सन्तः परिभाषार्थभावनाम् ।
राज्ञां संग्रामभीमानां जानन्त्यपि पदार्णवम् ॥ २६

प्रश्नोत्तराणि कुर्वन्ति सांतत्येन महीश्वराः ।
महेश्वरकृपाभाजः शास्त्रार्थे शस्त्रसंयुगे ॥ २७

शस्त्रास्त्रशास्त्रिणः सन्ति ब्रुवन्ति क्षत्रियास्तदा ।
इदं ब्राह्ममिदं क्षात्रं शिक्षायां देशरक्षणे ॥ २८

क्षतात् वयं प्रजाः सर्वाः त्रातुं सिद्धाः स्वयंभुवः ।
तस्माज्जाता वयं धात्र्यां क्षत्रियाणां कुले ननु ॥ २९

तथैव बहवो वीराः त्रातारः सन्ति भारते ।
अज्ञात्वा पुरतः पश्चात् केवलं देशरक्षणे ॥ ३०

राजानो भान्ति होतारः प्रभाते कृष्णवर्त्मनि ।
स्वीयाभीष्टफलप्राप्त्यै मन्त्रघोषप्रभाविताः ॥ ३१

कुर्वन्ति कल्ये राजानः महान्यासादिपूर्वकम् ।
रुद्राभिषेकमन्त्रौघैः एकलिङ्गार्चनं सदा ॥ ३२

चारुवृत्तसमाकीर्णं वीररौद्ररसावृतम् ।
देश्यभावपरिव्याप्तं प्रेरकं राजकं भुवि ॥ ३३

सर्वे सुशिक्षिताः सन्ति धावमानमृगेषु च ।
कर्णान्तं धनुराकृष्य वाणोत्सर्जनशिक्षणे ॥ ३४

शूलक्षेपणविद्धत्ता रभसोत्प्लवने मृगे ।
अश्वनागाधिरोहेषु शिक्षिताः शतधा भुवि ॥ ३५

सदाविनयसंपन्नाः धर्मराज्यप्रवर्तकाः ।
सर्वत्र ब्रह्मद्रष्टारः कार्तिकेयानुगाः सदा ॥ ३६

विख्यातपुरुषाः सर्वे आदर्शायितजीवनाः ।
रेजिरे कष्टकालेषु बहुमार्गप्रदर्शकाः ॥ ३७

हेषाघोषप्रतिध्वाने मन्दुरागतवाजिनाम् ।
हयग्रीवस्य माहात्म्यं दृष्ट्वा हृष्टाश्च नागराः ॥ ३८

सिंहगर्जनभीमत्वं वीराणां गर्जनादिषु ।
नृसिंहस्वामिरूपत्वं प्राप्य रेजे महीतले ॥ ३९

घींकारमत्तवेदण्डाः शृङ्खलाबद्धदेहिनः ।
गजाननस्य माहात्म्ये भान्ति विघ्नोपशान्तये ॥ ४०

एवं पवित्रदृश्यैश्च ग्रामाः सर्वे शुभंकराः ।
अजस्रभव्यसंस्कारैः कीर्तयन्ति स्वमातरम् ॥ ४१

अनेकवर्णभूयिष्ठः समवर्णो विभासते ।
विनैवोच्चत्वनीचत्वं मेवाङ्प्रान्तः सुखास्पदः ॥ ४२

निसर्गमधुरं दिव्यं सर्वदा रसपूरितम् ।
सुस्वादुफलपूर्णं च दिव्यवैभवराजितम् ॥ ४३

मेवाडतुलितं स्थानं विद्यते किं धरातले ।
तत्कृते कति संग्रामा जाताः नैकोऽपि विन्दते ॥ ४४

राजस्थाने महद्भाग्यं मेवाङ्स्थानं प्रकीर्त्यते ।
नैकराजन्यसंघैश्च बहुधा पालितं श्रिया ॥ ४५

केदारभागाः सर्वेऽपि सस्यश्यामलभाषिताः ।
सुफलास्तत्र वृक्षाश्च लता नित्यं सुमावृताः ॥ ४६

वसन्तः सर्वदा तत्र वस्तुं काङ्क्षति च प्रियम् ।
विकीर्य मञ्जुलां दिव्यां स्वशोभां रम्यभावनः ॥ ४७

बहुविधमधुभावैः सज्जनैः साधुलोकैः
अनवरतफलाप्तैः भव्यराजन्यवर्गैः ।
निरवधिधनलक्ष्मीराजितैः दिव्यरूपैः
विलसति नवशोभाजन्यमेवाडलक्ष्मीः ॥ ४८

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' मेवाडमहिमां ' नाम द्वितीयः सर्गः समाप्तः]

तृतीयः सर्गः ।

३. चित्तौड्दुर्गवैभवम् ।

अरावलीनगावृत्तः सात्पुडावप्रवेष्टितः ।
एकलिङ्गेश्वराधीनः चितौड्दुर्गो विराजते ॥ १

विद्यते तत्र विख्यातं चित्तौडिति पुरं श्रियः ।
प्रधानकेन्द्ररूपेण नृपुत्राणां प्रतापवत् ॥ २

पुरा क्षत्रियवंश्यानां शौर्यधैर्यविराजिनाम् ।
आसीन्मान्यश्चितौड्दुर्गः स्थिरलक्ष्मीविराजितः ॥ ३

दुर्गाभिधानमाकर्ण्य शत्रूणां हृदयानि च ।
व्यथापूर्णानि जातानि किमुत प्रेक्षणे ध्रुवम् ॥ ४

भाति चित्तौडुदुर्गस्तु राणावंशमहात्मनाम् ।
चित्तवत् बहुपूतश्च विशदः सूर्यरश्मिवत् ॥ ५

करालकरवालाक्ताः राजानो भान्ति सर्वतः ।
एकलिङ्गेश्वराकारैः देशरक्षणदीक्षिताः ॥ ६

ललाटेषु सदा वीराः त्रिपुण्ड्राणि धरन्ति च ।
अनङ्गदग्धसंजातं रागभस्मकृतत्विषा ॥ ७

दुर्गमोऽयं चित्तौड्दुर्गः राणाप्रकृतिवत् परैः ।
नितरां भ्राजते रम्यं राणावंशप्रतापवत् ॥ ८

अस्य दर्शनसौभाग्यं भवत्येवानिशं वरम् ।
तीर्थयात्रासमुद्भूतं पुण्येन तुलितं भुवि ॥ ९

प्रत्यहं स्नाप्यते देशे शात्रवासृक्प्रवाहकैः ।
वीरमानससूनैश्च पूज्यते दुर्गराड् भुवि ॥ १०

मन्दिराणां सहस्राणां पुण्यं यत् भवति भारते ।
तदेव जायते सत्यं दुर्गस्यास्य विलोकने ॥ ११

अस्य दर्शनसौभाग्यं भवत्येवानिशं प्रियम् ।
तीर्थयात्रासमुद्भूतपुण्येन तुलितं भुवि ॥ १२

दुर्गाकारपरिव्याप्तः रक्तपानप्रशामितः ।
दुर्गोऽयं राजते लोके भद्रकालीव सर्वथा ॥ १३

चित्तौडुदुर्गरूपस्तु हिन्दुराष्ट्राय केवलम् ।
भ्राजते प्रेरयन् स्फूर्तिं भारतीयप्रजाकृते ॥ १४

पद्मिनीत्यागसंपूतं रागपूर्णं रजोगुणम् ।
प्रत्यहं वीरवर्गालिः शिरसा धरति प्रियम् ॥ १५

चित्तौडुवासिनां दिव्यः एकलिङ्गेश्वरः शिवः ।
नित्यसेवादिपूजार्थं सान्निध्ये वसति प्रियः ॥ १६

चित्तौडुदुर्गसान्निध्ये प्राकाराथितभूधराः ।
शिवलिङ्गाथिता भान्ति मुक्तिमार्गप्रदायकाः ॥ १७

अयं चित्तौडुदुर्गस्तु सात्पुडाऽरावलीचयैः ।
अगम्यघोरारण्येषु भाति शैवपुरी यथा ॥ १८

एकलिङ्गेश्वरः साक्षात् अवतीर्णो महेश्वरः ।
तत्रस्थं काननं सर्वं विल्ववृक्षावृतं महत् ॥ १९

रत्नकाञ्चनसंभारैः माणिक्यादिसुमौक्तिकैः ।
विभ्राजते हि सततं राजपुत्रमहीतलम् ॥ २०

तस्थौ वरीतुमत्रस्थान् राजवंशकुमारकान् ।
स्वर्गं त्यक्त्वा श्रिया रम्या क्षीरसागरकन्यका ॥ २१

राणावंशीयजाः सर्वे शिवार्चनपरायणाः ।
तेषां नामानि सर्वाणि भीमनामपराणि च ॥ २२

लेलिहानाङ्गवत् वक्राः विषधारापरिप्लुताः ।
वीराणां खरहस्तेषु करवाला विरेजिरे ॥ २३

एकलिङ्गार्चने जाताः द्राघिष्ठाकृतिदेहिनः ।
पैहिकामुष्मिका सक्ताः राजानः स्नायुभासिताः ॥ २४

अजस्रमवनीपालाः देशनिष्ठैकभावनाः ।
चराचरेण संपृक्ताः ध्यायन्ति नगरीं प्रियम् ॥ २५

प्रजाभाषणवाग्जालं वितनोति महीतले ।
स्फूर्तिं कीर्तिं महीपेषु चन्द्रदीधितिकाशिनीम् ॥ २६

देशभक्तिप्रधानास्ते विद्याविनयभूषणाः ।
नितरां ते विराजन्ते तुषच्छन्नस्फुलिङ्गकाः ॥ २७

मैत्री विधीयते मित्रैः शत्रुत्वं क्रियते परैः ।
यथाकालं यथास्थानं राजनीतिविशारदैः ॥ २८

सख्यं सौख्येन कुर्वन्ति प्राणादानं धनेन च ।
प्रच्छन्नं यदि सख्यं चेत् तस्यान्तं साधयन्ति ते ॥ २९

सत्यसाधनमग्नास्ते मन्वते शाश्वतं सदा ।
जीवितं बुद्बुदप्रायं राष्ट्रं नित्यं च शाश्वतम् ॥ ३०

प्रवाहवेगमायाताम् अन्यदेशीयवाहिनीम् ।
रोद्धुं सर्वे दिवारात्रं जाग्रति प्रबलं भुवि ॥ ३१

पंजाबदेशः प्रथमं राजस्थानं द्वितीयकम् ।
अन्यदेशीयधार्टीं तु रोद्धुं जागर्त्यहर्निशम् ॥ ३२

संग्रामसिंहशौर्यं तु दर्शयन् भाति निश्चलम् ।
चित्तौडुदुर्गभूपालः पाषाणायितमानसः ॥ ३३

तनुं चैतन्यसंयुक्तं, भावपूर्णं विलोकनम् ।
गर्वोद्धतं हि दुर्गोऽयं करोति स्म चराचरम् ॥ ३४

कथं देशः पराधीनः कथं शात्रवहस्तगः ।
कथं स दुर्गमो दुर्गः नाशितः शत्रुशक्तिभिः ॥ ३५

चष्टे वृत्तं महद्भूतं सततं रोमहर्षणम् ।
देशभक्तिनिदानं तत् मौनेन विशदात्मवान् ॥ ३६

एवं प्रपञ्चितं भावं प्रत्यक्षं प्रत्यहं प्रियम् ।
अपृष्टः सत्वरं सर्वान् प्रबोधयति शान्तिमान् ॥ ३७

झंझावाते प्रचण्डार्के प्रावृट्काले च शीतले ।
विनैव कम्पनं किञ्चित् स्थितप्रज्ञो विभासते ॥ ३८

सर्वान् पथिकान् विशेषज्ञान् देशभक्तान् नरोत्तमान् ।
समाहूय प्रजाः शान्तं चारित्र्यं बोधयत्यसौ ॥ ३९

प्रतिवर्षं विशीर्णोऽसौ जराझर्झरितोऽधुना ।
स्वजीवितं समाख्यातुं मौनेनापि न शक्ष्यति ॥ ४०

अचैतन्यं हि लोकेऽस्मिन् चैतन्यमिव भासते ।
अवधातुं च तत्सर्वं हृदयं तत् समीहते ॥ ४१

देशे सर्वत्र कोणेषु देशभक्ताः प्रचारकाः ।
विना च वर्णनं तस्य कथां नैव भणन्त्यहो ॥ ४२

चारित्र्येण विना तस्य चारित्र्यं नैव भासते ।
तस्मादेशीयचारित्र्यं तस्य नाम्ना विभूष्यते ॥ ४३

चित्तौडुदुर्गमूर्तिस्तु देशभक्ते विमुद्रिता ।
यथा च हनुमच्चित्ते रामो राजीवलोचनः ॥ ४४

चित्तौडुदुर्गभूमिस्तु पर्वतैः परिवेष्टिता ।
राजते स्म परं भद्रा परानीकदुरासदा ॥ ४५

राजस्थानकुमाराणां देशभावावृतं मनः ।
चित्तौडुदुर्गनिर्माणे प्रस्तरत्वमपद्यत ॥ ४६

सततं चलिता मूर्तिः झंझावातैः भयानकैः ।
देशद्रोहपरैः लोकैः नूनं क्षुभ्यति विह्वलः ॥ ४७

चित्तोडुदुर्गमाभाति चित्तवद्रणशालिनाम् ।
वीररौद्ररसासिक्तं रूपवत् परभीकरम् ॥ ४८

तत्र राज्ञां सुपुत्राणां भावो मानसिको ध्रुवम् ।
पठ्यते देशभक्तैश्च स्मर्यते सततं भुवि ॥ ४९

राजपुत्रसहस्राणां पौरुषं पर्वतीकृतम् ।
दुर्गरूपेण चैतन्यं जनानां जनयत्यहो ॥ ५०

अयं वैभवसंपन्नः दुर्गः शान्तं स्वजीवितम् ।
कथयत्यनिशं मौनं निश्चलं च निरीहया ॥ ५१

निरन्तरं भूपतिमण्डलाश्रितः समस्तराष्ट्रस्य निदानदीपकः ।
अनेकयुद्धावलिवीक्षितप्रभुः पवित्रचारित्र्यगुणाभिरञ्जितः ॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' चित्तौड्दुर्गवैभवं ' नाम तृतीयः सर्गः समाप्तः]

चतुर्थः सर्गः ।

४. श्रीयशोविष्णुवर्धनौ ।

औत्तरे भारते राष्ट्रे राजस्थानं विराजते ।
तत्र सर्वे जना नित्यं बहुकष्टसमाश्रिताः ॥ १

मरुभूमिप्रभावेन झंझावाताहता जनाः ।
शीतोष्णवाताघातैश्च कष्टे संयमनावृताः ॥ २

राजस्थाने सदा लोकाः त्रस्ता जाताः सुखं विना ।
हूणाक्रमणघाटीभिः विना चैक्यं नराधिपाः ॥ ३

शत्रूणां बहुघाटीभ्यः रक्षितुं लसते ध्रुवम् ।
मरुः प्रदेशः सर्वोऽयं भारते दैवशक्तिमान् ॥ ४

अस्यां स्थित्यां जना नित्यं सदा स्वात्माभिरक्षणे ।
व्यग्रा जाता विनाऽन्येषां साहाय्यं जीवने रताः ॥ ५

उद्धरेदात्मना सत्यम् आत्मानं न पराश्रयम् ।
कुर्याच्च जीवने तस्मात् शक्तिदैवतमुच्यते ॥ ६

एतादृशैः महाभावैः जनता कष्टजीवितम् ।
यापयन्ती सदा भाति निर्लिप्तावृतजीवना ॥ ७

नानापालकसंकीर्णे नानाजातिपरिप्लुते ।
विना च सान्त्वनं लोकाः बभूवुर्व्यथिता ध्रुवम् ॥ ८

जवे संप्लुतघाटीभ्यः सर्वे विस्खलिता कृताः ।
हृतिशौर्यप्रभातेजाः विना धैर्यं प्रजास्तदा ॥ ९

वसनं दुष्करं जातं करणं नैव सूच्यते ।
संघशक्तिं विना लोकः मरणं भजते शनैः ॥ १०

त्यक्त्वा स्वीयगृहाण्यत्र दारापुत्रैः समावृताः ।
भद्राणि जीवने द्रष्टुं बहुदूरं पलायिताः ॥ ११

प्राणान् हस्तेषु संगृह्य प्रजा धावन्ति सर्वतः ।
आत्मरक्षणसंलग्नाः परघाटीचयात् भृशम् ॥ १२

मध्येमार्गं मृता लोकाः बहवो त्रस्तभावुकाः ।
अन्ये च शत्रुणा ध्वस्ताः परे धर्मान्तरं गताः ॥ १३

एवं चित्रविचित्रैश्च घटनाबद्धजीवितैः ।
हैन्दवा मरणं प्राप्ताः राजस्थाने तदा भृशम् ॥ १४

दुर्दिने मेघसंश्छन्ने निशीथौ तमसाऽऽवृते ।
सौदामिनी भवत्येव मार्गदर्शनतत्परा ॥ १५

आपत्सु जायते बुद्धिः प्रखरा शोधनात्मिका ।
स्थित्याश्च कारणं सत्यं ज्ञायते कष्टजीवने ॥ १६

जगत्यां बुद्धिमन्तश्च लोकवन्द्याश्च सर्वदा ।
कष्टकालसमुद्भूताः मानवा न तु सौख्यजाः ॥ १७

तादृशे कष्टसंघेऽपि द्वाविमौ पुरुषौ दृढम् ।
शोधनाबुद्धियुक्तौ च जातौ राष्ट्रियमेधसा ॥ १८

मन्दसौरप्रदेशे तु सुयशोविष्णुवर्धनौ ।
जनेषु संघभावेन नेतारौ रेजतुः परम् ॥ १९

नास्तां तौ राजवंशीयौ भृशं सामयिकौ तदा।
जनानुरागभावेन जातौ तौ राजपूरुषौ ॥ २०

सूर्यचन्द्राविमौ जातौ दिवारात्रमनारतम्।
स्वीयबुद्धिप्रकाशेन कर्तुं लोकं सचेतनम् ॥ २१

मन्दसौरप्रदेशं तु योग्यं मत्वा नरोत्तमौ।
तत्र चैतन्यभावान् ताववाप्सीष्टां दृढं तदा ॥ २२

ददतुः राज्यलोकेभ्यः एतौ संघटनात्मिकाम्।
विद्यां बुद्धिं च राष्ट्रैक्ये शक्तिदानोपकारिणीम् ॥ २३

एतौ सर्वत्र देशेऽस्मिन् भ्रामं भ्रामं महामती।
देशभक्तिं प्रकल्प्याशु संघीभावं वितेनतुः ॥ २४

एतयोर्मन्त्रशक्त्या हि लोका जाताः प्रभाविताः।
तदाप्रभृति देशेऽस्मिन् संघशक्तिः बभौ दृढा ॥ २५

द्वावप्येतौ प्रयत्नेन प्रजाभिः सहवार्तिनौ।
पराभूतान् विधायाशु हूणान् राष्ट्रे विरेजतुः ॥ २६

प्रजास्तं पुरुषद्वन्द्वं शङ्कासूयासमावृताः।
विनिन्दुः सर्वयत्नांश्च तस्य देशे भयावृताः ॥ २७

गृहात् गृहं चरन्तौ तौ नवाभिक्षुकवेषिणौ।
देशीयवीरगाथाऽलिं प्रजाभ्योऽभणतां प्रियम् ॥ २८

महाभारतगाथाऽलिं रामचन्द्रकथां प्रियाम्।
पुराणानि सहर्षं तौ वीरावेशपरौ भृशम् ॥ २९

दर्शयामासतुः सर्वान् प्रति नित्यं प्रभावितौ।
राष्ट्रभक्त्यै चैतन्यं नवं प्रस्थापितौ महत् ॥ ३०

क्रीडासु भारतीयानां राजनीतिं प्रसारिताम् ।
घनीभूतां विधायेतौ बुद्धिस्थानं विचक्रतुः ॥ ३१

प्रजानां मन्दचित्तानां भीत्या संवर्धितात्मनाम् ।
अपारशक्तिसंपन्नौ कष्टकाले बभूवतुः ॥ ३२

युद्धभीतिः प्रजानां तु जायते सततं हृदि ।
कस्माद्योद्धव्यमस्तीह वरं युध्दाद् हि जीवनम् ॥ ३३

यः कोऽपि वा भवेन्नूनं शत्रुर्मित्रं हरो हरिः ।
तस्य सान्निध्य एवात्र जीवनं यापने क्षमाः ॥ ३४

केषांचनात्मभावास्तु वक्रमार्गगता भृशं ।
न तेऽशृण्वन् सुसंदेशं दत्तं ताभ्यां तदा जनाः ॥ ३५

अनंताघातसंघातैः तावुभौ पर्वताविव ।
अप्राप्य चञ्चलं चित्तं स्वकर्मनिरतौ दृढम् ॥ ३६

नैव पश्यति कार्याथीं स्तुतिनिन्दादिकं भुवि ।
कुर्वन् यात्येव कार्यालिं आफलोदयकर्मकः ॥ ३७

अश्वारूढौ गजारूढौ क्वचिदुष्ट्राधिरोहिणौ ।
संघशार्क्तिं विधास्यन्तौ समाजं चक्रतुः दृढम् ॥ ३८

देशभक्तिप्रचाराय देशसाहित्यसंस्कृती ।
परमे शक्तिसंपन्ने जाते देशीयजन्तुषु ॥ ३९

विना च राष्ट्रसाहित्यं विना राष्ट्रकथाः परम् ।
महानुभावचारित्र्यं प्राच्यसंस्कृतिजीवनम् ॥ ४०

अन्यमार्गेण चारित्र्यं देशभक्तिर्महीयसी ।
भवतः नैव देशेषु हत्सु लोकेषु शाश्वतम् ॥ ४१

इत्येवं देशतत्त्वार्थं संघशक्तिं समग्रतः ।
अहर्निशं च लोकेऽस्मिन् व्यापयामासतुः प्रियम् ॥ ४२

सर्वहूणान् विजेतुं तौ संघशक्तिमवाप्य च ।
यतमानौ दिवारात्रं नाप्नुतां जयमेव हि ॥ ४३

नवीनशस्त्रसंघातं शिरस्त्राणानि शक्तिशः ।
पादत्राणानि दृढानि प्राप्य सर्वे तु संयुगे ॥ ४४

अनेकसैन्यसंघातैः वाहिनीशकटैः परम् ।
अनेकघोरयुद्धान् तौ चक्रतुः प्रजया सह ॥ ४५

अन्ततो हूणवर्गास्तु द्राविता नाशिताः परम् ।
युद्धैर्नानाप्रकाराख्यैः शाश्वतं राजभूतले ॥ ४६

राजस्थानीयमाहात्म्यं ज्ञात्वा हूणाः कदापि ते ।
नैव याताः पुनर्योद्धुं संघीभावसमायुतैः ॥ ४७

राजस्थानीयलोकैश्च परं ते मिश्रिताः स्वयम् ।
अन्योन्यभावसौहार्दैः राष्ट्रधारासु जीवने ॥ ४८

एवं कार्यनिमग्नौ तौ श्रीयशोविष्णुवर्धनौ ।
चक्रतुः नृपदेशं तु संघीभावेन रक्षितम् ॥ ४९

एतादृशं महत्कार्यं विधायैतौ दिवं गतौ ।
समस्तराजचक्रं तु स्तौति तौ विष्णुवर्धनौ ॥ ५०

अनंतरं बहोः कालात् गुहिलीयाः समागताः ।
बाप्पारावः प्रसिध्दात्मा नामवान् गुहवंशजे ॥ ५१

विष्णुवर्धनयशोविभवाद्यैः देशभक्तिभरितैर्वरकार्यैः ।
राजदेशजनताहृदि नित्यं राष्ट्रभक्तिरचला हि विजाता ॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' श्रीयशोविष्णुवर्धनौ ' नाम चतुर्थः सर्गः समाप्तः ॥]

पञ्चमः सर्गः ।

५. बाप्परावलः ।

राजदेशजनता बहु नष्टा हूणवर्गकृतदारुणयुद्धैः ।
रक्षितुं निजकुटुम्बजनालिं धाविता बहुजना वनभूमिम् ॥ १

उत्तमो गुहिलनामकभूपः रामचन्द्रविभुवंशजमूर्तिः ।
शात्रवालिकृतमारणहोमात् प्राप काननमसौ सकुटुम्बः ॥ २

कानने गिरिगुहासु निवासात् व्यापृतं गुहिलनाम जनेषु ।
अर्कपूजनसमात्तमहिम्ना भव्यसन्ततिमवाप महात्मा ॥ ३

तस्य संततिचये बलशाली धैर्यबुद्धिसमलङ्कृतराजः ।
बाप्प एव समभूदिति लोके किं वदन्त्यतिशयं भवतीह ॥ ४

पेतिहासिकजनाः प्रभुरावं तस्य वंशज इति प्रथयन्ति ।
रम्यभव्यगुणराजितबाप्पं विक्रमादिगुणसज्जितमूर्तिम् ॥ ५

इध्मसाम्यगतदैहिकमूर्तिः नित्यचालितमहाभययुद्धे ।
प्राप रावजनकः सपदेऽत्र मृत्युगह्वरतलं बहु युध्यन् ॥ ६

मातृमूर्तिसहितः खलु भक्त्या तातहीननृपबाप्पलरायः ।
ब्राह्मणस्य सदने बहुकालं धेनुपालनविधिं विचकार ॥ ७

अन्यसन्ततिरपीह सहेलं शात्रवीयकपटावृतयुद्धे ।
तस्य मृत्युसदनं खलु पेदे शासनाददयमाशु यमस्य ॥ ८

कल्यकालसमये स च नित्यं स्नानकर्मादिनिजदैनिककार्यम् ।
संविरच्य चपलं बहुभक्त्या देवतार्चनविधिं विचकार ॥ ९

मातृवन्दनविधिं स च रावः देवतार्चनसमं प्रति नित्यम् ।
कल्यरञ्जितमहाशुभकाले संविधाय बहुभक्तिपरीतः ॥ १०

प्रातरेव खलु वाडवधेनूः चारणाय बहुदूरमसौ हि ।
अन्यभिल्लनिचयैः सह नीत्वा सायमेति सदनं निजगोभिः ॥ ११

अष्टवर्षपरिपूरितकालं यापयन् भुवि विजीवति मात्रा ।
ब्राह्मणस्य गृहकर्म विकुर्वन् लब्धशान्तिमयजीवनतृप्त्या ॥ १२

चारणाय सकलाश्च विसृज्य भिल्लबालनिचयैः बहु खेलन् ।
सायमेति निजगेहममीभिः धेनुधूलिलुलितालकदीप्त्या ॥ १३

कालचक्रचलनेन समस्तं भूतले लसति नूतनदृश्यैः ।
यत्र किं नु भवतीति न कोऽपि ज्ञास्यति स्वधिषणाकृतभावैः ॥ १४

दृष्टिमार्गमविलम्बितमस्य प्रागता सपदि गौश्च विशिष्टा ।
तासु गोषु न ददाति हि दुग्धं प्रत्यहं किमिति चित्रमहोऽत्र ॥ १५

वच्मि सत्यमधुना मम धेनोः प्रत्यहं पिबति दुग्धमशेषम् ।
अन्तरेण खलु वाप्पलरावं कोऽपि नैव विदधाति च चौर्यम् ॥ १६

शङ्कया व्यथितमानसविप्रः वाप्परावजननीं निजगाद ।
तावकीनसुत एव नितान्तं धेनुदुग्धमखिलं पिबतीह ॥ १७

चौर्यमेव विदधात्ययमत्र द्रोहबुद्धिकलितः तव पुत्रः ।
तस्य वर्तनमहो विषमात्तं बोधय त्वमिह नीतिपदानि ॥ १८

अत्र जीवनमहो बहुकष्टं पैतृकं तव न चास्ति धरण्याम् ।
मानवीयकरुणालयचित्तः तुभ्यमेव हि ददौ मम गेहम् ॥ १९

चोरवाल इति तावकपुत्रः भावितं मनसि नैव कदापि ।
ईदृशं यदि तदीयवर्तनं सत्वरं गमनमेव सुयोग्यम् ॥ २०

एवमेव खलवर्तनमस्य वर्तते यदिह मामकगेहे ।
आशु मामकगृहं परिहाय गच्छ गच्छ तवमार्गमवेक्ष्य ॥ २१

तस्य वाक्यनिचयश्रवणेन मातृमूर्तिवदनं रविबिम्बम् ।
प्राप तत्क्षणमसौ निजसूनुं रुष्टवाक्यसरणीं निजगाद ॥ २२

गौहलीयकुलजातकुमार ब्राह्मणेन भणितं किमु सत्यम् ।
गोपनीयमिह नैव चकास्ति यत्कृतं वद तदेव समस्तम् ॥ २३

आकलय्य बहुकम्पितगात्रः मातृवाक्यमदयं परिणद्धम् ।
बाप्परावनृपतिः शुचिदीप्तः साक्षरं लघुपदैः निजगाद ॥ २४

नाहमस्मि कृतवान् खलु चौर्यं दुग्धमत्र वरभूसुरधेनोः ।
ब्राह्मणस्य वचनेन विदग्धं मानसं मम दुनोति च मातः ॥ २५

अम्ब मामकपदं शृणु शान्तं चोरकर्म न मया कृतमेव ।
ज्ञायते न किमपि वृत्तमकृत्यं केन किं कृतमिदं खलु कुत्र ॥ २६

चोरकर्मणि मनो न कदापि लग्नमेव जननि शृणु वाक्यम् ।
शेमुषी यदि रता मम चौर्ये तत्क्षणं मरणमेव वृणीयाम् ॥ २७

आनिशम्य जननी बहुतुधा पुत्रकस्य वचनं करुणात्तम् ।
शान्तसागरसमानमानसा चन्द्रबिम्ववदना प्रविरेजे ॥ २८

बाप्पराट् खलु निनाय परेद्युः चारणाय वरवाडवधेनूः ।
पूर्ववत् विपिनपर्वतभूमीः चिन्तया क्षुभितचित्तसमुद्रः ॥ २९

पूर्ववद्विपिनपर्वतभूमौ भिल्लबालकगणैर्नहि बाप्पा ।
भोक्तुमद्विवनखेलनसारं यात एव बहुपीडितचित्तः ॥ ३०

कारणं किमपि भाति ममात्र शान्तमानसपथा प्रविलोकम् ।
साधयेयमिति निश्चितचित्तः भावनानिशितलोचनदृष्टिः ॥ ३१

किन्तु चोर इव बाष्पलरावः निर्गतः प्रियगवां पदयायी ।
यत्र ताश्च चरितुं गतवत्यः तत्र गोपिततनुः सहसाऽयम् ॥ ३२

आशु मातृहृदयेन वनान्ते सक्रमाञ्चितपदावलिगत्या ।
कामधेनुरिव गच्छति दातुं क्षीरमेव च सुताय दिनान्ते ॥ ३३

कुत्र गच्छति विसर्जति दुग्धं किं करोति जननी मम धेनुः ।
स्वादु दुग्धमिह कः पिबतीति शोधयेयमथ संशयबुद्धिः ॥ ३४

कुत्र गच्छति शनैश्च विशिष्टा गौरियं धरणिवक्रितबुद्धिः ।
ऊष्मिभारजनितालसगत्या निर्निमेषनयनः प्रसमीक्ष्ये ॥ ३५

एवमादिविविधाकुलभावैः जल्पयन् मनसि बाष्पलरावः ॥
निर्ययौ कपिलगोः खुरमार्गे मन्दमन्दचलनैर्बहुदूरम् ॥ ३६

तत्र रम्यतरुमण्डलयूथे स्वात्मदेहमभयावृतकोणे ।
गोपितं बहुलतावलिरम्ये संचकार निशितेक्षणधेनुः ॥ ३७

मञ्जुगन्धकुसुमाञ्चितवृक्षैः गोपितामलपवित्रधरित्र्याम् ।
गोस्तनस्रुतकवोष्णपयोघैः सिञ्चितामलधरां बहु चक्रे ॥ ३८

तत्र बिल्वसमलङ्कृतभूम्यां भूमिगह्वरतले बहुछन्ने ।
सुन्दराकृतिविराजितमूर्तौ गौरियं स्रवति दुग्धमजस्रम् ॥ ३९

गौस्तु गच्छति पुरः प्रबलेन निर्भया बहुलवृक्षपरीताम् ।
शान्तशीतलसदागतिपूर्णां दिव्यसौरभपरीवृतभूमिम् ॥ ४०

धेनुना कृतममोघविधानं नेत्रपर्वविमलं प्रविलोक्य ।
पुण्यभावपरिकम्पितदेहः संजगाद वचनं मधुपूर्णम् ॥ ४१

दृष्टमत्र निशितं बहुतृप्त्या दर्शनीयमधुना खलु भूमौ ।
तत्र किं भवति भूस्थलिमेत्य सत्वरं नयनसुन्दरमीक्ष्ये ॥ ४२

प्राप्य तत्र ददृशे स तु बाप्पः क्षीरफेनधवलायितदेहम् ।
अट्टहासयुतशङ्कररूपं एकलिङ्गममलं हसितं च ॥ ४३

दर्शनानुपदमेव स रावो ओं नमो भगवते गिरिशाय ।
शङ्कराय च नुतैर्बहुशब्दैः सुस्वरैर्नमकमत्र पपाठ ॥ ४४

वन्दनं प्रविचकार च तूर्णं जल्पनानुपदमेव स बाप्पः ।
भक्तिभावपरिपूरितचित्तः तन्मयेन विगतस्पृहबुद्धिः ॥ ४५

मौनभावसमलंकृतमूर्तिः विस्मयावृतमनाः सपदं सः ।
तत्र पार्श्वतलभूषितसानुं हारितं मुनिवरं प्रणनाम ॥ ४६

नामितं वरतनुं प्रियबालं संजगाद हरितः स तपस्वी ।
एकलिङ्गकृपया च मनस्वी त्वं भविष्यसि पराक्रमशाली ॥ ४७

ईदृशं भुवि शुभास्पददृश्यं पूर्वपुण्यनिचयेन महात्मा ।
द्रक्ष्यतीति कथितं पटुशास्त्रैः धन्यजीवनमयोऽसि कुमार ॥ ४८

आगतोऽसि विपिनं गहनं त्वं नाम किं तव कथं प्रियबाल ।
किं करोषि वद तावकवंशे के भवन्ति सुखसद्मनि सद्यः ॥ ४९

बाप्पराव इममह्वत लोकाः तातपादरहितोऽस्मि महर्षे ।
मातृमूर्तिसहितो निवसामि नैव सन्ति मम वंशजभूपाः ॥ ५०

बालकः प्रियऋषिं सहसैव सर्वजीवनकथां निजगाद ।
आचकार मधुगन्धिलपुष्पैः पादपूजनममोदितभक्त्या ॥ ५१

तस्य पूतचरणाम्बुजसक्तः जीवनान्तमभवत् प्रियशिष्यः ।
हारितं मुनिवरं स तु नित्यं मार्गदर्शकगुरुं बहु मेने ॥ ५२

धेनुयूथमखिलेन स वाप्पा सायमेव बहुहर्षितचित्तः ।
मातरं विमलवाडवमूर्तिं प्राप्य सत्वरमिदं निजगाद ॥ ५३

आनिशम्य ऋजुवर्तनवाप्पं ब्राह्मणः परमवाप च तृप्तिम् ।
सत्यभावलसितं प्रियशिष्यं हारितस्य भुवि विश्रुतकीर्तेः ॥ ५४

हारितस्य वचनं प्रतिपाल्य वाप्परावलनृपः प्रियभिल्लैः ।
स्नेहपूर्वकवचस्सरणीभिः संघशक्तिमतुलां स चकार ॥ ५५

युद्धकर्मणि चणांश्च विचक्रे स्वीयसैन्यगतयोधकवर्गान् ।
दिव्यनव्यपथि संघटितास्ते भाविभारतभटा इव चेलुः ॥ ५६

स्वीयसैन्यपटलेन च वाप्पः चित्तडीथनिकटे बलशक्त्या ।
सर्वभिल्लसहितः प्रियभूपः राजधानिमतुलं सस्रजेऽसौ ॥ ५७

ईषदात्मगतगर्वपरीतः शासयन्निजबलाद्भुतधैर्यं ।
स्वीयशक्तिकृतमङ्गलराज्ये मत्तवारणसमं स विरेजे ॥ ५८

वीक्ष्य तं मदभरेण विभान्तं व्याजहार हरितः प्रियवाक्यैः ।
वाप्परात् शृणु मदीयपदालिं भवितुमर्हति भवान् न हि राजा ॥ ५९

एकलिङ्ग इति विस्मर मा त्वं राज्यचालनविधौ निजकर्ता ।
केवलं त्वमसि नामककर्ता देव एव खलु नाटककर्ता ॥ ६०

आदिदेश मृदुवाप्पलरावं सर्वशक्तिमयदैवतसृष्टिम् ।
एकलिङ्गपदवर्तनशीलः तस्य शासनवशात् स च भेजे ॥ ६१

तत्र गौहिलकुले जनितास्ते पूजयन्ति बहुधा निजभक्त्या ।
एकलिङ्गमनिशं समबिल्वैः रुद्रसूक्तकमलाभिषेचनैः ॥ ६२

तत्र भात्युदयपूर्भुवि सीम्नः क्रोशदाशकतलान्तरदेशे ।
तीर्थगामिजनताहृदि केन्द्रं कैविलासपुरि दीपितलिङ्गम् ॥ ६३

भक्तकोटिपरिपूजितमूर्तिः दिव्यशिल्पबहुशिल्पितभित्तिः ।
पूर्वभूपतिविराजितकीर्तिः राजतेऽत्र शुभमन्दिरमूर्तिः ॥ ६४

एकलिङ्गविभुमण्डितदेशः वाप्परावलसमस्तचरित्रम् ।
मौनभाववहुनिष्ठितरूपः सादरं वदति भक्तजनालिम् ॥ ६५

एकलिङ्गविभुदर्शनकाले जायते हृदि पुराकृतदिव्यः ।
राजवंशजविनूत्नपवित्रः राष्ट्रभक्तिपरिवेष्टितभावः ॥ ६६

एकलिङ्गेश्वराशीभिः हारीतकृपया कृतम् ।
सार्थकं धेनुसेवाभिः वाप्परावस्य जीवितम् ॥ ६७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' वाप्पलरावो ' नाम पञ्चमः सर्गः समाप्तः ॥]

षष्ठः सर्गः ।

६. राज्ञी पद्मिनी ।

चितौडुदुर्गस्य सुधाप्रसादे रम्ये विशाले महनीयकोशे ।
प्रसन्नताशिल्पितहंसतल्पे विभाति तन्वी कमलालयेव ॥ १

तदीय सौन्दर्यविसर्पिताभया सर्वं सुरम्यं भवनं नितान्तम् ।
कार्तीकराकेशमयूखलिप्तक्षीराब्धिवद् भाति मनोहरं नु ॥ २

सा पद्मिनी पद्मभवेन नूनं समस्तसौन्दर्यविलासिनीव ।
विनिर्मिता राजकुले महिम्ना सुतप्तकार्तस्वरसुन्दराङ्गी ॥ ३

सा राज्यलक्ष्मीः खलु राज लोके समस्तराष्ट्रस्य मतल्लिकापि ।
एकत्रमूर्तीकृतराजकीर्तिः चितौडुदुर्गस्य विलासलक्ष्मीः ॥ ४

अनन्तभोगैरुपलालिताङ्गी समस्तकन्याजनमण्डिता सा ।
विलासवल्लीजनितालतान्ता चितौडुकासारविरूढपद्मिनी ॥ ५

अनन्तसौभाग्यविलासलास्यैः विनूत्नभावैः कविकल्पनाभिः ।
विद्युल्लतास्पन्दनरम्यभाभिः सा निर्मिता विश्वसृजा स्वबुद्ध्याम् ॥ ६

परम्पराप्राप्तपवित्रतायाः प्रतीकरूपा ललनाजनेषु ।
ललामभूता वरवर्णिनी सा समस्तराष्ट्रस्य च वन्दनीया ॥ ७

स्वाहास्वरूपा भुवि साहसी सा सदा रता भर्तृपदारविन्दे ।
अदृष्टसूर्या प्रचुरं विकासिता सा पद्मिनी पद्मजकन्यका हि ॥ ८

पवित्रतां भारतदेशकीर्तिं संरक्षितुं सा स्वराष्ट्रे ।
नो चेत् कथं सा पतिता सवेगं कृपीटयोनौ स्वसखोजनेन ॥ ९

नितान्तचन्द्रोदयशान्तहासैः स्मिताप्यलास्यस्य वरप्रकाशैः ।
समस्तदेहे प्रसरद्विलासैः रराज सा मञ्जुलराज्यलक्ष्मीः ॥ १०

पुरो मुखाब्जात् वहुभीतचित्तं स्थातुं न शक्यं भवतीति मत्वा ।
छन्नं घनीभूततमिस्रजालं कौटिल्यभावेन शिरोजभारे ॥ ११

मनोज्ञनीलालकचित्रितं तन्मुखाब्जमस्याः कमनीयदृश्यम् ।
तनोति लोकाय मिलिन्दयुक्तं नीरेजसंदर्शनतृप्तिभावम् ॥ १२

फालं तदीयं विशदार्थभावैः अर्धेन्दुवद् भाति मनोज्ञभाभिः ।
दीर्घानुगुण्या वरनासिका च विराजते चम्पककुड्मलाभा ॥ १३

तस्याः भ्रुवौ मन्मथचापसाम्यं संप्राप्य नित्यं नुतनभ्ररूपम् ।
चकासतः प्रेक्षकमानसे तु नवं नवं प्रोद्भवमारभावैः ॥ १४

तदीयनेत्रे शफरीमनोज्ञे विलोकिनां प्रेक्षणभावजालात् ।
त्रस्ते प्रयातः सभयं सवेगं दिशान्तरं प्रेक्षणजालमिन्नम् ॥ १५

कपोलभागौ मुकुरानुरूपौ विलोकिनां रूपगुणालिजालम् ।
प्रदर्शयन्तौ चलतः प्रकर्षं द्रष्टुं भवन्तो न हि योग्यरूपाः ॥ १६

दन्तक्षतार्थं सितचारुरूपास्तदीयदन्ताः शिखरायिताश्च ।
सा कुन्दकुड्मावलिदन्तरुग्भिः शुभ्रं चकासे सुदतीति लोके ॥ १७

ताम्राधरोष्ठं ननु दाडिमस्य सरागसंछन्नसुकुड्मलाभम् ।
तन्वञ्चरागं हृदयान्तरस्थं धुनोति चित्तं प्रसमीक्षितानाम् ॥ १८

किमन्तरेण प्रियपद्मिनीं तु काप्यस्ति कान्तासु ललामभूता ।
प्रश्नार्थचिह्ने समुपाद्य कर्णौ भातः प्रियं मण्डनवस्तुजालैः ॥ १९

सुनादयुक्तं मम पाञ्चजन्यं तदीयकण्ठाकृतिमेत्य भाति ।
इति स्वचिन्तां व्यपनीय नाके निद्राति विष्णुः सुखरूपमेत्य ॥ २०

स्रस्तांसरम्यौ मृदुलौ च बाहू पुष्पासवापानविजातभावम् ।
विपश्यतां तौ तनुतः सकामं प्रतिक्षणं वर्धितमारभावौ ॥ २१

उत्सेधवक्षःस्थलपीवरत्वं विलोक्य वेदण्डगणाश्च दुर्गे ।
लज्जाभिघाताः बहु ताडयन्ति कुम्भस्थलं भित्तितले सबाधम् । २२

नितम्बविम्बं पृथुरूपयुक्तं विलासयाने स्खलितं विभाति ।
विपश्यतां दृष्टिचयाधिभारैः प्रवेपमानं तुलनाविहीनम् ॥ २३

ऊरू तदीयौ मृदुमांसलौ तौ कवाटभावे लसतोऽनुरूपम् ।
अश्वत्थपत्राकृतिकामगेहं संरक्षणार्थं खलु मे वितर्कः ॥ २४

वृत्तानुपूर्वे खलु जानुनी ते समस्तदेहस्य भरानुवाहिके ।
सुवर्णवर्णाकृतिकान्तिपूर्णे भातः सुरूपे नटनानुरूपे ॥ २५

सा पद्मिनी मञ्जुलपादपद्मा लाक्षारसारञ्जितरम्यपादा ।
शनैः शनैः चालनहंसयाना सदा वसत्येव सुपद्मषण्डे ॥ २६

वरो महीपः खलु रत्नसिंहः जातस्तदीयाङ्गसुखानुभोक्ता ।
सर्वोऽपि लोके गुलिकानुभावैः सुखानुभूतिं भजते रहस्यम् ॥ २७

न कोऽपि तां ग्राहयितुं शशाक वीरस्य पत्नी भुवि दुर्लभा च ।
इतीव चिन्ताप्रविदग्धमानसः सर्वोऽपि भक्त्यार्चनमादधाति ॥ २८

शिसोदियावंशपयोऽधिजाता लक्ष्मीसमानाभिरियं प्रियाभिः ।
परीवृता राजकुलाङ्गनाभिः सालङ्कृता भाति चित्तौडुदुर्गे ॥ २९

संध्यारुणाभावृतचीरवेषा निरन्तरं दीपशिखेव तन्वी ।
चन्द्रार्धफाले तिलकाञ्चिता सा विभाति मूर्तीकृतसान्ध्यरूपा ॥ ३०

चित्तौडुदुर्गे परवीरभीकरं एकत्रमूर्तीकृतसुन्दराङ्गम् ।
श्रीरत्नसिंहं हृदये धरन्ती बभौ नताङ्गी प्रियपद्मिनी सा ॥ ३१

सुतप्तकार्तस्वरवर्णदेहा तप्ता भृशं वैरिकुवर्तनैश्च ।
दग्धुं स्वदेहं परभावदूष्यं विवेश गर्भं खलु पावकस्य ॥ ३२

श्रीरत्नसिंहं मनसा स्मरन्ती महोन्नतिं भारतमातृमूर्तेः ।
भूदेविकन्यां जननीं च सीतां विवेश वह्निं समिदाकृतिः सा ॥ ३३

तां द्रौपदीं पावकजातकन्यां सा संस्मरन्ती हृदये ब्रुवन्ती ।
त्वमग्निजाताऽसि पवित्रगात्रि पवित्रतायै प्रविशामि वह्निम् ॥ ३४

इति ब्रुवन्ती पटुरागयुक्ता वह्निं समाराध्य वितप्तगात्री ।
शुद्धान्तनारी समलङ्कृता सा सुधाप्रसादाद्युगपद् विवेश ॥ ३५

विलसतु भुवि राज्ञी सर्वनारीललामा
सकलजगति रम्या हावहेलाविलासा ।
अमलमधुरसाध्वी पद्मिनी राष्ट्रकीर्तिः
हृदयसरसि भव्या शारदीयाब्जरम्या ॥ ३६

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' राज्ञी पद्मिनी ' नाम षष्ठः सर्गः समाप्तः ॥]

सप्तमः सर्गः ।

७. राणारत्नसिंहः ।

राणाशाखीय भूपालाः युद्धतन्त्राः शिसोदियाः ।
स्वतन्त्रराज्यं संस्थाप्य राजस्थाने विरेजिरे ॥ १

सूर्यवंशसमुद्भूताः रणे राणामहोदयाः ।
परम्पराऽऽत्तसंस्कारैः धैर्यधर्मनयापराः ॥ २

सर्वे सूर्यमयूखाभैः रेजुः सर्वधरातले ।
नानासारविचारैश्च देशभक्त्या प्रपूरिताः ॥ ३

रत्नसिंहो महायोद्धा सर्ववीराभिनन्दितः ।
सोऽयं चितौडुदुर्गे तु सौधराजं विनिर्ममौ ॥ ४

अयमासीत् प्रियो लोके वीर्यवान् गुणसंयुतः ।
पंचानन इवारेजे म्लेच्छमातङ्गरूपिणाम् ॥ ५

तस्यासीत् पद्मिनी नाम सौन्दर्यप्रियदर्शिनी ।
मानाभिमानसाम्राज्ञी ललामेषु ललाम सा ॥ ६

तत्र दुर्गे विनिर्माय पद्मिनीसौधमन्दिरम् ।
तदा विख्यातवीरोऽभूत् भारते राजपूरुषः ॥ ७

रत्नसिंहस्य वीरत्वं पद्मिन्याः चारुता भुवि ।
कथारूपेषु श्रूयन्ते विश्वलोकैः पदे पदे ॥ ८

तस्य कीर्तिं निशम्यैव राजानः पादवर्तिनः ।
जाताः तदा प्रजा नूनम् अष्टैश्वर्यविभूषिताः ॥ ९

अश्वसेना च तस्यास्ति संख्याऽतीतबलान्विता ।
योद्धारो भान्ति शस्त्रास्त्रैः यमराट्किंकरा इव ॥ १०

तदानींतनकाले तु क्रूरः खिल्जी विचारयन् ।
भारतं नष्टरूपस्थं कर्तुं स्वीयचमूचयैः ॥ ११

मेवाडुं भूतलस्वर्गं विराजन्तं सहस्रशः ।
श्रुत्वा परमलोभेन खिल्जी प्राप्तः सुभारतम् ॥ १२

महिमानं महाराजः श्रुत्वा खिल्जी भयाकुलः ।
दानोपायेन शत्रुं तं जेतुं स्वात्मनि निश्चितः ॥ १३

श्रुत्वा खिल्जी परं मुग्धः पद्मिन्याः यौवनं वपुः ।
सर्वाङ्गसुन्दरीं तन्वीं लावण्याश्चितमानिनीम् ॥ १४

रत्नसिंहं विजित्याशु भवेयं पद्मिनीपतिः ।
तस्मात् कार्यद्वयं चापि कर्तव्यं सत्वरं मया ॥ १५

इति संचिन्त्य खिल्जी तु मार्गान्वेषणतत्परः ।
किन्तु नैकोऽपि लब्धोऽभूत् रत्नसिंहसमो भुवि ॥ १६

कण्टकं कण्टकेनैव चोद्धर्तव्यं सदा भुवि ।
तस्मात् कण्टकभूपेन साधनीयोऽस्ति भूपतिः ॥ १७

तस्मात् खिल्जी प्रयत्नेन यस्मै कस्मै धनं महत् ।
दत्वा तेनैव योधेन शत्रुं जेतुं समीहते ॥ १८

तदैव भावनायोग्यं मित्रं कृत्वा च हैन्दवम् ।
तस्मै च प्रददौ रम्यां धनाराशिं महाप्रियाम् ॥ १९

तस्य नामास्ति चारित्र्ये मालिकाकापुरःप्रियः ।
सैव सेनापतिः जातः चाल्लावुद्दीन् खलस्य तु ॥ २०

तं जेतुं दुष्करं लोके तथा खिल्जी विचार्य सः ।
मालिकापूरुणा सार्धं सन्धिं चक्रे दुरोदरः ॥ २१

तेन सार्धं चितौडाख्यं दुर्गं जेतुं स निश्चितः ।
तमेवं शासयामास युद्धाय कृतनिश्चयः ॥ २२

अल्लावुद्दीन् दुरात्मा तु पद्मिनीं प्राप्तुमुद्यतः ।
प्रतस्थे योद्धुमत्रस्थैः रत्नसिंहादिभिः परम् ॥ २३

वित्तलोभेन मेदिन्यां देशद्रोहं विकुर्वते ।
मानवाः तुच्छभावात्ताः भुवि ते शाश्वता इति ॥ २४

स्वार्थसाधनमग्नास्ते यतन्ते शत्रवः परम् ।
विना कष्टेन भाग्यं तु संप्राप्तुं यतते जनः ॥ २५

अन्योन्याश्रयरूपेण जायते भुवि संकुलम् ।
समरं सर्वलोकानां हानिर्भवति निश्चयम् ॥ २६

अल्लावुद्दीन् च खिल्जीयः त्रयीशून्यत्रयीविधौ ।
मध्ये प्रचण्डसैन्येनाऽरौत्सीन्मेवाडुमेदिनीम् ॥ २७

तस्य सेनापतिर्नूनं हिन्दुः मालिकाकापुरः ।
प्रलोभितः परं वित्तैः मुसल्मान्धर्ममाश्रितः ॥ २८

मालिकापूरुणा युक्तः स खिल्जी यो वृथामतिः ।
व्यूहापोहैः अनीकैश्च योद्धुं यातः पदे पदे ॥ २९

रत्नसिंहः तदा चक्रे युद्धं तेन समं रुषा ।
आत्मीयैः सप्तपुत्रैश्च मिलित्वा पद्मिनीपतिः ॥ ३०

आयान्तं शत्रुवर्गं तं स्वीयसैन्यैः समावृतः ।
निरोद्धुं यतमानोऽसौ जयं लेभे कथंचन ॥ ३१

जीवग्राहं विधायैनं राणा तं क्रूरचेतसम् ।
प्रार्थितः तेन शान्तात्मा तत्याजानुपदं तदा ॥ ३२

महान् त्वं राजराजोऽसि त्वत्समो नास्ति भूतले ।
निवृत्तोऽस्मि सदा युद्धात् न काङ्क्षे युद्धमत्र भोः ॥ ३३

इत्युक्त्वा तस्य सान्निध्ये मुर्विंत लब्ध्वा स खिल्जिकः ।
ययौ गेहं प्रशान्तेन वञ्चनाभाववेष्टितः ॥ ३४

अनन्तरं वहोः कालात् प्रेषयामास पत्रकम् ।
रत्नसिंहाय भूपाय मैत्रीमिच्छन् प्रियं तदा ॥ ३५

तव पत्नीं तु मह्यं त्वं कासारे दर्शय प्रियाम् ।
अशस्त्रपाणिः भूत्वाऽहं तव सामीप्यमेमि भोः ॥ ३६

पठित्वा तस्य पत्रं तु मित्रभावेन सज्जितः ।
रत्नसिंहः तदीयाशां पूर्णं कर्तुं समीहितः ॥ ३७

शान्तिस्थापनसिद्ध्यर्थं हेतुर्भूराजकारणम् ।
कर्तव्यं भूतले भाति योग्यं चायोग्यमेव हि ॥ ३८

तदर्थं पत्रमेकं सः लिखित्वा प्रेषयत् स्वयम् ।
त्वदीयां कामनां सत्यं पूरयेयं समेहि भोः ॥ ३९

तत्पत्रं प्राप्य खिल्जी सः परमानन्दनर्तितः ।
शत्रुः हस्ते समायातः जितवान् चित्तडुं प्रियम् ॥ ४०

भूतले पद्मिनीनाथः सत्वरं भविताऽस्म्यहम् ।
चित्तौडुमन्दिरे सौख्ये निवसेयमहर्निशम् ॥ ४१

इति मत्वा प्रियं सैन्यं युद्धसन्नाहतत्परम् ।
विधाय सर्वं सश्रद्धं शासयामास सत्वरम् ॥ ४२

अल्लावुद्दिन् ससैन्यश्च दुर्गपर्यन्तमेत्य सः ।
सर्वसैन्यं बहिः दुर्गात् निक्षिप्येको जगाम तम् ॥ ४३

राजानं रत्नसिंहं तु मित्रवत् द्रष्टुमिच्छुकः ।
तथेत्युक्त्वाऽस्य सान्निध्ये कृतवान् प्रेमभाषणम् ॥ ४४

स्वागतं व्याजहारैषः नव्यमित्राय सादरम् ।
अल्लावुद्दीन् च कोष्ठे तु रत्नसिंहः प्रियंवदः ॥ ४५

एहि खिल्जी महन्मित्रं भवेवावां सुहृद्वरौ ।
विद्वेषो नैव भात्येव जीवने तु कदापि नौ ॥ ४६

रत्नसिंह भवाम्यत्र मित्रं ते शाश्वतं भुवि ।
आवयोः मित्रता यावत् धरित्री निस्तुला स्थिरा ॥ ४७

अधुना द्रष्टुमिच्छामि पद्मिन्याः सुन्दरं मुखम् ।
कासारे पद्मिनीषण्डे कल्पयस्व सुहृद्वर ॥ ४८

सत्वरं कल्पयामास कासारे विम्बितं मुखम् ।
पद्मिन्याः रत्नसिंहोऽयं मित्रानन्दस्य कारकम् ॥ ४९

दृष्ट्वा तस्या मुखं रम्यं कासारे पद्मषण्डजे ।
खिल्जी प्राप महाकामं किन्तु सर्वं जुगोप सः ॥ ५०

तस्याः सौन्दर्यमूर्तिं तु दृष्ट्वा तत्र विमोहितः ।
तामेव स्वीयपत्नीत्वे नेतुं खिल्जी समुद्यतः ॥ ५१

पद्मिनीवदनाम्भोजं विम्बितं सरसि प्रियम् ।
विलोक्य पद्मिनीतुल्यां पद्मिनीं चकमे हृदि ॥ ५२

संतुष्टोऽस्मि परं मित्रं मुखनीरजदर्शने ।
धन्यवादान् ददामीह तुभ्यं मे राजपुत्रक ॥ ५३

देशं मदीयं गच्छामि प्रेषितुं सुहृदं तव ।
सोदकान्तं मया सार्धम् एहि भो लोकवन्दित ॥ ५४

किञ्चित् सैन्यं रत्नसिंहः दीर्घमालोच्य बुद्धिमान् ।
चित्तौडुदुर्गसान्निध्ये न्यक्षिपत् शान्तिकारकः ॥ ५५

द्वावप्येतौ यदा यातौ दुर्गात् वाह्यतलं शनैः ।
पूर्वनिश्चितमार्गे तु शात्रवो परिवेष्टिताः ॥ ५६

सत्वरं रत्नसिंहस्य सैन्यं सर्वं समागतम् ।
तदानीं भयदं युद्धं जातं तत्रैव निस्तुलम् ॥ ५७

संग्रामः तुमुलो जातः सेनयोरुभयोरपि ।
किन्तु दौर्भाग्यमूलेन हैन्दवा निर्जिताः तदा ॥ ५८

रत्नसिंहो मृतो युद्धे मित्रद्रोहेण वञ्चितः ।
मित्रत्वमीहमानोऽसौ शत्रुभूत्वा महीतले ॥ ५९

यदि लक्ष्मीश्वरो लोके भाति सौख्ये नरेश्वरः ।
भार्या रूपवती जाता, शत्रुत्वं तथ्यमेव हि ॥ ६०

रत्नसिंहस्य वन्धुश्च लक्ष्मणः सिंहनामकः ।
तस्मिन् युद्धे मृतस्सैन्यैः अरिवीरान् निहत्य च ॥ ६१

अल्लाबुद्दिन् स खिल्जीयः स्वायत्तं कृतवान् द्रुतम् ।
चित्तौडुदुर्गराजं तु मालिकापुरसंगमात् ॥ ६२

तदानीं पद्मिनीं राज्ञीं स्वकीयां कर्तुमुद्यतः ।
जगाम पद्मिनीसौधं अल्लाबुद्दिन् रुषाऽशु सः ॥ ६३

श्रुत्वा तदीयभर्तारं युद्धे सर्वैर्युतं मृतम् ।
समागतं च खिल्जीयं कामान्धं पशुरूपिणम् ॥ ६४

पद्मिनी तरुणी राज्ञी त्रिषु लोकेषु सुन्दरी ।
सखीभिः सपदं भेजे वीतिहोत्रं स हेलया ॥ ६५

तत्रैव न्यवसन् सर्वे चित्तौडे हैन्दवास्तदा ।
अन्यथा शरणाभावात् व्यथाऽविलद्दो भये ॥ ६६

अनैतिकं भाति महीतलं सदा अराजकं चेद्यदि सत्यमेव ।
अराजदीक्षा रजनी कदापि किं सुन्दरी ध्वान्तपरीतरूपा ॥ ६७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' राणारत्नसिंहो ' नाम सप्तमः सर्गः समाप्तः ॥]

अष्टमः सर्गः ।

८. राणाहम्मीरः ।

मरणाद्रत्नसिंहस्य प्रजा भीता ययुः द्रुतम् ।
अन्यत्रगमनासक्ताः स्त्रीयजीवनलोलुपाः ॥ १

अराजकेन संव्याप्तं बहुभीतिपरिप्लुतम् ।
रक्षितुं राजसंस्थानं नैव नेता समाययौ ॥ २

पद्मिन्याः वह्निपातेन स्त्रियः सर्वा व्यथाऽविलाः ।
सोरस्ताडं रटन्त्यस्ताः जीवने निस्पृहावृताः ॥ ३

जाताः ता बहिरागन्तुं शङ्कालज्जाभयाकुलाः ।
गृहं बभूव सर्वस्याः कारागारसमं तदा ॥ ४

अराजकं परिव्याप्तं देशे सर्वत्र सर्वदा ।
शात्रवो तिमिराकाराः व्याप्ताः चौर्यै भृशं रताः ॥ ५

परम्परामनुसृत्य राजानो राज्यपालकाः ।
नाभवन् तत्र कुत्रापि राजस्थाने विशेषतः ॥ ६

स्वायत्तीकृत्य चितौडुं खिल्जी राजा बभूव च ।
सर्वदा हननं कुर्वन् शशासैकमहीपतिः ॥ ७

जनाश्च भीरवो भूत्वा धृत्वा प्राणान् गृहे गृहे ।
दैवनिन्दां प्रकुर्वन्तः मूका जाताः परं भिया ॥ ८

अस्यां स्थित्यां महाधीरः दूरदर्शी महामतिः ।
केवलं प्रज्ञया दीप्तः पुरोगामी बभूव च ॥ ९

स चास्ति राणावंशीयः पूर्वापरविचक्षणः ।
समयंपरिशील्यास्तावत्वृणोत् राजकारणम् ॥ १०

तस्य नामास्ति हम्मीरः झंझानिलसमो विभुः ।
ज्वलन् विवेश कर्तव्ये प्रगाढं राष्ट्रभावनः ॥ ११

पौत्रो लक्ष्मणसिंहस्य राणा हम्मीरनामकः ।
राजपुत्रेषु चैतन्यं जनयामास सत्वरम् ॥ १२

रथ्यायां पादमार्गेषु कुटीरे सौधमण्डले ।
गृहाद् गृहं चरन् नित्यं देशभक्त्या महाप्रभुः ॥ १३

प्रजासु देशभक्तेषु वने ग्रामचरेषु च ।
चैतन्यभावमाकल्य वीतिहोत्र इवाबभौ ॥ १४

चित्तौडुदुर्गं संत्यज्य स्थानान्तरमसौ ययौ ।
योग्यं सौख्यमयं चैव प्रशान्तं सानुमञ्जुलम् ॥ १५

खेलवाजप्रदेशं तु स्वीयकेन्द्रं चकार सः ।
सहस्राधिकराजानः हम्मीरं शरणागताः ॥ १६

बलवन्तं च हम्मीरं विलोक्यैव जनाः परम् ।
सर्वशस्त्रास्त्रसंभारैः तमेव शरणं ययुः ॥ १७

तदा चित्तौडुदुर्गस्थाः सर्वे राणाऽनुयायिनः ।
वैषम्यभावं संत्यज्य तं प्राप्तुं कृतनिश्चयाः ॥ १८

अपारसंख्ये राजानः त्यक्त्वा चित्तौडुमाशु ते ।
खेलवाजिसमीपे तु बभूवुः स्थानिकाश्चिरम् ॥ १९

सदा प्रजाभिः सार्धं सः निवसन् स्फूर्तिदायकः ।
यूनः सर्वान् समाहूय शस्त्रविद्यां शशास सः ॥ २०

तत्र शिक्षणमाप्त्वा ते हम्मीरस्य प्रशासने ।
एकैको नैकशाखासु प्रावीण्यं प्राप सत्वरम् ॥ २१

प्रजासु धैर्यमाकल्य स्वात्मशक्तिभरान् प्रियम् ।
विधाय सैन्यं दुर्भेद्यं सज्जितः सर्वशक्तिभिः ॥ २२

खेलवाजिप्रदेशस्तु शिक्षणाकेन्द्रमेव हि ।
भेजे गजाश्वयोधैश्च निरतं तस्य शासने ॥ २३

तस्मिन् प्रदेशे राजानः हम्मीरस्य प्रशासने ।
चित्तानां संयमैः जाताः एकमार्गानुयायिनः ॥ २४

जीवनं वा सुखे लोके नो चेन्मरणमेव वा ।
मार्गद्वयं प्रभात्यत्र निर्णयस्तु यथामति ॥ २५

योद्धारं शक्तिवन्तं तं युवानं राजपूरुषम् ।
वव्रजुः पटुभक्त्या ते सूर्यं सर्वे ग्रहा यथा ॥ २६

शशासैवं स हम्मीरः सर्वान् स्वीयमतानुगान् ।
एवमादिप्रबोधैश्च कर्तव्यं संदिशन् भृशम् ॥ २७

मुक्तकण्ठं च सर्वेऽपि जगदुः सुखजीवनम् ।
कर्तव्यं च विशालेऽस्मिन् भारते सर्वमानवैः ॥ २८

एवं जनेभ्यो वाक्यं तु गृहीत्वा राजपूरुषः ।
शुभे मुहूर्ते चैकस्मिन् प्रमोदभरमानसः ॥ २९

दृष्ट्वा संघटनां राणा हम्मीरः तत्र राजके ।
प्रारेभे म्लेच्छवर्गालिं व्याहन्तुं संयुगे रुषा ॥ ३०

श्रुत्वा हम्मीरयत्नं तु तुग्लक् संतप्तमानसः ।
उन्मत्तः प्रबलोद्वेगैः हम्मीरहनने रतः ॥ ३१

प्रारम्भे केवलं शक्यं नाशनं न तु वर्धिते ।
तस्माच्च कलिकारूपे कृन्तनं योग्यमेव हि ॥ ३२

मोहम्मद् तुग्लकः तूर्णं दिल्लीतः प्राहिणोत् परम् ।
अपारवाहिनीजालं हम्मीरं जेतुमावहे ॥ ३३

सर्वं विदित्वा हम्मीरः सत्वरं चारचक्षुषा ।
शशास सैन्यं संहर्तुं तुग्लक्सैन्यं तु खण्डशः ॥ ३४

महावेगैः संपतन्तं सैन्यं दृष्ट्वा समाकुलाः ।
दधवुः सत्वरं दिल्लीं जीवनेच्छुकमानसाः ॥ ३५

तस्य शौर्यं विलोक्यैव सर्वे मोग्लाः पलायिताः ।
चितौडुदुर्गं संत्यज्य कान्दिशीकाः परं भिया ॥ ३६

स्वतन्त्रदेशं मेवाडुं चक्रे हम्मीरपार्थिवः ।
महामारणकृत्यैश्च सर्वराजसहायकः ॥ ३७

सैन्यं तदा परावृत्य कथयामास तुग्लकम् ।
अपारसैन्ययुक्तोऽयं हम्मीरः साम्प्रतं भुवि ॥ ३८

श्रुत्वा तेषां वचः सान्तं देशभक्त्या प्रबन्धितैः ।
समेतं नृपहम्मीरं परवीरभयङ्करम् ॥ ३९

पदे पदे महासैन्यं प्राहिणोत् तुग्लकः पुनः ।
निर्जेतुं कटुहम्मीरं भुवि शत्रुभयङ्करम् ॥ ४०

हम्मीरः सर्वदेशीयैः सर्वशत्रूनजीजयत् ।
आरावलिप्रदेशे तु स्वीयसैन्यसमायुतः ॥ ४१

यावत् राजा स हम्मीरः तावन्मोग्लाथिसैनिकाः ।
चित्तौडुनामदेशेऽस्मिन् निभृताः भीतिमानसाः ॥ ४२

न कोऽपि शत्रुः तं जेतुं शक्तोऽभूत् भारतावनौ ।
तस्माद्धि शान्तिपूर्णानि वत्सराणि ययुः ध्रुवम् ॥ ४३

पञ्चाशत् पूर्णवर्षाणि राज्यं चक्रे नयापरः ।
हम्मीरः प्रियदेशीयैः कल्याणायुतपालने ॥ ४४

सर्वं मेवाडदेशं तु चारचक्षुसमावृतम् ।
विधाय सैन्यसंयुक्तं पालयामास धर्मतः ॥ ४५

एकोनविंशतिसमाः सहमित्रवर्गैः संधीयशक्तिसमवेतमहाप्रभावैः ।
देशीयभक्तिभरितैः बहुवीरगीतैः धर्मेण राज्यमनिशं निभृतं चकार ॥४६

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' राणा हम्मीरो ' नाम अष्टमः सर्गः समाप्तः ॥]

नवमः सर्गः ।

९. कुम्भराणा ।

अथ प्रजानां भुवि रक्षणार्थं समागतः शात्रवगर्वहारी ।
मेवाडदेशं बहुविश्रुतं च कर्तुं पटिष्ठं बहुदुर्गयुक्तम् ॥ १

हम्मीरराणाकृतसैन्यवर्गं नवीनमार्गैः छलमर्मयुक्तम् ।
सर्वप्रयत्नादमरं समग्रं चकार दार्ढ्यं नवशक्तियुक्तम् ॥ २

मेवाडदेशं परिरक्षितुं तं चित्तौडदुर्गं परदुर्गमं च ।
नव्यस्वरूपं परिणामपूर्णं विधातुमेवात्र समागतः सः ॥ ३

उत्थानयोग्यामलदेहयष्टिः महोन्नतः स्नायुपिनद्धकायः ।
कूलङ्कषं शात्रवयुद्धतत्त्वं ज्ञात्वा वरं भाति वरेण्यमूर्तिः ॥ ४

अनन्यसौभाग्यपरीतभूपः कालक्रमेणाथ रराज देशे ।
बुद्धया शरीरेण च दार्ढ्यमूर्तिः चरित्रलोके नुतकीर्तिकायः ॥ ५

प्रज्ञाविशेषेण परालिबुद्धिं ज्ञात्वा स्वयं युद्ध्यति संपराये ।
क्रौर्येण संछन्नदयान्तरङ्गः जेगीयमानः खलु राष्ट्रलोकैः ॥ ६

धृत्वा करालं समरे परालिं अक्लेशयत्नेन कृतान्तगेहम् ।
संप्रापयिष्यत्यविलम्बितं सः समस्तलोकस्य सुखाय एव ॥ ७

शीघ्रं गृहीत्वा मसिलेखिनीं तु मनोज्ञरासिक्यमयं कवित्वम् ।
विलिख्य सो लोकहिताय सत्यं दातुं समर्थोऽस्ति कवित्वविश्वे ॥ ८

ताम्पूरदण्डं सहसा गृहीत्वा षट्कालपूर्णं स्वरवद्धगानम् ।
आलाप्य सर्वान् रसिकान् सकामं सन्तोषपूर्णान् च करिष्यतीह ॥ ९

साहित्यविश्वे बहुपारगैश्च पूर्वापरं खण्डनमण्डनं तु ।
करिष्यतीति प्रबलं कथालिः तदा तदा श्रोत्रपथं प्रयाति ॥ १०

विश्रान्तिवेलासु कवित्वगोष्ठिं विरच्य चर्चां कुरुते सहर्षम् ।
महानुभावैः कविपुङ्गवैश्च तदा तदा स्वान्तसुखाय भूपः ॥ ११

अनन्तमापाद्य कलासु तत्त्वं शास्त्रेषु गूढार्थपरीतभावम् ।
सान्तं विदित्वा निखिलास्त्रशास्त्रान् विराजतेम्भोजदलस्थवारि ॥ १२

देशाधिपत्यं सहजं स लब्ध्वा बभौ नितान्तं नृपकुम्भराणा ।
वरः कविर्गायकशेखरश्च साहित्यमूर्तिः सुकलाविलासः ॥ १३

हयप्रचारैर्नववीरयोधैः अनन्तसंख्याऽवृतगूढचारैः ।
रेजे प्रकामं परधूमकेतुः समस्तराज्यं वयतीव भावैः ॥ १४

नवं नवं पालितवाहिनीभिः पदे पदे वर्धितवारणैश्च ।
बभूव राणाऽश्वपतित्वमाप्त्वा गजाधिपत्येन स लब्धकीर्तिः ॥ १५

तदीयपत्नी भुवि कीर्तिताऽस्ति संगीतराज्ञी कलनिःस्वनेति ।
अन्योन्यभावैः गुणबद्धरम्यैः शब्दार्थभावेन विरेजतुस्तौ ॥ १६

कविस्तु काव्यं कमनीयशैल्यां करिष्यति प्रेमरसानुभावैः ।
साहित्यिकः केवलशब्दजालैः काव्यस्य तत्त्वं प्रकटीकरोति ॥ १७

निरन्तरं गायनलोलुपस्तु स्वरैः प्रियं गायति भावचित्तः ।
त्रयः कदापीह न युद्धचित्ताः तन्द्रागुणासक्तधियो यतस्ते ॥ १८

सिसाधयिष्यन्ति कदापि नैव कार्यं महद् वा लघु वा तदस्तु ।
अलौकिकाः दैहिकशक्तिहीनाः कथं समर्थाः समरं विधातुम् ॥ १९

शब्दार्थभावैः कवितारणे ते श्लेषादिवाक्यैः मधुव्यञ्जनाभिः ।
परान् विजेष्यन्ति पदालिखड्गैः कदापि योद्धॄन् न रणाङ्गणेषु ॥ २०

अल्पाः सदा सर्वकलासु तज्ज्ञान् विलोक्य चाप्यीयमनोविकारैः ।
स्वल्पं विमन्वन् निजशक्तिभावैः तृणाय मत्वा विलसन्ति योद्धॄन् ॥ २१

अत्रस्तभावेन रणाङ्गणे चिरं योद्धव्यमस्तीति न ते कदापि ।
विचारयिष्यन्ति कलासु तज्ज्ञाः प्रतिक्षणं कल्पितभावविश्वाः ॥ २२

तस्मादमुं जेतुमशक्यमेव तथापि शङ्का सुतरां न मेऽस्ति ।
सदैव शत्रुं समयं प्रतीक्ष्य जेतव्यमस्तीति मदीयभावः ॥ २३

तथापि सर्पः शिशुरूपधारी मर्त्यः स्वदण्डं पटुतुङ्गमेव ।
धृत्वा दृढं दण्डधरश्च भूत्वा हन्तुं प्रयात्येव ननु प्रपञ्चे ॥ २४

एवं विचार्यैव विचित्रभावैः मत्तो महम्मद् खिलिजी जवेन ।
मेवाडुदेशाधिपतिं च कुम्भं राणामरौत्सीत् बहुवाहिनीभिः ॥ २५

कृतान्तदूतालिसमानयोधैः अमोघकल्पाणवलैः समाप्तः ।
अनूह्यकाले स च चण्डरूपः जवेन झंझानिलसाम्यमाप्त्वा ॥ २६

आयान्तमेनं खिलिजीं मदान्धं राणा स कुम्भो बहुयोग्यरीत्या ।
साङ्गापुरप्रान्तवनस्थलीषु नैकैः सुयोधैः निभृतं रुरुन्धे ॥ २७

अनीकयोः मध्यविवृद्धयुद्धे सैन्यं महत् तत्र मृतं बभूव ।
श्रीकुम्भराणाकृतयुद्धमेव विलोक्य शत्रुः चपलं दधाव ॥ २८

घोरातिघोरं जनितेऽत्रजन्ये प्रकर्षसैन्येन स कुम्भराणा ।
धृत्वा महम्मद् खिलिजीं ससैन्यं तूर्णं पराभूतममुं चकार ॥ २९

तदा महम्मद् खिलिजी सकम्पं विहाय सैन्येन रणाङ्गणं भिया ।
दधाव तन्माळवदुर्गदेशं प्राणप्रियः स्वात्मसुखाभिकाङ्क्षी ॥ ३०

रुद्राकृतिः क्षत्रियकुम्भराणा भीतं महम्मद् खिलिजीं समेत्य ।
बध्वा च हस्तौ कटुशृङ्खलाभ्यां निनाय चित्तौडुमहोग्रदुर्गम् ॥ ३१

निक्षिप्य तं क्रूरमहम्मदुं सः षण्मासकालं निजपञ्जरे तम् ।
अपास्तगर्वं बहुदुर्बलाङ्गं विलोक्य तत्याज कृपाऽन्तरङ्गः ॥ ३२

संप्राप्य मुक्तिं चपलो महम्मद् क्रोधेन संतप्तमनाः ससैन्यम् ।
यथाकथं चिन्नृपकुंभराणां विजित्य युद्धे निवसेयमत्र ॥ ३३

इति प्रकर्षेण विनिश्चितात्मा कथं च शत्रुः खलु दण्डनीयः ।
गत्वाऽधुना गुर्जरदेशमाशु तत्रस्थसुल्तान्प्रभुणा च संधिम् ॥ ३४

विधाय तेनैव भृशं मिलित्वा तं कुम्भराणां प्रबलं विजित्य ।
निष्कण्टकं शाश्वतशान्तिमार्गं प्रस्थापयेयं मम शासनेऽत्र ॥ ३५

गतः पुनर्वर्धितशक्तियुक्तः सुल्तान्महम्मद् खिलिजी सवेगम् ।
सुल्तानुयोधं गुजरातदेशे विमन्त्रणार्थं बहुराजकीयान् ॥ ३६

तेनैव सार्धं बहुमन्त्रणादिकं विधाय तुष्टो खिलिजी दुरात्मा ।
आकस्मिकं द्वावपि संमिलित्वा राणां निहन्तुं कृतनिश्चयौ तदा ॥ ३७

द्वावप्यजय्यं नृपकुम्भराणां जेतुं स्वकीयैः पृतनाभरैश्च ।
विमन्त्र्य यातौ स्वनिकेतनं तौ यथाऽनुयोग्यं समरं विधातुम् ॥ ३८

ज्ञात्वा तदेतत् वरगूढचारैः स कुम्भराणा सपदं प्रतस्थे ।
प्रत्येकशः शत्रुविनाशनाय शत्रुद्वयं भिन्नविभिन्नकाले ॥ ३९

द्वयोश्च संमेलनमत्रयुद्धे यथा न शक्यं भवितुं तथा सः ।
विधाय जातः सफलो महीपः तथैव योद्धुं चकमे सवेगम् ॥ ४०

स एवमालोच्य तडित्प्रवेगे सुल्तानुयोधं प्रियगुर्जरस्थाम् ।
निहत्य युद्धे विजयी बभूव तदादिसर्वैः विनुतः स रेजे ॥ ४१

अनागतं गुर्जरसुल्तनं तं मत्वा स खिल्जी बहुतप्यमानः ।
प्रागेव राणाविभुना स नीतः शमस्य गेहं नु तथेति मत्वा ॥ ४२

अनन्तसैन्यालिसमेतखिल्जिः शशाक जेतुं न हि कुम्भराणाम् ।
तस्मात् गताशो विदधे सुयत्नं यत्नेन नाना न फलन्ति कामाः ॥ ४३

सुल्तानुहत्यां गुजरातुदेशे कृतां समालोच्य परं स खिल्जिः ।
तं कुम्भराणां बहुचारचक्षुषं मत्वा प्रकामं भजते भयं सः ॥ ४४

तथापि सैन्यस्य बलेन मत्तः तेनैव सार्धं बहुधा सुयोद्धुम् ।
प्रचक्रमे राज्यविलोभनेन मौर्ख्येन खिल्जी महता नृपेण ॥ ४५

आशाविहीनः खिलिजी ससैन्यं तं कुम्भराणां शतधाऽप्यरुन्धत् ।
शौर्येण राणा द्विगुणीकृतेन शक्त्या च खिल्जीमजयत् सहेलम् ॥ ४६

मेवाडुदेशस्य सुरक्षणार्थं तुङ्गोग्रदुर्गान् प्रचुरं बबन्ध ।
सर्वत्र सैन्यं पटुशिक्षितं च निचिक्षिपे शस्त्रभृतं नरेशः ॥ ४७

मेवाडुदेशेबहुदुर्गपङ्क्तिं स एव निर्माय बभौ महिम्ना ।
तदीयराज्ये स्थिरता ललास शान्त्या समायुक्तविभिन्नभावैः ॥ ४८

स कुम्भराणा खलु वीरमूर्तिः प्रजाहितं पालनदक्षभूपः ।
लोकप्रियोऽत्यन्तकलारसज्ञो जनानुरागास्पदमेत्य रेजे ॥ ४९

द्वात्रिंशतिस्सांधिकदुर्गजालं निर्माय देशे मधुराकृतीनाम् ।
स्थानं प्रपेदे जनमानसेषु यथा पृथिव्यां वरसौरशक्तिः ॥ ५०

सर्वेषु दुर्गेषु गरिष्ठमूर्तिः श्रेष्ठश्च संरक्षणतत्परोऽयम् ।
विराजते कुंभलदुर्गराजः कुम्भस्य राशीकृतकीर्तिरूपः ॥ ५१

चित्तौडुदुर्गोपरि राजमानः स्तम्भःप्रियं वक्ति च शब्दहीनः ।
द्वयद्वयग्लौपदतुङ्गमूर्तिः प्रघोषयन् दिव्यतदीयकीर्तिम् ॥ ५२

पुनर्नवं कीर्तितरूपमेत्य देशस्य मानास्पदनामधारी ।
विराजते राजकुलस्य दीपः प्रभामहत्या वसुधातले सः ॥ ५३

तदीय पुत्रोऽदयनाम राजा निहत्य कुम्भं पितरं दुरात्मा ।
राजाऽहमस्मीति विजल्पमानः सिंहासनस्थो निजगाद गर्वैः ॥ ५४

आकृष्य कृद्धाः सुतरां निनिन्दुः सिंहासनस्थं युवकं प्रजाश्च ।
अशान्तिभावः शतथा ननर्त तदाप्रभृत्येव पुनः स्वराज्ये ॥ ५५

तं तातहन्तारममुं विलोक्य लोकास्तु दुःखे उदयं निनिन्दुः ।
तस्मात् स जातो न हि शासकश्च तदाऽभवत् देशमराजकं नु ॥ ५६

सततं खलु राजकारणे हननं स्वार्थसुखाय केवलम् ।
क्रियतेति दुरात्मभिः श्रुतं शतथा दृष्टमिदं महीतले ॥ ५७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' कुम्भराणा ' नाम नवमः सर्गः समाप्तः ॥]

दशमः सर्गः ।

१०. देवी मीरा ।

मीरापतिः शात्रवकण्ठहारी कुम्भाख्यराणा विनुतः प्रजाभिः ।
पत्नी तदीया कलकण्ठिमीरा संगीतराज्ञी कवितामतल्ली ॥ १

गङ्गा पवित्रा बहुभक्तिपूर्णा श्रीकृष्णलीलामृतभक्तिकाव्यम् ।
नैकेषु गीतेषु जगौ सुरम्यं एकाग्रचित्ता मद-पैककण्ठी ॥ २

मूर्तीकृताभा मधुशान्तरूपा सा शुभ्रवस्त्रावृतहेमगात्री ।
शुभ्राट्टहासैः तुलिता सुमूर्तिः बाभाति दन्तावलदन्तगात्री ॥ ३

ग्रीष्मर्तुकालोद्भवपुष्पराशौ गन्धार्द्रवीचीपरिचर्चिताङ्गी ।
सा पुष्पबाणस्य सुमालिमल्ली जाता पृथिव्यां खलु रम्यमीरा ॥ ४

भक्त्या पुनीता महिमान्विता सा सूर्यप्रकाशाच्छनितान्तपूता ।
एकत्रसान्द्रीकृतचन्द्रकान्तिः मल्लीलतान्तैः कृतरम्यदाम ॥ ५

सुवर्णचम्पोपमिताङ्गवर्णा सुगन्धगन्धेन विचर्चिताङ्गी ।
नीहारवच्छुभ्रतनुप्रकाशा मरालयानामधुराकृतिः सा ॥ ६

क्षीराब्धिलावण्यतनुप्रकाशा कैलासशुभ्रावरताम्पुरात्ता ।
पद्मानना भावविलासरम्या कर्पूरगौरा विधुकान्तिकान्ता ॥ ७

सा शारदेवात्र तनुप्रकाशैः काशालिवत् प्रेक्षणहासभासा ।
लतान्तसौरभ्यपरीमलास्या विभाति मीराकलकण्ठिगीता ॥ ८

वसन्तकाले बहुचित्रिताङ्गी सुगन्धपुष्पालिकुलालिनादैः ।
वसन्तरागे कृतगीतिकाभिः प्रस्तौति कृष्णं पदभक्तिचित्ता ॥ ९

एकत्रमूर्तीकृतमारवाणा वसन्तकाले कलमास्वनन्ती ।
चूतप्रवालोपमिताङ्गना सा रराज कृष्णं हृदि पूजयन्ती ॥ १०

सा ग्रीष्मकाले नुतदीपरागे संदर्शयन्ती घृतदीपवर्तिम् ।
निर्मोकतुल्या परिधानगात्री कृष्णं स्तुवन्ती कुरुते च काव्यम् ॥ ११

मल्हाररागे नुतकृष्णशैशवं सा वर्णयन्ती बहुभक्तिभावा ।
सुरम्यमल्हारसुनादगीतैः प्रावृड्विचक्रे नितरां स्वनन्ती ॥ १२

सा चन्द्रकौंसीति निबद्धरागे कार्तीकराका निशि पूर्णचन्द्रा ।
सुतन्त्रिनादा युतगीतिकण्ठी सा स्तौति राधेव च नन्दसूनुम् ॥ १३

नीहारगौरा शशिकान्तिरम्या कस्तूरिकाचर्चितदेहवल्ली ।
हेमन्तकाले मधुरं सुनादैः सा गीतिकालिं क्वणतीह नित्यम् ॥ १४

माघे च सुस्नाततनुप्रकाशा कृष्णाय नैवेद्यफलानि दत्वा ।
चिद्रूपधूपादिकमारतिं सा विधाय गीतानि करोति नित्यम् ॥ १५

सरस्वतीरूपमवाप्य मीरा सा कृष्णभक्त्या बहुपुण्यरूपा ।
नितान्तगोविन्दपदानुरक्ता जगौ च माहात्म्यमनन्तगीतैः ॥ १६

सर्वत्र तृप्त्या प्रविलोकयन्ती कृष्णाच्च भिन्नं न विलोकयन्ती ।
अस्मिन् सुरम्ये भुवि तन्मयेन साऽद्वैतभावेन रराज तन्वी ॥ १७

गोविन्दपादाब्जविमत्तचित्ता श्रीकृष्णलीलां मधु वर्णयन्ती ।
अनन्तगीतावलियोगदानं ददौ स्वराष्ट्राय पतिव्रता सा ॥ १८

कलस्वनैर्मञ्जुलकण्ठनादैः नभोन्तरालं परिपावयन्ती ।
आबालगोपालमनोनुकूलं श्रीकृष्णलीलां शतधा जगौ सा ॥ १९

समस्तराष्ट्रस्य महत्त्वपूर्णां संगीतसाहित्यपरीमलाक्ताम् ।
अमोघभक्त्या कृतगीतमालां प्रदाय लोकाय नुता बभूव ॥ २०

सर्वत्र दिव्यस्य विलासमेव ददर्श कृष्णस्य कलामयं सा ।
श्रीकृष्णमीराद्वयमत्र नास्ति एकोऽस्ति विश्वे बहुरूपमाप्त्वा ॥ २१

निरंतरं सा वरवर्णिनीति कृष्णं समाहूय हृदारविन्दे ।
संस्थाप्य भक्त्या वरवर्णनेन हे चक्रधारिन् वरनागराख्य ॥ २२

नैकानि गीतानि विरच्य मीरा भक्तेषु चैका निरतं विभाति ।
सर्वोऽपि तां प्रत्यहमेव जल्पन् पवित्रभावैः मनुते सुरूपम् ॥ २३

उन्मत्तभावा सकलं विसृज्य श्रीकृष्णभक्त्यां विवशा निमग्ना ।
विस्मृत्य सा लौकिकजीवनं तु विनिर्ममौ स्वीयपथं महिम्ना ॥ २४

सा चैकदा दत्तविषं निपीय सन्तोषभारेण ननर्त चारु ।
अनन्त नारायण वासुदेव गोविन्द हे माधव कृष्णदेव ॥ २५

इत्येव नामानि समुच्चरन्ती प्रतिक्षणं प्राप नवीनशोभाम् ।
संदृश्यमाने भुवि चित्ररम्ये चराचरे पश्यति कृष्णदेवम् ॥ २६

सा चान्ततो भोगविलाससौख्यं संत्यज्य बभ्राम पवित्रदेशे ।
सर्वत्र संस्थाप्य मुकुन्दमूर्तिं प्रसारयामास च कृष्णभक्तिम् ॥ २७

एवं च मीरा निरतं विरक्ता संन्यासिनीभावपरिभ्रमन्ती ।
क्षेत्राणि वृन्दाविननामकानि विलोक्य पूता मधुरादिदेशान् ॥ २८

सा राज्यभूमिं गुजरातदेशं श्रीकृष्णकर्णामृतभक्तिगीतैः ।
अनेकसंख्यायुतभक्तवृन्दैः परं भ्रमन्ती विचकार पूतम् ॥ २९

ग्रामेषु सर्वत्र जनानुरागं नक्तं दिवं कृष्णकथाः सहर्षम् ।
गत्वा च भक्तिं जनमानसेषु प्रसारयामास मनोज्ञगीतैः ॥ ३०

एवं तु मीरा सततं जनेषु प्रज्वाल्य भक्त्या पटुदेवभक्तिम् ।
आस्तिक्यभावावृतमानसात्तान् जनान् विचक्रे हरिदूतिकेव ॥ ३१

निरन्तरं दीपशिखेव मीरा स्वदेशभक्तिं जनचित्तवर्त्याम् ।
संचाररूपेण पवित्रचित्ता प्रज्वाल्य रेजे बहुदीपिकेव ॥ ३२

सृष्ट्यां तु सर्वे बहुदीपरूपाः यदा कदा वाऽनिलवेगविद्धाः ।
भवेयु रेवाऽमरदीपरूपः श्रीकृष्ण एवेति परं शशास ॥ ३३

मीरा कदाचित् जननीसमेता जगाम कल्याणमहोत्सवाय ।
तदा तु तत्रस्थमतल्लिकालिः पप्रच्छ मीराजननीं सभावम् ॥ ३४

अस्याश्च पाणिग्रहणं मतल्लि सार्धं हि केन प्रभुणा नियुक्तम् ।
योग्यस्तु कुत्रापि विचार्यते वा विवाहयोग्या खलु कन्यका ते ॥ ३५

कन्याऽपि मीरा जनितं च भाषणं निशम्य सान्तं हसिताननना सा।
दृग्भिः सदा केन्द्रितरम्यविग्रहं संदर्शयन्ती सपदं जगाद ॥ ३६

अनेन संदर्शितसुन्दरेण कृष्णेन सार्धं वरविग्रहेण।
पाणिग्रहो मे कृत एव पूर्वम् अयं हि देवोऽस्ति मदीयभर्ता ॥ ३७

पूजां विधायास्य पवित्रचित्ता संवाहयेयं मम जीवनं सुखे।
ममैव योग्योऽयमिति प्रजल्पिता प्रोत्थाय जाता बहुरागिणीव ॥ ३८

तदाप्रभृत्येव विहाय लौकिकं श्रीकृष्णलीलावलये सुबद्धा।
विचित्रभावैर्विरहातुरा सा कृष्णात् परं पश्यति नान्यदेवम् ॥ ३९

हे नन्दसूनो तव दर्शनार्थं मयूरपिच्छाच्छमनोज्ञचीरम्।
धृत्वाऽहमेष्यामि च वर्षकाले प्रसीद मामुद्धर देवदेव ॥ ४०

आबाल्यमेवात्र तदीयजीवनं कृष्णार्पितं सर्वविधं विधाय।
संकीर्त्य तद्रम्यगुणान् पवित्रा बभूव लोके प्रथिता मतल्ली ॥ ४१

इत्येवं जननी प्रिया मधुगुणालङ्कारवर्णाञ्चिता
श्रीकृष्णार्पितभक्तिचित्तभरिता गानामृतामज्जिता।
भूलोके वनितालललामललिता संगीतसाहित्यका
मीरा भक्तजनेषु सर्वविनुता राष्ट्रस्य भाग्येन्दिरा ॥ ४२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' देवी मीरा ' नाम दशमः सर्गः समाप्तः ॥]

एकादशः सर्गः ।

११. संग्रामसिंहप्रतिष्ठा ।

वक्ष्येऽहं सूर्यवंशीयान् जगद्विख्यातभूपतीन् ।
संग्रामोदयराणादीन् संग्रहेण यथा प्रियम् ॥ १

शिशोदियावंशनाम पारंपर्येण विश्रुतम् ।
विख्यातसूर्यवंशस्य नामाङ्कितमिति प्रियम् ॥ २

प्रसिद्धस्तेषु सर्वेषु धैर्यवान् वीरपूरुषः ।
नाम्ना संग्रामसिंहस्तु संग्रामे सिंहविक्रमः ॥ ३

अयमासीत् क्षितीशानां राजा भीमपराक्रमः ।
कानने सर्वजन्तूनां हर्यक्षो मृगराडिव ॥ ४

श्रुत्वा तस्य नरेन्द्रस्य परवीरभयङ्करम् ।
नाममात्रं मृताः केचित् अनारम्भितसंयुगे ॥ ५

अलाबूराशिवच्छत्रून् चकाट शकलाकृतीः ।
न चिक्षिपुः पराः पादं पवित्रे भारतावनौ ॥ ६

अरक्षत् देशमेनं सः निरतं शत्रुतामसात् ।
ग्रीष्मे चण्डांशुमालीव प्रखरैः करसायकैः ॥ ७

महाद्भुतगुणैः सर्वैः सुन्दरं समलङ्कृतः ।
अलंकारनिधिः जातः लोकस्यादर्शवत् प्रियः ॥ ८

रामचन्द्रकुमारस्य लवस्य कुलसंभवः ।
संग्रामे शत्रुविध्वंसी भारते लब्धकीर्तिमान् ॥ ९

राणावंशजभूपानां आदर्शः प्रियदर्शनः ।
भारतीयप्रजानां च पूजास्थानमवाप सः ॥ १०

न तत्र विद्यते कोऽपि तेन सार्धं रणाङ्गणे ।
शस्त्रास्त्रचालने योद्धुं वक्तव्यं किमतः परम् ॥ ११

म्लेच्छानां सर्वचक्षूंषि प्रसरन्ति दिवानिशम् ।
मेवाडराज्यस्वाधीने पिञ्जरीकृतपुञ्जकैः ॥ १२

प्राद्रवत् संयुगे म्लेच्छान् यथा सिंहो वनेचरान् ।
वायुः घासकणान् क्षिप्रं तथाऽसौ देशरक्षकः ॥ १३

मेवाडदेशः सत्यं हि केन्द्रमासीच्च संस्कृतेः ।
विख्यातरसपुत्राणां राजस्थाननिवासिनाम् ॥ १४

स्वातन्त्र्याय दृढं राजा सिंहसंग्रामभूपतिः ।
शिलामाधारभूतां तु निखायासौ व्यराजत ॥ १५

चारित्र्येण सदा युक्तः गुणवान् धैर्यविक्रमः ।
निश्चलो देशभक्तश्च पूर्वापरविचारकः ॥ १६

सिंहवत् गर्जनं कृत्वा संग्रामे शत्रुमारकः ।
हत्वा शस्त्रास्त्रजालैश्च ख्यातः संग्रामकेसरी ॥ १७

समग्रभारते वर्षे हिन्दुदेशीयजीवनम् ।
एकातपत्रमाक्रान्तं कर्तुं यत्नं चकार सः ॥ १८

हत्वा क्रूरं चमूराशिं भारतं रक्षितुं सदा ।
दीक्षादीपितचित्तस्तु प्रयत्नं कृतवान् नृपः ॥ १९

बाबरुं सप्तसिंधूनां पाययित्वा जलं रुषा ।
भारतं भारतं चक्रे नितान्तमरिसूदनः ॥ २०

अन्यदेशात् समापन्नां चमूराशिं नराधिपः ।
निरोद्धुं सर्वदा युद्धं चकार परभीकरः ॥ २१

भारतं प्राच्यदेशोऽयं पराक्रान्तं कदापि वा ।
मा भूयात् दास्यभावेऽपि तथा यत्नं चकार सः ॥ २२

अनन्तानीकसंभारैः परं पृथ्वी ननाम च ।
आदिशेषस्य शीर्षाणि नेमुर्नित्यं भरावृताः ॥ २३

अष्टदिग्भागसंजाताः वारणाभारनामिताः ।
अक्षमाः चलितुं भूत्वा तस्थुः तत्रैव दिग्गजाः ॥ २४

तस्मात् समाहितैः सैन्यैः दिवारात्रं ररक्ष सः ।
भारतं परवीरेभ्यः शान्तिमस्थापयच्चिरम् ॥ २५

सिंहस्वप्नो बभूवासौ परवीरभयङ्करः ।
पञ्चाननत्वमापाद्य परेषां हृदि वेशितः ॥ २६

संग्रामसिंह युद्धे तु परानीकं विलोक्य च ।
मत्तवारणरूपेण पलायामास सत्वरम् ॥ २७

बाबरं जीवने नूनम् अक्षमं चलने कृतः ।
चक्रे च कान्दिशीकं तु शाश्वतं समराङ्गणे ॥ २८

संग्रामसिंहभूपत्वं चारित्र्ये लिखितं पुरा ।
तस्मादयं बभूवात्र भारते शाश्वतं ध्रुवम् ॥ २९

बहवः शक्तिसंपन्नाः नानाशाखासु पूर्वजाः ।
राजन्ते ऋक्षमालायां नामिकाः शाश्वतं भुवि ॥ ३०

पेच्छत् संग्रामसिंहोऽयं दिल्लीभूपं तु बाबरम् ।
मारयित्वाऽऽहवे तूर्णं हिन्दुसाम्राज्यतत्परः ॥ ३१

यत् स्वप्ने दृष्टवान् रम्यं सर्वं देशे व्यरच्यत ।
कार्यशूरो महावीरः संग्रामे परमेश्वरः ॥ ३२

मेवाडदेशे सर्वत्र सोऽन्तःशत्रून् समापयत् ।
समैक्यभावं सर्वेषु जनयामास शाश्वतम् ॥ ३३

अन्ततो भूपतिः भूत्वा मेवाडञ्मीरचांदिकि ।
ग्वालियरबून्दिमेवाडं नागौरामपुरं तथा ॥ ३४

आबूजोधपुरं चापि साञ्मीरपर्यन्तमेव च ।
स्वीयराज्यं प्रतिष्ठाप्य वावरेण प्रशंसितः ॥ ३५

सिक्रीसमीपयुद्धस्तु वावर-संग्रामसिंहयोः ।
जातः सर्वजनाभीलः चरित्रे शाश्वतं महत् ॥ ३६

युद्धे खण्डितहस्तोऽसौ धैर्येणैककरेण च ।
चकार युद्धं रौद्रेण वावरेण समं नृपः ॥ ३७

तथा रौद्रेण राजाऽसौ युध्यमानः परैः समम् ।
गतपादो बभूवाशु संगरे शत्रुमारणैः ॥ ३८

विस्मृत्य देहं संग्रामे संग्रामः परभीकरः ।
युयुधे शत्रुवर्गैश्च बहून् शत्रून् जघान सः ॥ ३९

एवं प्रयुद्धे संमग्नं राजानं शरपातनैः ।
हन्तुं च शत्रुः सन्नद्धः त्यक्त्वा चान्यान् परान् युधि ॥ ४०

एकेन शरपातेन पपात भुवि भूपतिः ।
सैनिकाः तस्य सर्वेऽपि निन्युः तं गिरिकन्दरम् ॥ ४१

तत्रोपचारं सर्वेऽपि चक्रुः सान्तं महाप्रियम् ।
तदासौ भीमरूपेण सिंहनादेन भीकरम् ॥ ४२

जगर्ज परुषैः वाक्यैः चित्तौडुं साधयेम रे ।
सोऽयं दुर्गः प्रियो भाति जीवने मम सैनिकाः ॥ ४३

इति जल्पन् चित्तौडुं सः जीवने सर्वसैनिकान् ।
प्रेरयन् कार्यसंमग्नान् पञ्चत्वं प्राप भूपतिः ॥ ४४

संग्रामसिंहः शौर्येण पालयामास सर्वतः ।
निष्कण्टकं सुखोपेतं मेवाडं भारतावनौ ॥ ४५

चित्तौडुदर्शने वृत्तं चित्रवत् प्रैति मानसे ।
तच्च संस्मरणेनैव हाहाकारान्वितं रणम् ॥ ४६

सर्वजीवितसौख्यं च सर्वसंपच्चयं भुवि ।
स्वातन्त्र्याय सुदेशस्य त्यक्त्वा ते शाश्वता बभुः ॥ ४७

गतजीवाः परं भान्ति कीर्तिरूपेण साम्प्रतम् ।
जन्म तेषां हि धन्यं च भारते वीरभूतले ॥ ४८

रत्नशून्यमहाप्राणशशिसंवत्सरात् प्रियम् ।
वसुद्वैतमहाप्राणविधुपर्यन्तमेव हि ॥ ४९

एकोनविंशद्वर्षाणि संग्रामः क्रान्तिकारकः ।
राज्यं चकार सौख्येन स्वीयदेशीयबन्धुभिः ॥ ५०

संग्रामे सिंहवत् योद्धा बभूवेति जनाः प्रियम् ।
जुहवुः संग्रामसिंहोऽयं इति तं सार्थकैः पदैः ॥ ५१

प्रयुध्य वीरैः शतधा स सिंहः संप्राप्य युद्धे विकलाङ्गरूपम् ।
विशालदेशं परिकल्प्य यातः स्मरन् चित्तौडुं परितप्तचित्तः ॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' संग्रामसिंहप्रतिष्ठा ' नाम एकादशः सर्गः समाप्तः ॥]

द्वादशः सर्गः ।

१२. राणा विक्रमजित् ।

अथ संग्रामसिंहस्य मरणात् तस्य पुत्रकः ।
राणा विक्रमजिन्नाम चित्तौडुं पालयन् बभौ ॥ १

जन्मना दुर्बलो बालः मनसा कर्मणा च सः ।
अशक्तः परचित्तस्थां भावनां ज्ञातुमेव च ॥ २

कदापि शैशवे मित्रैः खेलनं न कृतं मुदा ।
जन्मना भीतिभावेन मण्डितः सहजैः गुणैः ॥ ३

अस्त्रविद्यां न जानाति मन्त्रणां शस्त्रचालनम् ।
लौकिकं तु न जानाति केवलं जन्मना नृपः ॥ ४

विवाहितो बभूवाऽसौ संप्राप्ते यौवने द्विजः ।
तस्य पत्नी गुणैराढ्या नारीलक्षणभूषिता ॥ ५

पराक्रमी न चैवासीत् दुर्बलो वपुषा सदा ।
पत्नी स्वयं कर्मवती तस्यासीच्चण्डिका ध्रुवम् ॥ ६

सा हि साहसिनी नित्यं राजकीयेषु पण्डिता ।
सर्वथा रक्षयन्ती तं पतिं राज्ये बभौ प्रिया ॥ ७

वर्तमानस्थितिं ज्ञात्वा शत्रवः तं जिघांसवः ।
अनेकयत्नान् चाकुर्वन् प्रत्यहं चारचक्षुभिः ॥ ८

चित्तौडुदुर्गे राजाऽस्ति निर्वीर्यो दुर्बलोऽक्षमः ।
केवलं रक्षिता राज्ये भार्यया सङ्कटे सदा ॥ ९

चित्तौडुं दुर्बलो राजा पालयन्नस्ति साम्प्रतम् ।
इति श्रुत्वा बहादुरशा चित्तौडुं जेतुमागतः ॥ १०

दृष्ट्वा सन्यं समायातं कम्पितो विक्रमः परम् ।
तदा कर्मवती पत्नी स्वीयसैन्यं दिदेश च ॥ ११

रोद्धुं सर्वां चमूराशिं धिक्कर्तुं तं बहादुरम् ।
अनन्यशक्तिसंपूर्णान् गजवाजिसुयोधकान् ॥ १२

कर्मवत्याश्च संदेशं नीत्वा सर्वसुयोधनाः ।
गजाश्ववाहिनीजालैः ययुः तं जेतुमेव हि ॥ १३

अभावात् वीरराजस्य सैन्याः सर्वे यथागति ।
योद्धुं सक्ताः परं भक्त्या विफलाः तेऽभवन् तदा ॥ १४

अभावात् सूर्यदेवस्य यथा सर्वे ग्रहाः सदा ।
शक्तिहीना भवेयुः च तद्वत् राज्येऽभवन् प्रजाः ॥ १५

राज्ञी स्वयं कर्मवती प्रयुध्य बहुलं तदा ।
जयस्य सूचनाऽभावात् चिन्तयित्वा धिया परम् ॥ १६

प्रेषयामास धैर्येण रक्षाबन्धनमाशु सा ।
हुमयून् बादशाहाय त्रातुं तस्मात् बहादुरात् ॥ १७

वार्तां सा प्राहिणोत् तूर्णं भगिनीं रक्षितुं स्वयम् ।
संकटे पतिता भ्रातः नास्ति गत्यन्तरं भुवि ॥ १८

राज्ञी तदा कर्मवती विचार्यैव तदा द्रुतम् ।
अभावादन्यमार्गस्य निश्चिता सा सखीजनैः ॥ १९

हुमयून् चिन्तयामास पत्रं रक्षां विलोक्य सः ।
कर्तव्यं यन्ममास्तीह सर्वं मे पादसन्निधिम् ॥ २०

अल्लाऽऽज्ञया समायातं द्वाराण्युद्घाटितानि मे ।
अधुनाऽहं करिष्यामि रक्षां तस्याः परं धिया ॥ २१

दृष्ट्वा रक्षां तथा प्राप्तां श्रुत्वा तस्याः प्रियं वचः ।
हुमायून् स्वीयसैन्येन प्रतस्थे तां प्ररक्षितुम् ॥ २२

हुमायूनागतः शान्तं विलम्व्याह्वानकारणात् ।
अर्धयुद्धं समाप्तं च सैनिका नाशिता ध्रुवा ॥ २३

अत्र युद्धं महाघोरं जातं मध्ये च सैन्ययोः ।
बहवो वीरराजानः निहता संङ्गरेऽभवन् ॥ २४

पूर्वमेव बहादुरशा राणां विक्रमभूपतिम् ।
निर्जित्य चित्तडुदुर्गं चक्रे स्वायत्तमाशु सः २५

सपदि स्वीयचारिण्यैः सखीभिः कृष्णवर्त्मनि ।
तदा कर्मवती घोरम् अर्पयामास जीवितम् ॥ २६

विलोक्य सर्वं संजातं सर्वराज्ये समाकुला ।
करुणावीभत्सदृश्याभ्यां जनता विह्वलाऽभवत् ॥ २७

पराक्रान्तं सुविज्ञाय चित्तोडं महिलाजनम् ।
गत्यन्तरमजानन्त्यो निश्चित्य मरणं ध्रुवम् ॥ २८

त्रयोदशसहस्रेषु संख्यामात्रेषु सत्वरम् ।
अन्या वहव्यः तरुण्यश्च प्रपतुर्वह्निगह्वरे ॥ २९

अन्ततो हुमयून् यातः मन्दसौरं स्वसेनया ।
तत्रैव निर्दयं युद्धं चक्रेऽसौ शाहुना परम् ॥ ३०

तत्र युद्धे बहादुरशां पराभूतं विधाय सः
संकटान्मोचयामास राणां विक्रमजितं तदा ॥ ३१

किन्तु तत्र तदा किञ्चित् न कृतं हुमयूनुना ।
द्रोहं तस्मै रणे चापि तत्पश्चात् राज्यशासने ॥ ३२

एकाकी विक्रमो जातः राजा राज्ये विना नृपान् ।
न कोऽपि राजा तेनैव सख्यं कर्तुं समागतः ॥ ३३

शक्तिहीनेन लोकेऽस्मिन् सख्यं नैव नराधिपाः ।
कुर्वन्ति किन्तु शत्रुत्वं बहुधा शाश्वतं भुवि ॥ ३४

भार्या प्रियं कर्मवती तेन सार्धं चकार च ।
पालनं सर्वराज्यस्य रक्षणं शत्रुनाशनम् ॥ ३५

तद्वन्न कोऽपि कर्ताऽस्ति तेन सार्धं प्रियं सदा ।
कर्तुं साहाय्यम् अत्यन्तं सुखदुःखादिजीवने ॥ ३६

मरणानन्तरं पत्न्याः साहाय्यं विक्रमस्य तु ।
कर्तुं नैव समायाताः सखायः राजवंशजाः ॥ ३७

मृत्पिण्डवत् तदाऽऽसीनं राजानं हीनजीवितम् ।
स्मृत्वा सर्वेऽपि लोकास्ते क्रोधावेशमनाः तदा ॥ ३८

तं विक्रमजितं तूर्णं सैनिकाः निर्दयं रुषा ।
पदच्युतं विधायैव चोदयं कर्तुमीहिरे ॥ ३९

राजानं देशसेवायै त्रातुं वंशपरंपराम् ।
प्राच्यवैभवनिष्ठाः ते वंशमर्यादया भृशम् ॥ ४०

तदा भ्राता च सापत्नः वीरवलो नामकः परम् ।
निर्दाक्षिण्यं जघानामुं विक्रमं राज्यलोलुपः ॥ ४१

तस्य विक्रमजीतस्य भ्राता चासीत् प्रियोदयः ।
शिशुस्तस्मिन् विपत्काले कथं राज्यं प्रशासयेत् ॥ ४२

इति सर्वान् समाधाय वीरवलो छलमानसः ।
स्वयं राजा बभूवासौ राज्यपालनतत्परः ॥ ४३

तदा सर्वा प्रजा भेणुः नैव युक्तं त्वया भुवि ।
कर्तुं राज्यं यदा राज्ञः पुत्रोस्तीह प्रभो शृणु ॥ ४४

तदानीमुदयं चापि हन्तुं पापी समुद्यतः ।
राज्यलोभेन संत्यज्य भ्रातृभावं रुषा नृपः ॥ ४५

तदा सर्वे तथा माऽस्तु त्वमेव कुरु शासनम् ।
यदि सर्वाः प्रजाः सौख्ये वर्तेयुः किमतः परम् ॥ ४६

वीरवलः शान्तचित्तस्तु तदा भूत्वा महाबलः ।
प्रजाऽनुमोदं संप्राप्य राज्यं कर्तुं समुद्यतः ॥ ४७

तदानीमुदयं त्रातुं सर्वे पौरा धिया युताः ।
अनेकनव्यमार्गांश्च रचयामासुरेव च ॥ ४८

किन्तु सर्वे तदा तत्र भीतचित्ताः समाभवन् ।
यतः सोऽयं दुरात्मा हि संहनिष्यति चोदयम् ॥ ४९

किन्तु रक्षां विधातुं ते शक्ता नैव समाभवन् ।
एकदा वीरवलो यातः हन्तुं तमुदयं रुषा ॥ ५०

श्वो वा नोचेत् परश्वो वा जहि तं बालकं मुदा ।
उदयात् पूर्वमेनं त्वम् उदयं शत्रुरूपिणम् ॥ ५१

इति तं शान्तवाक्यैः ते सान्त्वयामासुरेव च ।
वीरवलः शान्तचित्तस्तु निर्यातो हृष्टमानसः ॥ ५२

वीरवलं तमधमं पटुक्रुद्धं शान्तवारिनिचयेन नृपालिः ।
सान्त्वनां बहुविधं प्रविधाय तत्क्षणं च ततरुः तदापदम् ॥ ५३

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' राणा विक्रमजित् ' नाम द्वादशः सर्गः समाप्तः ॥]

त्रयोदशः सर्गः ।

१३. पन्नाधात्री ।

संग्रामसिंहराजस्य संस्थाने कर्मचारिणी ।
पन्नादायीति विश्वस्ता रेजे सत्यदयापरा ॥ १

शैशवात्तस्य संस्थाने मिष्टान्नं लवणादिकम् ।
भुक्त्वा विश्वासपूर्णा सा राजवंशे विराजते ॥ २

अनेकसुखभोगान् च भुक्त्वा साऽनन्दभासिनी ।
सर्वेषां दृक्पथं याता राजान्तःपुरचारिणी ॥ ३

एवं सा राजहर्म्येषु संस्थिता कर्मचारिणी ।
सर्वेषां हृदयस्थानं पेदे चारित्र्यशोभिनी ॥ ४

सर्वदा चिन्तयन्ती सा भक्तिभावप्रपूरिता ।
दिवारात्रं च युद्धेषु मग्नं तं देशरक्षकम् ॥ ५

नाऽहं कर्तुमशक्ताऽस्मि रणं शत्रुसमूहकैः ।
अहं विवर्धिता राज्ये राजवंशेन सर्वथा ॥ ६

मत्तः किं विद्यते लाभः राष्ट्राय महितात्मने ।
यस्मादहं समुद्भूता वर्धिता सर्वसौख्यकैः ॥ ७

चिन्तयन्ती महामत्या निनाय दिवसान् सुखम् ।
विवाहो निश्चितः तस्याः सत्वरं दैवयोगतः ॥ ८

कालक्रमेण पन्नायाः जातः पुत्रोऽतिसुन्दरः ।
तेजांसि विकिरन् आस्ते प्रातः सूर्य इवावनौ ॥ ९

अस्मिन्नेव सुकाले तु संग्रामस्यापि पुत्रकः ।
जातः प्रासादहर्म्येषु सर्वान्तःपुरदीपकः ॥ १०

कालक्रमेण तं बालं द्रष्टुं तत्र समागतम् ।
राजकं सर्वदेशस्य शुभाशीर्वादतत्परम् ॥ ११

सहसा राजकं तत्र प्रभाते द्रष्टुमागतम् ।
संग्रामसिंहपुत्रं च पन्नादेव्याश्च पुत्रकम् ॥ १२

एकत्र डोलिकासुप्तौ पन्नागानेन निद्रितौ ।
एकरूपमवाप्यैतौ रेजाते कंजकुड्मलौ ॥ १३

विलोक्य सर्वे संभ्रान्ताः द्वावप्येतौ सहोदरौ ।
इतीव भातः पप्रच्छुः प्रश्नपूर्वकलोचनैः ॥ १४

अत्रायं राजपुत्रोऽस्ति एषोऽयं पन्नपुत्रकः ।
द्वावप्येतौ च गास्यामि शिशुलालनगीतिकाः ॥ १५

दासी प्रियं जगादैतान् स्नेहभावेन मञ्जुलम् ।
श्रुत्वा सर्वे परं हृष्टाः दास्याः प्रेम विलोक्य च ॥ १६

आहार्यमेतयोर्बाल्यात् सममेव हि दृश्यते ।
सौष्ठवं तु शरीरस्य समानं भाव्यते प्रियम् ॥ १७

इत्येवं भाषणं सम्यक् बभूव परमोत्सुकम् ।
सर्वे राजकुमाराः तु तुष्टाः श्रुत्वा प्रजल्पितम् ॥ १८

विषमे संकटे काले कर्तव्यं किमु विद्यते ।
स्तनपो बालकः सत्यं रक्षितव्योऽस्ति साम्प्रतम् ॥ १९

इति चिन्ताकुलस्वान्ता क्षणे पन्ना सहस्रशः ।
अचेतना विजाता सा किं कर्तव्यमितःपरम् ॥ २०

उदये वीरवलः क्रूरः हन्तुं चोदयमेति सः ।
समागमिष्यतीत्येवं मत्वा प्राणाः प्रयान्ति मे ॥ २१

इति व्यथाविला पन्ना कम्पिता भयविह्वला ।
तत्र रात्रौ न सुप्ताऽऽसीत् उदयस्य प्ररक्षणे ॥ २२

पञ्चविंशतिवर्षाणि भक्षितं राजभोजनम् ।
तस्मादहम् ऋणी जाता ऋणशेषं न कारयेत् ॥ २३

अनृणी सहसा भूयां राजकर्मणि तत्परा ।
राष्ट्रभक्तिं समुज्ज्वाल्य निवसेयं सदा सुखी ॥ २४

निश्चित्य तत्क्षणं पन्ना स्वपुत्रमुदयाकृतिम् ।
विधायोदयरूपं तु स्वीयपुत्राकृतिं कृती ॥ २५

मातृप्रेम्णा विचुम्ब्यासौ कपोलं पुत्रकस्य च ।
गाढमालिङ्ग्य जिघ्रन्ती मूर्धानं च पदे पदे ॥ २६

अन्तःसुरङ्गगेहात् सा वहिर्गन्तुं प्रचक्रमे ।
निशीथिन्यां सुनिभृतं वहन्ती चोदयं शनैः ॥

क्षिपन्ती हृदये माता प्रयाता तस्य रक्षणे ।
राष्ट्रनिष्ठा सदाचारा पुत्रत्यागेन मानिनी ॥ २८

राजवंशीयमिष्टान्नं भुक्त्वा सा च कृतज्ञताम् ।
दर्शयामास कार्येण देशसौख्याय केवलम् ॥ २९

वीरवलः प्रातरागत्य स्वपन्तं पन्नबालकम् ।
मदान्धत्वेन चैकेन खड्गाघातेन सत्वरम् ॥ ३०

खण्डद्वयं विधायैव निर्जगाम हसन् वदन् ।
निष्कण्टकं समावृत्तम् इदानीं राज्यपालनम् ॥ ३१

किंवा किंवा विजल्पन् सो वीरूवलो निर्दयस्तदा ।
आरुरोह चित्तोड्दुर्गं राणाऽहमिति संवदन् ॥ ३२

बालेन सहिता पन्ना निर्भया घोरसंकुलम् ।
कान्तारं प्रविवेशात्र क्षेमरूपेण साहसी ॥ ३३

पन्ना तु काननं गत्वा चोदयेन समं सुखम् ।
प्रेम्णा च मातृवन्नित्यं तस्य सेवां चकार सा ॥ ३४

अष्टादशसमाः शान्तं स्थित्वाऽज्ञाते वने सुखे ।
क्रमशस्तरुणो जातः पन्नादेव्याश्च रक्षणे ॥ ३५

मरणानन्तरं तस्य वीरूवलस्य दुरात्मनः ।
पन्ना चोदयसंयुक्ता चित्तौडुं सा समागता ॥ ३६

भूत्वा राजा चित्तौड्दुर्गे सोदयो निभृतं बभौ ।
दृष्ट्वा तत् शोभनं दिव्यं रेजे पन्ना प्रहर्षिता ॥ ३७

एवं पन्ना महात्यागी देशभक्तिपरायणा ।
राजभक्त्या स्वपुत्रं तं वीरूवलस्य ददौ प्रियम् ॥ ३८

आत्मपुत्रपरित्यागं राजपुत्रस्य रक्षणम् ।
राणावंशपरित्राणं चक्रे पन्ना सुनिश्चितम् ॥ ३९

भारते वीरराष्ट्रेऽस्मिन् वीरनारीषु सोज्ज्वलम् ।
नामोल्लेखनमेतस्याः कृतं स्वर्णाक्षरैः परम् ॥ ४०

देशभक्तास्तु जानन्ति पन्नाधात्रीं विशेषतः ।
दाम्भिका देशभक्तास्तु नैव जानन्ति दैशिकम् ॥ ४१

स्वकीयपुत्रं त्वरितं पराय समर्प्य पन्ना नितरां चकाशे ।
राष्ट्रीयभक्त्या भरितान्तरात्मा राज्ञां कुले सा महिताऽनृणीव ॥ ४२

[श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' पन्नाधात्री ' नाम त्रयोदशः सर्गः समाप्तः ॥]

चतुर्दशः सर्गः ।

१४. उदयसिंहस्य व्यक्तित्वम् ।

तस्य संग्रामसिंहस्य पुत्रोऽभूत् देशरक्षकः ।
नाम्ना चोदयसिंहोऽसौ हर्यक्षस्य मृगो यथा ॥ १

तस्य शूरस्य पुत्रोऽयं भ्रान्तिकातरतायुतः ।
युद्धश्रवणमात्रेण भीतः सन् बहु कम्पते ॥ २

विलासभोगमग्नोऽसौ कोशागारं विधाय च ।
शून्यं देशं विना भूपान् शशास सुखलोलुपः ॥ ३

योद्धुं गत्वा महाभीरुः सदनं प्रत्ययौ द्रुतम् ।
ददौ मेवाडदेशं च शत्रवे विक्रमश्रिये ॥ ४

एतस्य पालने देशः पराक्रान्तो बभूव च ।
पौरुषस्य प्रतापस्य स्थानं नास्त्येव भारते ॥ ५

राजानस्तं परित्यज्य सेवकाश्च गताः परान् ।
अराजको बभूवासौ देशः सत्यपि भूपतौ ॥ ६

एकदा परवीराणां नीयमाने वशं नृपे ।
भार्या वीरा प्रयुध्याशु तं मुक्तं विचकार सा ॥ ७

एतस्य शासने देशः धर्मभ्रष्टो बभूव च ।
संस्कृतिः नष्टभूयिष्ठा निराधारा निराश्रया ॥ ८

चित्तौडदुर्गं दत्वाऽसौ परेभ्यः सभयं नृपः।
उदयसागरसामीप्ये उदयोऽयम् उवास च ॥ ९

प्रतापं सततं कर्तुं स्वीयमार्गानुगामिनम्।
मेने चोदयराणाऽपि किन्त्वभून्निष्फलो भृशम् ॥ १०

दन्तोऽयमघरं नित्यं परं तापयतीह मां।
इति निश्चित्य राणां तु बहिष्कारं चकार सः ॥ ११

द्वितीयतनयस्तस्य नाम्ना शक्तो विराजते।
साहसोपेतकृत्येषु मग्नोऽयं सततं भुवि ॥ १२

एकदा लोहकारस्तु तस्मै खड्गं प्रदत्तवान्।
तेन खड्गेन चिच्छेद घासपत्रं स भूपतिः ॥ १३

व्यसनानां प्रभावत्वात् निर्वीर्यो जात एव सः।
निर्वीर्यत्वात् सदा भीरुः निस्तेजोऽभूत् धराधिपः ॥ १४

राजपुत्रकुले जातः जन्मना राजपुत्रकः।
राजत्वं नास्ति तस्याङ्गे भीरुत्वं संभृतं भृशम् ॥ १५

तं दृष्ट्वा सहजं शक्तः पितरं चाभ्यभाषत।
खड्गेन शत्रवः छिन्नाः घासपत्रं न कर्हिचित् ॥ १६

इति खड्गेन दत्तेन स्वीयहस्ताङ्गुलिं द्रुतम्।
विना बाधां सशक्तस्तु चिच्छेद हसितोन्मुखः ॥ १७

विशालायां सभायां तु दारुणं रोमहर्षकम्।
तत् दृश्यं प्रविलोक्यैव राजा मेने भिया हृदि ॥ १८

यद्यहं बहुधा लक्ष्यः पश्येयं तनयं चिरम्।
स एव हन्ता मां सत्यं संशयो नास्ति कश्चन ॥ १९

ज्ञाति व्यथाभिन्नमतिः हन्तुमेनं शशास सः ।
मन्त्रिणः कठिनास्तत्र भावसंकुलवीचिभिः ॥ २०

सलुंब्रादेशभूपस्तु कृष्णसिंहाख्यभूषितः ।
तं नीत्वा पोषयामास स्वीयपुत्रकवत् प्रियम् ॥ २१

यदा चितौड्दुर्गस्तु परहस्तगतः तदा ।
मज्जे जीवनमारब्धं रोगावृतमहीभुजा ॥ २२

सामन्तान् मन्त्रिणः तूर्णं बान्धवान् मित्रवर्गकम् ।
आहूय तान् विशोकेन निजगाद वचः परम् ॥ २३

अथि भोः मन्त्रिणः सर्वे बान्धवाः मम गोत्रजाः ।
श्रुण्वन्तु मे वचः पूर्णं कर्तव्यं मदनन्तरम् ॥ २४

जीवेयं न हि लोकेऽस्मिन् दिवसीयसुखाय च ।
मे वाक्यमधुना यूयं श्रुण्वन्तु विशदं प्रियम् ॥ २५

बहवः सन्ति मे पुत्राः मूढाः सर्वे विभासकाः ।
ज्येष्ठः प्रतापराणा तु राज्यार्हः किन्तु दुर्जनः ॥ २६

सर्वदा भिल्लवर्गैश्च मैत्रीं कुर्वन् प्रकोपनः ।
मामकीनं वचो नित्यं न्यक्कृत्यास्ति प्रतापवान् ॥ २७

द्वितीयः शक्तपुत्रस्तु साहसी क्रूरमानसः ।
निर्धूमवीतिहोत्रोऽसौ भस्मसात् कुरुतेऽखिलम् ॥ २८

तृतीयः सागरो नाम चपलोऽयं च दुर्मतिः ।
वीतिहोत्राकृतिः पूर्णम् ऋणं दत्वा रणं नयेत् ॥ २९

सर्वे ममात्मजा नित्यम् अक्रमक्रमजीवनाः ।
बुद्धिमानेक एवास्ति जगमल्लाभिधानकः ॥ ३०

मदीयमरणान्ते तु स एवार्हः प्रियो नृपः ।
सज्जनो नयभक्तिभ्यां राजार्हः प्रियदर्शनः ॥ ३१

कृष्णसिंहो महामन्त्री करिष्यति मम प्रियम् ।
मद्धस्ते हस्तमाक्षिप्य राजानं जगमल्लकम् ॥ ३२

शान्तात्मना मया प्राणाः संत्यज्यन्ते सुखेन च ।
सकलं भारतं तिष्ठेत् शान्तिरूपेण निश्चलम् ॥ ३३

श्रुत्वा तस्य वचः सान्तं कृष्णसिंहो जगाद सः ।
कुर्वन्तु प्रार्थनां शान्त्या करिष्यामि यथेप्सितम् ॥ ३४

सर्वे तस्य वचः श्रुत्वा अनोन्यालोकने नतम् ।
निनिन्दुः प्रबलं मौने कृष्णसिंहं च बान्धवाः ॥ ३५

परेद्युः मरणं पेदे राजा राणोदयस्तदा ।
सर्वे कृतान्त्यसंस्काराः पारलौकिकसत्क्रियाः ॥ ३६

मुदा राणा स्वयं भूत्वा राज्यं चक्रे भयावृतः ।
ऋषित्रयीसमायुक्तं महाप्राणविधौ समे ॥ ३७

मेवाडं पालयामास त्रिंशतिर्वत्सरान् भिया ।
अन्यसाहाय्यमाप्त्वाऽसौ शक्तिहीनः स्वजीवने ॥ ३८

ऋषी रसमहाप्राणविधौ वर्षे पलायितः ।
बादशाहाकबरेणाशु बहुसैन्याधिपेन सः ॥ ३९

शक्त्या चितौडं स्वायत्तं चक्रे सान्तं स चाक्बरः ।
तदा प्रभृति मेवाडे शाश्वतं तस्य शासनम् ॥ ४०

दुर्बलो यदि भविष्यति राजा शाश्वतं हि परपालनमेव ।
जायतेति न कदापि देशजैः स्मर्यते किमिह चित्रविचित्रम् ॥ ४१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' उदयसिंहस्य व्यक्तित्वं '
नाम चतुर्दशः सर्गः समाप्तः ॥]

पञ्चदशः सर्गः ।

१५. कृष्णसिंहस्य चारित्र्यम् ।

कृष्णसिंहस्तु राज्येऽस्मिन् शान्तसागरभीकरः ।
महामन्त्रिपदं प्राप्य भ्राजतेऽसौ गुरुः यथा ॥ १

साम्प्रदायं विजानाति सर्वमानससंस्कृतिम् ।
कस्यापि चित्तं नैवासौ धुनोति कटुवाक्चयैः ॥ २

जृम्भणे कुक्षिसंव्याप्तं सर्वं जानाति पूर्णतः ।
अनुमानप्रमाणेन जगत् सर्वं प्रपश्यति ॥ ३

पीनवक्षा महायोद्धा श्मश्रुणा भूषिताननः ।
आजानुबाहुः कञ्जाक्षः भीमकान्तगुणैर्युतः ॥ ४

महामनीषी नीतिज्ञः रणरङ्गे पराक्रमी ।
अनन्तराज्यचक्रं तु चालनक्षमशक्तिमान् ॥ ५

सततं सर्वकार्येषु तस्य प्रज्ञा प्रवर्तते ।
चराचरेषु सूर्यस्य तेजो लीनं यथा भुवि ॥ ६

उदयस्य मनस्तत्त्वं सर्वं जानाति शैशवात् ।
तस्मादयं विचार्यैव तस्याज्ञां कुरुते प्रियम् ॥ ७

असाम्प्रदायकं यत् स्यात् न करोति कदापि सः ।
प्रतिपन्नं निर्वहति ससन्दर्भं सदैव यत् ॥ ८

अमलोदात्तचारित्र्यः पूर्णकुम्भस्वरूपकः ।
सर्वमङ्गलकाङ्क्षी च सर्वयुद्धविशारदः ॥ ९

कामन्दकीयनीतिस्तु दृश्यते तस्य भाषणे ।
चाणक्यनीतिसारं तु बुद्धिं प्राप्य विराजते ॥ १०

चुलिकीकृतनीत्यब्धिः कर्मसक्तमनाः सदा ।
धर्मशास्त्रादिकं तस्य शरीरे जीर्णितं भृशम् ॥ ११

सर्वशास्त्रेषु निष्णातः पर्यालोचनतत्परः ।
पूर्वापरपरिज्ञाने परमेष्ठी महायशाः ॥ १२

सुलुंब्रावंशदीपोऽयं कृष्णसिंहेति नामकः ।
राणावंशीयकर्तव्यं यथायोग्यं करोति च ॥ १३

अधर्माचरणं तस्य न योग्यं भाति जीवने ।
व्यक्तेरपेक्षया श्रेष्ठं देशसंरक्षणं सदा ॥ १४

देशसंरक्षणार्थाय बलिष्ठाः राजपुत्रकाः ।
धीरोदात्तगुणोपेताः सर्वदाऽऽवश्यका भुवि ॥ १५

इति तस्य मनीषाऽस्ति विपुलं देशरक्षणे ।
तदर्थं शैशवात् राणां चकाङ्क्षे देशरक्षकम् ॥ १६

भावनाम् उदयस्यासौ श्रुत्वा शान्तं यथाप्रियम् ।
तथा कर्तुं ददौ वाक्यं यथायोग्यं यथामति ॥ १७

तादृशे संकटे काले सर्वदा देशरक्षणम् ।
विष्णवंशजातकैः सत्यं क्रियतेति स निश्चितः ॥ १८

अकृत्वा जगमल्लं तु राणां देशहितैषिकः ।
राणां कर्तुम् इयेषासौ प्रतापं धीरपूरुषम् ॥ १९

धर्मशास्त्रानुसारं सः ज्येष्ठपुत्रोऽस्ति भूपतेः ।
नृपस्याज्ञानुसारेण जगमल्लो धराधिपः ॥ २०

विना च तस्य साहाय्यं नैव शक्तो बभूव च ।
राज्यभारं च संवोढुम् उदयः स्वीयपालने ॥ २१

जगमल्लं तु राजानं कर्तुमैच्छद्धराधिपः ।
उदयः शक्तिहीनोऽपि बुद्धिहीनो बभूव च ॥ २२

अशक्तिमत्त्वं भूपस्य सर्वं जानाति शक्तिमान् ।
तदीयपालने मेवाडुः परहस्तगतो बभौ ॥ २३

तदाप्रभृति कृष्णस्तु मनस्येवं सुनिश्चितः ।
उद्धर्तुं राष्ट्रमेनं तु प्रतापः शक्तिमान् भुवि ॥ २४

अस्यां स्थित्यां कृष्णसिंहः रेजे कार्यद्वयाकुलः ।
अनयोः कार्ययोर्मध्ये कर्तव्यं किं भवेदिति ॥ २५

एवं विचिन्त्य कृष्णस्तु नृपं सान्त्वयितुं तदा ।
तदीयकामनां श्रुत्वा तद्वत् कर्तुं वचो ददौ ॥ २६

देशस्थितिं समालोच्य भीरुत्वमुदयस्य च ।
समीक्ष्य सर्वराज्याङ्गं कृष्णसिंहः तथाऽकरोत् ॥ २७

व्यक्तिस्वार्थात् समाजस्य रक्षणं चोत्तमं खलु ।
समाजात् वरमत्रास्ति सदा देशस्य रक्षणम् ॥ २८

देशात् बृहत्तमं राष्ट्रं तस्य रक्षणमेव हि ।
समक्षमधुना भाति नान्यदस्तीह मे मतौ ॥ २९

अनन्तराष्ट्ररक्षां च जगमल्लस्तु नार्हति ।
कर्तुं सान्तत्यधाटीभ्यः परेषां क्रूरचेतसाम् ॥ ३०

राणाप्रतापभूपस्तु वीर्यवान् शक्तिमान् परम् ।
स एव योद्धा धर्मात्मा परवीरभयङ्करः ॥ ३१

तस्मादहं तमेवाशु राजानं कर्तुमुद्यतः ।
इति मत्वा दृढं कृष्णः चक्रे मौनेन यत् हितम् ॥ ३२

एवं विधाय शान्तात्मा देशं रक्षितवान् परम् ।
सोऽपि राणाप्रतापस्य जातो मन्त्री प्रियं तदा ॥ ३३

आपत्सु मन्त्रणाशक्तिः वर्धते तस्य संततम् ।
अपारदेशभक्तस्य कृष्णसिंहस्य मन्त्रिणः ॥ ३४

राजकार्यकरणे धुरंधरः कृष्णसिंहविभुरस्ति महात्मा ।
साधुसाध्विति नृपाः शुभवाक्यैः मेणुरेव बहुहर्षितचित्तैः ॥ ३५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' कृष्णसिंहस्य चारित्र्यं ' नाम पञ्चदशः सर्गः समाप्तः ॥]

षोडशः सर्गः ।

१५. उदयराणामरणानन्तरं राजसभायां वाग्विवादाः कृष्णसिंहं प्रति ।

जनाः सर्वे वदन्त्येवं राणा व्यर्थं चकार तम् ।
राज्यभ्रष्टमनालोच्य धीरोदात्तं प्रतापिनम् ॥ १

प्रासूत वृषभो वत्सं तूर्णं तत्र बधान रे ।
निशम्यैवं तथेत्युक्त्वा चक्रे राजानुशासनम् ॥ २

एकमस्ति तयोः कर्म ज्ञात्वा ज्ञात्वा च भूतले ।
मूढा भवन्ति राजानः ऐश्वर्यमदघूर्णिताः ॥ ३

उदयस्य वचः श्रुत्वा जगाद सचिवः प्रियम् ।
शास्त्रीयगायकस्याग्रे मर्दलस्य ध्वनिः यथा ॥ ४

पुरा दशरथः साक्षात् ज्येष्ठपुत्रं विहाय च ।
पट्टाभिषेकं प्रारेभे कनिष्ठभरतस्य तु ॥ ५

कथं लोके विधास्यन्ते नैककृत्यानि बाहुजैः ।
पितृभिः दुर्बलैः सत्यं युक्तायुक्तविचारकैः ॥ ६

स्वार्थे सुखे विलासेषु रममाणाः जनाधिपाः ।
कर्तव्यं देशकीर्तिं च त्यक्त्वा जीवन्ति भूतले ॥ ७

एतादृशं परिव्याप्तं दारिद्र्यं देशनाशकम् ।
निरस्तुं कस्समर्थोऽस्ति विना राणां महीतले ॥ ८

सर्वोऽपि यतते नित्यं शक्तिहीनोऽपि काङ्क्षया ।
सिंहासने मन्दमतिः उपवेष्टुं मदावृतः ॥ ९

काकोऽपि काङ्क्षते लोके प्राप्तुं गारुत्मतीं श्रियम् ।
उच्चैःश्रवत्वमाप्तुं च गर्दभो यततेऽनिशम् ॥ १०

कोऽयं लोके गुणी नेता साम्प्रतं विद्यते भुवि ।
इत्येवं चिन्त्यते नैव बुद्धिहीनाः धराधिपाः ॥ ११

सर्वः स्वार्थे निमग्नः सन् विस्मृत्यैव स्वगौरवम् ।
केवलं दाम्भिकाचारैः वसतीह विना मतिम् ॥ १२

दास्यभावैः परं हेयैः पारतन्त्र्यप्रदीपकैः ।
कथं जीवन्ति देशाग्राः आत्महत्यां विना भुवि ॥ १३

न कोऽपि चिन्तयत्येवं जन्तवः शाश्वता न हि ।
उत्पद्यन्ते विलीयन्ते किन्तु देशस्तु शाश्वतः ॥ १४

अशासयन् महीं भूपाः नैके धर्मपरायणाः ।
किन्तु तेषां सहस्राणां श्रूयते न च नामकम् ॥ १५

न किञ्चित् भुवि नेतारः नीत्वा गच्छन् प्रियं परम् ।
स्वीयद्रव्यं प्रियं वस्तु किन्तु धर्माद्दते स्वयम् ॥ १६

दृष्ट्वा लोके यथावृत्तं निर्दयं चर्वितचर्वणम् ।
मानवो नैव लोकेऽस्मिन् त्यजत्याशां किमुच्यते ॥ १७

त्यागेन भजते कीर्तिं स्वार्थहीनेन काङ्क्षया ।
मानवो नान्यमार्गैश्च शाश्वतां मार्गदर्शिनीम् ॥ १८

परस्परं प्रजाचक्रं किं वा किं वा वभाण च ।
सोद्वेगं रुधिरोद्रिक्तं कदुष्णं भावसंचयम् ॥ १९

कृष्णसिंहस्तु निःशब्दं सर्वं श्रुत्वा महीभुजाम् ।
वाक्यजालं प्रशान्तात्मा मौनमुद्राभिभूषितः ॥ २०

सत्यं तेनैव राजाज्ञा भवितव्या तिरस्कृता ।
सोऽपि मौनेन चाक्रान्तः किं वक्तव्यमतः परम् ॥ २१

भावांश्च हृदयस्थांश्च कृष्णसिंहस्य भूतले ।
ज्ञाताऽप्यत्र न चैवास्ति न भूतो न भविष्यति ॥ २२

शान्तबुद्धिः प्रसन्नात्मा सर्वं कर्तुं समीहते ।
कथं कुत्र कदा किं वा न जानाति करोति सः ॥ २३

किञ्चित् स्वार्थी भवत्येव तस्यापि शृणुत प्रियम् ।
जगमलं निहत्यैव स्वयं राजा भविष्यति ॥ २४

इयन्तं कालमत्रासौ मन्त्रिरूपेण संस्थितः ।
न जातो लाभ एवास्य तस्मात् राजा भवेद् ध्रुवम् ॥ २५

राजत्वे साधनीयं तु वहुधाऽस्ति भुवि प्रियम् ।
राजा भूत्वा स्वयं सर्वं साधयिष्यति साम्प्रतम् ॥ २६

तस्यान्तरङ्गे चिन्ताऽस्ति वाहिनीरूपमाश्रिता ।
तस्मादयं विभात्येव चिन्ताक्रान्ताननः परम् ॥ २७

निष्कासितप्रतापोऽयं कानने खिन्नजीवनः ।
दिनानि यापयन्नास्ते गजाधिप इव स्वयम् ॥ २८

मेवाडवैभवं भ्रष्टं राणावंशस्तु नाशितः ।
व्यत्ययो जात एवात्र कालचक्रं तु वक्रितम् ॥ २९

अत्यन्तबुद्धिमान् कृष्णः राजभक्त्या प्रवर्धितः ।
सर्वदा धर्मवद्धोऽसौ कथमेवं प्रवर्तते ॥ ३०

वार्धक्ये बुद्धिमान्द्यं तु जायते प्राणिनां सदा ।
तथापि न्यायमार्गात्ते च्युता नैव भवन्ति हि ॥ ३१

यदि स्वार्थे विजायेत बुद्धिर्भवति निर्बला ।
कालान्तरेण बुद्धिस्तु वैपरीत्यं प्रपद्यते ॥ ३२

अस्थैर्यं भौतिकं नित्यं क्षीयते भुवि चेतनम् ।
अचेतनं च शून्यत्वं प्राप्नोतीह ध्रुवं खलु ॥ ३३

राजाऽत्र नास्ति राज्येऽस्मिन् विरागी स च भूपतिः ।
न कोऽपि कृष्णसिंहेन योद्धुं शक्तो भविष्यति ॥ ३४

राजकीयेषु संमग्नः नित्यं कार्यरतः स्वयम् ।
तस्मादयं कदाप्याशु वभाणाप्रियवाक्चयम् ॥ ३५

प्रभाते स्वयमेवासौ शुचिर्भूत्वा महामतिः ।
सर्वानस्मान् स्वपादाब्जान् संग्रहीतुं वदिष्यति ॥ ३६

यद्येवं भविता राज्ये अहं राणां समेत्य भोः ।
सर्वं राज्ये समुद्भूतं कथयिष्यामि भारतम् ॥ ३७

कृष्णसिंहः तथा नैव भवितुं काङ्क्षते मे ।
मनस्तथ्यं ब्रवीत्येवं हृदयस्पन्दनैः प्रियम् ॥ ३८

अन्यः कश्चन कोपेन न्यगदत् सर्वराजकम् ।
कृष्णेनैव तथा कर्तुं ईह्यते शृणु मद्वचः ॥ ३९

उदयो वक्रगामीति निश्चितं तेन शैशवे ।
कथं मरणशय्यायां कृष्णः तं धिक्करिष्यति ॥ ४०

नीतिज्ञः स च धर्मात्मा स्वार्थस्तस्य न विद्यते ।
बाल्यात् प्रतापमेवासौ काङ्क्षते भावि-भूपतिम् ॥ ४१

तत्कालीनव्यवस्थां तु चकारासौ परं धिया ।
राज्ञेऽप्रियं न वक्तव्यम् इत्येवं कृतनिश्चयः ॥ ४२

राजानं कर्तुमस्यैव शक्तिरस्ति महीतले ।
न चास्ति कश्चित् तत्स्थाने तथा कर्तुं शृणु प्रियम् ॥ ४३

अस्मदीयवचोरीतिं यदि कृष्णः समेत्य भोः ।
श्रोष्यति प्रखरो भूत्वा सर्वानस्मान् वधिष्यति ॥ ४५

अयं राणां समानीय राजानं प्रविधास्यति ।
तदर्थं समयं योग्यं पश्यतीति ममाशयः ॥ ४५

शाम्यन्तु सर्वे पश्यन्तु विधानं कृष्णभूपतेः ।
नैव जानाति देवोऽपि वयं के मेदिनीतले ॥ ४६

लोकोत्तरस्य कृष्णस्य चारित्र्यं चित्तभावनाम् ।
विज्ञातुं बुद्धिमानस्ति प्रतापः केवलं भुवि ॥ ४७

एवं भाषणमस्माकं नैव योग्यं वृथा श्रमः ।
यद्भाव्यं भविता सत्यं गच्छध्वं स्वस्थमानसाः ॥ ४८

जगमल्लाभिषेकस्तु कदा कुत्र भवेत् ध्रुवम् ।
न कोऽपि राजा जानाति तावत् शान्तिं भजन्त्विति ॥ ४९

एवं विधानसंघर्षैः वाचिकाभिनयैः बभौ ।
सर्वत्र भवनं शब्दैः ध्वनितं निभृतं तदा ॥ ५०

समस्तचर्चां बहुसारवाक्यैः कृत्वा भृशं चर्वितचर्वणैस्ते ।
निर्यातुकामाः प्रियभक्तिभावैः स्वीयासनेभ्यः सहसोदतिष्ठन् ॥ ५१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये मेवाडकाण्डे ' उदयराणामरणानन्तरं राजसभायां वाग्विवादा कृष्णसिंहं प्रति ' इति षोडशः सर्गः समाप्तः ॥]

इति श्रीसकलभुवनतलबुधजनविनुतकविकुल-पादारविन्दमकरन्दपान-मत्तभ्रमरायमानमानसेन श्री ओगेटि कौसल्यासाम्बमूर्तिदम्पत्योः गर्भशुक्ति-मुक्ताफलायमानसूनुना गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना ललितगीतालहरी-अक्षयगीतरामायणम्-यशोधरामहाकाव्यम्-परीक्षिन्नाटकचक्रम्-जानपदनृत्यगीतमञ्जरीकाव्यम्-सौन्दर्यमीमांसादि काव्यसंचयविरचितेन पण्डित ओगेटि परीक्षित् शर्मणा विरचितश्रीमत्प्रतापराणायनमहाकाव्ये मेवाडकाण्डं समाप्तम् ।

उदय-काण्डम् ।

प्रथमः सर्गः ।

१. उदयपुरवर्णनम् ।

उदयपुरवरोऽत्र राजदेशे विलसति देशजनालिसंघशक्त्या ।
हरिसमनृपशासने प्रभूतः प्रकटितदिव्यनृपालभावदीपैः ॥ १

बहुनरपतिरक्तसिक्तदेशः किमपि कलङ्कविहीनशौर्यराशिः ।
भवति भुवनराजलोकवन्द्यः विमलमहापुरुषप्रतापदेशः ॥ २

मदगजचयदानसिक्तधात्र्या वरहरिदन्तगजालितौल्यमानैः ।
भयदकदनचालनाभिरामैः सततमनेकपयूथभासमानः ॥ ३

तुरगखरखुराग्रखण्डिताङ्गः विनुतनवोदितमण्डनाभिरम्यः ।
हयचयकृतहेषया सुगीतः विशदयतीह दिशासु राजकीर्तिम् ॥ ४

विविधतरुवरालिपुष्पिताग्रः हसति सदोदयभाग्यवीरदेशः ।
मधुरपन्नगकूजनाभिरम्यः सकलधरातलकीर्तिताभिधानः ॥ ५

विनुतविमलशुभ्रवारिदेशः विकसितनव्यजलेजगन्धलिप्तः ।
शुकपिकवरशारिकानिनादैः लसति सदागतिवीचिकापुनीतः ॥ ६

सदमलघनसात्पुडापरीतैः हरितवनाद्रिसुरम्यभव्यदृश्यैः ।
सुमफलभरभूरुहैः लतान्तैः हसति कलापिकलापजालभाभिः ॥ ७

निरवधिमहिमैकलिङ्गयुक्तः विशदमनाः सुमगन्धरागलिप्तः ।
मधुरघनजटादिवेदमन्त्रैः महितधरामरसामगानपूतः ॥ ८

सततपठितभूसुरेन्द्रमन्त्रैः अविरलहोमरुचाभिगीततन्त्रैः ।
अधिगतसकलार्थशास्त्रसारैः उदयपुरं प्रतिभाति सर्वसौख्यैः ॥ ९

बहुविधनुतवेदशास्त्रतज्ज्ञैः प्रतिदिनरुद्रमहाभिषेकमन्त्रैः ।
उदयपुरवरोऽत्र भूमिसूक्तैः अभिनवकान्तिविसारिदिव्यरूपैः ॥ १०

अविरलजपहोमभूसुरौघैः विरचितहव्यलसत्तनूनपाद्भिः ।
नुतगुरुकुलसाम्प्रदायबद्धैः भुविपरिनिष्ठितशास्त्रवेत्तृभिश्च ॥ ११

अतुलितमधुकण्ठनादभासैः प्रविमलसुस्वरसामगायनाग्रैः ।
सकलगगनशास्त्रवेत्तृवर्गैः विलसति भूपतिसुप्रतापभूमिः ॥ १२

हयगजशतधोष्ट्रधाटियूथान् शकलविभेदनसव्यसाचिरूपः ।
शमनभटसमानतद्भटालिः प्रभवति संगरसागरप्रपातान् ॥ १३

असुहरणकरालखड्गहस्ताः मधुरगभीरसुलोचनाभिरामाः ।
परहृदिगतशब्दभावतज्ज्ञाः रणभुवि शत्रुविनाशनाग्निरूपाः ॥ १४

गजतुरगविचालनेषु रक्ताः परजनसंमुखसंगरेषु सक्ताः ।
अरिजनचयभञ्जनप्रकाण्डाः सदमलकीर्तिविहारमग्नचित्ताः ॥ १५

त्सरुविलसितखड्गचालने ते सुनिशितबुद्धिबलाभियुक्तभूपाः ।
प्रतिदिनमिह भव्यराजवर्गैः उषसि भृशं निरता भवन्ति शस्त्रैः ॥ १६

समरगतिहयप्रचारमग्नाः मदगजकुम्भविदारणप्रकाण्डाः ।
दृढजडकटुशूलमुद्गराभिः प्रकटितयुद्धविशारदा भवन्ति ॥ १७

अचलगजहयाधिरोहणे ते पटुतरभारविचालनेषु शक्ताः
जलतलगतवस्तुशोधनेषु प्रकटितधैर्यविचारबुद्धिदीक्षाः ॥ १८

जलतरणकलासु तज्ज्ञभूपाः जलगतलोकविमोचनाग्रगण्याः ।
बलिशिविगुणदानकर्णतुल्याः शमगुणधर्मनृपालतुल्यभूपाः ॥ १९

गुरुतरनिजधर्मभावपूक्ताः शुभमयराष्ट्रहिताय दीक्षितास्ताः ।
महिविनुतनरेन्द्रजीवनादर्शहितकरामलनव्यभावदीप्ताः ॥ २०

उदयपुरनिवासिषु प्रकामं बहुजनयोग्यहिताय वैश्यवर्गाः ।
अपरिमितधनालिराशिधान्यैः वितरणकार्यरताः प्रभावयन्ति ॥ २१

अनवरतधनार्जनप्रवीणाः जनगणचित्तनिवेशदृष्टियुक्ताः ।
धननिधिषु कुबेरतुल्यवैश्याः विनुतविदेशगता विभान्ति राष्ट्रे ॥ २२

नवनिधिचयभारपूर्णगोणीः खरसिकताभरिते मरुस्थले तु ।
निशि निशि शशिकान्तिकौमुदीषु नयति च वैश्यगणः क्रमेलकेषु ॥ २३

बहुरसफलदायिनीमिलां ते कृषिकजना हलचालनेन नित्यम् ।
समधिकफलमूलधान्यलक्ष्या भरितमहो स्वपुरं प्रकुर्वतेऽत्र ॥ २४

दृढतमपटुलाङ्गलेन भूमिं युगयमितोष्ठधुरेण साधु सीताम् ।
पटुतरहिमविन्दुशीतकाले सुफलमधान्ययुतां विधाय भान्ति ॥ २५

बहुलकुसुमगन्धपूतरम्यं उदयपुरे रसपूर्णचित्तपौराः ।
विविधरसफलालिदीप्तदेशं प्रविदधते हृतुरम्यचित्रितं नु ॥ २६

असमशरविलासिनीसमानाः बहुमधुरं पुरवीथिकाभिरामाः ।
मदनसुरकुमारजनं समीक्ष्य विकसितनीरजलोचनैः सकामाः ॥ २७

नवजनितकलाविलासयुक्ताः विवशमनाः सपदं विना हि मूल्यम् ।
जलजनिभकरैः ददुश्च भावैः हृदयसमानि सुमानि भूपतिभ्यः ॥ २८

मदनकदनमग्नराजलोकः मणिगणदाममनोजरागयुक्तः ।
सुरतमृदितपुष्पलाविकेभ्यः लघु लघु याति मनोहरं प्रदाय ॥ २९

अमृतसमजलेन नित्यपूर्णाः जलनिधितुल्यविलोलवीचिकात्ताः ।
पतगनिचयमण्डिताः तडागाः पुरजनजीवनदानजीवरूपाः ॥ ३०

कुवलयनलिनीकदम्बभान्ताः हरितमनोहरशैवलाभिसक्ताः ।
अलिकुलकलिता सरोजषण्डाः नयनपथं नवशोभया भजन्ते ॥ ३१

अनुदिनमिह गन्धवाहपूताः दिनकररश्मिविराजिता दिनान्ताः ।
मधुरमिलनपूर्वरङ्गभान्ताः सततविकाररता क्षपाः विभान्ति ॥ ३२

जलधरकृतविगर्जनातिमत्ताः द्रुततगतिविस्तृतमत्तवर्हिवर्हाः ।
मधुरविषमवृत्तनृत्तरूपाः नयनपथीह च सुन्दरं लसन्ति ॥ ३३

प्रविकसितलतान्तगन्धलुब्धाः मधुचयगुञ्जनमत्तसद्विरेफाः ।
मदविकलितकोकिलाः स्वगानैः मुखरितमत्र विकुर्वते दिशान्तान् ॥३४

अनिलसमतुरङ्गयूथयुक्ताः विचलितशैलमतङ्गयूथदप्ताः ।
शमनभटसमानपत्तिसैन्याः परजनसैनिकमानसेषु शल्याः ॥ ३५

उदयपुरमहोन्नताद्रिसाम्याः परजनभीतिकराश्च भव्यदुर्गाः ।
वरनरपतिदिव्यकीर्तिरूपेप्वनिशमहो विशदा विभान्ति नूत्नाः ॥ ३६

उदयपुरनिकेतनेषु वेश्याः निशि निशि राजकुमारबाहुबद्धाः ।
मनसिजसुकुमारचित्तचोराः परमसुखं जनयन्ति राजलोके ॥ ३७

अमितमधुरगानवद्धलास्याः प्रतिपदवर्धितमन्मथाः कटाक्षैः ।
पदयुगकलशिञ्जिनीनिनादैः मदनरणाय समाह्वयन्ति लोकम् ॥ ३८

क्रमुकफलसमानसुस्तनात्ताः कुवलयपत्रविलोललोचनान्ताः ।
मधुरगमनराजमानकन्याः प्रतिदिनमेति विलोकितुं विटालिः ॥ ३९

ददति पुरप्रतल्लिकाः स्वगानैः उषसि समं निरतं कुमारकेभ्यः ।
रसमयदेशभक्तिगीतैः अमृतपयोधरदुग्धपानसौख्यम् ॥ ४०

कुसुमविशिखयुद्धरङ्गरम्याः मदनसतीसमरूपदीपिताङ्गयः ।
मधुपदचयजल्पिताभिरामाः विलसितहावविसारिता भवन्ति ॥ ४१

परिमलयुतशीतवायुयुक्तः विकसितनीरजगन्धलिप्तदेशः ।
अनिलचलितकीचकालिगीतः निरतविलोलपतत्रिकूजनाक्तः ॥ ४२

मधुमयभणितैः प्रतापकीर्तिं कथयति सर्वचराचरावलिश्च ।
रचयति च सदागतिस्तु नित्यं वरनृपतेः प्रतिशब्दरम्यचित्रम् ॥ ४३

प्रकटितमधुरस्वराभिगीतैः विविधकलायुतगायकालिगानैः ।
कलितललितरम्यवेणुनादैः प्रतिरवकृद् हि विभाति दिव्यसृष्टिः ॥ ४४

सदमलवरशान्तवीररौद्रैः रिपुकुलकण्ठविलुण्ठनाग्रगण्यैः ।
अनितरपटुदार्ढ्यदीर्घकायैः निरतमहोऽत्र विभासते सुवीरैः ॥ ४५

प्रकृतिविमलरम्यसौधहर्म्येष्वतिमधुरास्यसुहास्यलास्यरामः ।
पदनिगदितमयूरषण्डान् रसमधुराभिनयैः प्रशिक्षयन्ति ॥ ४६

अधिगतसुखरागमत्तचित्तैः सललितकाम्यसुभोगसक्तभूपैः ।
विचलितमधुभावनृत्तनृत्यैः भुवि सुखमत्र विभुज्यते नितान्तम् ॥ ४७

निरतसुचित्रमञ्जुलमहीजविभूषिततुङ्गभूधरैः
प्रविमलरम्यतोयविलसन् नयनोत्सवसारसीचयैः ।
कविकुलगानरीतिकलिताखिलकाननदिव्यवैभवैः
उदयपुरं विभाति निजसंस्कृतिमण्डलैः परम् ॥ ४८

[श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' उदयपुरवर्णनम् ' नाम प्रथमः सर्गः समाप्तः ॥]

द्वितीयः सर्गः ।

२. प्रतापराणाव्यक्तित्वम् ।

शून्यवेदमहाप्राणशशिसंवत्सरे प्रियः ।
ज्येष्ठे तिथ्यां नवम्यां स जातो राणा महाप्रभुः । १

दिव्यसौरप्रभादीप्तः देशभक्तो महाधिपः ।
राजर्षिरूपमापन्नः कान्तारे रतजीवनः ॥ २

स्वतन्त्रं भारतं कर्तुं पारतन्त्र्यान्महायशः ।
एकोनविंशद्वर्षाणि कुटुम्बीकः स्थितो वने ॥ ३

युयुधे शत्रुघाटीभिः दिवारात्रं चिरं वने ।
संत्यज्य जीवने सौख्यं देशभक्तिमना नृपः ॥ ४

धीरोदात्तगुणैः युक्तः राणा शत्रुभयंकरः ।
धर्मभीरुः स्थितप्रज्ञः संग्रामे भीमविक्रमः ॥ ५

अयं धीरः प्रसन्नात्मा त्यागी राष्ट्रहितेच्छुकः ।
भुवौकसां समाराध्यः साक्षात् रामविभुः स्वयम् ॥ ६

तदा देशे पराक्रान्ते भूपाः सौख्यरताः श्रिया ।
देशं कर्तव्यभावं च त्यक्त्वा शत्रुवशं गताः ॥ ७

एकोनविंशद्वर्षाणि युयुधे शत्रुभिः सह ।
एतादृशः कष्टभोगी नास्ति कुत्रापि भूतले ॥ ८

वीराबाई तदा रेजे रणदुर्गेति भारते ।
तस्याः पुत्रो महानेता प्रताप इति कीर्तितः ॥ ९

बाल्यात् प्रतापराणाऽयं वीरगाथाप्रभावितः ।
सर्वदा मातृपादाब्जे ववृधे वीर्यवानिव ॥ १०

पूजास्थानं भवन्त्यस्य पद्मिनी भीमदम्पती ।
कुम्भराणाप्रिया मीरा वीरमाताऽप्यहर्निशम् ॥ ११

संग्रामसिंहभूपस्य चरितं च महाप्रियम् ।
चिन्तने स्मरणे नित्यं नवशक्तिः प्रजायते ॥ १२

प्रत्यहं पितरं द्वेष्टि कुलघ्नं शत्रुरञ्जकम् ।
मेवाडराज्यदातारं शत्रुभ्यः भीतिमानसम् ॥ १३

कर्मयोगिनमाशंसुः पौराः राष्ट्रपरायणाः ।
राणाप्रतापभूपेन्द्रं सानुगाः वन्यजीवनाः ॥ १४

बाल्यात् प्रतापसिंहोऽयं भिल्लैः सार्धं वसन् प्रियम् ।
संघशक्त्या परान् जेतुं यतते स्म स्वयं धिया ॥ १५

भास्करस्य प्रतापेन दिवाऽन्धः सर्वदा यथा ।
संतापितो भिया भाति प्रतापेन तथा नृपः ॥ १६

अश्वारूढः स्तुतो लोकैः वीरमुद्राभिभूषितः ।
शूलखड्गादिशस्त्रास्त्रैः संयुतो व्रजते सदा ॥ १७

तस्य नेत्राञ्चले नित्यं सेतुशीतनगान्तरा ।
आब्रह्मकद्धिपर्यन्तं धरणी भाति नाकवत् ॥ १८

तस्यानने लसत्येव हिन्दुत्वं तिलकाञ्चितम् ।
श्मश्रुणा वक्रिताग्रेण सुतीक्ष्णं दृष्टिपुञ्जकम् ॥ १९

भारते सर्वलोकस्य नायको धैर्यसागरः ।
विस्मरेद्यदि तं कोऽपि देशद्रोही भविष्यति ॥ २०

राणाप्रतापचारित्र्ये दृश्यते लोकवन्दिता ।
काष्ठां गता देशभक्तिः धर्ममूला महीतले ॥ २१

देशोऽयं परशक्त्यैव सर्वनाशं गमिष्यति ।
इत्येवं चिन्तयित्वाऽसौ देशसंरक्षणे रतः ॥ २२

सर्वसौख्यनिदानं तद् राजसौख्यं विहाय च ।
गाढं राष्ट्रहिताकाङ्क्षी निवासं चकमे वने ॥ २३

एकोनविंद्वर्षाणि कुटुम्बेन समं नृपः ।
जीवितं यापयामास देशसौभाग्यचिन्तकः ॥ २४

शीतोष्णवर्षसंघाते क्षुत्पिपासाऽभिपीडिते ।
निद्राहीनो विना शान्त्या यापयामास जीवितम् ॥ २५

अजस्रशत्रुसंघातैः युध्यमानः परं नृपः ।
जुगोप दारान् पुत्रांश्च गिरीभ्यः संव्रजन् गिरीन् ॥ २६

परिवेष्टितकष्टेषु दारिद्र्यकुहरे वसन् ।
पाणिप्राणी बभूवासौ कान्तारे शत्रुनाशकः ॥ २७

सत्त्वभावेन संपृक्तः वातावरणदूषितः ।
रेजे शौर्यप्रतापाभ्यां दक्षिणायनभास्करः ॥ २८

पारतन्त्रीयशक्तिभ्यः देशरक्षणदीक्षितः ।
राणाप्रतापः सर्वेषां मूर्धन्यो राजते भुवि ॥ २९

इतिहासे नृपाः सर्वे राणामादर्शपूरुषम् ।
गृहीत्वा भारतं राष्ट्रं ररक्षुः सङ्कटात् भृशम् ॥ ३०

प्रतापानन्तरं राष्ट्रे सर्वे वीराः सुयोधकाः ।
तमेव मत्वा चादर्शं अयुध्यन्त सयुक्तिकम् ॥ ३१

एतादृशो महायोद्धा सत्यनिष्ठापरायणः ।
नासीत् अन्यत्र लोकेऽस्मिन् न कदापि भविष्यति ॥ ३२

चतुर्दशसमाः पूर्वं रामभद्रो वनेऽवसत् ।
दृष्टशिक्षणकार्याय पितृवाक्यानुपालकः ॥ ३३

पाण्डवाश्चैव कष्टानि त्रयोदशसमाः परम् ।
अन्वभूवन् सपत्नीकाः ज्ञाताज्ञातवनौकसाः ॥ ३४

राणाऽपि भारतं वर्षं रक्षितुं म्लेच्छपालनात् ।
देशद्रोहादिवीराणां संकटादयतत् परम् ॥ ३५

दारापुत्रयुतः पूर्णं जीवितं देशरक्षणे ।
आहुतिं व्यदधान्नूनं धिक्कृत्य परपालनम् ॥ ३६

अन्यपालनपङ्काच्च समुद्धर्तुं हि भारतम् ।
अयतत् जीवितान्तं सः भव्यस्वातन्त्र्यभावनः ॥ ३७

अनन्यदेशभक्तः च भीमसंयुगपावकः ।
सदागतित्वमापन्नः चेतकेन चलत्यलौ ॥ ३८

सर्वदा मनुते सर्वां भारतीयपरम्पराम् ।
आत्मशक्तिप्रदात्रीं यां स संरक्षितुमीहते ॥ ३९

मोचयित्वा प्रियं राष्ट्रं दास्यशृङ्खलबन्धनात् ।
प्राचीनभारतौन्नत्यं पुनः प्रस्थापनेच्छुकः ॥ ४०

यतते स्म धिया कर्तुं भिल्लवर्गैश्च दैशिकैः ।
सर्वथा शक्तिसंपन्नं भारतं सर्वतोमुखम् ॥ ४१

एवंविधगुणैः युक्तः राणा सज्जनपूजकः ।
रघोरन्वयकीर्तिं च स्मारं स्मारं विराजते ॥ ४२

भिल्लान् सर्वान् च भूपोऽसौ बोधयामास भारतम् ।
सर्वे तस्यानुगा नित्यं रेजुः भक्तिपराक्रमाः ॥ ४३

कदापि नोक्तवान् राणा चाक्बरं बादशाहिति ।
रेजे तुर्काख्यशब्देन नित्यं संबोधयन् विभुः ॥ ४४

अक्बरेण समं युद्धं कुर्वन् राणा शनैः शनैः ।
स्वाधीनं बहुशः चक्रे मेवाडं स्वीयजीवने ॥ ४५

चितौडं मङ्गलं दुर्गं विना सर्वान् च दुर्गमान् ।
दुर्गान् प्रतापराणाऽसौ मुक्तान् चक्रे स्वजीवने ॥ ४६

प्रबलं पटुयोद्धारं स्मृत्वा राणां सतुर्ककः ।
तत्याज सुतरां स्वीयां जिगीषां जीवनेच्छुकः ॥ ४७

राणासमो महायोद्धा जातो नैवेति भूतले ।
भारते दिव्यचारित्र्ये लिलिखुः विश्वलेखकाः ॥ ४८

मेवाडदेशे राष्ट्रेऽस्मिन् परहस्ते गते सति ।
राणाप्रतापसिंहोऽयं नेताऽभूत् देशरक्षणे ॥ ४९

मोग्लाय्विरुद्धसंग्रामे तरुणाः राजपुत्रकाः ।
बहवो मृत्युना नीताः प्रबले संगरे क्षणम् ॥ ५०

दुर्गाः सर्वे परानीकैः स्वायत्तं प्रापिता द्रुतम् ।
नैकभूपालपुत्रास्तु मुसल्मानपदे रताः ॥ ५१

राठोड् जोधपुराणां च राजानः कन्यकाः स्वयम् ।
अक्बराय ददुः तूर्णं स्वीयस्वार्थार्थसिद्धये ॥ ५२

संकटे मज्जिते राष्ट्रे भ्रष्टाः सर्वे महीभुजाः ।
देशभक्तिस्तु दद्राव परभीकरधाटिभिः ॥ ५३

तदा तस्मिन् विपत्काले दृढा स्वातन्त्र्यभावना ।
निर्मातुं शक्यते नैव राज्ञा केनापि भूतले ॥ ५४

आपत्सु जायते नूनं भगवान् सर्वशक्तिमान् ।
उद्धर्तुं नित्यसत्यानि नररूपेण भूतले ॥ ५५

तादृशेष्वष्टकष्टेषु राणाशक्तिसमन्वितः ।
स्वीकृतः सर्वभारं तु स्वीयस्कन्धे निजेच्छया ॥ ५६

गत्वाऽसौ विपिनं शीघ्रं भिल्लवर्गैः समाहितः ।
कारयामास तत्रस्थान् शस्त्रविद्यासमञ्चितान् ॥ ५७

स्वपेयं नैव शय्यायां तावत्पर्यन्तमेव हि ।
यावन्मेवाडदेशेन स्वातन्त्र्यं नैव भुज्यते ॥ ५८

चित्तौडे राजपुत्राणां यावन्नीड्डयते ध्वजः ।
तावच्च धातुपात्रेषु नैव कुर्यां हि भोजनम् ॥ ५९

सुखवस्तूनि सेवेयं नैव निद्रां भजामि च ।
स्वातन्त्र्यसिद्धये यत्नं तु कुर्यां शक्त्या दिवानिशम् ॥ ६०

इत्येवमादिशब्दार्थैः प्रतिज्ञातोऽस्ति भूपतिः ।
यथोक्तं पालयन् वीरः युयुधे शत्रुसंकुलैः ॥ ६१

यः करोति च साहाय्यं तुर्काक्वरमहीपतेः ।
तं च हिन्दुं न मन्वानः शत्रुं मेने महानृपः ॥ ६२

मानसिंहः सजातीयः नैकराजकुमारकैः ।
अकबरस्य वशं गत्वा तस्मै युद्धे जयं ददौ ॥ ६३

एतादृश्यां परिस्थित्यां पुनः स्वातन्त्र्यभावना ।
प्रजासु स्थापनं कष्टं भवत्येव न संशयः ॥ ६४

अकबराय न दातव्यं सहकार्यं च यादृशम् ।
येन केनापि पौरेण विस्मर्तव्यं कदापि न ॥ ६५

राणाप्रतापसिंहस्य शासनं सर्वदैशिकाः ।
शिरोभिः जग्रहुः शान्तं पुष्पमाला इवानताः ॥ ६६

श्रुत्वा सर्वं स्वकर्णाभ्यां अक्बरः तस्य शासनम् ।
कम्पितः प्रबलं पेदे वज्राघात इव स्वयम् ॥ ६७

अक्बरः सर्वशस्त्रास्त्रैः सर्वसामग्रिसंयुतः ।
अपारभटवर्गात्तः भ्राजते सर्व शक्तिमान् ॥ ६८

तदानींतनकाले तु शक्तिः तस्यास्ति सर्वथा ।
सर्वदा बलसम्पन्नः प्रगतश्चापि भारते ॥ ६९

राणाप्रतापशौर्येण तापिता देहलो तदा ।
अकबरस्य त्रियामासु सिंहस्वप्नो बभूव सः ॥ ७०

विश्वरूपत्वमापाद्य राणा रेजे स्वभारते ।
दृष्ट्वा राणां तु सर्वत्र पीडितोऽक्बरः सदा ॥ ७१

दिनानि यापयामास शान्तिहीनोऽकबरः सदा ।
स्वप्नेऽपि जल्पन् भीत्या सः राणानाम पदे पदे ॥ ७२

चरति वने प्रतापः तु समीपतरवर्तिशैलकन्दरेषु ।
विमलदैशिकचिन्तनः राजयोगीव भृशं निरतम् ॥ ७३

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' प्रतापराणाव्यक्तित्वं ' नाम द्वितीयः सर्गः समाप्तः ॥]

तृतीयः सर्गः ।

३. शक्तिसिंहस्य स्वभावः ।

उदयस्य तनूजेषु प्रतापो ज्येष्ठ एव हि ।
द्वितीयः शक्तसिंहस्तु महामानी दुरोदरः ॥ १

बाल्यात्प्रभृति शक्तोऽयं महागर्वी प्रकोपनः ।
पशुस्वभावपूर्णश्च सर्वदा कलहप्रियः ॥ २

सर्वशस्त्रास्त्रविद्यासु प्रतापेन समो भृशम् ।
गुणैश्च शून्यरूपोऽयं कुसंस्कारप्रवर्धितः ॥ ३

रामकृष्णाविमौ सत्त्वे पौरुषे कार्यसाधने ।
रामलक्ष्मणसाम्येन वर्तेते नैव शैशवे ॥ ४

उदये राज्यमेवात्र शास्तीति प्रियमन्त्रिभिः ।
विख्यातः शस्त्रविक्रेता प्रययावुदयान्तिकम् ॥ ५

तदानीं शस्त्रमेकं सः प्रददावुदयाय च ।
उपायनमिवात्मीयैः भावपुष्पैः सभक्तिकम् ॥ ६

गृहीत्वा भूपतिः खड्गम् अमन्दानन्दचेतनः ।
विक्रेतारं शशंसाशु सुस्मितैः भाषितैः मुदा ॥ ७

असौ हसन् द्रुतं तेन घासपत्रं चकर्त च ।
तीक्ष्णतायाः परीक्षां तु कर्तुं खड्गस्य भूपति ॥ ८

तस्य पार्श्वस्थले पीठे समासीनः कुमारकः ।
बाल्यचापल्यभावेन पितुः कृत्यं विलोक्य च ॥ ९

अनियन्त्रितभावेन शक्तः सान्द्रं जहास च ।
कारणं तस्य हासस्य पप्रच्छ तनयं नृपः ॥ १०

घासं केनापि खड्गेन नाकर्ति भुवि भूपते ।
राज्ञा खड्गेन हन्यन्ते रिपवो हि रणाङ्गणे ॥ ११

इति खड्गं गृहीत्वाऽसौ चिच्छेद स्वाङ्गुलिं रुषा ।
तदानीमस्रवच्चासृक् प्रवाहसदृशं करात् ॥ १२

किन्तु नैव रुरोदासौ ननर्त विहसन् भृशम् ।
तद्दृश्यं प्रविलोक्यैव चकम्पे चोदयः तदा ॥ १३

बाल्यात्प्रभृति शक्तस्तु रोषी धैर्येण साहसी ।
भृशं दुरभिमानात्तः न शृणोति परोदितम् ॥ १४

राणाशक्तौ परं रक्तौ द्वन्द्वयुद्धेषु कानने ।
द्वयोर्मध्ये दृढं प्रेम ववृधे बलवत्तमम् ॥ १५

दूरदर्शी न चासीत् सः प्रबलः क्रोधनः सदा ।
राणाप्रतापवन्नैव धीरोदात्तः स विद्यते ॥ १६

देशचिन्ता न चैवास्ति लेशतो धिषणातले ।
महाभिमानसंव्याप्तं व्यक्तित्वं च विराजते ॥ १७

शक्तस्य शक्तिः विद्या च देशभक्तिं विनाऽप्रियौ ।
भृशं पाशविकौ जातौ अप्रकाशौ महीतले ॥ १८

आपादमस्तकं दर्पः तामसा मदमत्सराः ।
शरीरे व्यापृता भान्ति सर्वाङ्गेषु विचर्चिताः ॥ १९

असत्त्वगुणभूयिष्ठः रजस्तमविघूर्णितः ।
तामसे वहतीवासौ जल्पते सर्वमानवैः ॥ २०

उच्चनीचगुणान्नैव जानाति वसुधातले ।
तस्यास्ते सर्वमेकं च तामसत्वं हि जीवितम् ॥ २१

असंस्कारगुणैर्युक्तः असभ्यास्पदवाचिकः ।
अमन्दकोपसंदीप्तः अराजकगुणैर्युतः ॥ २२

अल्पभावपरिव्याप्तः चित्तचैतन्यचोदितः ।
अनालोचितकार्येण शत्रुत्वं भजतेऽनिशम् ॥ २३

कोपेनोज्ज्वलिताङ्गोऽसौ भ्राजते वह्निवत् भृशम् ।
दग्धुं सर्वमिदं लोकं शक्तो भवति निश्चयम् ॥ २४

अत्यन्ताग्रहपूर्णोऽयं दर्पेणावृतभावनः ।
सार्थक्यं भासते शक्तः सर्वथा शक्तिमानिति ॥ २५

उद्वेगपूर्णचित्तोऽयं स्वात्मानं मनुते वृहत् ।
अन्यान् नैव शृणोत्येव शतमूर्खशिरोमणिः ॥ २६

मूर्खत्वकारणादेव पित्राऽसौ कानने पुरा ।
विसर्जितः परं प्रेम्णा कृष्णसिंहेन पोषितः ॥ २७

राणाप्रतापवत् सर्वं जानीते शस्त्रचालनम् ।
नैव योद्धा बभूवासौ यथा राणा महीभुजाम् ॥ २८

दुराग्रहप्रपूर्णोऽयं क्षणे कोपेन राजते ।
कलहं कुरुते सर्वैः स्वभावो दुरतिक्रमः ॥ २९

स्नेहभावो न चैवास्ति मित्रवत् भाषितं न हि ।
सर्वदा स्वीयचित्तौघैः कपित्वं भजते रुषा ॥ ३०

आत्माभिमानसंपन्नः स्वोत्कर्षेण विभूषितः ।
न्यूनतां सहते नैव सदौन्नत्यं विकाङ्क्षते ॥ ३१

स्वेच्छानुसारं कार्यं सः संविधातुं समीहते ।
शात्रव्रान्तं विधातुं च यतते क्रोधनः स्वयम् ॥ ३२

यदा राणाऽभवद्राजा तदा शक्तं समानयत् ।
कृष्णसिंहात् प्रियेणाऽसौ सोदरप्रेमपूरितः ॥ ३३

आत्मतुल्यं च तं शक्तं पोषयामास भूपतिः ।
शस्त्रास्त्रशिक्षणं दत्वा प्रतापोऽयं समन्ततः ॥ ३४

तदाप्रभृति शक्तस्तु राणा राज्ये सुखैः परम् ।
ववृधे सर्वसौख्यैश्च राजपुत्र इव प्रियम् ॥ ३५

असूयामत्सरग्रस्तः भ्रातरं द्वेष्टि सर्वदा ।
अदीर्घभावनायुक्तः अनालोचितकर्मकः ॥ ३६

जन्मना द्वेषभावेन प्रतापं गर्हते सदा ।
अक्रमेण पथा नूनं त्वं हि राजा बभूविथ ॥ ३७

जगमल्लं पिता चक्रे राणां न त्वां ममाग्रज ।
अनायासेन संप्राप्तं अक्रमेणैव शासनम् ॥ ३८

नागवद् विषमेवासौ वमते द्वेषभावनः ।
अनालोचितकार्येण शत्रुत्वं भजते द्रुतम् ॥ ३९

साहाय्यं शत्रवे कृत्वा मित्रे शत्रुत्वमाचरन् ।
मन्दात्मा कुरुते कार्यं यथाकालप्रचोदितः ॥ ४०

कुसंस्कारपरीतोऽसौ देशभक्तिं विना खलः ।
राजवंशे समुत्पन्नः दरिद्रो नृपलक्षणैः ॥ ४१

धर्मवृद्धेषु तस्यास्ति नैव भक्तिः कदापि च ।
तस्य बुद्धिः विभिन्नाऽस्ति राणावंशजवर्गकात् ॥ ४२

विचित्रभावनायुक्तः बुद्धिकल्लोलवीचिभिः ।
अशान्तिकल्पनासक्तः झंझानिल इवोद्धतः ॥ ४३

मेवाडराज्यनाशाय कारणं शक्त एव हि ।
हल्दिघाटप्रयुद्धाय सूत्रधारः प्रकीर्त्यते ॥ ४४

पितुराज्ञां तिरस्कृत्य कृष्णसिंहः चकार च ।
राजानमक्रमैः मार्गैः जानीहि त्वं विशांपते ॥ ४५

न्याय्येन नैव संप्राप्तं राज्यमेतत् तवानघ ।
कथं त्वं न्यायसूत्राणि ब्रवीषि जननायक ॥ ४६

बहुविधशब्दाघातैः निन्दति नृपं रुषा शक्तिसिंहस्तु ।
शृणोति नैव भूपतिं कपिचञ्चलमनाः पदे पदे ॥ ४७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' शक्तिसिंहस्य स्वभावः '
नाम तृतीयः सर्गः समाप्तः ॥]

चतुर्थः सर्गः ।

४. चेतकवर्णनम् ।

क्षीरफेनसमपाण्डुरच्छविः शीतशैलशिखरोन्नताकृतिः ।
मल्लिकासुमसमाङ्गभासितः स्फाटिकोपमितवल्गुवल्गितः ॥ १

शेषनागनिभपुच्छसज्जितः वायुदेवगतिवेगभूषितः ।
शक्तियुक्तवरजङ्घमण्डितो दीर्घदार्ढ्यखुरगुल्मशोभितः ॥ २

चेतकः चटुलपुच्छधूननः संततं प्रकृतिदर्शनोत्सुकः ।
हेषया भणितविश्वमण्डलः वायुवीजितसटाच्छटाञ्चितः ॥ ३

सूर्यवंशजसुकीर्तिराशितः चन्द्रसान्द्रमृदुचन्द्रिकासमः ।
भूर्भुवोन्तरमनारतं प्लुतः भूतले जनितवह्निवाहनः ॥ ४

अट्टहास इव कृत्तिवाससः कल्किमूर्तिवरवाहनप्रियः ।
पूर्वजन्मकृतपुण्यसञ्चयः चेतकः चरति विश्वमण्डले ॥ ५

वेगवाहितसुरापगेव सः पर्वते द्रवति वाजिरंहसा ।
छेदयन्निव सदागतिं ध्रुवं खण्डशः शकलतूलसञ्चयम् ॥ ६

क्षीरसागरसमुद्भवः प्रियः सैन्धवक्रमिकदीर्घभावनैः ।
अश्वलक्षणसमञ्चितो ध्रुवं चाश्वतल्लज इवात्र भासते ॥ ७

जन्मना वरतुरङ्गमः प्रियैः वर्तनैश्च विशदैः सुवीक्षणैः ।
दिव्यपूरुष इवोन्नतं मुदा भूतले लसति चारुसद्गुणैः ॥ ८

मन्दुराधिगतविग्रहोऽपि सः शत्रुसंचयविवर्तनादिकम् ।
विन्दते स्म पटुबौद्धिकैः गुणैः विश्वरूपमवलम्ब्य चेतकः ॥ ९

सूर्यदेवरथयामिता हयाः मर्त्यलोकवसनेच्छुकाः स्वयम् ।
एकरूपमवलम्ब्य तत्क्षणं चेतकाकृतिछलेन रेजिरे ॥ १०

अश्वतल्लजममुं पुरंदरः प्राहिणोदिव नृपाय संयुगे ।
शत्रुमर्दनजचणं हि विचिन्त्योच्चैःश्रवा ननु विभाति भूतले ॥ ११

तप्तकाञ्चनखलीनभासुरः कण्ठबद्धवरशिञ्जमण्डितः ।
रम्यरत्नचयमण्डितः सपर्याणबद्धवरपीठचित्रितः ॥ १२

हंसपक्षचयसाधुमण्डितः सर्वरत्नखचिताम्बराञ्चितः ।
हेमदामसु किरीटभूषितः शारदाब्ज इव राजवाहनः ॥ १३

आगलाद् वदनमण्डलाञ्चले चर्मरज्जुसुदृढं प्रबन्धितम् ।
अर्धनेत्रयुगलं च गोपितं रम्यचर्मफणबद्धरज्जुभिः ॥ १४

चेतकाद्धि समरे विजायते भीतिरेव परवीरमानसे ।
वर्तनं प्रभुपदातिचालने सर्वथा भवति वीरचोदकम् ॥ १५

पादबद्धवरनूपुरस्वरैः तालबद्धखुरघट्टनैः ध्रुवम् ।
हेषया मिलितवीरगायनैः चेतकः चलति नाट्यविभ्रमैः ॥ १६

चेतकः कविवरप्रभावजैः पादबद्धविविधोत्तमैर्गुणैः ।
भावरम्यपदमञ्जुलस्वनैः धावतीव च रथोद्धतासमम् ॥ १७

धीनधीधिनतितीनधीधिना झंपतालगतिभव्यधावने ।
भैरवीस्वरसुरागरञ्जितो भ्राजतेऽत्र तुरगः त्रितालके ॥ १८

नासिकापुटविलात् समुद्गतैः श्वासनिश्वसनकम्पिताधरः ।
शत्रुसंचयतिरस्कृतिं रुषा दर्शयन्निव विभाति चेतकः ॥ १९

चेतनं भवति यत्र शाश्वतं चेतसि प्रवलनव्यवर्तनैः ।
तत्र नाम कथितं महाजनैः चेतकस्य न तथाऽन्यजीविनाम् ॥ २०

धूमकेतुरिव पुच्छदीपितः संगरे प्रवलशत्रुनाशनम् ।
सूचयन् चपलपुच्छवीजनैः भ्राजते भुवि रुचा तुरङ्गमः ॥ २१

स्वीयधावनरुचा महीयसा हन्ति लोकहयवेगसञ्चयम् ।
तद्विलोक्य भुवि वाजिराजयो नैव भान्ति युधि धावनेच्छुकाः ॥ २२

तर्जयन् परभटावलिं रुषा तर्पयन् निजभटावलिं मुदा ।
मज्जनेन परशोणिते तरन् चेतकः प्रविदधाति धावनैः ॥ २३

शत्रुवीरसमराणवे हयः वाडबाकृतिमवाप्य राजते ।
नित्यनूतनशरीरभासुरैः राजसैन्यनिवहे समेधते ॥ २४

वर्चसा बहुपराक्रमाञ्चितः तेजसा मधुररम्यलोकनः ।
प्रज्ञया विशदशान्तभावनः चेतको व्रजति सङ्गराङ्गणम् ॥ २५

अश्वराज इव राजसंयुगे शत्रुकाननदवाग्निभासितः ।
संचचार बहुधा हयेश्वरः वेगरूपितसदागतिः भुवि ॥ २६

चक्रवेगचलितः तुरङ्गमः चक्रिरूपमधरत् प्रतिक्षणम् ।
धावनैः चटुलचालनैः भृशं दिव्यविष्णुपदमारुरोह सः ॥ २७

कार्तिकाभ्र इव पाण्डुरदेहः शारदाब्ज इव लोचनरम्यः ।
सागरोद्भवसुधारसकुम्भः भाति सर्वजनलोचनदीपः ॥ २८

चञ्चलाचपलनिस्तुलवेगः क्षीरसागरतरङ्गरिङ्खितः ।
आदिशेष इव भारवाहकः राजतेऽत्र हयराट् विशां पतेः ॥ २९

पाञ्चजन्य इव मङ्गलाकृतिः देवदत्त इव शत्रुभीकरः ।
वायुपुत्र इव वेगमण्डितः सूर्यरश्मिरिव पूतमानसः ॥ ३०

अष्टकाष्टपरिपालकैः ध्रुवं दत्तघोटक इतीव दृश्यते ।
नास्ति सत्यमवनीतले हयः चेतकेन सममत्र धावने ॥ ३१

अश्वशास्त्रसमुदीरितैः गुणैः संधिबन्धनमयैः सुलक्षणैः ।
रूपयोग्यबहुचारुमण्डनैः भाति रम्यगुणमूर्तिसुन्दरः ॥ ३२

चेतकस्य खुरघट्टनात् ध्रुवं प्रस्तरावृतधराऽपि चूर्णिता ।
भूमिमात्रविषये ततः परं शंसनीयम् अपि नास्ति निश्चयम् ॥ ३३

चेतकस्य पटुधावनादिकं संविलोक्य खलु शत्रुसंचयः ।
संयुगाच्च कुरुते पलायनं जीवने बहुशुभानि वीक्षितुम् ॥ ३४

चेतकस्य वहुधावनोद्भवा रोदसीतलगतः प्रभञ्जनः ।
रंहसा विविधवर्गभूरुहान् भञ्जनं च विदधाति तत्क्षणम् ॥ ३५

तीक्ष्णबुद्धियुतलोचनेक्षणैः सङ्गराङ्गणविधावनैः हयः ।
स्वीयदेहगतमित्रतेजसा शत्रुवर्गतिमिरः प्रभञ्जितः ॥ ३६

आत्मरूपमधिगत्य तिष्ठति श्रीप्रतापनृपतेः तुरङ्गमः ।
तस्य मानसविचारमण्डलं दर्शने प्रियमवैति भूपतेः ॥ ३७

भूपतिं स्पृशति जिघ्रतीहया शेषपुच्छममलं धुनोति च ।
हेषयाकृतमरन्दसेचनैः भाषते स्म विभुना स चेतकः ॥ ३८

मन्दुराञ्चितसुवद्धजीवनः संततं वहुसहस्रलोचनैः ।
प्राणपञ्चकनिभं समीक्षते भूपतिं मधुरचेतकः प्रियम् ॥ ३९

तं विहाय न हि जीवनेच्छया वाहनः चरति विश्वजीवने ।
पूर्वजन्मकृतपुण्यवन्धनं जन्मजन्मनि सदाऽनुवर्तते ॥ ४०

सर्वथाऽऽजिनिभृतं परस्परं चालनं कुरुत एव सुन्दरम् ।
ऐकमत्यगतभावनाऽऽशयैः एकरूपमवलम्व्यतावुभौ ॥ ४१

पातकं भुवि विमन्वते भृशं सुप्रजामनसि मित्रवञ्चनाम् ।
भावयन्निव हयः स्वयं नृपं देववद् भजति भक्तिमानसः ॥ ४२

द्वावपीह परभाववेदिनौ शत्रुसंचयम् अनंतभेदकौ ।
युद्धकौशलपरालिमारकौ वद्धमैत्रिगुणराजचेतकौ ॥ ४३

द्रोहवुद्धिपरिपूर्णमानवाः द्रोहमेव सुतरां प्रकुर्वते ।
भावयन्निव सुमित्रचेतकं निर्ममौ विधिरहो नृपाय किम् ॥ ४४

द्रोहवुद्धिपरिवर्जिता मृगाः सर्वदा विनुतसाधुवर्तनैः ।
मानवाय वहुधोपकारकाः स्वीयदेहनिसृतैः भवन्ति ते ॥ ४५

संपरायसमये च रक्षितुं देशरक्षणनिमग्नभूपतिम् ।
शत्रुनिर्मितकुवञ्चनात् ध्रुवं प्राहिणोदिह पुरंदरः प्रियम् ॥ ४६

ज्ञानचक्षुयुतदिव्यलोचनो दार्ढ्यदेहयुततीक्ष्णभावुकाः ।
याजमानहृदयस्थिताशयं विन्दमान इव भाति सैन्धवः ॥ ४७

संपरायनुतवाहिनीवरः चेतको भवति विश्वमण्डले ।
नान्यदस्ति जगतीह तोलने तेन सार्धममरीयवाजिना ॥ ४८

धावतीह भुवि वायुना समः चञ्चलोऽस्ति दिवि चञ्चलासमः ।
दिव्यलक्षणसमञ्चितं तमिन्द्रायुधं हि नितरां विमन्वते ॥ ४९

चेतकः चित्तवेगोऽसौ निर्जरो भुवि राजते ।
राणाप्रतापराजस्य चिदात्म इव शाश्वतम् ॥ ५०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' चेतकवर्णनं ' नाम चतुर्थः सर्गः समाप्तः ॥]

पञ्चमः सर्गः ।

५. भ्रातृकलहः ।

प्रातःसन्ध्या सप्तवर्णाभिरम्या चीरावेष्टा दिव्यशोभा सितास्या ।
आकुर्वन्ती भूतलं रश्मियुक्तं प्रादुर्भूता सर्वविश्वान्तरात्मा ॥ १

मध्वासक्ताः सर्वरोलम्बवर्गाः गानासक्ता राजहंसा प्रमत्ताः ।
निद्रां त्यक्त्वा भूपरागैः सुरागैः मन्दं मदं कार्यमग्ना विभान्ति ॥ २

वन्याः स्वैरं शान्तरोमन्थरम्याः नेत्रानन्दं वन्यघासं चरन्तः ।
स्वीयारावैः अंशुमन्तं स्तुवन्तः सर्वं विश्वं नन्दितं कारयन्ति ॥ ३

अश्वाः सर्वे सप्तरश्मे रथस्य स्वैराचारैः भूतलं प्राप्तवन्तः ।
रुग्भिः पूर्णं पूतलोकं विधाय वेलाभावात् वेगभावं भजन्ते ॥ ४

रम्या चोषा नर्तनामग्रपादैः अण्डोद्भूताऽऽवर्तनैः स्वैरगत्या ।
आश्रुण्वन्ती लोकगीतानि तारं स्वात्मानं सा विस्मरन्ती जगाम ॥ ५

आतन्वन्ति प्रेमपुष्पोपहारान् हर्षैः वृक्षाः सूर्यदेवाय भक्त्या ।
वाताः शान्तं वीजयन्तीव सूर्यं गन्धामोदैः स्वैरभावं भजन्ते ॥ ६

आश्वीयूजे दिव्यदाशम्यतिथ्यां युक्ताः शङ्खैः डिंडिमैः शृङ्गवाद्यैः ।
पश्चाद्वर्गैः चारणैः मन्त्रिवर्गैः दिव्याचारैः चारणैः पौरभूपैः ॥ ७

तस्मिन् कल्ये राजवर्गः समस्तः वन्यैः सार्धं योद्धुमेव प्रतस्थे ।
द्रष्टुं स्वीयं शस्त्रविद्याचणत्वं हाहारावैः सर्वशस्त्रादिभारैः ॥ ८

सर्वे वीराः वीरपानप्रकोपाः याताः तूर्णं वायुवेगेन मत्ताः ।
अश्वारूढाः घूर्णिता रक्तनेत्राः वन्यत्रासं धावमाना रटन्तः ॥ ९

दृप्ताः सर्वे वीरघींकाररावैः शस्त्रास्त्रौघैः तीक्ष्णशूलैरमोघैः ।
पादत्राणैः हेतिरक्षादिशूर्पैः सान्तत्यं ते वीररौद्रावतारैः ॥ १०

राणाभूपः चेतकाधिष्ठितः सन् काळीजिह्वावक्रखड्गालियुक्तः ।
मध्ये मार्गं धावमानः सवेगं हस्तात् स्रस्तं स्वीयखड्गं ददर्श ॥ ११

खड्गापातं धूमकेतुस्वरूपं प्राहुः विप्राः वन्धुवर्गेऽतिघोरम् ।
युद्धं भूत्वा रक्तसिक्ता धरित्री नूनं भूयात् विप्रहत्यानिदानम् ॥ १२

दृष्ट्वा घोरं भीमदृश्यं तदानीं भीतः स्पष्टं नैकशङ्काकुलोऽयम् ।
दुश्शाकुन्यं रक्तपातप्रकीर्णं प्राणत्यागो ब्राह्मणस्यात्र नूनम् ॥ १३

इत्येवं सः चिन्तयन् धर्ममूर्तिः नाहं कर्ता रोद्धुमेतत् भविष्यत् ।
लोके सर्वं दृश्यते मानवैश्च छायारूपेणात्र वर्तिष्यमाणम् ॥ १४

एवंभूतैः वीचिकारूपभावैः संक्षुब्धात्मा वीरमूर्तिः प्रतापः ।
वेगेनैवं स्वीययूथं जगाम वन्यैः साकं योद्धुमेव प्रहृष्टः ॥ १५

वीराः सर्वे स्वीयशूलैः महोग्रं उच्चैः घोषाघूर्णितैः वन्यजालैः ।
सार्धं योद्धुं प्राक्रमन्तातिकान्तं वीरारावैः शस्त्रझंकारनादैः ॥ १६

क्रूरारावैः वन्यजीवाः सवेगं वीरैः योद्धुं स्वीयवैपिन्यवृत्तैः ।
उद्घाट्यास्यं घोरदंष्ट्राकरालं सोड्डीनैः ते वायुवेगे विचेलुः ॥ १७

साटीयाभैः दीप्तपञ्चाननस्तु निर्गत्योग्रं कन्दराद् गर्जनाभिः ।
अङ्गारोग्रैः लोचनाभीलदृग्भिः वीरान् सर्वान् त्रस्तजीवांश्चकार ॥ १८

दृष्ट्वा सर्वे वीरवर्गाः सकोपं कोशाकृष्टैः हस्तशस्त्रैः विरेजुः ।
पञ्चास्योग्रैः भीमगर्जा-निनादैः वन्याः सर्वे त्रस्तचित्ताः वितस्थु ॥ १९

भ्रातः शक्तः तस्य राणानृपस्य शूलं धृत्वा वन्यराजं बभाण ।
सिंहोऽसि त्वं केवलं शब्दनाम्ना नूनं सिंहाः सूर्यवंशीयभूपाः ॥ २०

अस्मिन् युद्धे मामकीनं प्रतापं शौर्यायत्तं तावकीनं विलोक्य ।
सर्वे वीरा निश्चयं सत्यवाचः को वा सिंहो निर्णयिष्यन्ति नूनम् ॥ २१

एहि त्वं रे सिंहराज प्रकामं याम्यं नीत्वा शक्तिसिंहो भवेयम् ।
एकाघातेनाहमेवं भवन्तं वैरं नित्यं तुल्यशक्तौ चकास्ति ॥ २२

उक्त्वा चैवं शक्तिसिंहो बलेन शूलं तस्मिन् क्रूरसिंहे ससर्ज ।
भीतिग्रस्तो नैव भूत्वा सवेगं वीरारावैः वर्तनैः वीरयोग्यैः ॥ २३

उत्प्लुत्योग्रं वन्यसिंहो महोच्चैः चण्डत्वेन प्रेक्षणीयैः प्रचारैः ।
व्यूहाक्रान्तैः वर्तुलाकारबद्धैः स्थानाबद्धं शक्तिसिंहं चकार ॥ २४

शूलं शूली शूलतुल्यं गृहीत्वा चाप्त्वा राणा दिव्यरुद्राकृतित्वम् ।
बाढं सिंहस्यान्तिकं संप्रधाव्य चैकाग्रत्वे सर्वदृष्टिं नियोज्य ॥ २५

रे रे भ्रातः शक्तिसिंह त्वमत्र माऽऽङ्डं भूया एहि पार्श्वं मदीयम् ।
उक्त्वा चैवं शूलमेनं विसृज्य याम्यं लोकं प्राहिणोत् सिंहशत्रुम् ॥ २६

सर्वे वीराः प्रेमभावैः प्रतापं हाहारावैः कीर्तयामासुरेवम् ।
आलिङ्ग्याार्द्रं हस्तसंदोलनाद्यैः नेता योद्धा सर्वलोकप्रियोऽसि ॥ २७

श्रावं श्रावं तादृशं वीरवाक्यं दर्शं दर्शं वीरमूर्तिप्रतापम् ।
स्मारं स्मारं तस्य वैषम्यवाचं वारं वारं दग्धचित्तः सः शक्तः ॥ २८

आङ्डं मा भूः एहि पार्श्वं मदीयं हालहल्यं शूलविद्धं तनोति ।
इत्येतन्मे तावकीनं प्रताप सेहे नाहं तादृशं वाक्यशल्यम् ॥ २९

नाहं शक्तः तादृशीं वाक्यरीतिं श्रोतुं कृत्ये राजवंशप्रदीपः ।
रुष्टः तुष्टः चास्तु किं मामकीने हस्तक्षेपः तावकीनो न योग्यः ॥ ३०

शक्तिः किं ते विद्यते चेन्मया त्वं योद्धुं तीव्रं निर्भयं रे चलस्व ।
नैवास्त्यत्र त्रातुमेव प्रतापो ब्रह्माविष्णू नैव रुद्रोऽपि शक्तः ॥ ३१

इत्युद्गारैः शक्तिसिंहः स्वखड्गं कोशात् वेगं रुष्टभावः चकर्ष ।
राणा खड्गं कोपवेगात् स्वकोशात् आकृष्याग्रे शक्तिसिंहस्य तस्थौ ॥३२

द्रावप्याशु प्रोद्वलं च प्रडीनैः कृत्वाऽन्योन्यं व्यूहसंचारनृत्तैः ।
चण्डीदेव्यै रक्तनैवेद्यखाद्यं दातुं शक्तौ स्वीयमन्दोष्णरक्तम् ॥ ३३

दृष्ट्वा दूरे द्वन्द्वयुद्धं महोग्रं नैवोद्युक्तः कोऽपि वीरः सवेगम् ।
वीरावेशे मग्नचित्तौ निरोद्धुं वीराग्रे ते लाघवत्वं भजन्ति ॥ ३४

जन्ये मग्नौ वीरशक्तप्रतापौ मोहावेशौ दृप्तवीरौ तदानीम् ।
खड्गाघातैः वैद्युतीयाभयुक्तैः प्रागजेतां युद्धभूमौ प्रकोपैः ॥ ३५

सर्वे वीरा पार्श्वभागे सकम्पाः अद्यैवाहो वीरलोकस्य नाशः ।
द्रष्टव्यः किं पापनेत्रैः धरायां विश्वं जातं शून्यवीरं किमेतत् ॥ ३६

इत्येवं ते चिन्त्यमानाः सवाधं तिष्ठेत्याक्रोशं हठात् श्रूयमाणाः ।
मा भूयाद्धि भ्रातृवर्गे कदापि जन्यं लोके सर्वदाऽनिष्टमूलम् ॥ ३७

शैशोदीया वंशजाः सर्ववीराः राष्ट्रौन्नत्यै कर्मवीरा नितान्तम् ।
आश्चर्यं मे जायते वीरपुत्रौ नैवाभूत् यत् भावितं भ्रातृयुद्धम् ॥ ३८

चिह्नं चैतत् सूर्यवंशे नृपाणां लज्जास्थानं युष्मदीयं कुकर्म ।
युद्धं मा भूत् शक्तिसिंहप्रतापौ श्रोतव्योऽहं वर्जनीयं च शस्त्रम् ॥ ३९

एनं वाक्यं भीकरं दैन्यपूर्णं श्रुत्वा वीरौ नैव संन्यस्तशस्त्रौ ।
घोरे युद्धे सक्तचित्तौ प्रकोपं युद्धोन्मत्तौ नैव लोकं भजन्ते ॥ ४०

प्रावृड्विद्युद्वेगसाम्येन विप्रः विष्टश्चासीत् वीरसंग्राममध्ये ।
राज्ञोः खड्गाघातनिष्यन्दरक्तैः क्षोणीं तृप्तां मातरं संचकार ॥ ४१

वीराः सर्वे हाय रे विप्रवर्यः स्वात्मत्यागं राजवंशार्थमेव ।
कृत्वा जन्ये स्वामिभक्तिं प्रदर्श्य भ्रातृद्वेषं शामयामास भक्त्या ॥ ४२

शैशोदीयावंशलावण्यशाकं भुक्त्वा कामं लोकवन्द्यः स विप्रः ।
अन्ते राज्ञां वंशरक्षार्थमेव देहत्यागं शान्तिभावेन चक्रे ॥ ४३

जीवः स्वैरं व्योमयानेन नाकं गत्वा पेदे मोक्षधाम प्रशान्तम् ।
योऽसौ लोके देशधर्मार्थमेव त्यागं कुर्यात् प्राप्नुयान्मोक्षधाम ॥ ४४

दृष्ट्वा भूपाः विप्रवर्यस्य हत्यां मन्दोत्साहाः तत्यजुः काननं ते ।
संजल्पन्तः पापभीत्या विदीर्णाः हाहाकारैः ब्रह्महत्येति पापम् ॥ ४५

राज्ञां वंशं रक्षितुं विप्रवर्यः भ्रातृस्नेहस्यार्जने दत्तदृष्टिः ।
स्वात्मत्यागात् कीर्तकीर्तिः स विप्रः धन्यो जातः कीर्तिरूपो धरण्याम् ॥ ४६

इत्येवं ते सर्वभूपाः प्रशान्तं वद्ध्वा हस्तान् स्वीयवक्षस्थलेषु ।
उक्त्वा कारुण्यात्तचित्ता नताङ्गाः श्वासोच्छ्वासैः तप्तदेहा बभूवुः ॥४७

दृष्ट्वा विप्रं तत्र भूमौ मृतं तौ राणाशक्तौ लज्जया नम्रशीर्षौ ।
दग्धौ चिन्तावीतिहोत्रेण गाढं पश्चात्तप्तौ रेजतुः निर्विकारौ ॥ ४८

इत्युक्त्वाऽसौ धर्मभीरुः प्रतापः चिन्ताक्रान्तः कम्पितः पापभीत्या ।
अत्रापन्नं युद्धमूलं त्वकृत्यं लोकेऽनर्थाः क्रोधमूलाः भवन्ति ॥ ४९

स्थित्वा क्रोधे वीरराणाऽदिदेश प्रोक्त्वा तीक्ष्णं शापतुल्यैः कठोरैः ।
निन्दावाक्यैः तत्र मेवाडदेशं त्यक्त्वा गन्तुं तत्क्षणं शक्तिसिंहम् ॥ ५०

शैशोदीयो वंश एवात्र नष्टः व्यर्थं जातं तावकीनं च जन्म ।
हेतुर्भूतः त्वं हि पापस्य नूनं न स्थानं ते वर्तते याहि शक्त ॥ ५१

श्रुत्वा सर्वं मौनमुद्रापरीतः स्वात्मानं सो निन्दयन् खिन्नचित्तः ।
आज्ञां भ्रातुः मस्तके धारयित्वा मेवाड्देशं त्यक्तुमेवोद्यतोऽसौ ॥ ५२

पापी चाहं राजपुत्रश्च नूनं सूच्याग्रं चाप्यस्ति धात्री ममात्र ।
नाहं स्थातुं योग्य एवात्र राणा भूत्वा राजा नाममात्रावशिष्टः ॥ ५३

दिल्लीभर्तुः पादपूजां विधास्ये राजत्वं मे नश्यतीहापि नूनम् ।
नैवात्राहं स्थातुमेवात्र शक्तः काका श्वानो नैव पृच्छन्ति नाम ॥ ५४

एवं चिन्ताज्वालमालाप्रतप्तः यद्यत्रैव स्यां सर्वदा लोकनिन्द्यः ।
शैशोदीया दिव्यकीर्तिः प्रशस्ता नूनं काले कालवर्णं तनोति ॥ ५५

एवं चोक्त्वा शक्तिसिंहः सहेलं दिल्लीभूपं मुग्लचन्द्रं दिनान्ते ।
गत्वा सर्वं जातवृत्तान्तमेवं व्याचष्टे स्वं निश्चयं चापि शक्तः ॥ ५६

भ्रातृद्वेषं कर्तुमेव व्रजन्तं देशद्रोहं शाश्वतं चिन्तयन्तम् ।
दृष्ट्वा क्रुद्धः शक्तिसिंहं दिनेशः क्रोधाद्रक्तः तूर्णमस्तं जगाम ॥ ५७

सर्वश्चायं द्वेषपूर्णः स्वभावः हल्दीघाटस्याजिरूपं प्रपेदे ।
देशो नष्टः सर्ववीरा हताश्च भ्रातृद्वेषो सर्वनाशाय हेतुः ॥ ५८

भ्रातृद्वेषः सर्वथा नाशहेतुः बन्धुप्रेम प्रीतिभावं व्यनक्ति ।
राष्ट्रप्रेम द्योतते संघशक्त्या तस्मान्नूनं संहतिः कार्यरूपा ॥ ५९

विश्वाकीर्णा रेणवः शक्तिपूर्णाः संघीभावं सर्वथा प्राप्य दीप्ताः ।
तस्मात् विश्वे संघभावासचित्ताः दिव्यामोदैः शाश्वतत्वं भजन्तु ॥ ६०

इत्येवं भीकरं दृश्यं शास्ति लोकं महोन्नतम् ।
भावं संघात्मनाऽऽसक्तं सर्वकार्यार्थसाधकम् ॥ ६१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' भ्रातृकलहः ' नाम पञ्चमः सर्गः समाप्तः ॥]

षष्ठः सर्गः ।

३. प्रतापवननिष्कासनम् ।

निरन्तरं वन्यजनैश्चः सख्यं करोति राणा बहुदुर्जनोऽसौ ।
यदा कदा वा खलु मां निहत्य भवेत् ध्रुवं भूपतिरेव देशे ॥ १

इति प्रकर्षं पटुयोधवीरं राणामभिद्रावितवानरण्यम् ।
तस्मात् कदाप्यत्र न चैव हानिः भूयादितिं स्वात्मनिमन्त्रणेन ॥ २

आज्ञां तदीयां शिरसाऽवधार्य गतः सहेलं गहनं प्रतापः ।
श्रीरामवत् तातवचो निशम्य शस्त्रास्त्रपाणिः तुरगद्वितीयः ॥ ३

वरं हि मत्वा पितुरानतिं सः वनाय गन्तुं बहुधा समुत्सुकः ।
अरण्यलोकैः कृतबद्धसख्यः स्वजीवितं यापयितुं प्रतापः ॥ ४

गच्छन्तमेनं विपिनं जनालिः विलोक्य खिन्ना बहुधा निनिन्द ।
राजाऽभवन्निर्दयचेतनस्तु चाकृत्यमेवात्र करोति नित्यम् ॥ ५

अपात्ररूपं बहुधा च मत्वा राज्याभिषेकाय वरं प्रतापम् ।
ज्येष्ठं गृहात् प्रेषितवान् स भूपः कान्तारवासाय दयाविहीनः ॥ ६

गत्वा च कान्तारमहर्निशं तैः भिल्लैः समं खेलनतत्परोऽभूत् ।
तत्रत्यवर्गैः पटुदार्ढ्यसख्यं विधाय तत्रस्थ इवाबभौ सः ॥ ७

भिल्लैश्च सार्धं धरणीधरालिं विलोक्य सर्वं विदितः समस्तम् ।
निम्नोन्नतस्थानयुतानि सान्तं युद्धाय योग्यानि तलानि नूनम् ॥ ८

इत्येवमाद्यैः वचनैरजस्रं प्रजल्पयन्ती निभृतं प्रजालिः ।
निनिन्द दैवं शतधास्य कृत्यैः गर्ह्यं सदाकृत्यमहो धरण्याम् ॥ ९

उवास राणा स्वयमेव तत्र भिल्लैः मिलित्वा घनकाननेषु ।
तैरेव सार्धं बहुधा प्रहर्षं सुकन्दमूलानि चखाद तृप्त्या ॥ १०

स तत्र भिल्लैः सततं मिलित्वा धराधरारोहणसिद्धहस्तः ।
भूत्वा प्रहर्षं बहुधा सरांसि विलोक्य तृप्तिं सहसा प्रपेदे ॥ ११

स तत्र सम्यक् बहुपूर्वरङ्गं भविष्यमाणस्य रणस्य नूनम् ।
विधाय देशस्य समस्तभागान् निम्नोन्नतान् सान्तमपस्यदेव ॥ १२

कस्मात् प्रदेशात् खलु सैन्ययानं कदा कथं शत्रुनिषूदनं च ।
कर्तव्यमस्तीति विचिन्त्य सर्वं देशस्य दिग्भागतलानपश्यत् ॥ १३

तदा तदा काननगुल्मतल्पे नितान्तसौख्ये निवसन् मुदा सः ।
वृक्षात् शलाटून्प्रविलूय कामं खात्वा च सुस्वाप सुखेन राजा ॥ १४

अरावलीपर्वतमस्तकेषु बृहच्छिलाखण्डतलेषु रात्रौ ।
सुप्त्वा प्रकृत्याः परमां सुशोभां विलोक्य तृप्तिं बहुधा स भेजे ॥ १५

वनेचराणां बहुयातनानि सुवर्तनं चाव्यवहारयुक्तम् ।
अत्यन्तखिन्नं दयनीयदृश्यं विलोक्य खिन्नः सहसा प्रपेदे ॥ १६

किमत्र चित्रं निरतं धराधिपाः अनन्यसौभाग्यविलासमग्नाः ।
दुःखं परेषामनभिज्ञमानसाः चरन्ति लोके पटुगर्वमत्ताः ॥ १७

दिल्लीनगर्यां मधुपानमत्ताः वाराङ्गनासंगमजातसौख्ये ।
स तुर्कराजाक्ववरुमानसाश्च चरन्ति विस्मृत्य वनेचरादीन् ॥ १८

सर्वोऽपि सौख्यं भजते नितान्तं न कोऽपि सख्यं कुरुते वनस्थैः ।
इमेऽपि राष्ट्राङ्गसमाजजीवाः तथेति भावोऽपि न लक्ष्यतेऽत्र ॥ १९

ततः स्वयं मित्रवनौकसैश्च सख्यं विधायाखिलराष्ट्रभक्तिम् ।
प्रकल्प्य नूनं बहुरक्षणार्थं देशैक्यतायै प्रबलं यतिष्ये ॥ २०

वनेचराः संगरभीमरूपाः तेषां च काङ्क्षा न हि भौतिकेषु ।
प्रवर्तते किन्तु सदा च बुद्धिः विसर्पति प्राकृतजीवनेषु ॥ २१

इति प्रकर्षेण स चिन्तयित्वा चकार राणा बहुबद्धसख्यम् ।
तत्रस्थमित्रैः वरभिल्लवर्गैः देशस्य कल्याणसुखास्पदाय ॥ २२

तदैव तत्रस्थधनुर्धराणां सख्येन संमेलनमाप्य राजा ।
तेषां सकाशात् रणतन्त्रसारं निपीय रेजे स कलाप्रपूर्णः ॥ २३

स्वयं स राणा रणशस्त्रविद्यां अशिक्षयत् भिल्लजनं सहेलम् ।
अन्योन्यभावैश्च सुबद्धचित्ताः रेजुः प्रहर्षं सहकारभावैः ॥ २४

सायं प्रभाते स च भिल्लवर्गैः एकत्र शैलाग्रविशालभागे ।
निवेश्य देशीयकथाः समस्ताः व्याख्यानरूपेण जगाद रम्यम् ॥ २५

प्रगाढसान्द्रीकृतदेशभक्तिं मनोज्ञवाचा रसभावपूर्णम् ।
शब्दार्थरम्यं निजगाद सर्वं उद्रेकमग्नो निजभिल्लबन्धून् ॥ २६

वयं हि सर्वे महिभारतीयाः संस्कारचित्ताः करुणान्तरङ्गाः ।
भृशं पुनर्जन्ममतानुगाश्च संस्कारचक्रभ्रमणे सुरक्ताः ॥ २७

एतादृशी भावपरंपरा तु नान्यत्र पश्येम भुवौ स्वराष्ट्रात् ।
भिन्नप्रदेशेषु वनौकसो मे शृण्वन्तु सत्यं कथनं प्रशान्तम् ॥ २८

इयं धरित्री बहुसस्यपूर्णा फलैः नदीभिः मधुरं विकासिनी ।
आसेतुशीताद्रिपरीतरम्या गान्धारदेशात् वरवर्ममध्यम् ॥ २९

वयं तु राष्ट्रैकविचारचित्ताः सद्भावनायुक्तसुजीवरक्ताः ।
समस्तराष्ट्रं तु सुभाववद्धं सुसंस्कृतं रम्यमिदं धरण्याम् ॥ ३०

अनन्तकालाद् बहुदुष्टवर्गाः श्रुत्वा च देशीयसमस्तवृद्धिम् ।
विज्ञानपूर्णं निजसौख्यमग्नं राष्ट्रं स्वकीयं शतधा च कर्तुम् ॥ ३१

अनेकयत्नैः कटुदुष्टमार्गैः कठोरहिंसायुतसंगरैः भृशम् ।
दाक्षिण्यहीनैः पशुवर्तनैस्ते पराः प्रियं भारतवर्षमूर्तिम् ॥ ३२

आत्मीयमाधातुमनन्तशक्तिं प्रयुञ्जते भिन्नविभिन्नमार्गैः ।
विनैव देशीयजना मनीषां परान् प्रहर्षं बहुधा स्तुवन्ति ॥ ३३

समैक्यभावेन विना च पौराः परस्परं द्वेषपरीतमानसाः ।
प्रियं पराक्रान्तममुं स्वदेशं कृत्वा विरेजुः कटुदास्यभावैः ॥ ३४

अनन्तवैषम्यपरीतचित्ताः भूपाः परं सौख्यनिमग्नभावैः ।
विस्मृत्यदेशं परपादसक्ताः निन्दन्ति देशीयसुसंस्कृतिं ते ॥ ३५

राष्ट्रोदरात् जातजना वयं हि समोदरा स्मो न तु भिन्नरूपाः ।
सर्वे वयं संघटिताः सगाढं कुर्याम देशं निजशक्तिवद्धम् ॥ ३६

समागतोऽस्यत्र सहोदराणां समक्षमस्मिन् बहुसंकटे च ।
सख्यं विधातुं गिरिकाननस्थैः त्रातुं च देशं परहस्तनाशात् ॥ ३७

समुत्सहे सर्ववनेचरैश्चः समस्तदेशे गिरिवासिभिश्च: ।
सख्यं विधायैकमनाः सकामं संघात्मकं देशममुं विकर्तुम् ॥ ३८

समस्तदेशीयजना नितान्तं देशीयतत्त्वं विविधप्रकारम् ।
ज्ञात्वा च देशस्य सुरक्षणे रताः भूयासुरित्येवमहं प्रवक्ष्ये ॥ ३९

स्वतन्त्रदेशे वसनं हि योग्यं कदापि दास्ये सुखजीवनं न ।
समस्तसौख्यालयदास्यवासात् स्वच्छन्ददेशे मरणं हि योग्यम् ॥ ४०

शनैः शनैरक्बरुमोग्लभूपः पामस्वरूपेण तनोति देशे ।
यद्येवमासीत् भुवि भारतं न संदृश्यते धर्मपरीतदेशम् ॥ ४१

त्रातुं च राष्ट्रं परवर्गहस्तात् वनेषु चारावलिमस्तकेषु ।
तत्तत्प्रदेशस्थितभिल्लवर्गैः कुर्याम मैत्रीं वयमत्र सर्वे ॥ ४२

विद्रोहिणो राजकुलान्तकाश्च जाता महान्तो नृपशेखराः तु ।
संजातमेवात्र नृपालहीनं राजास्पदस्थानमिदं समस्तम् ॥ ४३

अनारतं राष्ट्रममुं विजेतुं प्रवाहरूपेण पराः समेत्य ।
प्रध्वंसमेवात्र विचक्रुराशु मनोज्ञदेवालयशिल्पसृष्टिम् ॥ ४४

निरन्तरं राक्षसरूपयोधाः स्वात्मीयतां कर्तुममुं च देशम् ।
आकाङ्क्षमाणाः निरतं च जन्यं प्रचक्रिरेऽसत्कुलवंशजातैः ॥ ४५

अरौत्सिषुः तत्र महानुभावाः समागतान् ते पुरुषोत्तमाख्याः ।
परान् च तान् द्वारसमीप एव देशं परित्रातुमनन्तशक्त्या ॥ ४६

देशे तु निद्रासुखमेव यातं कस्यापि नास्त्येव सुखप्रशान्ती ।
न कोऽपि हा कुक्षिभरेण चान्नं चखाद देशे मम मित्रबान्धवाः ॥ ४७

अनारतं शात्रवमर्दनं हि कृतं महावीरनृपैः श्रृणुध्वम् ।
कथं स्वदेशः सुखशान्तिपूर्णः भवेद् वदन्तु प्रियमित्रभिल्लाः ॥ ४८

इति प्रजल्पन् जनयन् सुगाढं देशीयभावं विपिने सुहृत्सु ।
तान् सर्वभिल्लान् मनसा सुवध्य चैकात्मतारूपमवाप्य तस्थौ ॥ ४९

स्वजीवने तत्र वनेचरान्तान् सुक्षितान् योधवरान् विधाय ।
सुसंस्कृतान् राष्ट्रचरित्रतज्ञान् परं चकासे चतुरं प्रतापः ॥ ५०

वने तु सादर्शपुरं विधातुं पल्लीयभिल्लैः बहुधा प्रतापः ।
स्वप्नान् विलोक्यैव चचार यत्नैः दिवानिशं मन्त्रितभिल्लवर्गः ॥ ५१

निष्कासितोऽहं जनकेन नूनं जातोऽस्मि लोके बहुकार्यमग्नः ।
अरण्यवासो वर एव जातः श्रीरामचन्द्रस्य यथा ममापि ॥ ५२

सर्वे भवन्तः कपियूथतुल्याः वने वसन्तो वयमत्र नित्यम् ।
कुर्याम तुर्कस्य भटालिसर्वं चूर्णं विचूर्णं समरे सहर्षम् ॥ ५३

ममास्ति शक्तिः भवतां सहायात् न काऽपि शङ्का भवतीह मेऽत्र ।
भविष्यमाणे शतधाप्यनीके जयः सदाऽस्मान् समलङ्करोतु ॥ ५४

इति चतुरवचोभिः भिल्लवर्गं विधाय
विनुतमहितदेश्यैः भाववन्ध्यैः प्रबद्धम् ।
वनचरसहकारैः पर्वतत्वं प्रपद्य
प्रकटितमहिमाऽसौ विश्वरूपश्चकासे ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' प्रतापनिष्कासनं ' नाम षष्ठः सर्गः समाप्तः ॥]

सप्तमः सर्गः ।

७. जगमल्लस्य पट्टाभिषेकसमारम्भः ।

कृताभिषेकसन्नाहाः समाहूतपुरोहिताः ।
सुधर्मसाम्यनिर्माणाः संप्राप्ताः तत्र सत्वरम् ॥ १

तत्र सिंहासनं न्यस्तं समकोणचतुर्भुजे ।
सूर्यध्वजश्च तत्रैव तपनीयप्रभान्वितम् ॥ २

सिंहासनस्य सामीप्ये नैके राजकवीश्वराः ।
गायकाः नटकाः चैव स्वीयस्थानेषु रेजिरे ॥ ३

जगमल्लः तदायातः नूत्नवस्त्रैः सुमण्डितः ।
सुगन्धलेपनेनासौ राजदण्डेन मण्डितः ॥ ४

उद्धृत्य दण्डं हस्तेन दर्पितः स च दन्तिवत् ।
घींकाररूपशब्दैश्च प्रारेभे भाषणं स्वयम् ॥ ५

अहं राणाऽस्मि पश्यन्तु नित्यं यूयं स्तुवन्तु माम् ।
इत्युक्त्वा गर्वभावेन नटन् सिंहासनं ययौ ॥ ६

उपवेष्टुं समुद्युक्तः राजभावेन गर्वितः ।
दण्डं विचालयन् हस्ते यथा सः शक्तिमानिव ॥ ७

अत्रान्तरे कृष्णसिंहः गत्वा तस्यान्तिकं शनैः ।
शान्तोक्त्या सान्त्वयन् मल्लं जगाद परमं वचः ॥ ८

तिष्ठ हे जगमल्लात्र कथनीयं ममास्ति ते ।
यच्छ मे समयं श्रोतुं मह्यं शान्तमनाः नृप ॥ ९

इदं त्वदीयं नास्त्येव, प्रतापासनमास्ति रे ।
योग्यो न चासि तत् स्प्रष्टुमपेहि मदभासुर ॥ १०

स्नात्वा राजा प्रियं देवं पूजयित्वा सभक्तिकम् ।
कल्ये शुभे मुहूर्ते तु समागच्छति मन्दिरम् ॥ ११

मङ्गलैः मधुरैः वाद्यैः राजाभिः प्रियगायकैः ।
पुरन्ध्रीपरिवारैश्च भूसुरैः सामगायकैः ॥ १२

जगमल्लः तदा रुष्टः कृष्णसिंहं बभाण च ।
अङ्गीकृतं तदा वाक्यं पित्रा प्रोक्तं नृपान्तिकम् ॥ १३

तस्मादहं समायातः पवित्रध्वजलाञ्छनः ।
सिंहासनमलंकर्तुं सहजं मे समागतम् ॥ १४

स एव राणा लोकेऽस्मिन् यं पिता वक्ति धर्मतः ।
अन्यः कथं भवेदत्र कृष्णसिंह स्वयं वद ॥ १५

एनं कर्णप्रियं वाक्यं जगमल्लो जगाद च ।
तच्छ्रुत्वा कृष्णभूपालः बभाणेदं शुचिस्मितः ॥ १६

किं रे जल्पसि जानासि न त्वं धर्ममिलातले ।
धर्मानभिज्ञो जनकः राजानं कर्तुमिच्छुकः ॥ १७

केवलं सुतवात्सल्ये मग्नस्ते जनकः खलु ।
प्रतापराणां राज्यार्हं प्रेषयामास काननम् ॥ १८

राज्यार्हस्तस्य पुत्रेषु प्रतापः स्फूर्तिदायकः ।
अन्ये च केवलं नाम्ना विद्धि भूपा भवन्ति रे ॥ १९

देशेऽस्मिन् मध्यमे काले तादृशो परभीकरः ।
भारते नैव जातोऽस्ति राणातुल्यो महीपतिः । २०

हितैषी नयमार्गस्थः राजकीयेषु कौशलः ।
भवितुं भारते राजा योग्योऽस्ति, जगमल्लक ॥ २१

राजकीयविषावृत्तं देशमेनं सुरक्षितुं ।
असमर्थः पिता रेजे तस्य पुत्रोऽसि डिम्भक ॥ २२

युद्धे च बहवो वीराः पश्चात् धावन्ति साम्प्रतम् ।
महागजाः पलायन्ते मशकानां तु का गतिः ॥ २३

यः चासीत् संगरे भीरुः संशयात्मा प्रशासने ।
धर्माधर्मानभिज्ञश्च राजवंशविनाशकः ॥ २४

यथास्थितिमवेक्ष्यैव तथेत्युक्तं मया तदा ।
कासौ प्रतापराणा क जगमल्लः स्वयं भण ॥ २५

सोऽयं राजा स्वयं भाति नास्ति लेशोऽपि संशयः ।
अतीवबलसम्पन्नः शान्तात्मा शान्तसागरः ॥ २६

न कोऽपि लोके शक्तोऽस्ति रोद्धुं तं बलशालिनम् ।
शिरोधार्येति राजाज्ञा मौनेन विपिनं ययौ ॥ २७

राजलक्षणसंपन्नः महाबलपराक्रमः ।
इतः पूर्वं न मेवाडे जातः तादृक् बलान्वितः ॥ २८

एकलिङ्गेश्वरः साक्षात् प्रतापो मूर्तिमान् स्वयम् ।
सर्वलोकं निहत्यैव राजानं तं करोमि रे ॥ २९

यदा संग्रामसिंहोऽभूत् परवीरभयङ्करः ।
सर्वदेशः सुखायत्तः चानृत्यत् शौर्यवान् इव ॥ ३०

यदा ते जनको राजा बभूव वसुधातले ।
ईतिबाधाऽवृतो देशः क्ष्मातलं क्षामभासितम् ॥ ३१

गतः पिता विहायास्मान् बन्धुवर्गं सदा भुवि ।
यदि त्वं भविता राजा देशनाशो भविष्यति ॥ ३२

शाश्वतं न हि तिष्ठेम वयं सर्वे धरातले ।
चकास्ति शाश्वतं देशः वीरचक्रैः विमण्डितः ॥ ३३

एतादृशविपत्काले प्रतापः सर्वशक्तिमान् ।
भूत्वा राजा प्रकुर्याच्च देशमेनमनामयम् ॥ ३४

जन्मना कार्यकर्ताऽस्ति प्रतापः खलु भूपतिः ।
तस्मात् त्वं नार्हसि स्थातुं निर्गच्छ बहुजल्पक ॥ ३५

जगमल्लः तदा क्रुद्धः कोऽसि त्वं वञ्चनात्मक ।
स्थानं त्यक्ष्यामि नाहं तु द्रक्ष्यामि त्वामितः परम् ॥ ३६

किं भोः सामन्तराजानः सर्वे राजप्रियाश्च मे ।
वृथा किं निश्चलं स्तब्धाः सत्यं रक्षन्तु भूतले ॥ ३७

अहमास्मि ध्रुवं त्रातुं युष्मान् सर्वानपक्रमात् ।
एवमेकः करोत्यत्र किं चास्माभिः न साध्यते ॥ ३८

इयत् त्वं कुरुषे नूनं संधीभावपरा वयम् ।
कर्तुं शक्ताः महत्कर्म भोः कृष्ण शृणु तत् ध्रुवम् ॥ ३९

तच्छ्रुत्वा कृष्णसिंहोऽपि जगाद सुदृढं वचः ।
राणाविधायके कृत्ये कृष्णसिंहः सदा कृती ॥ ४०

यथा गां पङ्कमग्नां च रक्षते बलपूरुषः ।
तथैव देशमेनं तु रक्षयिष्यति भूपतिः ॥ ४१

वस्तुं त्वं राजलोकेऽस्मिन् न योग्योऽसि नराधम ।
कृत्वा राजानमत्र त्वां राष्ट्रं नरकमाप्स्यति ॥ ४२

तादृशं पापमत्यन्तं नाहं कर्तुं समुत्सहे ।
इत्यर्थं चन्द्रहस्तेन तं चक्रे पतितं भुवि ॥ ४३

दृष्ट्वा तत् दृश्यमानन्दे प्रहृष्टास्तत्र संस्थिताः ।
सर्वे हाहारवैः कृष्णं तुष्टुवुः साधुभाषणैः ॥ ४४

रुषा जल्पन् भिया मल्लः तस्मात् क्रन्दन् पलायितः ।
यथा शार्दूलघोरास्यात् मृगः त्रस्तः पलायते ॥ ४५

कृष्णसिंहः सुखे भातु बहुकालं विचक्षणः ।
धर्मस्य भरतखण्डस्य प्रतापस्य च रक्षणे ॥ ४६

अमृतं दर्पणं लोके मालिन्यं प्राप्तुमर्हतः ।
मलिनं नैव चित्तं तु भविष्यति महात्मनाम् ॥ ४७

कृष्णसिंहो महादक्षः धर्माधर्मविचक्षणः ।
मन्त्रित्वरूपमापन्नः राणावंशप्रियंकरः ॥ ४८

यथास्थितिमवेक्ष्यासौ सर्वं चक्रे महामनाः ।
स्वयं राजा भवेत् तर्हि तं कोऽपि न निवारयेत् ॥ ४९

सर्वं सः पालयामास साम्प्रदायं विचक्षणः ।
अनुबव्राज शान्तात्मा देशरक्षणतत्परः ॥ ५०

सर्वदा भारते तस्य कीर्तिः शाश्वतरूपिणी ।
पुष्पिता फलिता भूत्वा जनामोदं विधास्यति ॥ ५१

राणाप्रतापच्छायेव कृष्णसिंहः स्वयं सदा ।
अन्वगच्छत् सुखे दुःखे दीक्षितो देशरक्षणे ॥ ५२

सपदि किमपि सर्वे हृष्टचित्ता नितान्तं
मधुरमधुरभावैः कृष्णसिंहं प्रशंसुः ।
परमभयदभूपं मल्लभूपं तदानीं
पटुतरकटुवाक्यैः भाषणैः तं निनिन्दुः ॥ ५३

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे 'जगमल्लस्यपट्टाभिषेकसमारम्भः' नाम सप्तमः सर्गः समाप्तः ॥]

अष्टमः सर्गः ।

८. प्रतापं प्रति कृष्णसिंहादीनां स्तुतिः ।

तदा महात्मा नृपकृष्णसिंहः मित्रैः मिलित्वा त्वरितं जगाम ।
यत्रास्ति राणा स्वकुटुम्बमित्रैः वने तु पञ्चास्य इव प्रशान्तः ॥ १

तं वीक्ष्य सर्वे मधुशब्दजालैः प्रियं समाबद्धमनोहरैश्च ।
भेणुः परं हार्दिकभक्तिभावैः हाहारवैः ध्वानितसर्वकाष्ठाः ॥ २

नूनं प्रभो व्याहर साधुवादान् रक्षस्व देशं वचनं निशम्य ।
तदा प्रियं तातवचोऽनुयायी समागतस्त्वं गहनं महात्मन् ॥ ३

वीरावतारोऽसि जनप्रियोऽसि बाधां परेषामसहिष्णुमूर्तिः ।
शृणु प्रभो बान्धवशोकवाक्यं वीरैः विना देशमराजकं हि ॥ ४

विचारहीनस्तवतातपादः राज्याधिपं त्वां तु विधाय नैव ।
दुरोदरं हीनमतिं च भीरुं चकार भूपं जगमल्लपुत्रम् ॥ ५

आक्षेपपूर्णाः पटुवाग्विवादाः वृथेति मत्वा भवदीयपौराः।
तदा प्रगाढं क्षमया समाक्ताः प्रियं व्यराजन् पटुमौनरूपाः ॥ ६

आगत्य राष्ट्रं परिपालय त्वं रक्षस्व धर्मं शरणं त्वमेव।
त्वमेव नूनं जनरक्षकोऽसि समस्तकल्याणविधायकोऽसि ॥ ७

प्रभो प्रताप प्रबलं पिता ते भयावृतः तद्भवतः प्रतापात्।
विचारहीनः सभयं प्रकोपात् निष्कासयामास भवन्तमाशु ॥ ८

तवानुजं तं जगमल्लभूपं नृपं विधातुं बहुमन्त्रितश्च ॥
तस्मिन् कृतौ नास्ति विशेष एव न कुर्वते राष्ट्रहितं खलास्तु ॥ ९

यदि प्रभुः शक्तिसमेतवीरः कर्तुं च सम्यक् यतते प्रकर्षम्।
योग्यं स्वयं दुर्बललक्षणात्तः कदापि भीरुः न करिष्यतीह ॥ १०

नृपाः सदा स्वार्थपरीतचित्ताः विचारहीना बहुनिष्क्रियाश्च।
विस्मृत्य राष्ट्रं महतीं च कीर्तिं भवन्त्यकृत्ये निरतं प्रवृत्ताः ॥ ११

यदीदृशी भाति मनोगतिस्तु राष्ट्रे भवेयुः बहुधाप्यनर्थाः।
बृहत्स्वनर्येषु वली विभाति घनान्धकारेषु यथांशुमाली ॥ १२

अजायतात्रैव न जातु लोके मेवाडदेशेऽपि भवादृशस्तु।
वीरावृते भारतराष्ट्रसीम्नि धराधिपो वीररसावतारः ॥ १३

सर्वेऽपि लोके मनुते भवन्तं नृपं विधातुं शृणु भानुतेजाः।
शिरोधरार्हा नृपतेरनुज्ञा तथेति चित्राकृतिमापुः आशु ॥ १४

मनोगतव्याधिविचेष्टमानं विभुं प्रवीक्ष्यैव वयं प्रशान्तम्।
अनूह्यमानं त्वहितं तदानीं प्रोदीरितुं चापि न शक्नुयाम ॥ १५

अशान्तचित्तं प्रविधाय राष्ट्रं गतः सुखेनैव सुदीर्घनिद्राम्।
प्रशास्तुमेनं नृपहीनराष्ट्रं ऋते प्रतापान्नहि कोऽपि शक्तः ॥ १६

नेदं मदीयं गृहकर्म राजन् न तावकं नैव परस्य कर्म ।
समस्तदेशस्य हिताय नूनं आवश्यकं पावनराष्ट्रकार्यम् ॥ १७

भवन्ति राष्ट्रेऽत्र धराधिपास्तु कदापि ते नैव भवन्ति वीराः ।
कल्याणकारी भविता सुयोग्यः समस्तलोकस्य सुखाय नेता ॥ १८

न हि क्षणं जीवति देशभक्तः विना स्वदेशीयमहत्त्वभावम् ।
प्रतिक्षणं देशहिताय नूनं कष्टे यतन् विन्दति सौख्यमेव ॥ १९

लसन्ति लोके नृतराजपुत्राः तथापि सर्वे न भवन्ति भूपाः ।
ऋते फणीन्द्रान्नहि भूमिभारं नान्ये विभर्तुं प्रभवन्ति नागाः ॥ २०

अनन्तवंशीयनृपा वयं तु निरीक्षमाणाः समयं सुयोग्यम् ।
यथास्थिति स्वीयमतानुकूलं कुर्मः प्रियं देशहिताय कार्यम् ॥ २१

भवन्ति नूनं पुरुषाः प्रधानाः कलाप्रवीणाः मधुगायकाश्च ।
रसार्द्रचित्ताः कवयो धरण्यां पुराकृतप्राभवकोटिपुण्यैः ॥ २२

यदीदमेवं निभृतं धरण्यां प्रजा विजानन्ति रहस्यतत्त्वम् ।
सदा भवत्येव धरातलस्य प्रशासनं शान्तमयेन गत्या ॥ २३

अनन्तगर्वोत्तमदान्धनेत्रैः स्वार्थेन कालुष्यमनोविकारैः ।
विलोलजिह्वायुतनागवृत्तैः वचःप्रवाहैः विलसन्ति भूपाः ॥ २४

समानभावः पटुकष्टसौख्ये समानदर्शी पुरुषार्थमार्गे ।
विचारशीलः परलक्षणेऽपि पवित्रधर्मे निरतं रतश्च ॥ २५

प्रियश्च नेता भविता प्रभावी महीपतिः भारतराष्ट्रगुह्ये ।
गुणैः परं धार्मिकतत्त्वभावैः भवान् विभातीह न कोऽपि भूम्याम् ॥ २६

त्वमेव सत्यं जनतार्तिहारी संग्रामशूरां परवोरजेता ।
महत्त्वराष्ट्रस्य नियुक्तनेता स्वातन्त्र्यराष्ट्रीयरथोपयन्ता ॥ २७

भवन्तमेव प्रबलं जनालिः भविष्यकाले बलवानितीह ।
अमन्दसानन्दमनोविकासैः स्तुवन्ति गायन्ति हसन्ति रम्यम् ॥ २८

आदित्यतापाधिकतापिता भूः यथा च वर्षागमने क्षणे रता ।
तथैव भातीह पराभिपीडिता प्रजा त्वदभ्यागमने प्रताप ॥ २९

समेत्य देशं मसृणैः कटाक्षैः प्रशामयन् पीडितलोकवाधाम् ।
विधेहि लोकं परमैक्यतायुतं प्रगाढभक्त्या बहुराजमानम् ॥ ३०

पुरा च रामे विपिनं गतेऽपि विरच्य पूजां भरतो मनस्वी ।
उपानहौ तस्य निधाय पीठे शशास राज्यं व्रतधर्ममार्गैः ॥ ३१

न तादृशोऽस्तीह पवित्रराष्ट्रे त्वदीयवंशे भवतोऽनुजेषु ।
ततः परं त्वं च विहाय तूर्णं वनं प्रजापालनतत्परः सन् ॥ ३२

समेहि राज्यं तव वंशजानां पितामहस्यात्मसुखाय तथ्यं ।
परात्तभागं वरभारतस्य स्वाधीनजातं कुरु पार्थिवेन्द्र ॥ ३३

गतं प्रभुत्वं परवीरहस्तं पुनः स्वहस्तागमनं वरं हि ।
तथा विचार्यैव वयं तवाग्रे स्थिताः प्रभो न्यायविचारणाय ॥ ३४

इयं पराक्रामितमातृभूमिः न कोऽपि शक्तः फलु मोचनार्थम् ।
यतश्च सर्वे कलहायमानाः विमन्वते ते स्वयमेव भूपाः ॥ ३५

विमुच्य देशं परपालनात् त्वं विधेहि शान्तं समभावपूर्णम् ।
नाना स्वदेशीयपवित्रभावं त्रपाविहीनाश्च नृपाश्चरन्ति ॥ ३६

सर्वे महीपाः सततं यतन्ते समस्तदेशस्य धुरं प्रवोढुम् ।
स्वकीयसामर्थ्यमवेक्ष्यमाणाः सिंहासने लोलुपवीक्षणास्ते ॥ ३७

धराधिपा ये गृहपालनं तु जानन्ति किञ्चिन्नहि शक्तिहीनाः ।
कथं नु ते सङ्कटमव्यदेशं त्रातुं समर्थाः सततं भवन्ति ॥ ३८

अट्टालके लम्बितरज्जुशिक्यं आरोढुमेते प्रभवा न सन्ति ।
मदोद्धताः कार्यविचारहीनाः कथं नु ते स्वर्गपथं विशेयुः ॥ ३९

अनन्तभारानमितां धरित्रीं सर्पाश्च ये वासुकिवंशजाताः ।
भवन्ति शक्ताः न च ते प्रवोढुं ऋते ह्यनन्तात् पृथुकार्यभारम् ॥ ४०

भूपाश्च नाम्ना खलु भूपरूपाः अभावभूपत्वगुणा लसन्ति ।
यत् दिव्यरूपेण बभौ नृपेषु तत् भूपतित्वं त्वयि राजते भोः ॥ ४१

समं हि सूर्येण खगोळदेशे राराज्यते कोऽपि न च प्रभावी ।
तथैव राष्ट्रे भवता समं भोः न शक्तिमान् भाति महाप्रताप ॥ ४२

सर्वे ग्रहा रम्यखगोलदेशे लसन्ति दिव्यं सततं सुषुम्णा ।
सूर्यप्रकाशात् प्रभवन्ति नित्यं स्वकीयकार्याचरणे सशक्ताः ॥ ४३

अभावसूर्यस्य खगोळमार्गे सर्वे ग्रहाः सत्वरमापतन्ति ।
परस्पराकर्षणशक्तिहीनाः प्रत्यक्षदेवः खलु चित्रभानुः ॥ ४४

त्वमेव सूर्यप्रभवे स्ववंशे जातोऽसि राष्ट्रे बहुशक्तिशाली ।
सर्वे जनाः त्वामनुभावयन्ति सूर्यः स्वयं राष्ट्रहिताय जातः ॥ ४५

ब्रह्माण्ड एवेह विराजते भोः नाना रविं जीवनदानमूर्तिम् ।
न याति यत्रैव दिवाकरस्य रोचिः परं तत्र विनाश एव ॥ ४६

भवादृशो राष्ट्रहिताय लोके न वाऽस्ति योद्धुं नृवरेषु देव ।
खद्योतरूपाः खलु देशभूपाः खद्योतरूपोऽसि नमोस्तु तुभ्यम् ॥४७

सान्निध्यहीनोऽपि भवान् महिम्ना सर्वप्रजाकीर्तितदेवतोऽसि ।
सान्निध्यहीनोऽपि दिवाकरस्तु सर्वप्रजापूजितदेवतोऽस्ति ॥ ४८

दिवाकराकर्षणभाग्यलुप्तं खगोलमार्गे ग्रहमण्डलं तु ।
अशक्तिदेहं निजचालनेऽपि भवत्यहो राष्ट्रदिवाकरस्त्वम् ॥ ४९

त्यक्त्वा भवन्तं निजदेशलोकाः नान्यं महीपं भुवि कामयन्ते ।
विना त्वदीयं वरशासनेन देशः सदा मज्जति दास्यपङ्के ॥ ५०

तस्मात् स्वयं शुद्धवितर्कभावैः देशस्थितिं केवलमत्र मत्वा ।
अनाथदेशस्य हिताय कामं कृतप्रयत्नो भव राष्ट्रनाथ ॥ ५१

सर्पाश्च लोके बहवः सरन्ति नाम्ना परं सर्पकुलोद्भवास्ते ।
नैकोऽपि शक्तः क्षितिभृत् पदे तु ऋते ह्यनन्ताद् भुवि राजराज ॥ ५२

सिंहासनार्थं बहवो यतन्ते श्वानो वराहाः खरसूषकाश्च ।
नृसिंहमूर्तिः खलु तत्र योग्यः तदैव सिंहासन-नाम भाति ॥ ५३

सिंहासने दिव्यशुभे मुहूर्ते पट्टाभिषेकः क्रियते यदि प्रभो ।
शुनश्च जन्मागतनैजभावः किं लुप्यते साधु वद प्रताप ॥ ५४

विशिष्य लोके खलु शक्तियुक्ताः जनाः परं केचन संलसन्ति ।
नूनं यदि स्यात् गतमेव राज्यं तेषां सुहस्तेषु विवर्धते हि ॥ ५५

लसन्ति लोके निजजन्मपूताः महानुभावाः कवयश्च भूपाः ।
न कोपि तान् शास्ति गुणान् कदापि यतः स्वयं ते जनिं लब्धतेजाः ॥ ५६

चतुर्विधोपायवृतो हि राजा यथास्थितिं स्वीयमतानुकूलम् ।
संरक्ष्य सर्वान् खलु राजकीयान् समस्तदेशं परिपालयेत् श्रिया ॥ ५७

संरक्षितुं देशमिमं परेभ्यः दैवांशसंभूतराधिपो वरः ।
त्वमेव राष्ट्रे भवितुं च योग्यः राजा यतो दैवतवंशजात ॥ ५८

दैवांशसंभूतजनाधिपोऽसि समस्तराष्ट्रस्य निदानभूतः ।
दिवानिशं दैशिककार्यमग्नः त्वमेव राजा भविता स्वराष्ट्रे ॥ ५९

तस्मात् हि देव त्वरितं निवृत्य राष्ट्रप्रजाः स्वीयजना इवात्र ।
विलोक्य राज्यं परिपालयस्वसमस्तदेशं सुखशान्तिपूर्णम् ॥ ६०

प्रभाष्य मञ्जुलं रसोल्वणं सविस्तरं जगत्प्रभुम् ।
विनम्रमस्तकाः प्रजाः प्रणेमुः आर्द्रमानसाः ॥ ६१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' प्रतापं प्रति कृष्णसिंहादीनां स्तुतिः ' नाम अष्टमः सर्गः समाप्तः ॥]

नवमः सर्गः ।

९. वीरनार्या राणाप्रतापविवाहः ।

अनेकधाटीचयनुन्नदेशं महीपतिद्वेषविदीर्यमाणम् ।
निरन्तरं दास्यपदे व्रजन्तं खिन्नः स्वदेशं बहुधा विलोक्य ॥ १

देशे तदा सर्वनृपालवर्गाः विचित्रभावैः परपादलग्नाः ।
तस्मात् स्वदेशे नुतराजकत्वं कालुष्यमाप्त्वा भयदं चकासे ॥ २

स्त्रैणं तदा शत्रुपदारविन्दे विनीयमानं विललास दास्ये ।
माणिक्यरूपाश्च नृपालकन्याः गाणिक्यकार्ये निरता विरेजुः ॥ ३

भवन्ति केचित् परपादशीर्षाः केऽप्यत्र कुर्वन्ति परैश्च मैत्रीम् ।
नृत्याङ्गना भान्ति नृपाग्रकन्याः समस्तदेशो नरकायते किम् ॥ ४

सर्वाश्च नित्यं परदास्यचित्ताः लज्जाविहीनाः सुखलोलुपाश्च ।
विचित्रभूषा परिधानवद्धाः तां पद्मिनीं नैव कथं स्मरन्ति ॥ ५

हताश्च वीराः परसंगरेषु दास्ये प्रयाताः सुखतत्परास्तु ।
अराष्ट्रभक्ताः बहवो विभान्ति विध्वस्तरूपा नृपराज्यभूपाः ॥ ६

पराधिकारे विषवायुपूर्णे सर्वेऽपि जाताः विषपूर्णचित्ताः ।
कन्या विजाता विषकन्यकाश्च चरित्रहीनाः प्रभवन्ति पौराः ॥ ७

नावीन्यधर्मेण विमोहितास्ते मत्ताश्च रम्या मदिरासहायाः ।
विस्मृत्य देशीयसमस्तधर्मं पिशाचरूपेषु लसन्ति देशे ॥ ८

नासन् तदा क्षत्रियराजकन्याः विवाहयोग्याः खरदेशभक्ताः ।
आचारपूताः स्वचरित्ररम्याः प्रतापराणाप्रियकारकाश्च ॥ ९

हिमाचलोत्तुङ्गमहोन्नतं तं पयोधिसाधर्म्यगभीरचित्तम् ।
वीरावतारं प्रविलोक्य सर्वे विमेनिरे वन्यगजं महीपाः ॥ १०

सिन्धासवः तेऽकृवरुदास्यसिन्धौ राणां तृणीकृत्य ययुः सगर्वम् ।
राणा तु सर्वान् परिहाय शान्तं वनं ययौ तान् कृमिकीटकांश्च॥ ११

धिक्कृत्य राणा परतन्त्रभूपान् भोगेषु नित्यं प्रविलुठ्यमानान् ।
वंभ्रम्यमाणान् धनसौख्यलब्ध्यै तन्द्रायुतान् दास्यतले प्रसुप्तान् ॥ १२

विलोक्य देशं परहस्तयातं विनैव राज्ञां सहकारहस्तम् ।
परस्परं तान् कलहायमानान् खिन्नः परं स्वात्मनि निश्चितोऽसौ ॥१३

सुक्षत्रियाणां कुलसंभवास्तु प्रियैः च सुक्षत्रियधर्ममार्गैः ।
देशीयधर्मं परिपालयेयुः निरन्तरं नैतिकजीवनस्थाः ॥ १४

उद्भूय देवौ भुवि रामकृष्णौ सुक्षत्रियाणां कुलशेखरौ तौ ।
प्रशासयामासतुः एव राष्ट्रं प्रशासनं क्षात्रगुणं वृणोति ॥ १५

मदीयवंशोद्भवपुत्रिपुत्राः प्रियां मदीयां जननीं स्वभक्त्या ।
समुद्धरिष्यन्ति च दास्यसिन्धोः सिन्धोर्वराहोद्धृतमेदिनीव ॥ १६

नूनं हि संरक्षितुमत्र देशं सुक्षत्रियाणां जनिरेव योग्या ।
तस्मात् भुवि क्षत्रियवंशजाता नारी विवाहाय शुभा ममात्र ॥ १७

स्वदेशचिन्ताभरनामिताङ्गीं समस्तदेशोन्नतिकांक्षिणीं च ।
तदीयभावानुगुणाभिरामां वरीतुकामः सुहृदं जगाद ॥ १८

कृष्णस्तु राणां निजगाद सत्यं देशस्य वृत्तं चरितं समस्तम् ।
यथा स्वदेशे वरराजवर्गाः भृशं नु दैवोपहता वितेनुः ॥ १९

महीपते मत्कथनं शृणोतु जनःश्रुतिः सा प्रथिता च राष्ट्रे ।
सुक्षत्रियाः सन्ति सदाऽऽन्ध्रदेशे राष्ट्रैकभक्ताः पटुराज्यतन्त्राः ॥ २०

कृष्णातटे सन्ति धराधिपेषु श्रीरामवंशोद्भवशूरभूपाः ।
सुक्षत्रियाः पौरुषमूर्तिमन्तः समस्तसंग्रामविशारदाश्च ॥ २१

रणाङ्गणे रुद्रमदेवितुल्याः विशिष्टसुक्षत्रियवंशजाताः ।
अनन्तकष्टेष्वविचाल्यमानाः सुखासुखे भर्तृसमं स्थिताश्च ॥ २२

इतस्ततः खड्गविचालनैश्च परान् विजित्यैव विराजमानाः ।
आन्ध्रस्त्रियो यान्ति रणाङ्गणेषु तथेति हालो मधुरं लिलेख ॥ २३

सुक्षत्रिया हूणगणैः प्रयुध्य संरक्षितुं स्वीयसुतांश्च दारान् ।
उष्ट्रैः समस्तैः गजघोटकाभिश्चेलुश्च राष्ट्रे विविधप्रदेशान् ॥ २४

तदैव केचित् बहुसस्यपूर्णां फलान्वितां जीवनदीविभान्ताम् ।
कृष्णातटीं चान्ध्रवनस्थलीं तु समालिलिङ्गुः स्वकलत्रपुत्रैः ॥ २५

एवं पुरा क्षत्रियवंशजाताः तेनुः प्रदेशेषु विशालराष्ट्रे ।
तेष्वेव संजातकुमारिकाऽस्ति पतीश्वरी नाम विभूषितैका ॥ २६

सर्वं विलोक्यैव धराधिपस्तु राणा स्वयं काङ्क्षितदेशकीर्तिः ।
हिन्दुत्वसंरक्षणलग्नचेताः क्षिप्रं ययौ तां परिणेतुकामः ॥ २७

मध्यस्तलोकैश्च यथोपदिष्टं प्रतापराणा प्रियमित्रवर्गैः ।
कृष्णापगावेष्टितहेमदुर्गं जगाम दिव्यं विजयादिवाडम् ॥ २८

यत्रार्जुनः पाशुपतास्त्रमाप्तुं तेपे तपः शात्रवकण्ठहारी ।
तत्रैव भीमार्जुनजातयुद्धे पार्थः तु लेभे विजयं महिम्ना ॥ २९

तस्माद्धि लेभे विजयाभिधानं वाडस्तु तत्रस्थसुवर्णदुर्गे ।
विराजमानो जनतामुखेषु शनैः शनैः सो बेजवाडरूपम् ॥ ३०

आयान्तमेनं बहुदूरवासात् घोट्टाणयानेन विदीर्णगात्रम् ।
प्रतापराणां प्रविलोक्य भूपं कृष्णानदी स्वागतमाजहार ॥ ३१

सशीकराम्भःकणलास्यमाना तरङ्गहस्ता निनदत्प्रवाहा ।
विलोलवीचीपरिवेष्टिताङ्गी प्रोवाह सानन्दमवेक्ष्य राणाम् ॥ ३२

जामातरं भारतवीरयोधं विलोक्य वैवाहिकमण्डपे सा ।
कृष्णानदी फेनिलहासभासा चकार शुभ्रं बेजवाडभूमिम् ॥ ३३

समेत्य चान्ध्रीयवरप्रदेशं कृष्णातटेऽसौ कनकाद्रिपार्श्वे ।
चक्रे विवाहं बेज़्वाडपुर्यां पतीश्वरीनामककन्यया सः ॥ ३४

तदैव शास्त्रोक्तविधिप्रमाणं चक्रुः शुभां सप्तपदीं वसिष्ठाः ।
लाजादिहोमान् विधिवत् प्रकामं समस्तभूपालसमक्षमेव ॥ ३५

परस्परं तौ प्रविराजमानौ प्रदक्षिणीकृत्य सुभावबन्धैः ।
अन्योन्यसंश्लिष्टगुणैः विभान्तौ वैश्वानरं रेजतुरग्निरूपौ ॥ ३६

तदा समाविष्टसदस्यवर्गे तौ दम्पती वेदपुनीतविप्रान् ।
प्रणम्य, तेभ्यः शतदीर्घमायुः विरजेतुः प्राप्य ऋचाविवात्र ॥ ३७

प्रकल्प्य वेदोपनिषत्सदस्यं शुभे विवाहे महनीयसौधे ।
ददौ प्रतापो बहुदक्षिणाश्च समस्तशास्त्रेषु विशारदेभ्यः ॥ ३८

तौ ब्राह्मणेभ्योऽक्षतपुष्पमन्त्रान् संप्राप्य चाशीर्वचनानि साधु ।
प्रणम्य तत्रस्थनृपालवर्गं यथाविधिप्राज्ञजनान् प्रवृद्धान् ॥ ३९

पतीश्वरीसार्धमयं प्रतापः दध्यौ चिरं शान्तमनाः मनस्वी ।
प्रदक्षिणीकृत्य सुवर्णदुर्गम् अधिष्ठितः चेतकमश्वराजम् ॥ ४०

अन्योन्यभावाश्रितबन्धनं तु नैकक्रियारम्भहिताय भाति ।
तथ्यं विवाहः पुरुषार्थदाता सौख्यास्पदो वंशविवर्धकश्च ॥ ४१

शब्दार्थरूपौ मधुगीतनादौ सुपुष्पगन्धौ चपलाघनौ तौ ।
प्रसन्नताचन्द्रमसौ नितान्तं छायातपौ द्वन्द्वसमासरूपौ ॥ ४२

एतादृशं भव्यपुराणवाङं विलोक्य भावो मम जायते च ।
अहं विजेता समरे भवेयं यथा किरीटी समरे तदाऽभूत् ॥ ४३

सुवर्णदुर्गे मयि सुप्रसन्ना ददातु मह्यं युधि दिव्यशक्तिम् ।
अखण्डतां भारतदेशकीर्तिं सदाऽभिसंरक्षतु दैशिकं च ॥ ४४

राणा विलोक्यैव पुरीं पवित्रां चारित्र्यपूर्णां सितिकण्ठपूताम् ।
सुवर्णदुर्गापरिरक्षितां तु ननाम भक्त्या सपदि प्रहृष्टः ॥ ४५

प्रचक्रमाते नवदम्पती तौ विवाहसंबद्धसुकङ्कणैश्च ।
अरावळीपर्वतवन्यशोभां देशं च संरक्षणदीक्षितौ तौ ॥ ४६

अद्वैतभावेन विभिन्नरूपौ कष्टे सुखे साधुविराजमानौ ।
देशीयकार्याय समर्पिताङ्गौ कर्तव्यबुद्ध्या करणे रतौ तौ ॥ ४७

राष्ट्रैक्यतां साधयितुं प्रतापः प्रादेशिकीयां तरुणीं ववार ।
आकाशवत् कल्पितमण्डपे सः समस्तराजन्यकदम्बमध्ये ॥ ४८

समस्तराष्ट्रस्य निदानभूता दिव्या सदा भाति सुसंस्कृतिश्च ।
एनां विना राष्ट्रमिदं समेति नीचं गुणं पाशविकं तु तथ्यम् ॥ ४९

आदर्शरूपेण धराधिपोऽयं समस्तराष्ट्रे स्थिररूपमाप्त्वा ।
रेजे प्रियः चाप्यधुना समक्षं विभाति नित्यं गगनेशवद् हि ॥ ५०

प्रतापराणा राजाऽसौ कृत्वा चादर्शजीवितम् ।
प्रजानां दिव्यनेताऽसीत् धर्ममार्गपरायणः ॥ ५१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे 'वीरनार्या राणाप्रतापविवाहः' नाम नवमः सर्गः समाप्तः ॥]

दशमः सर्गः ।

१०. प्रतापेन नवग्रहपूजादिकरणम् ।

गणाधिपं कविश्रेष्ठं ज्येष्ठराजं महौजसम् ।
सिद्धिवृद्धिपरीतेशं वन्देऽहं शान्तिकामुकः ॥ १

अस्मद्वंशमहादेवं सृष्टिस्थितिलयाधिपम् ।
प्रत्यक्षदैवतं नित्यं वन्देऽहं शान्तिकामुकः ॥ २

तेजोनिधिं लोहगोळं आत्मानं जगतः प्रभुम् ।
आयुरारोग्यदातारं वन्देऽहं शान्तिकामुकः ॥ ३

ओषधीनां पतिं चन्द्रं शिवमस्तकभूषणम् ।
मनःशान्त्यै सदा भक्त्या वन्देऽहं शान्तिकामुकः ॥ ४

इष्टापूर्त्यै बुधं देवं शान्तिदं पीतवाससम् ।
रक्षितुं सर्वलोकं तं वन्देऽहं शान्तिकामुकः ॥ ५

बृहस्पतिं बुद्धिमन्तं शुभदृष्टिप्रभावितम् ।
सर्वदा शान्तमूर्तिं तु वन्देऽहं शान्तिकामुकः ॥ ६

शुक्रमूर्तिं कलाभिज्ञं गृहसौख्याधिकारिणम् ।
दानवालिगुरुं नित्यं वन्देऽहं शान्तिकामुकः ॥ ७

लोहिताङ्गं धरापुत्रम् अष्टकष्टप्रदायिनम् ।
अहार्यनिश्चयं भौमं वन्देऽहं शान्तिकामुकः ॥ ८

शनिग्रहं विनम्रः सन् सर्वपीडाधिपं प्रभुं ।
देवादिदेवं कालाङ्गं वन्देऽहं शान्तिकामुकः ॥ ९

राहुग्रहं सदा चोरं सर्वविघ्नोपकारकम् ।
पापात्मानं तु सर्पाङ्गं वन्देऽहं शान्तिकामुकः ॥ १०

केतुग्रहं ज्ञानमूर्तिं सर्वदा मोक्षकारकम् ।
पश्यन्तं राहुमित्रं तं वन्देऽहं शान्तिकामुकः ॥ ११

दिशि प्राच्यां वलारातिं देवेन्द्रं नाकवर्तिनम् ।
शचीसमेतं लोकार्थं वन्देहं शान्तिकामुकः ॥ १२

आग्नेयभागे राजन्तं गौरवर्णं घृताशनम् ।
सतीस्वाहासमेतं तं वन्देहं शान्तिकामुकः ॥ १३

दक्षिणायां दिशि श्रेष्ठं कालदण्डधरं प्रभुम् ।
श्यामलादेविसंपृक्तं वन्देऽहं शान्तिकामुकः ॥ १४

नैर्ऋत्यां दिशि राजन्तं निरृतिं लोकरक्षकम् ।
पत्न्यासमेतं देवेशं वन्देऽहं शान्तिकामुकः ॥ १५

वरुणं पश्चिमाशायां जलाधिष्ठानदैवतम् ।
मकरासनसम्राजं वन्देऽहं शान्तिकामुकः ॥ १६

वायव्यां दिशि देवेशं सर्वात्राशु सदागतिम् ।
भार्याज्ञनासमायुक्तं वन्देऽहं शान्तिकामुकः ॥ १७

उत्तरस्यां दिशि श्रेष्ठं कुबेरं श्रेष्ठिनं सदा ।
सर्वार्थसिद्ध्यै भक्त्या तं वन्देऽहं शान्तिकामुकः ॥ १८

ईशान्यां दिशि राजन्तम् ईशानं जगतः पतिम् ।
गौरीमङ्गलमूर्तिं तं वन्देऽहं शान्तिकामुकः ॥ १९

कैलासाचलराजन्तं वृषभेन्द्राधिरोहिणम् ।
नागाभरणचित्राङ्गं वन्देऽहं शान्तिकामुकः ॥ २०

वैकुण्ठवासिनं देवं स्थितिकारकदैवतम् ।
लक्ष्मीसनाथं लोकेशं वन्देऽहं शान्तिकामुकः ॥ २१

कार्तिकेयं महासेनं सङ्गरे पण्डितं प्रियम् ।
महाशक्तिप्रदातारं वन्देऽहं शान्तिकामुकः ॥ २२

शरवणभवशाक्तेयं विष्वक्सेनाभिभासुरम् ।
विष्वक्सेनाप्रसादाय पूजयेयं भृशं हृदि ॥ २३

स्रोतानामधिपं सिन्धुं महागम्भीररूपिणम् ।
गाम्भीर्यं सततं प्राप्तुं वन्देऽहं शान्तिकामुकः ॥ २४

पशूनामधिपं रुद्रं महेशानमुमापतिम् ।
रूपाणामधिपं नित्यं वन्देऽहं शान्तिकामुकः ॥ २५

सुषुम्णे चैव लोकेऽस्मिन् सर्वदा सूर्यरश्मये ।
ब्रह्मक्षत्रसुरक्षार्थं स्वाहा देशहिताय नः ॥ २६

प्रजाधिपतये भक्त्या निरतं विश्वकर्मणे ।
दिव्यात्मने प्रशान्ताय स्वाहा देशहिताय नः ॥ २७

देवाः सर्वे प्रियं देशं सर्वदा सर्वतोमुखम् ।
पुनन्तु शक्तिसम्पन्नं कुर्वन्तु च महीं श्रिया ॥ २८

सत्यानामधिपं मित्रं वरुणं सलिलाधिपम् ।
नक्षत्राधिपरात्रीशं वन्देऽहं शान्तिकामुकः ॥ २९

तेजस्वी बहुधाऽहं नु भूयासं देशरक्षणे ।
वर्चस्वी वह्निवन्नित्यं भूयासं लोकरक्षणे ॥ ३०

दुःस्वप्नं रुदितं चैव शत्रूणामस्तु सर्वदा ।
आयुष्यं तेज आरोग्यं दद्यान्मे हव्यवाहनः ॥ ३१

मयि मेधां मयि प्रज्ञां सूर्यो देवो दधातु च ।
मयीन्द्रियं च सुभ्राजाः सततं लोकरक्षणे ॥ ३२

अनुक्ता बहवो देवाः द्योतन्ते ये दिवानिशम् ।
सहायका भवन्त्वाशु मम राष्ट्रोदये भृशम् ॥ ३३

प्रातिस्विकं न काङ्क्षेऽहं देवताः देशरक्षकाः ।
सर्वे जनाः सुखे सन्तु भारतीयसुपालने ॥ ३४

गावो दुग्धं दुहन्त्वत्र पक्षिणो मञ्जुलस्वरैः ।
कूजन्तु देशकीर्तिं च भारतस्य निरन्तरम् ॥ ३५

भद्रं कर्णैः वयं सर्वे शृणुयाम दिवौकसाम् ।
पश्येमाक्षाभिः भद्रं स्थिरैरङ्गैश्च स्वमानसैः ॥ ३६

राष्ट्रं मदीयं लोकेऽस्मिन् राजतां सर्वशक्तिदम् ।
एकात्मभावसंपृक्तम् अष्टकष्टेष्वपि ध्रुवम् ॥ ३७

कूलङ्कषाश्च वाहिन्यः मेदिनीं सस्यशालिनीम् ।
यथायोग्यं च पर्जन्यः कुर्वन्तु भुवि वर्षतु ॥ ३८

पूर्वजाः शक्तिसंपन्नाः राष्ट्रार्थं त्यक्तजीविताः ।
ते सर्वे राष्ट्रवृद्ध्यर्थं वर्षयन्त्वाशिषोऽक्षतान् ॥ ३९

एवं ध्यात्वा कल्पे होमं कृत्वा भक्त्या राणा मन्त्रैः ।
राष्ट्रं सर्वं शक्त्या युक्तं भातुं स्तोत्रै रेजे पूतः ॥ ४०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' प्रतापेन नवग्रहपूजादि-करणम् ' नाम षष्ठः सर्गः समाप्तः ॥]

एकादशः सर्गः ।

११. श्री राणाप्रतापपट्टाभिषेकः ।

वनात् समानीय नृपं मङ्गलवाद्यगीतैः सपत्नीकम् ।
उदयपुरं सानन्दं कृष्णसिंहादयो बहुसन्नाहैः ॥ १

पट्टाभिषिक्तुं नृपं पतीश्वरीयुतं राणाप्रतापम् ।
दिदिक्षुः पौरान् सर्वान् उदयपुरम् अलङ्कर्तुं सोत्साहम् ॥ २

उदयपुरपौरवर्गाः नगरं पताकाञ्चितं रम्यं ते ।
विधाय शुभतोरणैश्च रथ्यां सलिलैः प्रसिञ्चयामासुः ॥ ३

नैकाश्च दीपकलिकाः सर्वत्र प्रज्वलिताश्च सुरम्याः ।
विविधरङ्गाः नगर्यां विकीर्णाश्च मनोरञ्जकाः हृद्याः ॥ ४

पीतवर्णसमञ्चितः हरिततास्वूलवल्लीवलयितस्तु ।
मण्डपः कुङ्कुमरागः क्रान्तिपुञ्जपिञ्जरितः प्रतिभाति च ॥ ५

तत्रोदयपुरसौधे रम्यहर्म्यचन्द्रसुधाशालायाम् ।
मधुरं निर्मितवेद्यां चतुष्कोणविभासमानमण्डपे ॥ ६

रङ्गवल्लीचित्रिते सिंहासनं कनकमयं क्षितं च ।
तस्योभयपार्श्वयोस्तु पुरुषौ सुवर्णयष्टिधरौ स्थितौ ॥ ७

सिंहासस्य पुरतः सामन्तभूमिपतयो गायकाश्च ।
कविपण्डितराजानः स्वीयस्वीयस्थानेष्वुपविष्टाः ॥ ८

वेदपण्डिता विप्राः वन्दिमागधाः सर्वे समुचितेषु ।
समुपविष्टाः तत्रैव पीतदुकूलावेष्टिताः पीठेषु ॥ ९

शहनाशङ्खादीनां घोषाः दशदिशासु शून्यं प्रविश्य ।
आशान्तान् वधिरितान् कुर्वन्ति पटहढक्कानिनादाश्च ॥ १०

नवनारिकेळपर्णैः दलफलयुतकदळीविशेषैः चापि ।
सुरम्यचित्रितं पुरं प्रतीक्षते च राणाप्रतापार्थम् ॥ ११

आयान्तं प्रतापं तु सपत्नीकं विलोक्य तत्र रामाः ।
अवाकिरन् पुष्पाणि च राणाप्रतापपादपद्मतलेषु ॥ १२

गृहीत्वा पताकान् ते बाला रथ्यास्वाहिण्डमानाश्च ।
जयतु हे प्रताप जयतु राष्ट्रीयानस्मान् च रक्षतु भवान् ॥ १३

इत्यसीमितानन्दे सर्वे खेलमानमानसाः तत्र ।
उदयपुरं शब्दितं च कुर्वन्तः दौष्ट्ये मग्नाः भवन्ति ॥ १४

केचन हयाधिष्ठिताः बहुदूरात् समागतवन्तः नृपाः ।
अन्ये गजाधिष्ठिताः नवविधोपायनैः सपत्नीकाश्च ॥ १५

विविधमणिगणमण्डिताः विलसत्केयूरसुकण्ठाभरणाः ।
राणाप्रतापानुगाः केचन स्यन्दनाधिष्ठिताः तत्र ॥ १६

उदयपुरनिकेतनानि सर्वत्र बहुविलसितानि दीपैश्च ।
मद्गजमदसिञ्चितानि राजभवनससैकतप्राङ्गणानि ॥ १७

सकलपवित्रनदीभ्यः समानीतैः पुण्यकीलालचयैः ।
सुवर्णकुम्भपूर्णैश्च वेदमन्त्रमहिमासंविराजितैः ॥ १८

कल्ये गन्धिलसलिलैः स्नातः सपत्नीकः स प्रतापः ।
धृत्वा मृदुदुकूलानि दैवतमेकलिङ्गेश्वरमानर्च ॥ १९

ततः परं सुयोग्यान् च केयूरादीन् धृत्वा प्रतापस्तु ।
पाटेश्वरीसमेतः मङ्गलवाद्यघोषैः ययौ शालाम् ॥ २०

सपत्नीकः प्रतापः सर्वान् नमस्कृत्य भक्तिभावैश्च ।
मन्दहाससमञ्चितः राजलोकमपश्यत् लोचनान्तैः ॥ २१

लोकराजाधिराजः राजपरमेश्वरराणाप्रतापः ।
चन्द्रशालां समेति धर्मपत्नीपाटेश्वरीसहितः ॥ २२

इति स्तोत्रपाठकास्तु विधाय स्तुतिं समुपविष्टाः तत्र ।
सपदि भूसुराः मन्त्रान् ध्रुवन्ते राजेति स्वरैः पपठुः ॥ २३

सर्वे सभास्तारास्तु समुत्थायातिष्ठन् तत्रैवाशु ।
शरदां शतं जीवतात् पतीश्वरीप्रतापावित्यघोषयन् ॥ २४

पट्टाभिषेकसमये सकलधराधिपाः राणानुकूलाः ।
आनन्दपुलकाञ्चिताः वाष्पपूर्णलोचनान्ताः बभूवुः ॥ २५

संजगदुः सोत्साहं कृष्णमनः श्यामसिंहादयस्ते ।
सुराजकमद्य राष्ट्रं रोहिणीशशिसंयुतविभावरीव ॥ २६

दुर्दिनानि गतान्यत्र सर्वाणि भवन्ति शुभसूचकानि च ।
राणाप्रतापनृपतिः पालकोऽयं रक्षकः चास्माकम् ॥ २७

स्वदेशरक्षणे वयम् चोढ्वा शिरसा तदीयाज्ञां शुभाम् ।
अरिनिषूदनं कुर्मः देशस्वातन्त्र्यसिद्ध्यै च सर्वे ॥ २८

चतुर्वेदमन्त्राणां संहिता-पद-क्रम-घन-जटाभिश्च ।
चन्द्रशालाभवनं प्रतिध्वनितं सपदि चक्रुः पूतम् ॥ २९

समस्तनदीभ्यः जलं समानीय मन्त्रपूतं विधाय तत् ।
सपत्नीकं प्रतापम् अभिसिसिञ्चुः वेदपारगाः तदा ॥ ३०

अनुपदं राजाङ्गनाः मङ्गलारतिं प्रगायन्ति मधुरम् ।
दत्वा शुभकामनाश्च आशीभिः पुष्पाक्षतानवाकिरन् ॥ ३१

समागतराजन्यकं मातङ्गतुरङ्गमाणिक्यादीन् च ।
प्रददौ चोपायनमिव दम्पतीभ्यां सभक्तिकं सप्रियम् ॥ ३२

अनुपदमेव कृष्णस्तु राजदण्डमयच्छत् राणाराज्ञे ।
तिलकं भाले कृत्वा गन्धाक्षतानुत्तमाङ्गेऽवाकिरत् ॥ ३३

कट्यां खड्गबन्धनं विधाय पुरोहितः मन्त्रपूर्वकम् ।
शतवत्सराणि वसतां आयुर्भ्यामित्याशिषः प्रददौ च ॥ ३४

स राणा सपत्नीकः स्वर्णसिंहासने समुपाविशत् च ।
कृष्णसिंहः किरीटं शीर्षे तस्य न्यक्षिपत् सहर्षम् ॥ ३५

तेजितबाणहस्ताश्च मलीमसकृष्णदृढदीर्घदेहाश्च ।
पतत्रिपत्रभूषिताः विविधरङ्गशिरोवेष्टनवेष्टिताः ॥ ३६

ते वनादारभ्यैव नानाविधपटहवाद्यविशेषैश्च ।
नर्तयन्तः सहेलं समागतवन्तः मनोहरगीतैः ॥ ३७

एकस्यां श्रेण्यां ते समागत्य च बन्धुभिस्त्रैः साकम् ।
वाद्यैः साकं हर्षैः मण्डलाकारे ननटुः च भक्त्या ॥ ३८

वनप्रतिनिधिभिल्लः व्याघ्रचर्मबहुमानपूर्वकं च ।
प्रददौ प्रतापराज्ञे साष्टाङ्गप्रणिपातपूर्वकं सः ॥ ३९

राणा तस्मिन् समये स्वीयानुचरान् सामन्तनृपालान् ।
संबोधितवान् कामं यथायोग्यं कृतज्ञताभावैश्च ॥ ४०

राणावचोमरन्दैः हर्षोत्फुल्लनयनाः सभास्ताराः ।
पटुकरतालध्वनिभिः स्वीयानुमतिं प्रकटयामासुः च ॥ ४१

उत्थाय कृष्णसिंहः सोत्साहमपरिमितानन्दमुवाच ।
राजन्वन्तं जातं भारतमस्मदीयादृष्टवशात् हि ॥ ४२

वयं सर्वे सर्वदा प्रतापाज्ञां समवधार्य व्रजेम ।
स्वतन्त्रदेशं कर्तुं भारतं मनोवाक्कायकर्मभिः ॥ ४३

तत्रस्थाः परस्परं सुहृद्भावैः रक्षाबन्धनं तु ।
विदधुस्ते चिह्नार्थं देशसंरक्षणाय कामनाभिः ॥ ४४

पट्टाभिषेकसमये विश्रुतनाटकरङ्गवहुरूपिणः ।
प्रतापं कीर्तयन्तः महाभारतनाटकं विचिखेलुः ॥ ४५

परेद्युः गायकवराः भारतीयसंगीते नदीष्णाश्च ।
नैकरागप्रभावैः राजसभां रागरञ्जितां चक्रुः ॥ ४६

नर्तकाः कथकूनाट्यं मधुमयप्रकाराभिनयपूर्वकम् ।
बहुरम्यभङ्गिमाभिः पट्टाभिषेकं शिल्पितं चक्रुः ॥ ४७

चेतकोऽपि सानन्दं हेषारूपेण स्वीयानन्दम् ।
प्रकटयामास गाढं पट्टाभिषेकजनितमतुलममलम् ॥ ४८

पङ्क्तावनेकपास्ते शुण्डालमुद्धृत्य बहुधींकारैः ।
पुरः पादावुन्नमय्य भूपं स्तुवन्त्यभिनन्दनपूर्वकम् ॥ ४९

काश्चन युवत्यः साधु दीपकलितकुम्भान्निक्षिप्य शिरसि ।
मञ्जुलवक्रितनाट्यैः पादनूपुरध्वनिभिश्च ननर्तुः ॥ ५०

मङ्गलं नेत्रदीपैः महिलाश्च कर्पूरार्तिक्यदीपैः ।
कृत्वा मधुरं गानैः प्रोचुः श्रीरामरक्षां राणाय ॥ ५१

संतोषनिमग्नास्ते पट्टाभिषेकानन्तरं पौराः ।
अखण्डान्नदानं तु चक्रुः पञ्चपक्वान्नैः बहुविधैः ॥ ५२

सामुदायिकभोजने सर्वे पङ्क्तावुपविश्य सस्नेहम् ।
स्वराष्ट्रनामस्मरणैः गीतैश्च भोजनं चक्रुः तृप्त्या ॥ ५३

भुक्त्वा च कण्ठदघ्नं पट्टाभिषेकमागन्तारस्ते ।
शब्दमुद्गारपूर्णं विधायोदरे हस्तं भ्रामयन्ति ॥ ५४

एवमत्र बहुमङ्गलवाद्यैः राजलोककृतसुन्दरकृत्यैः ।
कृष्णसिंहकृतमङ्गलकार्यैः पत्तनं लसति वैभवहासैः ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे 'राणाप्रतापपट्टाभिषेको' नाम एकादशः सर्गः समाप्तः ॥]

द्वादशः सर्गः ।

१२. सपत्नीकस्य राणाप्रतापस्य वनगमनम् ।

देशः तिष्ठति दास्ये मग्नः संरक्षणं विना गाढम् ।
नोद्धर्तुमुद्युक्तः कोऽपि राजा भारतेऽधुना ॥ १

आसीत् राजस्थानं, नास्ति राजस्थानं नाम्नाप्यधुना ।
नाममात्रं क्षत्रियाः सन्ति, किन्तु देशद्रोहिणः ॥ २

मद्यपानमत्तास्ते राजानः सर्वत्र कलहावृताः
स्नेहविहीना निरतं दास्यतत्त्वमग्ना भान्तीह ॥ ३

अरिषड्वर्गभरिताश्च निरस्तस्नेहभावराजमानाः ।
राजानः विद्यन्ते शुनश्छत्रसमानाः राज्ये ॥ ४

सर्वः स्वार्थमीहते मनुते महोन्नतमिव स्वात्मानम् ।
न तु कोऽपि मे भावनां शृणोति किन्तु तृणीकरोति च ॥ ५

राजवंशजाः सर्वे कामजीविकाः कुर्वन्ति कन्याः ।
प्रत्यहं धर्मान्तरं भजन्ते स्वीयकुटुम्बैः सह ॥ ६

तस्मादहं नेहेऽत्र वस्तुं बहुविषमयवातावरणे ।
राष्ट्रचिन्तनारहिते मदमत्सरग्रस्तसमाजे ॥ ७

नृपसौधेषु वर्तनं न हि योग्यं वनगमनमेव साध्यम् ।
वन्यजभिल्लैः सार्धं सैन्यसज्जीकरणं युक्तम् ॥ ८

भिल्लाः देशभक्ताश्च सुखजीवनलोलुपत्वरहितास्ते ।
योद्धुं शक्ता नित्यं तीव्रं गाढमैत्रीभरिताः ॥ ९

तदा निश्चित्यैव सः सहसा स्वीयमित्रवर्गालिभिश्च ।
दोलायमानमनसा चिन्ताग्रस्तोऽभवद्ध्रुवं नु ॥ १०

पत्न्या पाटेश्वर्या सहितः प्रतापः प्रभातसमये तु ।
मन्त्रिमण्डलसंयुतः कानने वस्तुं जगाम सः । ११

राजकुलं सर्वं सः गतं धर्मान्तरं च निस्सहायः ।
भिल्लवर्गेन सार्धं मत्वा सख्यमैच्छत् धीरः ॥ १२

वनवासं विधाय सः रहसि भिल्लवर्गैः सख्यं कृत्वा ।
सैन्यसम्पत्तिमधिकं कर्तुमैच्छत् प्रतापाधिपः ॥ १३

उदयपुरं संत्यज्य सभार्यः गृहात् निर्गतो यदा सः।
तदानुपदमेव जनाः ताभ्यां सार्धं बहिरागताः ॥ १४

सपत्नीकं प्रतापं विलोक्य सर्वाः प्रजाः दुःखमग्नाः।
साश्रुपूर्णविलोचनाः विलोकितुं तौ न शेकुः ताः ॥ १५

तौ दम्पती कानने निवासयोग्यपटचराणि धृत्वा।
चेतकसहितौ यातौ निश्चलनिरीहलोचनयुतौ ॥ १६

जनाः सर्वे प्रतापं पाटेश्वरीदेवीं विलोक्य मनसि।
अचिन्तयन् भवितव्यं चैताभ्यां राजविलासेषु ॥ १७

किन्तु दैवोपहतौ च काननवासं चिकीर्षन्तावुभौ।
गच्छतः सपरिवारं सानन्देन विना दुःखेन ॥ १८

ताभ्यां साकं योधाः शस्त्रपाणयो विनिर्गताः सहसा।
पादशिरस्त्राणानि च धृत्वा राज्ञः भावरूपाः ॥ १९

देशस्वातन्त्र्यार्थं सर्वं परित्यज्य वने योद्धुम्।
शत्रूणां सार्धं बत कष्टान्याश्लिष्य व्रजन्ति हि ॥ २०

इति जल्पन्तः सर्वे तैः साकं पुरसीमापर्यन्तम्।
जग्मुः सबाष्पनेत्राः सगद्गदं व्यग्रमानसाश्च ॥ २१

दृष्टिपथपर्यन्तं च विलोक्य पौराश्शनैश्शनैः सर्वान्।
निर्गतवन्तः शान्तं निन्दन्तौ दैवं स्वगृहाणि ॥ २२

शनैः शनैश्च दुःखेन राणापरिवारसुहृद्वराश्च ते।
तीर्त्वा नगरसीमां तु विविशुः घनभीकरकाननम् ॥ २३

घनतरुलतावेल्लितं हिंतालतालतमालतक्कोलम्।
हरिणलुलायपरीतं फलभरितं सिंहशार्दूललसितम् ॥ २४

व्यत्ययभूतललसितं कण्टकाकीर्णशष्पसमाकुलितम् ।
शिवारुतप्रध्वनितं गवयगजपरिप्लुतं गहनम् ॥ २५

व्यालाभीलं सान्द्रं वनमयूरचित्रितं सुरम्यान्तम् ।
पृथुलधराधरावृतं समशीतोष्णयुतं भयदम् ॥ २६

पश्य देवि नृत्यन्तः वनमयूराः विस्तृतपिच्छभारैः ।
व्याहरन्तः स्वागतमस्मभ्यं केकां कुर्वन्ति ॥ २७

एते वन्यलुलायाः पल्वलेषु मज्जनं विधास्यन्तः ।
स्वीयतापमपनुदन्ति विलंभेण च विचरन्त्यत्र ॥ २८

क्रमेलकयूथानां च भवति स्वैरविहारः कण्टकेषु ।
रोमन्थं कुर्वतीह ते निषण्णाः शान्तं क्षेत्रे ॥ २९

एतादृशः स्वदेशः धरण्यां कुत्रापि न दृश्यते खलु ।
तस्मात् सर्वे पराश्च देशमाक्रमितुं समागताः ॥ ३०

अरावलीयसमीराः वहन्ति सरसं शीतोष्णवाहकाः ।
अस्माकं स्वागतं नु दिदित्सवश्च मन्दं मन्दम् ॥ ३१

शनैः प्रयान्तं सैन्यं विलोक्य तरवः पल्लवव्यजनैश्च ।
प्रवीजयामासुः तान् व्यपगतश्रमान् च चक्रुः आशु ॥ ३२

पश्यात्रार्थे हरिणाः अस्मान् द्रष्टुं निर्भयमागताश्च ।
तवाक्षिसौन्दर्यं ते पश्यन्तः तिष्ठन्त्यत्रैव ॥ ३३

वनमागतं नरेन्द्रं विलोक्य भिल्लयोधमुख्यप्रवरास्तु ।
अरेर इति धावन्तः प्रतापं ववन्दुः भक्त्या च ॥ ३४

इति सानन्दं सर्वे सामूहिकधावनेन राजानम् ।
स्वागतं व्याहर्तुं च संप्राप्य तेऽहमहमिकयाशु ॥ ३५

तथाऽऽगताय राणाय तत्रस्थाः विपिनवासिनो भिल्लाः ।
व्याहृत्य स्वागतं तु हैयंगवीनकुम्भं ददुः ॥ ३६

केचन भिल्लाः नव्यं मधु संहृत्यायच्छन् प्रहर्षेण ।
अन्ये फलान्याहृत्य पादसन्निधिं निचिक्षिपुश्च ॥ ३७

गन्धिलमधुरसभरितान् खाद्यपदार्थान् बहुरुचिरपाचितान् ।
भिल्लाः समानीयाशु पर्णेषु परिवेषयामासुस्ते ॥ ३८

बहुविधचित्रितवर्णान् सुखमयशीतलमरुत्प्रदातॄन् ते ।
मयूरबर्हान् रम्यान् संहृत्य वीजयामासुश्च ॥ ३९

केचन धनुर्बाणैश्च समागत्य पादवन्दनं विधाय ।
वयमिह तावक-चाराः स्वराष्ट्ररक्षणे सहायकाः ॥ ४०

अस्मदीयप्रतापः शस्त्रास्त्रधनुर्विद्यापारगश्च ।
सपत्नीकः कानने वस्तुं ससैन्यमेति पश्य ॥ ४१

वयं सपरिवारं तानाह्वयेम गीतवाद्यैः नाट्यैश्च ।
सुफलप्रसूनभरिताः जलपूर्णकुम्भैः सानन्दम् ॥ ४२

एष एव प्रतापस्त्वस्मदीयसंरक्षकः तथैव च ।
सर्वभारतराष्ट्रस्य, संगच्छध्वं संवदध्वम् ॥ ४३

भो राजन् तव भक्ताः वयं वनवासिना रणाङ्गणचणाः ।
राष्ट्रस्त्वातन्त्र्ये तव पदपङ्कजयामिनो निरतम् ॥ ४४

अस्मदीयसौख्यं किं जनगणजीवितानीह कुर्मस्ते ।
पादतले दामानि च राष्ट्रहिताय केवलं भूप ॥ ४५

केचन भिल्लाः गीतैः तदीयकीर्तिं गाने संविधाय ।
ननटुः तोषैः रम्यं बहुविधतालवाद्यगतिभिश्च ॥ ४६

एते काननजीवाः परं विश्वासभरितान्तरङ्गाश्च ।
देशकृते कटिबद्धाः महादेशभक्तिसुपूरिताः ॥ ४७

प्रकृतिलालितास्त्वेते सहोदरा गिरिवासिनो मित्राणि ।
अस्मत्सहायभूताः पटुधनुर्विद्यानदीष्णाश्च ॥ ४८

इमे प्रबलयोद्धारः सर्वदा देशरक्षाहितैषिणः ।
शुभाकाङ्क्षिणो नित्यं कालायसकर्कशकायाश्च ॥ ४९

देवि वनेऽत्र बान्धवाः भिल्लराजाः सदाऽस्मदीयाः ।
एते सर्वे सैन्ये समवेताः भवन्ति सर्वदा ॥ ५०

प्रतापः सपत्नीकः तत्रैवोपविशत् सानन्दं सः
भिल्लाः हल्लीसकेन ननटुः सहेलं गानैः ते ॥ ५१

भोः त्वां वयमिह नित्यं भवत्कामनाप्रकारं सर्वाणि ।
विधास्यामो मास्तु ते चिन्ता शत्रुं हनिष्यामः ॥ ५२

वयं सर्वे मिलित्वा शत्रुं जेष्यामः समैक्यभावैः ।
भारतं निश्शात्रवं करिष्यामः संघशक्त्या ॥ ५३

इति सर्वानादिदेश सानन्दं राणा शान्तवचनैः सः ।
सर्वैः साकं तस्थौ तत्रैव राजा परिवारैः ॥ ५४

तेन वन्यजनमण्डलेन सः शान्तभावसहितः सकौतुकम् ।
मन्दवारगलितः श्रमः तदा शान्तसागर इवाबभौ नृपः ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे 'सपत्नीकस्य राणाप्रतापस्य वनगमनम्' नाम द्वादशः सर्गः समाप्तः ॥]

त्रयोदशः सर्गः ।

१३. राणासन्देशः

स भीमकान्तैः नृपसद्गुणैश्च सामन्तभूपैः परिवेष्टितः सन् ।
पद्मासने शान्तमनाः विरेजे प्रशान्तमुद्रालसितः समुद्रः ॥ १

पद्मासने निश्चलतत्त्वरूपः विलम्बरेखास्थितपूर्वकायः ।
घोणाग्रसंलग्नमनोज्ञदृष्टिः प्रशासयामास मनोविकारान् ॥ २

उन्मील्य नेत्रे परमानसज्ञः प्रियं शनैः शाब्दिकमाजहार ।
भोः कृष्णसिंह प्रियबन्धुवर्ग शृण्वन्तु मे हार्दिकसूक्तिजालम् ॥ ३

लोके जनाः स्वीयगृहं प्रजाश्च देशः प्रशान्त्या भुवि वर्तनीयाः ।
इति स्वमित्रैः सततं भणन्तः सदा स्वसौख्ये बहुधा लसन्ते ॥ ४

हे बान्धवाः देशममुं च वक्तुं न युज्यते साम्प्रतमत्र लोके ।
अभाग्यमेवात्र सदानुधावति पश्चात् प्रजानां खलु भारतेऽस्मिन् ॥ ५

अनन्तकालादयमेव देशः सहस्त्रधायात महावलैश्च ।
अनेकमार्गैः यवनस्य सैन्यैः बलादरौत्सिष्ट पदे पदे नु ॥ ६

सेना च तेषामिममेवदेशं बलादवस्कन्द मुषाण लक्ष्मीं ।
प्रतिक्षणं नाशितदैवमूर्तिं विनष्टसस्यं विचकार घोरम् ॥ ७

क्षमाप्रधाने निजदेशभूमौ स्थातुं च शक्तिः न हि भाति सत्यम् ।
अनेकवीरा रसमूर्तयश्च मृताः स्वयं शात्रवधाटिपातैः ॥ ८

सहस्रवर्षाधिकरक्तपातैः प्रसिक्तगात्री वसुधा विभाति ।
मासा व्यतीताः ऋतवो व्यतीताः समाः व्यतीताः न हि शान्तिमार्गः ॥९

अहो प्रियं भारतदेशमेनं यथावलं ते गजनी मदान्धः ।
संक्षोभमार्गे बहुधाप्यशासुः परं परेशोऽकूवरचक्रवर्ती ॥ १०

प्रियाः च मे सोदरतुल्यरूपाः नृपार्जुनो दुर्जयदुर्गरायाः ।
कृत्वा च युद्धं स्वविहारमार्गैः हताः परैः वञ्चनया रणे ते । ११

मातामही जह्नरु मामकीना रणाङ्गणे चण्डविहारदुर्गा ।
परं परानीकनुता प्रहर्षं प्रयुध्य पञ्चत्वमवाप शान्तम् ॥ १२

मेवाडमाता परवीरवर्गैः संछिन्नरूपा गतजीवनेत्रा ।
विभाति दुःखेषु विचेष्टमाना निरन्तरं मे नयनान्तिकं भोः ॥ १३

संरक्षणार्थं खलु मानलज्जे महारिवगात् प्रवलं सुदत्यः ।
प्रतिक्षणं त्रह्मिगताः च रामाः भवन्त्यहो हेमशलाकरूपाः ॥ १४

प्रतिक्षणं वीरवरेण्यवर्गः स्वर्गं प्रयात्येव वियुध्य तूर्णम् ।
इत्थं भवेत्तर्हि कथं स्वराष्ट्रं संरक्षितुं शक्तियुता भवेम ॥ १५

इयं यदा लोचनमार्गमेति मेवाडलक्ष्मीः मम नेत्रदीपा ।
तदा व्यथा भिन्नविभिन्नभावैः स्वान्तं भवत्येव विदीर्णरूपम् ॥ १६

तां रक्षितुं संततचिन्तनात्तः भवामि कार्यान्तरसक्तचित्तः ।
उपायहीनः क्षुभितान्तरात्मा नितान्तनैराश्यपरीतभावः ॥ १७

अस्मासु योद्धाः बहवो भवन्ति सर्वेऽपि देशाहितकाङ्क्षिणः च ।
न केवलं जातिकुलघ्नकाः च विनाशकाः भारतदेशकीर्त्याः ॥ १८

नृपेषु वीरो भगवान् स्वकन्यां प्रदाय तामकूवरभूवराय ।
विधाय पुत्रं खलु तस्य दासं विनर्तने दास्यविवर्तचित्तः ॥ १९

जगत्प्रसिद्धैकमहीपतिश्च ददौ स्वराज्यं खलु यावनाय ।
तदैव राजोदयनामधारी स्वसारमस्मै विचकार पत्नीम् ॥ २०

तदा स्वयं सो विकनीरूभूपः स्वपुत्रिकां यावनराजमूर्त्यै ।
दत्त्वा च सन्तोषपरीतचित्तः वभूव सामन्तधराधिपोऽयम् ॥ २१

एवं हि सर्वे महितान्यवीराः समाश्रिताः स्वार्थपराः स्वशत्रुम् ।
उच्छिष्टखाद्ये बहुलोलुपास्ते विस्मृत्य देशं परदास्यसक्ताः ॥ २२

मदीयनेत्राञ्चलवर्तमानाः शत्रुं समाश्रित्य लसन्ति सौख्ये ।
भाण्डारशून्याः वयमेव जाताः अरावलीपर्वतजीवनाश्च ॥ २३

मेवाडदेशीयविचारमूर्तिं दृष्ट्वा न कोऽप्यत्र विदीर्णचित्तः ।
विभासतेऽतिप्रबला च चिन्ता संजायते मे हृदि मित्रवर्याः ॥ २४

प्रवाहवेगाभिमुखं तरन्तं विलोक्य मां मूर्खजना हसन्तु ।
निन्दन्तु सर्वेऽप्यरिवीरवर्गाः भणामि हृत्पूर्वकभव्यवाक्यम् ॥ २५

सिसाधयिष्ये च मुदा प्रयुध्य स्वातन्त्र्यलक्ष्मीमुदयाख्यपुर्याः ।
नोचेत् प्रियं देहकवोष्णरक्तैः कुम्भाभिषेकं विदधेऽहमद्य ॥ २६

पश्यन्तु सर्वेऽत्र सदन्तरङ्गैः मदीयकृत्यं निशितं स्वबुध्या ।
सदाऽऽशिषः सर्वजनस्य नित्यं भवन्तु मे लोकहिताय पूर्णम् ॥ २७

उदीरितं यन्मधुरं निशम्य कर्तव्यबुद्धिं वितरन्तु मेऽद्य ।
इति प्रियं सान्द्रितदेशभक्त्या जगाद राणा स्वहितार्थिलोकम् ॥ २८

निशम्य वाक्यं नतमस्तकश्च जगाद शान्तं नृपकृष्णसिंहः ।
प्रभो मदीयं दृढदेशभक्तिं जानाति लोकः सकलो महात्मन् ॥ २९

संत्यक्ष्यसि त्वं यदि देशभक्तिं धरातलं यत् तव पाददेशे ।
भविष्यतीति प्रियमेव कश्चित् वदेत् ध्रुवं नैव धरां स्पृशामि ॥ ३०

राज्यं मदीयं मम सर्वशक्तिं तुभ्यं ददामीह समस्तसौख्यम् ।
अहं त्वया साकममित्रवर्गं प्राणान् त्यजेयं सहजं निहत्य ॥ ३१

तदा तदीयं भणितं निशम्य श्यामश्च भानुश्च तथा मनश्च ।
प्रोचुः सहर्षं सपदं स्वभक्त्या सर्वे वयं वीर समर्पयेम ॥ ३२

गाम्भीर्यमूर्त्या कृतवीरमूर्तिः चाश्रूणि राणाऽपि विसर्जयन् किम् ।
अनेकवीराः प्रियदेशकार्ये सहायभूता विलसन्ति कामम् ॥ ३३

न मेऽत्र किञ्चित् भयमस्ति लोके सत्यं भवत्येव जयः प्रियो नः ।
आकाशपातेन वयं न भीताः निष्कारणं नैव रणे रताश्च ॥ ३४

पिपीलिकाहानिरपीह मा भूत् लताः प्रियं भूरुहसंततिश्च ।
प्राणाधिकं तीक्ष्णसहस्रनेत्रैः संरक्षयिष्याम वयं सुवीराः ॥ ३५

हृद्बान्धवान्मे रणरूपमार्गे नाहं हनिष्यामि कदापि वीराः ।
अद्यैव तुर्कोत्कूबरचक्रवर्ती चारावलीप्रान्तमपीच्छतीह ॥ ३६

धूर्तः स्वयं दानगुणेन सर्वान् वीरान् प्रियं स्वीयबले नियुङ्क्ते ।
तस्माद् वयं निग्रहचित्तगेहाः भवेम सौख्यं च विहाय लोके ॥ ३७

विसृज्य सौख्यं ऋषितुल्यरूपाः वीरत्वमालम्बितशान्तभावैः ।
अर्धाशनैश्चार्धविलुप्तनिद्राः समर्चयिष्याम सदैकलिङ्गम् ॥ ३८

विजित्य वीरानरिषड्प्रवर्गान् वृणीय सत्यं श्रुतशौचवर्गम् ।
स्वातन्त्र्यमार्गे विचरिष्यमाणाः न्यायं वयं नैव हि विस्मरामः ॥ ३९

स्वातन्त्र्यसेवावृतसज्जनानां मार्गाः सदा कण्टकिता भवन्ति ।
कदापि ते भान्ति विलासरूपाः पुष्पैः परीता न हि देशवीराः ॥ ४०

कदापि सीतां पृथिवीं न कुर्यात् वापीजलं नैव पिवेत् कदापि ।
मृगाश्च रम्यं नितरां चरन्तु वयं भ्रमेमात्र दरीगुहासु ॥ ४१

सर्वः स्वदेशः खलु सस्यहीनः भवेच्च हल्यं सततं श्मशानम् ।
यद्यक्बरस्यात्र चमूः प्रविष्टा रजः परं तस्य लभेन्न चान्यत् ॥ ४२

तिष्ठेद्धि सर्वं खलु शान्तरूपं यद्यक्बरूः शान्तमनाः प्रकामम् ।
नोचेत् स योद्धुं प्रयतेत् प्रमत्तः वयं न तिष्ठेम भवेच्च युद्धम् ॥ ४३

अहो हरिश्चन्द्रकुले प्रसूतः राणा कदाप्यत्र परं विचार्य ।
क्षुद्रात्मनां नैव पुरः शिरस्तु निक्षिप्तवान् देशहिताभिलाषी ॥ ४४

मद्भारतुल्यं धनराशिदाने नाहं भवेयं यवनानुकूलः ।
व्यतीत्य वर्षाणि चिराय तृप्त्यै कथं भवेयं परभोजनेऽत्र ॥ ४५

प्रदर्शयित्वा बलवीर्यशौर्यं शत्रून् विजेष्याम परं महिम्ना ।
नोचेत् रणे सर्वबलं प्रपात्य विकर्तयिष्याम शिरांसि काल्यै ॥ ४६

क्षेत्रं विचक्रे सुतरामहल्यं कृष्णेन सार्धं वसति स्म राणा ।
अनाहतं जन्तुततिं विधाय चाच्छेद्यरूपं तरवो लताश्च ॥ ४७

सर्वोन्नतस्थानमहं भजिष्ये नोचेत् गलिष्ये भुवि शौर्यमूर्तिः ।
नैवाहमेष्यामि पदारविन्दं शत्रोः स्वयं जीवनतृष्णयाऽपि ॥ ४८

देशस्त्वयं पूर्वपितामहानां तत्पूर्वमास्ते प्रपितामहीनाम् ।
अनन्तकालाद् बहुरक्षिता च ततः परं हैन्दवभूमिपालैः ॥ ४९

परम्परायातमदीयभूमेः राजाऽस्म्यहं किन्तु परास्त्विदानीम् ।
मृद्वार्द्रवस्त्रेण लुनन्ति कण्ठान् समस्तभूपालवरेण्यकानाम् ॥ ५०

एवं वने सर्वजनाभियुक्तः राणाऽनुभूते बहुकष्टकालम् ।
तत्रास्ति राजाक्बरुचक्रवर्ती व्यग्रः परं शात्रवकण्ठलुण्ठने ॥ ५१

द्वन्द्वभावेन सर्वत्र कालो गच्छति भूतले।
सुखदुःखसमाकीर्णं कृत्याकृत्यैः निरन्तरम्॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे ' राणासन्देशः ' नाम त्रयोदशः सर्गः समाप्तः॥]

चतुर्दशः सर्गः।

१४. राणाप्रतापदेशभक्तिः।

हिमालयाभूषितशस्तमस्तकां पयोनिधिक्षालितपादपीठिकाम्।
नदीमतल्लीनुतदिव्यवैभवां नमामि तां भारतमातरं सदा॥ १

प्रशस्तविन्ध्याचलबद्धमध्यमां स्रवत्स्रवन्तीचयहारशोभिताम्।
निसर्गरम्यां ऋतुचीरमण्डितां फलैर्युतां सस्यचयाभिराजिताम्॥ २

कविप्रकाण्डैः बहुधा प्रकीर्तितां समस्तसंपद्व्ययचारुशोभिताम्।
प्रसन्नताश्राजितयामिनीयुतां लतान्तकिञ्जल्करजोविभूषिताम्॥ ३

निरन्तरं मञ्जुलपुष्पहासिनीम् अजस्रगीर्वाणपदालिवर्षिणीम्।
मनोज्ञमाधुर्यकवित्वभूषिताम् अनन्तकल्याणगुणैः विलासिनीम्॥ ४

अनर्घरत्नावलिनित्यभासिनीम् अनारतं धर्मपथे प्रचालिनीम्।
अमोघधैर्यायुतसूनुभिर्युतां नमामि भक्त्या सकलार्थदायिनीम्॥ ५

समस्तविज्ञानभरेण नामिताम् अनन्तविश्वे विषयैः विकासिनीम्।
अजस्रभासा रमणीयदर्शनां समस्तलोकैराभिनन्दितां प्रियाम्॥ ६

अनादिसंक्रामितवेदजीवनां षडङ्गषड्दर्शनतीक्ष्णबौद्धिकाम् ।
समस्तलोके नुतकाव्यसुन्दरीं नमामि तां विश्वनुतां मतल्लिकाम् ॥ ७

प्रपञ्चसद्धर्मकृते विराजिनीं मुदा रमन्तीं निजवैभवश्रिया ।
समस्तलोकाश्रयदायिनीं प्रियां नमामि तां मञ्जुलविश्वतल्लजाम् ॥ ८

महाकवीनां रसनाग्रनर्तनैः अभ्यर्च्यमानां मधुशब्दपुञ्जकैः ।
दशावतारैः बहुपूतमानसां पवित्रगीताऽमृतपानकाशिनीम् ॥ ९

निरन्तरं रामकथां सुगायिनीं उपेन्द्रगीताऽभिमतानुयायिनीम् ।
विकासिनीं वैदिकभाववर्तनैः श्रुतिप्रमाणं सततं विहारिणीम् ॥ १०

सुशब्दनिर्माणमनोज्ञशिल्पिनीं प्रशस्तनाट्यादिवरिष्ठभासिनीम् ।
पवित्रहोमाग्निपुनीतरूपिणीम् अमर्त्यलोके नुतरम्यजीविताम् ॥ ११

समस्तधर्मेषु समानदर्शिनीं चराचरे पर्वतमृत्तिकास्वपि ।
प्रहर्षचित्तोत्कटभावदर्शिनीं सदा दयां प्राणिचयेषु कारिणीम् ॥ १२

विलोकयन्ती श्रुतिसाररूपितं पिपीलिकाब्रह्मपरीतभूतले ।
अधर्महिंसां बहुधा विगर्हिणीम् अनन्यभक्त्या निजधर्मवर्तिनीम् ॥ १३

समस्तलोकाः सुखमज्जने भृशं लसन्विति प्रोक्तवतीं पदे पदे ।
चतुष्पदे शं द्विपदेषु शंसिनीं नमामि नित्यं मम जन्मदायिनीम् ॥ १४

अनेकराजावलिनीतिपालने प्रशस्तशास्त्रीयकथाप्रभाविनीम् ।
पवित्रमन्त्राक्षतलब्धजीवितां नमामि तां भारतमातरं सदा ॥ १५

अपौरुषेयाध्ययनेन पावितां महर्षिगीर्वाणपदाभिशोभिताम् ।
सदाश्रितानां बहुरक्षणे रतां नमामि मे भारतमातरं हृदा ॥ १६

नमो नमस्ते मधुभाषिणि प्रिये समस्तलोकस्य सुखाभिलाषिणि ।
अनन्तवेदान्तविभासिते मुदा तवार्चनं मेऽस्तु मतल्लिके भुवि ॥ १७

त्वमेव मे पूज्यतमाऽसि देवते न मेऽस्ति किञ्चित् भवतीं विना भुवि।
त्वदर्थमेवास्मि वने ममात्मजैः विमोचयेयं परदास्यबन्धनात्॥ १८

स्मरामि मे भारतमातरं मुदा विराजिनीं पूरुषसूक्तवत् प्रियाम्।
समस्तभाषावलिकेन्द्ररूपिणीं निरन्तरं स्तौमि मनोज्ञसुस्वरैः॥ १९

पवित्रलिङ्गायितभूधरान्वितां प्रशस्तविल्वायितकाननश्रियाम्।
पवित्रगङ्गायितवाहिनीयुतां नगावृतां शाश्वतलिङ्गरूपिणीम्॥ २०

इयं धरा गोसदृशी प्रियं पयः प्रसारयामास पवित्रभारते।
नितान्तसस्यावलिरम्यशोभिता चकार लोकाय समस्तमङ्गलम्॥ २१

अजस्रघाटीचयनष्टवैभवा विलुप्तनिद्रा सततं रणाङ्गणे।
व्यतीतजीवा सुखहीनजीवना विचेष्टते निर्दयतुर्कशासने॥ २२

अनन्तमाहात्म्यपवित्रजीवनाः समस्तभूपाः सकलं स्वजीवितम्।
समर्प्य भक्त्या सुपवित्रसंस्कृतिं स्वदेशकीर्तिं बहुधा ह्यरक्षयन्॥ २३

अनेकराजन्यपवित्रवर्तनैः समुद्धृता शात्रवपङ्कसंकटात्।
तथापि देशे बहुराजपुत्रकाः चरित्रहीनाश्च भवन्ति नूनम्॥ २४

पुरा च वैदेशिकमित्रवान्धवाः समेत्य देशं पटुशिक्षणे रताः।
अकीर्तयन् भारतमेव भारतीं समस्तविद्यासु धरातले ध्रुवम्॥ २५

अनारतं शात्रवतीव्रवाहिनीं मुषाण मूर्तीकृतरत्नसंचयम्।
धरामवस्कन्द च रामकृष्णयोः निरस्तलज्जाः विचरन्ति हैन्दवाः॥ २६

किमर्थमेवं परदेशिकानिशं समस्तविज्ञाननिधिं महीतले।
समागताः केवलमेव भारतं समस्तसंपच्चयभासुरं प्रियम्॥ २७

चरित्रहीनाश्च भवन्ति भारते प्रजाः परं पाशवजीवने रताः।
कदापि ते नैव विचारयन्ति प्रियस्तु देशो न हि तुच्छजीवितम्॥ २८

न कोऽपि जानाति जनेषु भारते सुशिक्षितेषु प्रखरेषु साम्प्रतम् ।
शिविः दधीचिः खलु कौ बभूवतुः कथं परं तौ प्रथितौ महीतले ॥ २९

यदीदृशी भारतवासिनां स्थितिः स्वदेशभक्तिः न कदापि जायते ।
तथा यदि स्यात् परदेशपालने ध्रुवं नु देशः प्रसभं पतिष्यति ॥ ३०

उदात्तभावावृतदेशकल्पनां परम्पराप्राप्तममोघसंस्कृतिम् ।
विना च देशीयचरित्रजीवनं सुशिक्षणा नैव भवत्यहो दृढा ॥ ३१

समुद्धृतं शात्रवरक्तपङ्किलात् स्वतन्त्रभावावृतभूपमण्डलैः ।
अमेयदेशीयबलाढ्ययोधकैः सुरक्षितं भारतदेशभूतलम् ॥ ३२

सुशिक्षिताः सन्ति परं न ते दृढं स्वदेशभावावलिचित्तराजिताः ।
भवन्ति ते भारतदेशवैभवं न चापठन् जीवनलोलुपाऽभवन् ॥ ३३

गताः क्व ते भारतरक्षणे रताः निसर्गवातावरणे क्षताश्चिरम् ।
अनन्तकष्टाकुलजीवनेन ते स्थिरीकृताः नैव गता महीतलात् ॥ ३४

बिभाति सा स्वार्थपरीतपुत्रकैः व्यपास्त लोकोन्नतगौरवैः खलैः ।
प्रतिक्षणं भाति विकम्पिता सती विचारयन्ती गतवैभवं परम् ॥ ३५

अनारतं कृत्रिमभावभूषितैः पशुत्वमापादितमानसैः परम् ।
अचिन्त्यमानैः गतवैभवोन्नतिं प्रतिक्षणं वर्धितदास्यभावुकैः ॥ ३६

निरन्तरं शाश्वततत्त्वचिन्तनां विधाय गौणं भुवि भौतिकं प्रियम् ।
प्रबोधयन्ती निजदिव्यचिन्तनां विराजते भारतमातृदेवता ॥ ३७

कथं नु दिव्यं निजमातृदेशं विसृज्य कामं मनुजाधमास्तु ।
विचिन्तयन्तो निजभावसद्मनि क्षिपन्ति देशं बहुसङ्कटे चिरम् ॥ ३८

कलामयं भारतदेशमेनं प्रगाढदेशीयकलाभिमानिनः ।
विलोक्य मूढाः निभृतं हसन्ति यथा स्वयं नागरिकाः पृथिव्याम् ॥ ३९

निसर्गरूपेण विसर्पिता पुरा महीतले द्वन्द्वपरीतभावना ।
विचारधारैकरता हि दैविका द्वितीयधारा खलु भौतिकाख्यका ॥ ४०

अजस्रयुद्धं भयदं पुराऽजनि निरंतरं मध्यमकालजीविते ।
प्रवर्धमाने सति संकटे भुवि सदा भवत्येव जयस्तु दैविके ॥ ४१

अजस्रपक्षद्वयभूतसंगरो विजायते भीकररूपमाश्रितः ।
अनारतं चास्तिकनास्तिकाख्यकं प्रवर्तते युद्धममुत्र लौकिके ॥ ४२

यतश्च धर्मे निरतं प्रवर्तते मनुष्यबुद्धिः सहजा पृथिव्याम् ।
ततः समस्तं च तदीयजीवितं विराजते शाश्वतशान्तिभद्रकैः ॥ ४३

यदैव देशे बहुनायकाः परं समुद्भवेयुः तदतीवभीषणम् ।
भविष्यतीतीह मदीयभावना तदेव संभूतमहो महीतले ॥ ४४

धरा मदीया पररक्तसिञ्चिता दशावतारैश्च परं पवित्रिता ।
नवीकृता चार्षगुणैः पदे पदे चकास्ति देशीयजनाभिपूजिता ॥ ४५

पुराणवेदोपनिषत्प्रभावितां तपःप्रभाभासितमौनिमण्डिताम् ।
पतिव्रतापादरजोविभूषितां नमामि तां विश्वनुतां प्रियाम् इलाम् ॥ ४६

प्रतिक्षणं पाशमधाटिमण्डलैः विनाशिता भारतसंस्कृतिः परम् ।
विनष्टरूपं प्रबलं विलोक्यते शरीरमाहार्यविलुप्तसुन्दरम् ॥ ४७

अनेकसंस्कारवतां सुजीवनैः परां गतिं सैव गताऽस्ति सर्वथा ।
अनन्यसंपूर्णसुखाश्रिता श्रिया नितान्तदानेन समस्तवैभवैः ॥ ४८

अपि स्वयं त्यागमयं सुजीवितं निशम्य यः कोऽपि समस्तविप्लवम् ।
सदाऽत्र संसार्य विचेतनो भवेत् स एव सार्थक्यपवित्रजीवनः ॥ ४९

अमूल्यसिद्धान्तमयेन भाषया विना च देशीयमहत्त्वविद्यया ।
अमोघभाषायुततत्त्वविद्यया स्वदेशभक्ता न भवन्ति मानवाः ॥ ५०

महौजसां तात्त्विकचित्रसञ्चनां सतां मुनीनां खलु भावसंचयम् ।
विना च संपूर्णपदावगाहनं न जायते भारतदेशचिन्तना ॥ ५१

अहो वयं राष्ट्रहिताय जीवितं समर्पितान् पुण्यमयांश्च बान्धवान् ।
वसेम विस्मृत्य तदीयवर्तनं कृतघ्नजीवाः सुतरां भवेम हि ॥ ५२

परम्पराप्राप्तपवित्रसंस्कृतिं विहाय भूमौ सुखलोलुपा वयम् ।
अपास्तसंस्कारवशेन शाश्वतं भवेम राष्ट्राहितकारकाः भृशम् ॥ ५३

स्वदेशविद्यां ऋजुवेषभूषणं स्वदेशखाद्यं शतधा च खण्डनम् ।
करोति यः कश्चन शिक्षितः परं स एव नेता स च पण्डितो भुवि ॥ ५४

नमोऽस्तु ते भारतदेशदेवते भवामि संकीर्तयितुं गुणान्विताम् ।
सदा भवन्तीं सुतवत्सलां भुवि प्रसीद मां त्वं तव चिन्तने रतम् ॥ ५५

सदा त्वदीयां मधुचित्रणां हृदि विधाय संस्मार्य पवित्रसंस्कृतिम् ।
प्रदर्शयेयं भवदीयवैभवं निरन्तरं कीर्तितविश्वमण्डले ॥ ५६

विना त्वदीयं मधुरं सुजीवितं न मेऽस्ति चान्यत् बहुरोचकं भुवि ।
सदा भवत्यै कविताक्षमालया जपन् मदीयं वितरामि जीवितम् ॥५७

सदाऽत्र लोकस्य विधेयमुत्तमं प्रियं भवत्याः स्मरणं मुदाऽर्चनम् ।
अवन्ध्यवाक्कायमनोविधेयकैः नितान्तदेशीयकथाप्रचारणम् ॥ ५८

अनेकराजावलिशस्तपालितां प्रशस्तदैवीयकथाप्रभाविनीम् ।
अनन्यदेवायतनैः विभूषितां नमामि मे दैशिकभाग्यदायिनीम् ॥ ५९

अनन्यसामान्यचरित्रमुत्तमं विनाऽवरोधं बहुलभ्रमानसैः ।
प्रपाठयामोऽत्र सभक्तिकं प्रिये वसेम सौख्येन मतल्लिके ध्रुवम् ॥ ६०

दिवाकरं विलोक्यैव मज्जन्तं पश्चिमार्णवे ।
संध्यावन्दनकार्याणि चिकीर्षुः निर्गतो नृपः ॥ ६१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये उदयकाण्डे 'राणाप्रतापदेशभक्तिः' नाम चतुर्दशः सर्गः समाप्तः ॥]

इति श्रीसकलभुवनतलबुधजनविनुतकविकुलपादारविन्दमकरन्दपानमत्तभ्रमरायमानमानसेन श्री ओगेटि कौसल्यासाम्बमूर्तिदम्पत्योः गर्भशुक्तिमुक्ताफलायमानसूनुना गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना ललितगीतालहरी-अक्षयगीतरामायणम्-यशोधरा-महाकाव्यम्-परीक्षिन्नाटकचक्रम्-जानपदनृत्यगीतमञ्जरीकाव्यम्-सौन्दर्यमीमांसादि-काव्यसंचयरचयित्रा पण्डित ओगेटि परीक्षित् शर्मणा विरचितश्रीमत्प्रतापराणायनमहाकाव्ये उदयकाण्डं समाप्तम् ।

अरण्य-काण्डम् ।

प्रथमः सर्गः ।

१. अरण्यवर्णनम् ।

विभाति घोरं बहुदुःखदं वनं चारावलीपर्वतरम्यसानुषु ।
अनेकहिंस्रैः विविधैश्च वन्यजैः नानाविधैः चारुमनोज्ञभूरुहैः ॥ १

न कोऽपि संयाति च वीरपूरुषः स्वप्नेऽपि तत्काननमाशुवीक्षितुम् ।
असंख्यवन्यैः बहुहिंस्रभीकरं यस्मात् नितान्तं जनभीतिदायकम् ॥ २

जगाम तत् भीकरकाननं मुदा राणाप्रतापः सहमित्रबान्धवैः ।
प्रपूजयन् तां प्रकृतिं महामनाः नैसर्गिकं दिव्यसमस्तसम्पदम् ॥ ४

लुलायखड्गैः गवयैश्च भीकरा नानाविधैः भूरुहजालछत्रिता ।
अरण्यभूमिः बहुवृक्षसान्द्रिता व्याघ्रालिपश्चास्यगजालिबृंहिता ॥ ४

परस्पराघट्टनजन्यनिस्वनैः रागान् क्वणन्त्यत्र वनेषु कीचकाः ।
मरुत्प्रवाहैः निर्भृतं विताडिताः भूपालतोडीसमसुस्वरायुतान् ॥ ५

इतस्ततः चालनदीर्घकन्धराः वाताहताः ते वरकीचकद्रुमाः ।
अनेकरागान् मधुरस्वरान्वितान् गायन्ति तारस्वरमूर्च्छनादिषु ॥ ६

जगुः प्रियं वम्भरमञ्जुगुञ्जनैः प्राभातवाताहतवंशभूरुहाः ।
पतत्रिणां कूजनमिश्रितस्वरैः रागं च तानं वरपल्लवीं भृशं ॥ ७

लतान्तवीरुन्निभृतं परीवृताः पुंनागहिंतालतमालभूरुहाः ।
निकुञ्जवल्मीकशिलातलान्विताः तक्कोलचम्पावकुलाः कदम्बकाः ॥ ८

द्विरेफमालाकलितं च पङ्कजं कल्हारमालालसितं सरोवरम् ।
विचित्ररङ्गाञ्चितपक्षिसंकुलं वीरुल्लातान्तैः हसितं च काननम् ॥ ९

सरस्सु कारण्डवहंसपोतकाः नैकैः विरावैः बहुधा च खेलनैः ।
विमज्जनैः निस्वनरम्यकूजनैः कुर्वन्ति नित्यं बहुशब्दितं वनम् ॥ १०

करोति कान्तं वनराजिसम्पदं केकीकुलं चित्रितपिच्छमण्डलम् ।
प्रभापरीतं स्वकुलावतंसकैः विस्तृत्य रम्यं मधुवर्तनैश्च ॥ ११

परं द्विजिह्वाभ्यवहारकर्मभिः नागाश्च वल्मीकशिखाग्रवर्तिनः ।
विभुञ्जते स्वीयविहारवर्तनैः कृत्वा फणाः शीतलवायुपुञ्जकान् ॥ १२

समेत्य पानीयह्रदानि सत्वरं पातुं जलान्यत्र पिपासितानि ।
वनेषु शार्दूलकुलानि निश्चलं वीरुत्सु गुप्तानि भवन्ति नित्यशः ॥ १३

सदा प्रयच्छन्ति च शावकेभ्यः निर्माय नीडानि कलासु कौशलाः ।
मुदा समानीय सुखाद्यसञ्चयं वृक्षाग्रशाखासु विचित्रपक्षिणः ॥ १४

विभान्ति रम्याणि कृतानि मक्षिकैः माध्वीकपूर्णानि गृहाणि सुन्दरम् ।
विलंबमानानि वने निरन्तरं पत्रालिसंछन्नमुखानि शाखिनाम् ॥ १५

रुषा स्वपुच्छोऽपरि मानदण्डवत् स्थित्वा परं काननागवंशजाः ।
दशन्ति क्रुद्धा इव नागबन्धनैः फूत्काररावैः विवृतास्यनिर्गतैः ॥ १६

लुलाययूथाः प्रविशन्ति पल्वलं दुर्गन्धिलं स्वल्पजलैः विभासुरम् ।
विगाहमाना निभृतं जलेषु ते तत्रैव शृङ्गैः प्रखनन्ति मृत्तिकाम् ॥ १७

खनन्ति मुस्तानि वराहयूथपाः तुण्डाग्रभागैः कमलस्थितानि च ।
विलम्बमानैः लघुपुच्छचालनैः एकाग्रदृष्ट्या बहुलग्नमानसाः ॥ १८

उलूकयूथालिनितान्तभीकराः सान्तत्यनादस्वरझिल्लिकास्वनाः ।
निरन्तरं फेरवरावरावितः घोरं वनान्ताश्च तमिस्रलिम्पिताः ॥ १९

विलोक्यते तत्र वने क्वचित् क्वचित् दावाग्निसंज्वालितवृक्षसञ्चयम् ।
विभान्ति शोभारहिताः तदा तदा वर्हार्धसंदग्धमयूरयूथपाः ॥ २०

लतालिसंवेल्लितवृक्षसञ्चये श्रेणित्वमापाद्य पतत्रिमण्डलम् ।
प्रवातसंचालितकुञ्जमण्डलैः दोलायमानाः विलसन्ति कूजनैः ॥ २१

निरंतरं रम्यविहायसि प्रियाः चास्तम्भमालागुणबद्धदेहिनः ।
अपत्यवर्गाय सुखाद्यसञ्चयं संयान्ति चाहर्तुमहो पतत्रिणः ॥ २२

विशालपर्णैः तरवो महोन्नताः शाखासमावद्धपरस्पराङ्गिनः ।
विभान्ति पैशाच्यशरीररूपिणः झंझानिलाघातविकम्पिताङ्कुकाः ॥ २३

वटस्य तोका इव सन्ति मौनिनः शाखोपशाखैः बहुधोपबृंहिताः ।
विभासमानाः तपसि प्रवर्तिताः प्रारूढ विक्षिप्तशिरोजमण्डलैः ॥ २४

सुगन्धिलैः वर्णविवर्णभूषितैः वैविध्यपूर्णैः फलवृक्षमण्डलैः ।
विलोकिनां चित्रमिवावभासते पुष्पालिभान्तं विपिनं विचित्रितम् ॥२५

मनोज्ञरागाञ्चितपत्रिकूजनैः शब्दायितं भाति निरन्तरं वनम् ।
विरावितं भीतिमहो प्रकुर्वते पञ्चास्यनादैः गजबृंहितैः भृशम् ॥ २६

प्रविश्य तुण्डोद्धृततोयजालैः वेदण्डयूथाः चटुलं च पल्वलम् ।
तदा तदा सर्वगजालिभिस्तिषु क्रीडन्ति चास्यन्ति परस्परं जलम् ॥२७

मदेन संभासितवन्यदन्तिनः कण्डूतिसंजातकटेषु पीडनम् ।
समापनेतुं घनसर्वभूरुहान् आघट्टयन्त्यत्र बलेन सर्वदा ॥ २८

लुलायशार्दूलमृगांश्च मर्कटान् संभर्त्सयन्तोऽत्र सदा गजा मदैः ।
वनं प्रयान्त्वन्यतले प्रवर्धितं युष्मादृशानां नहि विद्यते स्थलम् ॥ २९

समासमध्यासहरीतशाद्वलाः निम्नोन्नतान्यत्र वनस्थलानि च ।
नभस्वदाकम्पितशीर्षकाः परं काशाः सुहासैः विलसन्ति मञ्जुलम् ॥३०

मृगैर्मिलित्वा भयभीतचेतसः तस्मिन् प्रधावन्ति मृगाङ्गनाः प्रियैः ।
अपत्यजालैः सहिता च सत्वरं स्थानान्तरं हिंस्रभयाच्च तत्क्षणम् ॥३१

गिलन्ति सान्तं गतभीतचेतसः सर्पास्तु वृक्षाग्रकुलायसञ्चये ।
शनैः शनैः स्वादुरसाधिनिष्ठिताः निक्षिप्तपक्ष्यण्डततिं विना दयाम् ॥३२

मुदा विहारं प्रविधाय कानने
सर्पैः नितान्तं नकुलास्तु भीकरम् ।
प्रयुध्य चान्ते बहुरक्तसिञ्चिताः
कुर्वन्ति तान् खण्डविखण्डितान् भृशम् ॥ ३३

विचित्रवर्णाः सरटाश्च कीटकान् चिक्रोडवर्गाः फलपुष्पखादने ।
दिवानिशं व्यापृतमानसाः प्रियं वृक्षाच्च वृक्षं चपलं प्रयान्ति ते ॥३४

फलानि जग्ध्वा वरबीजसंयुतान् पद्भ्यां कराभ्यां चपलाश्च वर्तनैः ।
मुदा प्लवन्ते निजवर्तनैः भृशं द्राघिष्ठलाङ्गूलविचित्रवानराः ॥ ३५

निकुञ्जगुप्ताः बहुधा बुभुक्षिताः शार्दूलयूथाः जलपानलोलुपान् ।
मृगान् क्षणेनैव निहत्य निर्दयं खादन्ति रक्तेन कदुष्णमामिषम् ॥३६

सदा मृगेन्द्राः प्रविधाय गर्जनां भीत्या समन्ताद् बहुधा वने रतान् ।
कवोष्णरक्तं मधुरं पिबन्ति ते मत्तेभयूथान् च निहत्य सत्वरम् ॥३७

लतान्तपत्रालिमनोज्ञवीजनैः आयान्तमेनं सह भार्यया वनम् ।
विलोक्य सुस्वागतमाददुः प्रियाः वृक्षाः समस्ताः सहकारमण्डलैः ॥३८

सुमेषु किञ्जल्कपरागनिर्गताः राणाप्रतापं परिवारवेष्टितम् ।
रजःकणाः वायुभृताः सुशीतलाः संचर्चयामासुरमन्दगन्धिलाः ॥ ३९

पिकाः प्रियं मञ्जुलपञ्चमान्वितं चक्रुः सहर्षं मधुरं स्वकूजनम् ।
मिलिन्दनादैः सममेव मञ्जुलं ताम्पूरतन्त्री निभनिस्वनस्वनैः ॥ ४०

राणाप्रतापः स्ववलेन संयुतः विलोक्य शान्तः प्रकृतिं वभाण सः ।
ध्रुवं प्रपञ्चे मधुरं च सुन्दरम् आहो मदीयं भुवि भारतं प्रियम् ॥४१

प्रतापराणा विपिनेऽतिसुन्दरे वस्तुं प्रदेशे बहुमुग्धचेतनः ।
दिदेश सर्वं परिवारमण्डलं पर्णैः कुटीराणि विधातुमीहया ॥ ४२

श्रुत्वा राणावाक्यं तस्य परिवारमविलम्बितम् ।
निर्मातुं कुटीराणि समुद्यताः परिकरैः सर्वैः ॥ ४३

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे ' अरण्यवर्णनम् ' नाम प्रथमः सर्गः समाप्तः ॥]

द्वितीयः सर्गः ।

२. प्रतापस्य सन्देशमाकर्ण्य कुटीरनिर्माणम् ।

विलोक्य परिसरदेशं बन्धुमित्र सपरिवारं सानन्दं च ।
राणा स्थातुं तस्मिन् चकमे सर्वविषयानुकूलं विपिने ॥ १

राणा प्रतापसिंहः स्वीयानुच्चरान् जगाद सोत्साहं सः ।
वयमत्रैवोषित्वा प्रकुर्याम सर्वसैन्यशिक्षणादिकम् ॥ २

ततः वस्तुमस्माकं वसतिगृहाण्यावश्यकानि भवन्त्यत्र ।
कुर्वन्तु कुटीराणि सर्वसामान्यात्यन्तसुभगानि ॥ ३

वृक्षाः तु सहवासिनः तान् मा छेदयन्तु शक्यतो भवन्तः ।
यदि स्यादावश्यकं शुष्कान्येव चाहरन्तु स्वार्थाय ॥ ४

पर्णानि संगृह्णन्तु भोजनार्थं कुटीरसंछादनार्थम् ।
पुष्पाणि संचिन्वन्तु देवतार्चनायोभयसन्ध्ययोः सदाः ॥ ५

सरोवरेषु सलिलानि पानीयानि कालुष्याणि मा भवन्तु ।
तेषु क्षाळनादिकं मा कुर्वन्तु स्नानादिकानि कदापि ॥ ६

पानीयं समानीय घटेभ्यः सरोवराद् बहिःप्रदेशेषु ।
वस्त्राणि स्वपात्राणि भवन्तु प्रक्षाळनीयानि सर्वदा ॥ ७

घोटकेभ्यः कवलानि समानयन्तु प्रत्यहमुभयसन्ध्ययोः ।
यथायोग्यं कुर्वन्तु यतो हिंस्राः स्वेच्छया विहरन्त्यनिशम् ॥ ८

अपेक्षितफलादधिकं न चाहर्तव्यमधिकफलं केनापि च ।
सुफलानि सहचरेभ्यः भवन्तु वन्येभ्यश्चात्मसदृशाः ते तु ॥ ९

कृष्णपक्षिणः द्विजाश्च तैत्तिरीयकाश्चारण्ये प्रगायन्ति ।
सर्वदोभयसन्ध्ययोः आनन्दवल्लीभिः शिक्षिता इवात्र ॥ १०

आरण्यकान् पक्षिणः मा घ्नन्तु सर्वे वयं व्रतधारिणश्च ।
प्रमादेनापि वन्यान् कदापीति सस्नेहं कथयामि पुनः ॥ ११

गूढचारिणो भूत्वा वयं शत्रुसैन्यसमागमनं विदित्वा ।
अरण्याद् बहिरेव तान् पलायनतत्परान् कुर्याम सहेलम् ॥ १२

आरण्यकांश्च निर्जेतुमसंख्यानीकैः यवनास्तु ।
प्रयतन्ते पटुछलनैः न विस्मर्तव्यमस्माभिः कदाप्येतत् ॥ १३

अर्धनिद्रयाऽस्माभिः निशाः यापनीयाः जाग्रदवस्थाभिः ।
कुक्ष्यर्धपूर्णान्नेन दिवसाश्च यापनीयाः भवन्ति सततम् ॥ १४

अवश्यमेव हि जन्तोः मरणं राष्ट्रकृते पञ्चत्वं स्वर्ग्यम् ।
न वयमत्र शाश्वतिकाः भवामः किन्तु राष्ट्रं शाश्वतं भवति ॥ १५

अल्पसैन्ययुता वयं धर्मन्यायसत्यैः अनल्पा भवामः ।
सत्यमेव जयतेऽन्तेः न तु पशुबलसैन्यसमावृतो भूपतिः ॥ १६

धर्मार्थं पूर्वजास्तु नैककष्टान्यनुभूय प्रसिद्धाः ।
सर्वस्वं परित्यज्य राष्ट्रसंरक्षणाय केवलं शृण्वन्तु ॥ १७

धर्मनिरताः पाण्डवाः चारण्येषु नानाकष्टान्यनुभूय ।
जित्वा शत्रून् सर्वान् स्वसंतत्या राष्ट्रं पालयामासुः ॥ १८

पूर्वं श्रीरघुरामः सपत्नीको लक्ष्मणेन सार्धं वने ।
धर्मार्थं हि कष्टानि बहून्यनुभूय विजयं तु प्राप चान्ते ॥ १९

न गन्तव्यमस्माभिः रोद्धुं तुर्कसैन्यान् कदापि पश्यन्तु ।
यद्यागच्छेयुः ते तेषां न किमपि लभ्यते ऋते युद्धात् ॥ २०

सैन्यान् यदि प्रेषयेत् तुर्कः योद्धुं बलिष्ठान् तान् निहन्तुम् ।
संसिद्धैरस्माभिः भवितव्यमिह गत्यन्तरं न विद्यते ॥ २१

शत्रूणां सैन्यानां किञ्चिदप्यलभ्यं वस्तु भूयादिह ।
मृत्तिकामात्रं भृशं लभ्यं भवतु न त्वन्यदिति भावयामि ॥ २२

ततोऽस्माभिः सर्वैश्च मूल्यवस्तूनि क्षिप्तानि मा भूयात् ।
सुखदुःखानि भान्तु तुल्यानि सदा वनौकसामस्माकम् ॥ २३

रथाण्डजाश्रयभूतान् भूरुहान् मा छेदयन्तु प्रमादेन ।
प्राणिनां ते वृक्षाश्च जगति सर्वोपकारकाः सन्त्यर्घाः । २४

गुप्तस्थानानि यत्र शत्रूणां भवेयुः तानि पश्यन्तु च ।
शिलोच्चयेषु कुमार्गान् विशोधयन्त्वरिसंहारार्थं बाढम् ॥ २५

प्रतापोक्त्यनुसारं च तत्रैव सर्वे कुटीराणि निर्ममुः ।
अत्यन्तसुन्दराणि प्रियाणि सर्वसामान्यातिस्वच्छानि ॥ २६

सर्वत्र सूचितवने गृहाणि पर्णकुटीराणि सुशोभितानि ।
सन्ति प्रेक्षणीयानि सर्वकालवातावरणानुकूलानि ॥ २७

स्वपरिवारेण सार्धं भिल्लाः ते लवित्रखड्गपरशुसहिताः ।
खनकतक्षकैः सहिताः जग्मुः सूच्यस्थलं स्वच्छकरणाय च ॥ २८

हरितस्थलानि तथैव क्षिप्त्वा घासकर्तनं विधाय रम्यम् ।
शुष्ककाष्ठान्यानीय तानि संस्थाप्य समतलप्रदेशेषु च ॥ २९

तानि क्रकचैः योग्यं प्रविलूय यथायोग्यं च तक्षयित्वा ।
कृत्वा तैललिप्तानि खनितेषु निखाय तान् स्तम्भान् ववन्धुः ॥ ३०

लवित्रेण प्रविलूय केचन विस्तृततालपर्णान्यानीय ।
तानि निक्षिप्यातपे शुष्कत्वमापन्नानि साधु संहृत्य ॥ ३१

वास्तुशास्त्रप्रमाणं रेखाचित्राणि निर्माय धिषणायाम् ।
बध्नन्ति चापः प्रोक्ष्य गाढं स्तम्भोपरि गृह्यसूत्राणि ते ॥ ३२

आच्छादयन्ति सव्यं वंशदण्डनिर्मितफलकोपरि रम्यम् ।
मृत्तिकया कुड्यानि च परे कुर्वन्ति सान्द्रचिक्कणस्थूलानि ॥ ३३

केऽपि कुठारैश्छित्वा वंशवेत्रदण्डांश्च समानीय तत्र ।
निष्कण्टकान् विधाय च लवित्रेण चतुर्धा प्रविदारयन्ति च ॥ ३४

स्वपितुं शिलातलानि निशिततक्षकैः तक्षयित्वा योग्यानि ।
तदुपरि दर्भासनानि सम्यक्कीत्या विस्तीर्य निक्षिप्तानि ॥ ३५

नैव निक्षिप्तान्यत्र जलपानाशनकलधौतमयपात्राणि ।
किन्तु भव्यमृण्मयानि निक्षिप्तानि सर्वोपयोगार्हाणि च ॥ ३६

सर्वराजभोगांश्च परित्यज्य ते विपिनवासिनो भव्यम् ।
स्वराष्ट्रतपसि निमग्नाः जटाधारिणो भूत्वा सन्ति सर्वे ॥ ३७

कार्यकरणे निरतास्तु सर्वे ते राष्ट्रगीतानि गायन्ति च ।
जननीं भारतभूमिं समर्चयन्ति भावकुसुमैः सश्रद्धम् ॥ ३९

खनित्रैः निर्मूल्य ते बहुप्ररूढघासं स्वच्छं प्रविधाय ।
मेदिनीं तत्र जलैः संप्रोक्ष्य संमार्जनं चक्रुः केचन ॥ ३९

वृक्षेभ्यः विलूयन्ते सुविस्तृतयोग्यपर्णसञ्चयं तूर्णं ।
बृहत्तमकुशभारांश्च समानीयातपे विनिक्षिप्तवन्तः ॥ ४०

लघुखाद्यपदार्थानि च खाद्यन्ते सर्वैरपि पर्णपात्रेषु ।
मृण्मयपात्रेभ्यश्च सुजलानि पीयन्ते चाञ्जलिपुटेभ्यः ॥ ४१

एवमादिश्य सर्वान् तान् चकार निरतान् भृशम् ।
स्वस्वकर्मसु राणा च राष्ट्रदीक्षापवित्रितः ॥ ४२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे 'प्रतापस्य सन्देशमाकर्ण्य कुटीरनिर्माणम्' नाम द्वितीयः सर्गः समाप्तः ॥]

तृतीयः सर्गः ।

३. उदयसागरसमीपे राणाप्रतापनिवासः ।

उदयपुरपरिसरसमीपे विभाति योजनायतविततसरोवरस्तु ।
मधुरसलिलविलसितसुधाब्धितुलितविनुतनीरजकविकुलवर्तनेन ॥१

उदयसागरपरिसरं भूरुहालिजातसौन्दर्यसुषमालिमत्तचित्त-।
मधुरभावनाप्रावल्यलसितविशदतृप्तिविचलितहृदयेन वीक्ष्य चाशु ॥ २

सज्जनपुरुषालिमधुरचित्तवच्च भाति सागरविलसितसलिलमत्र ।
मज्जनजनतातापहारीति साधुसन्तजनगणकथनमस्ति सत्यमेव ॥ ३

प्रकृतिरमणीयसौन्दर्यमाशु वीक्ष्य विचलितान्तरङ्गसुभावनावलैश्च ।
रागरञ्जितभावकविहृदयेन रम्यभावार्थयुतकवितां चकार ॥ ४

सपरिवाराय राणाप्रतापराज शीतकिरणाय सुस्वागतं विधाय ।
उदयसागरतीरलक्ष्मीः सुमैश्च कोकिलालापगीतैः जगौ च मुदा ॥ ५

कोकिलालापमाकर्ण्य भूपतिस्तु पुष्पविकिरणमालोक्य रम्यभूम्नि ।
चिन्तयामास मोहनमुग्धभावहावनिष्यन्दमकरन्दविन्दुमनसि ॥ ६

किमिदमवनीतलामलनन्दनं नु विनुतकाश्मीरकेदारवितुलितं नु ।
न हि तु कथमत्र दृश्यते सुन्दरं हि भूम्नि चोदयसागरतीरमत्र ॥ ७

पूर्वपुण्यालिवीचिकासमुदयस्तु मामिह प्रेरयन् वस्तुमेव मृदुल- ।
शीतलपवनडिम्भकरूपमेत्य चर्चयन् वहति च वहु मेऽङ्गमत्र ॥ ८

इति च राणाप्रतापसिंहस्तु चारुतुङ्गभूधरवलयितसागरं तु ।
सुमितभूरुहगन्धवन्धुरसमीरवीचिकापूर्णममलं च संविलोक्य ॥ ९

योग्यमत्र मम वसनमिति विभाति नास्ति कुत्रापि सममीदृशं जगद्धि ।
सर्वथोपयोगमयमेवास्ति भूम्नि नैकसौकर्यभूतवस्तुनिचयेन ॥ १०

विकचरक्तनीलोत्पलपङ्कजैश्च भाति हंसकारण्डवबम्भरैश्च ।
हरितशैवालजाललसितझषैः च भूम्नि चोपमानद्रव्यसंकुलैश्च ॥ ११

उदयपुरपुरन्ध्रीजनहावविभ्रमालिसंलोकनार्थमिवात्र भाति ।
दर्पणोपमितोदयसागरस्तु विमलमधुरसलिलकमलैर्विहस्य ॥ १२

गहनमागतस्य भवति मानसस्य मेऽत्र चाभूतपूर्वानुभूतिरेव ।
नर्तते हृदयं वहुनाट्यमग्ननीलकण्ठनाट्येन साम्यमेत्य ॥ १३

बहुलपतगकुलविकूजनमुखरितं नु भवति दशदिशान्तस्थभूवलयमत्र ।
विकसितामलनीरजगन्धलिप्तमधुरपवनकुमारसंचार एव ॥ १४

अलिकुलमधुरझंकारनादमेति विनुततम्पूरतन्त्रीस्वरालियुक्त ।
सततकर्णरसायनगीतिकासु मग्नसुमधुरगायककण्ठवच्च ॥ १५

पतगकूजनरञ्जितसागरस्तु भवति चानन्दविकसितमूर्तिमांश्च ।
निरतकेकीकुलानन्दनर्तनादिवर्तनमनुभूय हृदि तरंगितश्च ॥ १६

बंभरकुलमधुरनादगुञ्जनेन मिलितकोकिलकूजनगानमत्र ।
रचयति च गायनादिककार्यमेव चातिथिकुलकर्णमधुरसायनं तु ॥ १७

पूर्वजन्मनि चापि वनेऽत्र धर्मरक्षणार्थमवसमिति मानसे तु ।
भाति कोऽपि भावस्तु सततमेव परमसौख्यदो बहुमहिमान्वितश्च ॥ १८

अत्र मे पूर्वजाः सकलप्रकारसर्वकष्टनष्टान्यनुभूय सम्यक् ।
यज्ञयागादिकार्यकलापादिकं च पावनगतिं विधायाशु चाखनन् हि ॥ १९

उदयसागरं लोकहितार्थमेव खलु तथैव सत्कर्मकृत्वाऽन्ततोऽपि ।
सकलभारतं चैकचित्तं विधाय शाश्वतस्थानमगमन् च लोकहृत्सु ॥ २०

देवि पाटेश्वरि विलोक्य सुखदां च सततरमणीयविश्वलोकप्रियां तु ।
उभयसंध्ययोः बहुविधचित्रितां च विश्वसुन्दरीं वेदपूतां मुदा नु ॥ २१

बहुविधद्विपदचतुष्पदादियुक्तममलसहचरजीवजालप्रकृष्ट-
परमरमणीयसागरतीरमेत्य मानसं तु मोमुद्यते बाढमत्र ॥ २२

नाथ सर्वे वयं सकुटुम्बमत्र सपरिवारं सकलकर्मयोग्यमेव ।
सृष्टिरमणीयसागरतीरमद्य वसतियोग्यं विधाय खलु निवसेम ॥ २३

मह्यममलमिदं स्थानमद्य भूप रोचते परमं यतः सुन्दरं नु ।
सकलकार्यकरणबहुप्रेरकं च भाविसमरङ्गानुकूलं विभाति ॥ २४

सपदि पाटेश्वरी चाप्यकाङ्क्षतात्र निवसितुं सौख्यमयविभाग इति चाशु।
भावभारेण सहचराश्चापि परिसरैश्च मुग्धाः तथैवेति चाभणन् च ॥ २५

कृष्णसिंहादिसर्वभूपालकास्तु भूपराणाप्रतापस्य भाषणं च।
हृदयसंस्थितकामनामाविलोक्य सृष्टिसुन्दरसागरतीरमाशु ॥ २६

वसतियोग्यमिति च हर्षेण निगद्य दन्तिघोटकेभ्यश्चात्र चावतीर्य।
स्वीयखाद्यभाण्डाराणि तत्क्षणं तु भूम्नि योग्यस्थलेषु ते न्यक्षिपन् च ॥ २७

उदयसागरतीरं विलोक्य सादरं प्रणम्य हर्षोत्फुल्ललोचनैश्च।
तर्पणानि विधाय तस्य सलिलैश्च पूर्वजेभ्यः प्रशान्तभावैः तदाऽऽसन् ॥ २८

भूमिपतयो विरेजुश्च दिव्यभावसंकलितमनोनिश्चयाः तत्र सपदि।
विततसर्वसुखास्पदमपि च भवति शुभदबहुलार्थविजयादिसाधनेषु ॥ २९

नूत्नचैतन्यमापाद्य राजपुत्रकुलममलधिषणाऽभिसंक्रान्तपूर्व-।
पुण्यसमुदायगर्भसंजातदिव्यसुखदसौभाग्यलसितसुभावनासु ॥ ३०

विलसितऋजुकार्यकरणलग्नमानसास्तु सर्वे महीपतयश्च भूमि-।
पतिमनुपदमेव च सपल्लोकमत्र विशदपीठोपरि समुपावेशयन् च ॥ ३१

सुखमयोदयसागरदर्शनं तु भवति पूर्वजदर्शनसुखमिवात्र।
ते मया सह विविधानि भाषणानि रहसि कुर्वन्त इव खलु मनसि सन्ति ॥ ३२

कृष्णसिंहादिभूपवर्गास्तु योग्यमाविलोक्य तत्स्थानं नवं विधाय।
पर्णसद्मानि निर्माय नूतनानि भूपमानससंतोषकारकाश्च ॥ ३३

रेजुरमलमनीषासमाहिताश्च विविधसुव्यवस्थाकरणेषु सक्त-।
गाढचित्तवृत्तिविकासभासुराश्च भव्यभारतरणरङ्गयोधकाश्च ॥ ३४

अत्र संभविष्यति शत्रुनाशनं च विजयसूचकचिह्नानि सुष्ठु सन्ति।
नास्ति संशयलेशोऽपि युद्धसीम्नि भूप राणाप्रतापसिंह राजचन्द्र ॥ ३५

उदकसंदर्शनं खलु शुभदमत्र सर्वसौख्यदसागरः सत्यमेव ।
शत्रुदुर्गमदुर्गोऽयमत्र भाति विजयसंसूचकश्चापि चन्द्रवदन ॥ ३६

इह खलु मरणं जीवनं चव मेऽस्तु महितभारतस्वातन्त्र्यलक्ष्यसिद्धि- ।
दर्शनपर्यन्तमिति च मे भावनाऽपि कथयति तथैव निवसेयमत्र जगति ॥३७

भारतीयसंस्कृतिपवनाङ्कुराश्च मां वहुविधं च सर्वथा कौतुकेन ।
पूर्वपुण्यसंचयपरिपाकजातभावनाश्चात्र निवसितुं प्रेरयन्ति ॥ ३८

उदयसागरवारिणीयूषतुल्यमपि च मङ्गलकारकं ननु विभाति ।
निरतपीयूषतुलिताम्बुपानजातशक्तिसंपन्नभासुरमूर्तिरस्मि ॥ ३९

रम्यभूधरभूमिरूहास्तु नित्यहरितसमलङ्कृतसुषमाकासिताश्च ।
धरणिशाश्वतकल्याणकारका लसन्ति भारतविजयसंसूचकाश्च ॥ ४०

स्वैरसंचारविलसितजन्तवस्तु सूचयन्ति च स्वातन्त्र्यमार्गमेव ।
नयनशीतलचन्द्रिकासाम्यमद्य सकलचेतनाचेतनविततदिक्षु ॥ ४१

भयदकानने मम खलु वासयोग्यमेव चोदयसागरतीरमद्य ।
भाविराष्ट्रीयचैतन्यजन्यभूम्नि विजयसाधनाभूतमिवात्र भाति ॥ ४२

मनसि जायते खलु मम प्रेरणाऽपि चास्मदीयवंशजराष्ट्रभक्तियुक्त- ।
नृपतिकामना वलविशेषाभिजातनव्यचैतन्यचपला समत्वमेत्य ॥ ४३

हरिणयूथानि संघटितानि चात्र रम्यजीवननिरताश्च साधु भान्ति ।
संघशक्तिं प्रजां वहु शिक्षयन्ति चैकमत्येन भारते संचरन्तु ॥ ४४

पल्वलेषु निपीयात्र सलिलमेव सम्यगत्वा च शष्पाणि सुलसितानि ।
यूथनिवसनशाश्वतलोलुपास्तु भान्ति हरिणकाः संततगहनसीम्नि ॥ ४५

एवमादिलोकहिताय भावनास्तु विषयवैपुल्यभारैश्च जगति सन्ति ।
मूर्खभावनासंव्याप्तमानवास्तु गर्वभारेण ताश्च विभान्ति नैव ॥ ४६

प्रकृतिबोधितशास्त्राणि कोऽपि नैव भुवि विजानाति सामान्यमानवस्तु ।
बोधनासूक्तिमौक्तिकमण्डितोऽपि बुद्धिजाड्येन संजातकारणेन ॥ ४७

मोदते हृदयं त्वेतदाविलोक्य विश्वमोहनकारणदिव्यधाम ।
नैकवर्षसमायातनव्यदीप्तिसंलसितमञ्जुलविशदसागरस्य ॥ ४८

वृक्षसान्द्रितकानने भ्रातृभिश्च पञ्चपाण्डवमध्यगो वत्सराणि ।
शत्रुसंहारयत्नैरयापयं च फल्गुणाभिधानविराजितश्च भूम्नि ॥ ४९

कौरवैरयुध्यमभयं केशवेन सार्धमतिरथैश्च महारथैः भृशं नु ।
शत्रुसंचयसंहारमनिशमेव धर्मसंस्थापनार्थाय सव्यमत्र ॥ ५०

रामरूपेण भूतलरक्षणार्थमेव विपिने चतुर्दशवत्सराणि ।
यापयित्वा च शत्रुसंहारमाशु देवि चाकरवं खलु पूर्वमत्र ॥ ५१

सोऽहमधुनाऽपि परवीरनाशनं तु वन्यभिल्लमित्रसमूहयोधकैश्च ।
संविधाय च स्वातन्त्र्यभावदीप्तराष्ट्रमेतद्धि कुर्यां च मित्रलोक ॥ ५२

अर्धनारीश्वरी सती कष्टनष्टपरिधिषु विचेष्टमाना कुटुम्बिनी च ।
श्रीमती वीरपत्नी च सततदेशभक्तवन्दिता पाटेश्वरीह चापि ॥ ५३

तत्र सर्वे भवन्तश्च मामनेकसेवासदुपायसदुपचारैश्च सम्यक् ।
तर्पयन्ति चावश्यं जयं तु साधयेम नास्ति संशय इति भाति मेऽपि ॥ ५४

संघशक्त्या वयं जयं साधयेम राष्ट्रभक्तिं च लोके प्रवर्धयेम ।
एकलिङ्गकृपापात्रभाजिनश्च राष्ट्रं वयं हि सर्वदा पालयेम ॥ ५५

निश्चयमनसा सर्वे चावश्यककरणीयानि विधाय सान्तम् ।
कृत्यानि ते वसन्तः रिपुवलदमनमनोभिश्चासन् वनेऽपि ॥ ५६

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे 'उदयसागरसमीपे राणाप्रताप-निवासः ' नाम तृतीयः सर्गः समाप्तः ॥]

चतुर्थः सर्गः ।

४. माहुः नाम भिल्लसर्दारस्य वर्णनम् ।

तरुणभिल्लयूथपरिपालितवनेषु सकलयुद्धशिक्षणान्वितश्च ।
माहुः नाम भिल्लसरदार् विभात्यत्र दक्षिणभुजमस्य भूपतेश्च ॥ १

अनितरगुणभावदेशभक्तियुतोऽपि महितराजभक्तिसैनिकोऽस्ति ।
मुष्टियुद्धखड्गचालनकोविदो वञ्चनाविहीनवर्तनेन ॥ २

भिल्लबालतरुणशस्त्रास्त्रशिक्षको निरतराष्ट्रभावराजितश्च ।
सान्द्रगहनविदिततस्करमार्गैश्च वन्यचित्तभावकोविदोऽस्ति ॥ ३

एकलव्यरीतिगुरुभक्तिमण्डितः तेजितास्त्रबाणधारकश्च ।
निशितदीर्घलोचनायुतमूर्तिस्तु राजतेऽत्र गहननृपतिमनसि ॥ ४

द्योतमानभिल्लराजलक्षणलक्षितश्च मलिनवस्त्रभूषितोऽपि ।
तरलकर्णकुण्डलद्युतिविम्बितामल-मदयुतगण्डमण्डलेन ॥ ५

नीलकण्ठपिच्छविलसितमकुटाभिभूषितोत्तमाङ्गभासुरश्च ।
भालभागकुङ्कुमाञ्चितवदनेन भाति काकपक्षचित्रणेन ॥ ६

प्राज्यभारतीयसंस्कारमहिमात्तविनुतवीरचरितचर्वणश्च ।
स्वप्रतापराजनेत्राञ्चलादेशपालनात्तबुद्धिभूषितश्च ॥ ७

निखिलवन्यजीवरक्षणदक्षश्च शत्रुपक्षवर्गनाशकश्च ।
अद्रिकोटिभागविहरणशीलश्च माहुरत्र भाति काननेषु ॥ ८

पीनकठिनविपुलवक्षस्थले भाति कण्ठलम्बिताम्रशृङ्खला च ।
ताम्रवलयबद्धभुजदण्डदीप्त्याऽभिराजते च माहुनामकोऽत्र ॥ ९

भाति सर्वसौख्यवितरणभावेन दुःखलौख्यसारभोजकश्च ।
न्यायधर्मबद्धहैन्दवनृपतिप्रतापपादपद्मवम्भरश्च ॥ १०

एणजङ्घवच्च विलसितजङ्घोऽस्ति रागपद्मसदृशलोचनोऽस्ति ।
शातमध्यकलितकार्श्येन मध्येन चित्ररूपमेत्य दृक्षु लसति ॥ ११

युद्धभूम्नि निरतशम्पासमानत्वमेत्य सर्वदिक्षु लसति चारु ।
हस्तमुष्टिखड्गधाराप्रभावैश्च शत्रुहृदयनेत्रच्छेदकोऽस्ति ॥ १२

अन्यहृदयभावसंवेदिमोहस्तु भावनाऽनुगुण्यकर्मकश्च ।
शत्रुजलधितरणनौदीप्तदीपोऽस्ति राजसैन्यसिन्धुवाडवोऽत्र ॥ १३

शत्रुगमनरीतिमवगम्य सत्वरं स्वीयगमनमार्गमीक्ष्य साधु ।
प्रबलवीररौद्ररसमूर्तिमोहस्तु चरति दन्तिवच्च समरभूम्नि ॥ १४

अखिलसमरभूम्नि राणाप्रतापस्य दक्षिणाङ्गबाहुपार्श्वमेत्य ।
प्राणपञ्चकेन सममेव चालोक्य तस्य रक्षणेऽपि साधु भाति ॥ १५

उष्ट्रदन्तितुरगसारथ्यमवगम्य वेत्रयुद्धशास्त्रजलधिमेत्य ।
निखिलशत्रुवर्गसंहारशीलोऽत्र लसति विपिनराजरक्षकश्च ॥ १६

शब्दभेदिबाणवृष्टिसंचारेण शत्रुपावकप्रशामकोऽस्ति ।
मञ्जुवर्तनेन मधुभाषणेनैव सज्जनालिमनसि वसतिमेति ॥ १७

उदयशत्रुसैन्यहन्तैव विचकास्ति गूढचारभाववर्तनैश्च ।
स्वप्नसिंहरूपमापाद्य वैरिणां नारसिंह भाति राजतेऽत्र ॥ १८

अनितरभुजशक्तियुक्तोऽपि माहुस्तु नैव गर्वयुक्तयोधकोऽस्ति ।
सर्वराजवर्गविश्वासपात्रमपि भिल्लवर्गहृदयभीम एव ॥ १९

क्रुद्धवन्यहिंस्रवर्गीययुद्धेषु तुङ्गभूधराधिरोहणेषु ।
जृम्भमाणसिंहदन्तालिगणनासु शक्तियुक्तिबुद्धिसंयुतोऽस्ति ॥ २०

धावमानहिंस्रमारणलक्ष्येषु हृदयभेदिवाणमोचनेषु ।
अर्धचन्द्रवाणशात्रवकण्ठालिकृन्तनेषु कुशलरूपकोऽस्ति ॥ २१

भूरूहालिशिखरशाखासु शायी च निम्नसलिलसरसि तारकश्च ।
अचलरूपशत्रुविदलनकुलिशश्च भाति माहुः नाम भिल्लराट् च ॥ २२

पवनपुत्रवच्च नानाप्रकारेण कार्यसाधकश्च धैर्यवान् च ।
सततभिल्लराजसंनुतमहिमात्तनव्यशक्तिदीप्तरूपकश्च ॥ २३

भावभणितिनिर्मितिकरणेषु साधु गीयमानकीर्तिधवलितोऽस्ति ।
अल्पभावलसितजनतालिभयभूतविमलबुद्धियुक्तवर्तनोऽस्ति ॥ २४

रामचन्द्रवंशसंजातभूपस्य विविधकार्यकरणतत्परेण ।
जातपवनपुत्रतुलितेन कायेन भाति भक्तिभावसञ्चयेन ॥ २५

माहुमूर्तिरूपमापाद्य कानने सञ्चरन् च नृपतिसंगमेत्य ।
भक्तिशक्तियुक्तधीयुतवानरो लसति राजसौख्यमण्डलेषु ॥ २६

स्वीयमित्रवर्गसहवासगमनेन लसति सततमेव काननेषु ।
निशितकण्टकात्तमार्गेषु धैर्यवान् चापबाणखड्गधारणेन ॥ २७

भ्राजतेऽत्र युद्धसांकेतिकपदैश्च शत्रुसैन्यहननचिन्तनेन ।
मल्लयुद्धदीप्तकाठिन्यकायेन कर्कशाङ्गसन्धिबन्धनैश्च ॥ २८

अचलराजभक्तिपावनमानसो विनुतधर्मयुक्ततत्परश्च ।
दिव्यभावपूताराणाप्रतापस्य हृदयदीपरूपमेत्य भाति ॥ २९

प्रत्यहं च वन्यमधुरातिमधुराणि पक्वकन्दमूलभक्षणानि ।
क्षेत्रपात्रपूर्णरुचिराणि सुफलानि राजपादभूम्नि वितरति स्म ॥ ३०

राजलोकभोज्यसुमफलमूलानि मधुरसलिलपूर्णकुम्भकानि ।
दिव्यगव्यपूर्णकलशानि नित्यशः प्रेषयन् च माहुमूर्तिरस्ति ॥ ३१

अमृतमधुरवन्यमधुभाण्डमानीय नृपतिपादपद्मपीठमेत्य ।
भक्तिभावलसितसाष्टाङ्गवन्दनं चाविरच्य भिल्लराट् विभाति ॥ ३२

अतिरसभरितबहुलफलानि चादाय तालवृक्षमञ्जुमुञ्जकानि ।
भूचणकसुबीजखाद्यानि च गुडानि यच्छति प्रतापभूधराय ॥ ३३

आम्लमधुरपक्वकरवीरसुफलानि कीरचञ्चुरागमूलकानि ।
नव्यकन्दकलितहरितानि पर्णानि खाद्ययोग्यकानि नित्यमत्र ॥ ३४

चारुगन्धिलानि नीवारधान्यानि विविधरूपशाकवर्गकानि ।
रम्यमदनविम्बकोशातकाद्यानि नव्यकान्तिलसितरूपकानि ॥ ३५

पक्वसरसदिव्यवदरीफलानीह चेक्षुदण्डखण्डबन्धनानि ।
गणपतिप्रियाणि जम्बूफलान्यपि वदनवारिदानयोग्यकानि ॥ ३६

एवमादिरम्यगुणगणमण्डितः सकलराजवर्गमानितश्च ।
प्राणपञ्चकसमराणाप्रतापस्य चाज्ञनेय भाति हृदयसीम्नि ॥ ३७

राजपुत्रदेशमाह्वाख्यभिल्लस्तु भिल्लकुलजमर्त्यभूपतिश्च ।
निखिलविपिनभिल्लसरदारनाम्ना च लसति भिल्लविश्वमण्डलेषु ॥ ३८

युद्धसीम्नि बहुलवाहिनीसंचारलग्नमत्तचित्तराजितोऽपि ।
शत्रुवर्गहननकर्मणि लग्नश्च नैव संत्यजति च नैजकर्म ॥ ३९

शत्रुहृदयजातभाववेत्ताऽस्ति च भाति मूर्खभिल्लवत् स एव ।
किन्तु युद्धजातशात्रवचलनेषु लसति विशदतत्त्वचालनैश्च ॥ ४०

निम्नवारिवच्च शान्तगभीरोऽस्ति देशनाममन्त्रजापकोऽस्ति ।
भूपनामपठनवर्धितश्रीर्भाति भील विपिनभिल्लमण्डलेषु ॥ ४१

एतादृशो महान् माहुः राणा दक्षिणबाहुगः ।
सारदारनाम्ना चाहूतः भिल्लवंशे प्रकीर्तितः ॥ ४२.

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे ' माहुः भिल्लसर्दारस्य वर्णनम् ' नाम चतुर्थः सर्गः समाप्तः ॥]

पञ्चमः सर्गः ।

५. वसन्तागमः

अनङ्गकोटिविलसदङ्गवैभवो वसन्तमूर्तिरिह शुभावृतोऽनिशम् ।
प्रतापभूमिपतिशुभेच्छुको मुदा समागतः प्रियनिजवान्धवैः शुभः ॥ १

प्रतिक्षणं शिशिरमनोज्ञभूपतिः निपीय प्रकृतिरमां सुकाशिनीम् ।
विधाय नीरसतनुकान्तिशोभिनीं जगाम चाश्विह परिहाय तत्क्षणम् ॥ २

दुरोदरः शिशिरकुमारभूपतिः चकार तां प्रकृतिरमां विवस्त्रिणीम् ।
इति स्वयं किसलयवस्त्रसंयुतां नवां विरच्य भुवि ललास माधवः ॥ ३

मिलिन्दगुञ्जनमधुनादनिस्वनैः समस्तकोकिलकुलकीरमण्डलैः ।
पतत्रिमङ्गलशुभरम्यकूजनैः वसन्तरागविलसितः प्रमोदते ॥ ४

विलोक्य तं किसलयसूनवीजनैः प्रवीजयन् वहति सदागतिः प्रियः ।
मनोज्ञगन्धिलमधुवीचिकालिभिः करोति लोकमिह विमत्तजीवितम् ॥ ५

रसालवृक्षसुमचयेषु वम्भराः विगुञ्जनैः सुखलुठनैश्च दर्पिताः ।
विचित्ररङ्गसुमरजोविभूषिताः विभान्ति पीतहरितनीलरञ्जिताः ॥ ६

निरन्तरं चलति जनालिसौख्यदः सुगन्धसंवितरणगन्धवाहकः ।
अलङ्करोति च मलयानिलः श्रिया चराचरं नवविधमण्डनैः परम् ॥ ७

वसन्तमूर्तिरपि परागचर्चितसुमालिहासलसितपावनाननः ।
विराजते भुवि मधुचैत्रयात्रया विलोभयन् नवयुवतीजनं भृशम् ॥ ८

समागतं मधुरवसन्तभूपतिं विलोक्य सा विपिनविहारदेवता ।
विकीर्य गन्धसुमचयं तु तत्क्षणं जगाद कीरकुलपिकालिजल्पनैः ॥ ९

बभूव सा विमलपरागलेपिता सुपुष्पिता विशदजलेजभूषिता ।
द्विरेफसंतुलितशिरोजमण्डला समागमे लसितशरीरभास्वरा ॥ १०

अरावलीकुधरशिखाग्रराजितं सुसात्पुडानगशिखराग्रमण्डितं ।
वसन्तराजमधुरशासनात् भृशं विभाति चोदयवसुधातलं प्रियम् ॥ ११

निरन्तरं कुवलयपत्रिकूजनैः सुगन्धकुन्दकुटजवल्लरीचयैः ।
भृशं नवैः बहुमधुरेक्षुमण्डनैः विभासते सुमचयगुच्छभूषणैः ॥ १२

वसन्तसंगमबहुभावभासिता वसुन्धरा लसति मुदा विनर्तिता ।
तदीयनर्तनमनुकुर्वता तदा पिकेन पञ्चममधुरः स्वरः कृतः ॥ १३

अनन्तभावभरितमाधवीप्रभां विनूत्नजागतिकविलासमण्डनाम् ।
विलोक्य हे नृपकुलजातसैनिकाः सुहासिनीं प्रणमत भक्तिमानसाः ॥ १४

अयं वसन्तनृपतिः आत्मवंशजान् अपश्यदेव सकलवैभवावृतान् ।
तदीयवर्तनमनिशं च वर्णयन् परालिवर्तनमदयं विदूषयन् ॥ १५

विभात्ययं जगति महामहीपतिः समस्तदैविकगुणभावभूषितः ।
ससुन्दरं प्रकृतिललाममण्डितः विचित्रभूषणसहितो मुदा कृती ॥ १६

सरोवरश्रियममलां च बम्भराः निरन्तरं बहु गणयन्ति निःस्वनैः ।
इतीव ते सुममधुपानलोलुपाः भ्रमन्ति पङ्कजनिचयाच्च पङ्कजम् ॥ १७

सुगन्धपूरितमधुवातपोतकाः विचित्रमिश्रितकटुनिम्बवासनाः।
प्रसारयन्ति विमलगन्धमिश्रणैः धरातले सुखमयजीवनाय ते ॥ १८

समीरणो नृपतिममन्दचालनैः समेत्य लोकविनुतवीरगोष्ठिभिः।
सशीतलेन कुसुमरागपाणिना प्रसान्त्वयन् वहति तरङ्गशीकरः ॥ १९

ऋतुः प्रियो रहसि मनोगतं पुनः पुनः कथं वदति मनोहरं शृणु।
प्रशान्तमानसमवलम्ब्य निश्चलं पवित्रभावनिचयभासिताननेः ॥ २०

यदा यदा ललितवसन्तभूपतिः उदेति भूतलजनता चतुष्पदः।
अचेतनं द्विपदमनांसि नूतनैः रसान्ति चित्तजनवविभ्रमैः सुखम् ॥ २१

वसन्तागमलुलितचैत्रयामिनी विनीलताम्रहरितपीतरञ्जिता।
मनोविकाररलसितविश्वयौवने निरन्तरं विकिरति रागभावनाः ॥ २२

प्रमत्तकीरपिककुलानि वैभवैः वसन्तरूढकिसलयादिखादनैः।
भणति वृक्षविटपशारिकादिभिः वयं हि भूम्नि मदनराजसेवकाः ॥ २३

विशालविश्वविलसिताङ्गदीप्तिभिः विभाति लोकमनसि हावविभ्रमैः।
अनङ्गभावपरितेन सम्पदा वसन्तराट् भुवि निजराज्यसीमसु ॥ २४

अशोकचूतकुसुमराजिसम्पदा सुगन्धदीपितनवमल्लिकादिभि।
नवारविन्दविकसितोत्पलैः युतः प्रयाति लोकहृदयभावचोदकैः ॥ २५

लतान्तगर्भगलितरागवाहिनी महीमजस्रमधुरगन्धवासिनीम्।
विधाय दिव्यपरिमलात्तरूपिणीं विगायतीव नववसन्तवैभवम् ॥ २६

मृगाङ्ककान्तिषु सुखमज्जनैः चिरं स्वपन्तमात्मसमजनैः सुखात्मना।
वसन्तमूर्तिमिह निशान्तमारुतः प्रबोधयन् वहति च दिक्षु साम्प्रतम् ॥ २७

विमोहयन् सकलवनेचरान् वरः सुमाकरो वनजचयैः प्रियं चरन्।
सघर्मदेहकलितहालिकान् मुदा विचर्चयन् वहति लतान्तसौरभैः ॥ २८

इहैकलिङ्गचरणनीरजे प्रियं वसन्तभूमिपतिरनेकधाऽनिशम् ।
सुगन्धरागनिचयशीकरैः हृदा समर्चयन् चलति मन्दचालनैः ॥ २९

सुपुष्पगुच्छतुलितभस्मभूषितः प्रवालताम्रवरजटालिमण्डितः ।
लतालिरूपवलितनागवेष्टितः लसन्मिलिन्दसमशिवाक्षमालितः ॥ ३०

रसालचूतनवलतालिवेल्लितः प्रवालपुष्पमधुपपङ्क्तिभासितः ।
इवात्र भाति विपिनरूपसंस्थितः फलोदयाय तपसि जाटजूटकः ॥ ३१

सदैकलिङ्गमधुकटाक्षवीक्षणैः विभासते च मधुलिहालिगुञ्जनैः ।
वसन्तभूपतिरिह सर्वसुन्दरं विभूषितः कुसुमपरागलेपनैः ॥ ३२

प्रसन्नतालसितवसन्तचन्द्रमाः चराचरेष्ववसितकर्मसञ्चयम् ।
गुणागुणं बहुविधघातकं ध्रुवं विलोक्य साक्ष्यविकथने विभासते ॥ ३३

अनेकपुण्यपुरुषसंगमेन किं सुखेन भाति मलयमारुतः प्रियः ।
प्रभावितश्च मलयमारुतस्वरैः विगायतीह ललितरागचालनैः ॥ ३४

विभाति रागलुलितदेहभास्वरो वसन्तरागललितगानतत्परः ।
समस्तलोकहृदयरागदीपकः स्वदीपरागमधुरतोडिसंयुतः ॥ ३५

स्वभावगन्धमधुरमोहने रमा सुकङ्कपत्रचलनजातनिःस्वनैः ।
विगायतीह विपिनसुन्दरी स्वयं वसन्तदिव्यपुरुषतोषणे रता ॥ ३६

अनारतं मम भरतावनी शुभा चकास्ति भव्यनववनाद्रिवेष्टिता ।
प्रशान्तचैत्रमधुविभावरीषु च वसन्तकाशितवदनेन सुन्दरी ॥ ३७

पतत्रिकूजननवचैत्रवासराः अजस्रावजनितसुस्वरान्विताः ।
प्रबोधयन्ति खलु चराचरं स्वरैः धरातलं बहुविधनादसंकुलम् ॥ ३८

विराजते ननु विनुतैः श्रुतिस्वरैः समस्तलोकजनमनांसि चोरयन् ।
निरस्तरोगचयसुखात्तजीवनं प्रचारयन् प्रथितवसन्तभूपतिः ॥ ३९

वसन्तसौरभमदमत्तमानसाः चरन्ति भौम्यसुखपरम्परावृताः ।
जनाः परं विकसितजीवनाः मुदा स्तुवन्ति चैत्रमधुरयामिनीं भृशम् ॥ ४०

स्थाण्डजाः सकलनिजाण्डजान् परं बुभुक्षितान् विपिनकुलायसंस्थितान् ।
सरागचञ्चुपुटसमाहृतैः प्रियं सुपोषयन्ति मधुरकूजनैः भृशम् ॥ ४१

विनृत्यतेऽत्र सुखमयी स्वतन्त्रता पतत्त्रिजातिषु विपिनेषु जन्मतः ।
वयं तु भारतभुवि राजपूरुषाः परालिपादकमलरजोविभूषिताः ॥ ४२

धिगस्तु ते प्रथितकुलोद्भवप्रभो विलोक्य शान्तिपथरतोऽस्ति किं वद ।
स्वभारतं परजनपालने स्थितं गृहाण सत्यमिह यथा भवेत् तथा ॥ ४३

वसन्तजीवमिह पश्यतः सदा प्रसन्नता भवति तथैव सत्वरम् ।
विधेयकं च बहुविधं चकास्ति च निमेषकालमपि न चास्तु मे वृथा ॥ ४४

विभुज्य कण्टकितकुशष्पजालकं क्रमेलको लसति मरुस्थले यथा ।
घनान्धकारगिलनजाततान्द्रिको महाबिले लसति सुधाकरस्तथा ॥ ४५

इदं पठामि सततमत्र कानने समस्तभाविसमरसारमेव हि ।
प्रतिक्षणं प्रकृतिरिहाद्य मां भृशं पदे पदे कथयति हृद्यबोधनैः ॥ ४६

निरन्तरं भवतु मदीयवर्तनं परालिकर्तनरणभूमिमूलकम् ।
वसन्तवत् सकलसुहृद्वरैः युतः सचेतकः सकलधरां न यामि किम् ॥ ४७

मदीयभारतभुवि शत्रुजीवनं व्यपास्तमेव हि बहुशश्च शाश्वतम् ।
न कोऽपि मामककटुशासनं सुहृद् निवारयेच्च भरतदेशचिन्तकः ॥ ४८

यथा वसन्तनृपतिरात्ममण्डलैः समस्तलोकहृदयपीडने रतः ।
तथैव चाहमपि मदीयमण्डलैः विपक्षचित्तविदलने भवामि च ॥ ४९

इति बहुविधभावैर्दैशिकैर्दीपितात्मा विनुतनृपकुलेषु प्राज्ञलोकं समर्च्य ।
स्वमतविधिविधानैर्देशसंरक्षणार्थं महितवनचरैः सः कर्तुमेवं चकाङ्क्षे ॥ ५७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे ' वसन्तागमः ' नाम पञ्चमः सर्गः समाप्तः ॥]

षष्ठः सर्गः ।

६ असफखानस्य वधः ।

राणाप्रतापं गहनेषु संस्थितं ज्ञात्वाऽक्बरो गूढचरैश्च सत्वरम् ।
काम्यं यदत्रास्ति तदेव संवृतं चाल्लाप्रभावेन भवेत् प्रियं मम ॥ १

सौख्ये वसन्ते निवसन्तमेव तं पत्नीसमेतं सुतमित्रवेष्टितम् ।
भावैरशान्तैः खलु पीड्यमानः तुर्कोऽक्बरः शान्तिमवाप नैव हि ॥ २

नैकैः उपायैः बलशत्रुसैनिकान् व्यापाद्य राणां प्रविधाय कानने ।
एकाकिनं मामकपादपङ्कजे संवाहयन्तं भुवि वीक्षितुं रतः ॥ ३

भव्यं सदा मामकभावमन्थनैः संजायते नैतिककर्मणः फलम् ।
एवं विचार्यैव स शान्तमानसो गर्वेण रेजे खलु तुर्कभूपतिः ॥ ४

वामेतरं दक्षिणबाहुसंनिभं दृप्तं महान्तं निशि युद्धतल्लजम् ।
आसीफखानं भवनं यथा स्थितं चाहूतवान् मन्त्रणतत्परः तदा ॥ ५

आसीफखानः सभयं विकम्पितः संदेशमाकर्ण्य तथाऽक्बरोदितम् ।
तूर्णं सुसज्जीकृतवेषभूषणः सौधं ययौ चाक्बरवासमण्डितम् ॥ ६

दृष्ट्वाऽक्वरं नामितशीर्षकः परं शुभानहोऽलेति पदे पदे भणन् ।
तस्थौ महीपस्य समक्षमेव सः हस्तौ च बध्वा कटिमण्डले दृढम् ॥ ७

आवीक्ष्य तं योधवरं जनाधिपः संमार्जयन् श्मश्रुचयं कराग्रजैः ।
गत्वाऽद्य सैन्यैः कटुयोधमण्डलैः राणाप्रतापं गहने स्थितं भवान् ॥ ८

बध्वा समक्षं मम पादसंनिधिं चानीय गेहं व्रज तावदेव रे ।
नो चेत् त्वया सैन्यपदाधिकारिता त्याज्या हि भूयादिति तं जगाद ॥ ९

आदेशमेनं शिरसाऽवधार्य सः चासीफखानः सहसा प्रणम्य तम् ।
कुर्यां भवत्पादरजोविभूषितं राणाप्रतापं सह मित्रमण्डलैः ॥ १०

एवं समुच्चार्य हितं शुभं वचः कृत्वा सलां सैनिकचालकः ततः ।
निवर्त्य तस्मात् भवनात् शनैः शनैः गजाश्वपूर्णां प्रविवेश मन्दुराम् ॥ ११

योग्याश्वदन्तावलिभारमण्डितां दिव्यैः शतघ्नीदलसान्द्रितां चमूम् ।
कृत्वा स खानः सुदलाभिशोभिनीं नीत्वा स्वयं योद्धुमहो विनिर्गतः ॥ १२

सर्वान् भटान् संगरयोग्यपूर्णान् कृत्वा शिरस्त्राणयुतान् च सत्वरम् ।
नानाप्रकारैः खरतीक्ष्णचासिभिः ढालैः पदत्राणसुसज्जितान् तदा ॥ १३

सैन्यं समस्तं बहुधा दिदेश सः राणाप्रतापं प्रविवद्धुमेव तम् ।
गन्तव्यमस्तीति द्रुतं ससैनिकः शस्त्रास्त्रपाणिः सहसा ययौ वनम् ॥ १४

सैन्यं यदा तत्र पदातिभिः शनैः मत्तेभघींकारहयालिहेषितम् ।
भेजे तदानीं प्रकृतिस्तु निद्रया मत्ता बभौ नीरवनिश्चला भृशम् ॥ १५

तत्रोदयप्रान्तसुषुप्तिमास्थिता राणाप्रतापस्य चमूश्च जागृतिम् ।
संप्राप्य शत्रोः पटुवञ्चनागतिं ज्ञात्वा प्रतस्थे परवीरनाशने ॥ १६

तिष्ठेति कृष्णः स्वमहीपतिं भृशं मा गच्छ भूपेश वयं परान् ध्रुवम् ।
संप्रापयेमात्र यमस्य सद्म तान् चात्रैव पत्नीसुतमण्डलैः सुखम् ॥ १७

उद्वेगपूर्णं बहुधा प्रभाष्य सः सैन्यैः प्रतस्थे करदीपदीप्तिभिः ।
आसीफखानस्य पुरो यमो यथा शस्त्रास्त्रसंयुक्ततदीयसैनिकैः ॥ १८

स्थित्वा सवेगं पटुशस्त्रचालनैः शत्रुं विचक्रे बहुभीतमानसम् ।
सैन्येषु सर्वे निशितासिभिः चिरं प्रादर्शयन् तत्र रणीयपाटवम् ॥ १९

दण्डैश्च खड्गैः नवशूलचालनैः लाङ्गूलखड्गैः ककचैश्च मुद्गरैः ।
धारासुतीक्ष्णैः असिभिः कुठारैः कुर्वन्ति युद्धं ननु सर्वसैनिकाः ॥ २०

सर्वान् भटान् संगरशास्त्रपण्डितान् कृत्वा शिरस्त्राणयुतान् च सत्वरम् ।
नानाप्रकारैः कवचैश्च कुन्तकैः ढालैः पदत्राणसुसज्जितान् तदा ॥ २१

सीधुं पुराणं वशिकां निपीय ते मैरेयमन्ये विवशाश्च संगरे ।
युद्ध्यन्ति रात्रौ क्षतगात्रिणः परं विस्मृत्य सर्वां स्वशरीरभावनाम् ॥ २२

शस्त्रास्त्रघातैः बहुधा च घातिताः चाक्रोशरावैरपतन् भटास्तदा ।
पाषाणिते कण्टकिते च भूतले क्षिप्ताश्च ते साधु विगर्तिता इव ॥ २३

हाहारवैः हेषितघोटकैस्तदा दिल्लीयमार्गे त्वरितं पलायिताः ।
तत्रैव ते केचन तुर्कसैनिकाः विच्छिन्नदेहैः पतिता धरातले ॥ २४

संभावितेऽस्मिन् प्रथमे रणाङ्गणे तुर्कस्य योधाः बहवो विपेदिरे ।
सान्तत्यसंजातविदारुणे तदा चान्ये विरेजुः बहुधा विखण्डिताः ॥ २५

राणाप्रतापस्य भटाग्रतौर्किकाः शस्त्रास्त्रसंघातविनष्टसैनिकाः ।
षोढुं तदानीं नृपवीरमण्डलैः जाता ह्यशक्ताः गलिताश्च संगरे ॥ २६

अत्रान्तरे चासफखानसैनिकाः व्यूहैः नवैः संगरपण्डिता इव ।
राणाप्रतापस्य भटानरौत्सिषुः नानाविधैः चायुधनव्यचालनैः ॥ २७

द्वेधा विभज्यात्र तदीयवाहिनीं चासीफखानः प्रथमं महाबलः ।
संप्रेषयामास च पूर्ववाहिनीं राणाप्रतापानयनाय सत्वरम् ॥ २८

सर्वे तदा पूर्वघटस्य सैनिकाः पञ्चत्वमापुः सहसा रणाङ्गणे ।
मित्रैः स्वकीयैः बलयोधमण्डलैः रात्रिंचरैः तं प्रविरोद्धुमेव सः ॥ २९

अल्लाह चाक्बर्वचनैः पदे पदे चाकाशमेवास्ति रवैः प्रपूरितम् ।
उत्साहशक्त्या प्रचुरं प्रयुध्यतस्तुर्कस्य सैन्यस्य महोग्रभासिनः ॥ ३०

श्रुत्वा च तेषां भणनं तु हैन्दवाः भेणुः प्रियं हे हर भंभणेति ते ।
शब्दैः तदीयैः क्षितिजं परिसृतं नादार्णवत्वं प्रतिपद्य शाश्वतम् ॥ ३१

अन्योन्यखड्गाञ्चलघट्टनेन तत् युद्धं विजातं घनविद्युता युतम् ।
वीभत्ससंजातरणार्णवस्तदा वीभत्सनाम्ना प्रथितं रसेन हि ॥ ३२

दुष्टोऽसफीखान् निशितैश्च सायकैः चक्रे रणं भिल्लवनेचरैः द्रुतम् ।
भिल्लाश्च विद्यानिपुणाः शिलीमुखैः पुङ्खानुपुङ्खैः शरवृष्टिमानयन् ॥ ३३

तस्मिन् शराच्छादितसंगरे तदा पञ्चत्वमाप्ताः बहुतुर्कसैनिकाः ।
भानुश्च खण्डादिनृपाः महीतले सुप्ताश्च तुर्काः शमनस्य सद्मनि ॥ ३४

वीक्ष्याशु सर्वं रणरङ्गमर्जिताः कृष्णादयश्चाक्बरसैनिकान् परम् ।
संजृम्भ्य सिंहा इव वक्रचालनैः तुर्कीयवीरान् ग्रसितुं प्रचक्रमुः ॥ ३५

सिंहांश्च तान् क्षत्रियवंशजन्मिनः व्याधा इवासन् मृगया विनोदिनः ।
तुर्कीयसैन्याः शरपातवर्षणैः चक्रुः प्रहारैः विकलाङ्गराजितान् ॥ ३६

शस्त्रास्त्रखड्गादिविघट्टनात् द्रुतं संजातविद्युन्निचयैः परीवृतम् ।
आक्रोशरावैः भरितं महाविलं प्रावृट्पयोदाकृतिमेत्य राजते ॥ ३७

भिल्लाधिनाथो धनुषः सहस्रधा तत्याज तीक्ष्णाणि शिलीमुखानि सः ।
तैरेव नैके निहताः तदाऽरयः चाल्लेति चाक्रन्दनपूरितैः रवैः ॥ ३८

दृष्ट्वा तदार्तान् पतितान् स्ववान्धवान् श्रुत्वा खुदा चाल्लपदैः तनुत्यजः ।
अत्युष्णकीलालपरिप्लुताङ्गकैः शत्रूनकृन्तन् खरखड्गचालनैः ॥ ३९

आसीफखानः परुषैश्च वाक्चयैः राणीयसैन्यं निरतं विदूषयन् ।
नेष्यामि सर्वान् नरकं विमर्दयन् हिन्दून् दयाहीनमतिस्तु सत्वरम् ॥ ४०

दुर्भावपूर्णैः कटुशब्दसञ्चयैः नीचातिनीचैः लपनैः महारुषा ।
प्रादूषयन् राजकुलानि भारतं राणां च मित्राणि च तस्य मण्डलम् ॥ ४१

आस्ते प्रयुध्यन् बहुक्रुद्धमानसः चालोक्य नैवात्र पुरः किमस्ति च ।
विस्मृत्य सर्वं परितो यदस्ति तं राणां ग्रहीतुं सततं विचिन्तयन् ॥ ४२

अस्मिन् विघोरे तुमुले रणाङ्गणे तुर्कीयसेनाः शतधा निपातिताः ।
त्यक्त्वा प्रयातो न हि संगरं पुनः चाशापिनद्धाः प्रभवन्ति मानवाः ॥ ४३

विक्षिप्तसैन्यं ननु कृष्णभूपतिः तन्त्रेण चानीय चकार मण्डलम् ।
तन्मध्यगं तं प्रविलोक्य चासफं स्थानं तु कव्रं व्रज रे तव प्रियम् ॥ ४४

इत्यादिवाक्यानि वदन् स्वमण्डलैः युध्यन् परं तौर्किककृन्तने रतः ।
क्षणे क्षणे क्षीणदशां च वाहिनीं दृष्ट्वाऽऽसफीयं युगपत् स भूपतिः ॥ ४५

संभाव्य तं योधवरं प्रभाविनं वैचित्र्यपूर्णं समयं विलोक्य च ।
सर्वान् दिदेशाशु सशस्त्रराजितान् हन्तुं च तूर्णं युगपत् प्रहारकैः ॥ ४६

सर्वे तदा तेजितखड्गधारिणः संदर्शयन्तो रणरङ्गपाटवम् ।
संहत्य केचित् स्वकुठारचालनैः प्रपातयन् चासफखानयोधकम् ॥ ४७

काष्ठं यथा भेदयति प्रहारकः तद्वत् तदा भिल्लवरः तमासफम् ।
धाराविराजत्प्रखरेण भीकरं सद्यः कुठारेण विभेद निर्दयम् ॥ ४८

अन्ये च सर्वे स्वकुठारचालनैः एकैकशः छिन्नविभिन्नदैहिकम् ।
कृत्वा तदानीं तमसीफखानकं हाहारवैः रेजुरमन्दतोषणैः ॥ ४९

दृष्ट्वाऽऽसफीखानवधं विदारुणं सर्वे च तुर्कीयभटाः सहस्रशः ।
ते कान्दिशीकाः सभयं विदुद्रुवुः दिल्लीयमार्गेषु विकम्पिता भिया ॥ ५०

शिष्टाश्च सेनाः सहसा समेत्य तं तुर्कीयराजं प्रणिपत्य सादरम् ।
वृत्तं समस्तं बहुचित्रितैः नवैः काव्यं पदार्थैः सरसं विनिर्ममुः ॥ ५१

दुःखाग्निसंज्वालितचित्तभासुराः जन्ये कथं चासफखानकृन्तनम् ।
संजातमित्यर्थपरीतभाषणैः आवेदयामासुरमुं धराधिपम् ॥ ५२

प्रोद्गीरितं सर्वमुदन्तसञ्चयं श्रुत्वाऽक्षरो दुःखविदग्धमानसः ।
वृत्तं च सर्वं हि खुदाप्रकल्पितं चिन्ता न कार्या खलु यद् गतं गतम् ॥ ५३

शत्रुः परं काननमित्रमण्डलैः कान्तारवासी च विमर्दने रतः ।
कष्टेऽपि सोऽवर्धत एव गौरवे दैवं नितान्तं परिरक्षतीह तम् ॥ ५४

अक्षीणशक्त्या लसति प्रतापवान् रणाप्रतापः प्रियमित्रमण्डलैः ।
व्यूहाननेकान् प्रविकल्प्य संगरे मामेव जेतुं यतते स भूपतिः ॥ ५५

अन्यायमार्गेण मदीयसैनिकान् जघ्नुश्च शारीरकशान्तिसंयुतम् ।
एकाकिनं चासफखानसाहिवं काका यथोलूकवधं प्रकुर्वते ॥ ५६

विनतान् योधान् शतधा चोक्त्वा लसितं राणां बहुधा स्तुत्वा ।
असफं खानं विनुतं गीत्वा समरे पतितान् गतवान् नत्वा ॥ ५७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे ' आसफखानस्य वधः '
नाम षष्ठः सर्गः समाप्तः ॥]

सप्तमः सर्गः ।

७. फरीदखानस्य वधः ।

शत्रुं बलवन्तं मत्वा बहुधा दुःखतप्तोऽक्बरः नूनम् ।
मरणेनासफखानस्य च विचारमग्नः सः ॥ १

अभूत्वा निष्क्रियोऽक्बरश्च फरीदखानं प्राहिणोत् योद्धुम् ।
राणासार्धं कानने तु ससैन्यं सत्वरम् ॥ २

तुरगदन्तिपदातिभिः सः योद्धृभिः महाबलाढ्यैः सशस्त्रैः ।
फरीदखानस्तु सहसा च प्रतस्थे काननम् ॥ ३

शनैः शनैः संजग्मुः ते दिल्लीत उदयसागरपर्यन्तम् ।
यत्र राणा वसति सौख्ये पिपीलिका इव खलु ॥ ४

आगतं फरीदखानं तु झंझामारुतवत् ते राणीयाः ।
अभिमुखं जग्मुः सशस्त्राः स्वागतमाहर्तुम् ॥ ५

रणभिक्षार्थमागतान् नैवात्यजन् राणीया सश्रद्धम् ।
भिक्षां तेभ्यः दातुं ते हरिहरेति याताः ॥ ६

सेनयोरुभयोर्मध्ये तु तुमुलं जन्यमजनि महाभयदम् ।
घातिताश्च हाहाकारैः पेतुश्च शत्रवः ॥ ७

कृष्णश्यामसिंहादयः शत्रुनिवहं शाककृन्तनवत् ते ।
कुर्वन्ति शतशः खण्डितान् प्रापयन्ति याम्यम् ॥ ८

केचन वीरपानमत्ताः नैके सीधुपानरक्तनयनाश्च ।
अन्ये च मैरेयदृप्ताः वशिकयाऽपि केचन ॥ ९

विषशास्तुरगारूढास्ते नैके सीधुपानेन घूर्णिताश्च ।
योद्धुं तुर्कीयास्तु ययुः प्रतापस्य पुरतः ॥ १०

परस्परं मुष्टामुष्टि च बाहाबाहि खड्गाखड्गियोधाः ।
विस्मृत्य च जगत् सर्वं ते युध्यन्तश्चासन् ॥ ११

खड्गाश्च भान्ति कन्धरेषु पुष्पहारा इव बहुरागरञ्जिताः ।
मस्तकाः पतन्ति भूतले कन्दुका इव तत्र ॥ १२

हाहाकारनिनादैः रवं ध्वनितं मेघगर्जनाभीलं खलु ।
खड्गाघट्टनस्फुलिङ्गैः विभाति प्रावृडिव ॥ १३

कृपाणाघातैः समरभुवि किंशुक इव पुष्पितगात्राः पेतुः ।
केचन बहुरक्तकुल्यासु पतिताः विपेदुश्च ॥ १४

तुर्कयोधकाः सक्रोधं कशाघातैश्चाश्वान् ताडयन्तः ।
पादाघातैश्चोदयन्ति खलीनहस्तास्ते ॥ १५

पृष्ठपादेषु स्थित्वा हि हयाश्चोभयपक्षयोः पदाग्रैः ।
हेषापुरस्सरं क्रोधे दूषयन्ति शत्रून् ॥ १६

अरयः नितरां सक्रोधं राणाप्रतापसैन्येषु चिक्षिपुः ।
तेजितानि चारुन्तुदानि शूलानि वेगेन ॥ १७

तनुत्राणैः शूलानि ते राणाप्रतापीयाः सहेलं खलु ।
मोधितानि विधास्यन्तश्च रेजुः सोत्साहम् ॥ १८

उभयसेनयोः रज्जुभिश्च केचन शत्रुकण्ठान् बध्वा चाशु ।
आकृष्य पातयन्ति रणे शत्रून् च निर्दयाः ॥

एवं भयदसंग्रामे च कस्य जयो भविष्यति निर्णेतुमपि।
अशक्यमभूत् सर्वेषां हि वर्तिष्यमाणं च ॥ २०

कर्कशकरवालाघातैः तुर्काः पातयन्ति राणासैन्यम्।
विकलाङ्गसंराजितं तत् चाक्रन्दनाच्चं हि ॥ २१

राणीयाः केचन घोरं शरवर्षेण च तुर्कीयान् पातयन्ति।
अल्लाऽऽक्रोशमृतान् तूर्णं सहेलं रणसीम्नि ॥ २२

राणाप्रतापः शूरश्च महान् सोऽक्बरात् श्रेष्ठश्च भारते।
इति श्रुवन्तः तुर्कीयाः मृताश्चाक्रोशैश्च ॥ २३

केचन प्रतापीयाः द्रावयन्तोऽक्बरसैन्यान् दूरं तु।
परिभ्रमणयुद्धं विधाय तुर्कान् मारयन्ति ॥ २४

अन्ये परान् गिरिकन्दरान् प्रापय्य छलेन हयेभ्यः तुर्कान्।
पातयित्वा शूलैः भृशं व्यापादयन्तीह ॥ २५

युद्धं तुमुलं बहुभयदं भवति निर्विरामं सागरतीरे।
भूमिर्मग्ना रक्तोदधि रञ्जितेवाभाति ॥ २६

पदातयः विविधचालनैः संडीनैर्वियत्तले चलन्तः।
उर्व्यां स्तोकं तिष्ठन्तः शत्रून् घ्नन्ति रणे ॥ २७

उभयपक्षमरणसंव्याप्तरक्तरञ्जिता धरित्री दृश्यते।
विरागिणीव प्रपञ्चेऽत्र कामं स्वजीवने ॥ २८

कृपाणाघातस्यन्दितैः शरीरास्रङ्निचयैः वीरास्तत्र।
वीरगन्धसुलेपिता इव व्यराजन्त कामम् ॥ २९

केचन खं पश्येत्युक्त्वा पश्यतः शत्रून् खड्गाघातैः भृशम्।
खण्डयित्वा सोत्साहं च नर्तिष्यन्ति साधु ॥ ३०

परे मुष्टियुद्धं कृत्वा तालुस्थानेषु गण्डस्थलेषु च ।
ताडं ताडं सक्रोधं परान् मारयन्ति ॥ ३१

सोद्धूतं प्रताडयन्तश्च चोत्प्लुत्योत्प्लुत्य पादाघातैश्च ।
परान् सक्रोधं रणे ते गतासून् कुर्वन्ति ॥ ३२

अल्लां नेष्यामि त्वामपि श्मश्रुमार्जनेन चोरुताडनेन ।
पश्येति ब्रुवन्तस्तत्र संहरन्ति शत्रून् ॥ ३३

खुदां नमस्कुर्वन्त्विति ते चान्ये निष्ठुरं केचन भणन्तः ।
शूलाघातैः तान् सर्वान् मारयन्ति क्षणे ॥ ३४

श्यामसिंहः तत्रागत्य हयोपरि प्रचारं विधाय चाशु ।
सैन्यानादिदेश कामं शत्रून् हन्तुं तान् ॥ ३५

तं फरीदखानं परितः त्रिशूलयुतकराः राणीयास्ते :
आवेष्टनं विधाय भृशं चक्रभ्रमणैस्तम् ॥ ३६

शूलाघातैश्च शरीरं तितउसमं विधाय फरीदखानस्य ।
काका इव तं रटन्तश्च संहत्य विजघ्नुः ॥ ३७

व्यापादितं च तं विलोक्य तुर्कीयाः काचस्फोटमिव दिक्षु ।
व्यासाश्च दुद्रुवुः भीत्या दिल्लीपत्तनं तु ॥ ३८

क्रमशश्च शत्रवः सर्वे विनिहिताश्चास्माभिः संगरे ननु ।
जयमस्मान् ववार तथ्यं सत्यमेव जयते ॥ ३९

मुदिता बहुधा धरणीपतेः मधुरमोहननाट्यकलायुताः ।
प्रययुः लपनैः सहसा नृपाः विपिनसागरतीरमहो द्रुतम् । ४०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे 'फरीदखानस्य वधः' नाम सप्तमः सर्गः समाप्तः ॥]

अष्टमः सर्गः ।

८. अब्दुल्लाखानकासीम्खानयोः वधः ।

फरीदखानस्य वधं तु सैनिकात् निशम्य तुर्को बहुधा व्यथाविलः ।
शयं विनिक्षिप्य ललाटमण्डले रुरोद खिन्नस्तु विनिन्दयन् नृपम् ॥ १

प्रतापभूप त्वमसि प्रियं मम यतः त्वमत्रासि महीतले प्रियः ।
भवादृशो नास्ति धरातलेऽधुना महः तु सर्वत्र न दृश्यते खलु ॥ २

त्वदीयकाले निवसामि भारते तदेव सौख्यं मम विद्यते नृप ।
अभावसैन्येन विराजसे वने तथापि सर्वं तव वर्ततेऽधुना ॥ ३

वने वसन् त्वं बहुधाऽल्पसैनिकैः मदीयसैन्यं शमनस्य मन्दिरम् ।
विनाऽवरोधं खलु प्राहिणोः भृशं क्व तेऽस्ति शक्तिः वद राष्ट्रवन्दित ॥४

इति प्रजल्पन् विलपन् च मानसे निनिन्द राज्यं पशुशक्तिसैनिकान् ।
प्रतापराणासमवीरपूरुषो न जायते भारतसीम्नि निश्चयम् ॥ ५

इति प्रशंसन् वनचक्रवर्तिनं जुहाव तत्रैव मृगेन्द्रसंनिभम् ।
महाबलं भीमनिकायविग्रहं तमब्दुलं खानवरं स तौर्किकः ॥ ६

स चाब्दुलः खानवरः समाययौ सलामसाहस्त्रिकमाचरन् प्रियम् ।
तदीयसामीप्यतले विभास्वरं महार्हसिंहासनसंनिधिं क्षणे ॥ ७

विलोक्य तं तुर्कमहीपतिः स्वयं समेत्य तस्याग्रतलं शनैः शनैः ।
तदीयहस्तं स्वकरेण चालयन् शुभाश्च मार्गाः प्रभवन्तु तेऽनिशम् ॥८

इति प्रहर्षं मनसा शुभाशिषो
वितीर्य तस्मै निजगाद भूपतिः ।
सदाऽब्दुलाखानवरप्रभावितो
निरन्तरं मे विजयं प्रकल्पय ॥ ९

यदत्र तुभ्यं प्रविरोचते रणे
तथैव सैन्येन समाप्तिमानय ।
अदेयमत्रास्ति सुखं च कानने
प्रतापराणाय कदापि वीर ॥ १०

तदीयवाक्यं निशितं विचिन्तयन्
प्रभो विधास्ये भणितं भवत्कृते ।
इति प्रहर्षं विजयाञ्चितः प्रियं
निगद्य यातः स्वचमूचयैः क्षणे ॥ ११

अनीकिनीं चाश्वपदातिशोभिनीं
गजालिपङ्क्त्या विपुलं विसारिणीम् ।
सशस्त्रकुन्तादिसुधारिणीं कृतीं
विनीय यातः खलु खानसाहिवः ॥ १२

अरावलीपर्वतमस्तकेष्वति-
प्रकर्षरूपेण विराजते नृपः ।
इति प्रियां गुप्तचरेण भाषितां
नवां सुवार्तां खलु चाशृणोद्वली ॥ १३

इयेष गन्तुं स्वचमूवलान्वितः
शनैश्च तत् प्रान्तमसौ सुयोद्धा ।
ततः स कार्सीपदखाननामकं
वने च तस्मिन् वसितुं दिदेश हि ॥ १४

स चाब्दुलाखानवरो विनिर्गतः
शनैः शनैः चारवलीयभूधरान् ।
प्रतापराणां प्रति तत्र कानने
प्रमार्ष्टुमेवाशु चमूचयेन तम् ॥ १५

नगाग्रदेशे विचरन्तमेव तं
प्रतापराणां निग्रहीतुमाशु सः ।
ययौ सहस्राधिकवीरयोधकैः
समाचरन् चाक्वरनामकीर्तनम् ॥ १६

अरौत्सिषुस्तेऽवनभिल्लयोधकाः
तमब्दुलाखानवरं वने पथि ।
तदा समुद्भूतमहोग्रसंगरे
विमम्रुरेवात्र सहस्रयोधकाः ॥ १७

तदा प्रभूते भयदे रणे चिरं
परस्परं शात्रवकण्ठलुण्ठनाः ।
निमग्नचित्ता इव सर्वसैनिकाः
विरच्य रेजुः शमनस्य किंकराः ॥ १८

त्रिशूलिनः पादतले यथा गणाः
प्रवर्तयन्ति स्म तदीयशासनैः ।
तथैव रुद्राकृतिभाजिनस्तदा
प्रतापराणानृपतेः वनेचराः ॥ १९

निशम्य चाज्ञां खलु तत्र भूपतेः
सुतीक्ष्णशूलानि शिलीमुखान्यपि ।
प्रयुञ्जते योधवराः त्वखण्डितं
यथाऽस्त्रधाराः प्रवहन्ति खे तले ॥ २०

अजस्रशस्त्रास्त्रविनिक्षिपेण ते
चमूचये संस्थितवन्ययोधकाः ।
विपेदिरे खानवरेण्यकर्तिताः
प्रतापराणास्तवनेन पाविताः ॥ २१

समेत्य माहुः खलखानसंमुखं
वलेन शूलावलिमण्डितेन सः ।
पपात सैन्योपरि पर्वताकृतिः
निषूदयामास च खानवाहिनीम् ॥ २२

प्रतापराणासममेत्य योधकाः
कुशाग्रशूलानि निचिक्षिपुस्तदा ।
तदीयशूलावलिवेष्टनेन सः
पपात खानः सहसा धरातले ॥ २३

तदा धरण्यां पतितं च साहिवं
विलोक्य खानोः गहनीयमण्डलम् ।
करे विराजत्खरशूलसञ्चयैः
अकुट्टयन् दैर्घिकपीवरं तनुः ॥ २४

विजग्मुराशासहिताश्च तौर्किकाः
वने च काशीनिकटं सशस्त्रिणः ।
तदैव तत्रापि च खानकासिमः
प्रयुध्यमानः प्रविलोकितः क्षणे ॥ २५

भवत्यमोघं भयदं महारणं
भृशं नु मध्ये खरवीरयोस्तदा ।
कसीमखानस्य च कृष्णसिंहयोः
अखण्डितत्वेन वनस्थलीषु च ॥ २६

त एव चात्रापि कसीमयोधकैः
समं मिलित्वा नवशक्तिभासुराः।
प्रतापराणाबलमाशुशाश्वतं
समाधिगं कर्तुमहो व्यचिन्तयन्॥ २७

स कृष्णसिंहस्तु तदा प्रवर्तते
रणाङ्गणे व्याघ्र इवातिविक्रमी।
भृशं नु तुर्कीयभटास्तु सत्वरं
लसन्ति व्याधा इव तं जिघांसवः॥ २८

प्रतापराणाऽपि सचेतको रुषा
समेत्य कृष्णाय ददौ शयं तदा।
विरेजतुस्तौ बलभद्रकृष्णवत्
रणाङ्गणे शत्रुभयङ्करौ यमौ॥ २९

समीक्ष्य राणां ननु कासिमस्तदा
सरोषसंवर्धितरक्तपीडनः।
विजृम्भयामास तदीयसैनिकैः
विनाऽवरोधं च निहन्तुमेव तौ॥ ३०

कृपाणहस्तश्च कसीमसाहिवः
खलीनमागृह्य हयं प्रचोदयन्।
इतस्ततश्चाशु चरन् स्वगर्जनैः
विकर्तयामास नरेन्द्रमण्डलम्॥ ३१

ह्रसिष्णुतां प्राप्तवतीं स्ववाहिनीं
प्रतापराणा प्रविलोक्य सत्वरम्।
तदीयहस्तात् निशितं च दैर्घिकं
त्रिशूलशूलं चपलं महाभुजः॥ ३२

ससर्ज शत्रौ विलपन् स कासिमः
पपात चाश्वोपरि संस्तुवन् प्रभुम् ।
तदैव सर्वे नृपवीरयोधकाः
व्यसर्जयन् तीक्ष्णशरांश्च साहिवे ॥ ३३

पपात कासीम स खानसाहिवो
विखण्डितस्तालसमो महीतले ।
रटन् महाक्रोशयुतैः स्वरैः यथा
श्रुतं च गव्यूतितलान्तरेष्वपि ॥ ३४

महारणे चात्र नृपालमण्डलं
महोग्रकासीमचमूचयं भृशम् ।
कृतं विनष्टं च सहस्रसंख्यया
द्वयोश्च संजातमपारनाशनम् ॥ ३५

सुरक्षिता ये विचरन्ति संयुगात्
त एव दिल्लीं सहसा पलायिताः ।
परे च केचित् पथि रोगपीडिताः
विपेदिरे कर्दमभूम्नि पातिताः ॥ ३६

कसीमखानस्य वधार्थमेव हि
नृपालवंशीयकुमारमण्डलम् ।
रणाहुतिं प्राप्य जयं ददुः प्रियं
प्रतापराणाय चिरन्तनं यशः ॥ ३७

निरस्तशत्रुं प्रविधाय राजकं
ननाट संतोषभरेण कानने ।
विलोक्य तन्नाट्यविधानमाशु सो
बभाण राणा बहुभावभूषितः ॥ ३८

किमर्थमेवं बहुधा विनर्तने
रताः भवन्त्यत्र नराधिपा वने।
इयं हि नान्दी भवतीह संयुगे
लसन्ति चाङ्काः बहुधाऽत्रनाटके ॥ ३९

न कोऽपि जानाति च वीरसंयुगे
महाद्भुते भारतसीम्नि योजिते।
समस्तमस्माभिरहो सुनट्यते
जयस्तु कं याति पराजयस्त्विह ॥ ४०

श्रुत्वा तदीयं वाक्यं तु प्रोचुः सर्वे धराधिपाः।
जयोऽस्तु सर्वदा पक्षे चास्मदीये विभाति भोः ॥ ४१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे 'अब्दुल्लाखानकासीम्खानयोः वधः' नाम अष्टमः सर्गः समाप्तः ॥]

नवमः सर्गः

९. फिरोजखानस्य अपि च षाबाजखानस्य वधः।

श्रुत्वा वधौ तस्य महाऽब्दुलस्य काश्मीमखानस्य च संगरेषु।
खिन्नः स तुर्को भयविह्वलः सन् शब्दं जयं विस्मृतवान् स्वराज्ये ॥ १

तुर्काधिपो वन्यजनालिशक्तिं ज्ञात्वा तदीयाप्तचमूचयस्य।
संचालकस्यात्मजयोधकाञ्च संभ्रान्तचित्तः स विचारमग्नः ॥ २

उद्गीर्य खिन्नः सहसा दिदेश प्रज्ञायुतौ सङ्गरसीम्नि योधौ ।
फिरोजषावाजयमौ च खानौ राणां विजेतुं सुगदाधरौ तौ ॥ ३

तौ योधकौ स्यन्दनमास्थितौ तं सैन्यं महातुर्कधराधिपस्य ।
नीत्वा सहायं गजवाजियुक्तं संजग्मतुः सात्पुडपर्वतालिम् ॥ ४

विश्रान्तिमाप्त्वा च तदीयसैन्यैः राणां विजेतुं बहुयत्नमग्नौ ।
व्यायामलग्नं च तदीयसैन्यं कृत्वा विसंरेजतुरद्रिसानौ ॥ ५

राणां ग्रहीतुं नवमन्त्रतन्त्रैः रेखासु मार्गं प्रविधाय सम्यक् ।
एनं कथं स्वीयवशं विधातुं कुर्याव यत्नानिति तौ तपन्तौ ॥ ६

स्वेच्छाविहारे मदमत्तचित्तौ दृष्टौ तथा गुप्तचरेण राज्ञः ।
गोप्येन चारः सहसा प्रधाव्य राणाप्रतापाय जगाद सद्यः ॥ ७

दृष्टं च यत् तत्र नगेन्द्रसानौ सैन्यं महाभीमगदाधरौ तौ ।
व्यायाममग्नां महतीं चमूं च सुचित्ररूपं लघुवर्णयुक्तम् ॥ ८

राणाप्रतापः सहसाऽत्मबन्धून् आहूय कर्तव्यमसौ जगाद ।
तूर्णं गदायुद्धविशारदं च तं प्राहिणोत् भीकरभीमचन्द्रम् ॥ ९

अद्यावधिस्तत्र गदाधरस्य भीमाभिधानस्य गदायुधस्य ।
चन्द्रस्य कुत्रापि सुयोग्यकालः नैवागतः संगरसीम्नि पूर्वम् ॥ १०

तं भीमचन्द्रं सहकृष्णसिंहं संप्रेष्य युद्धाय च सात्पुडाद्रिम् ।
राणाप्रतापः सह चेतकेन मित्रैः समेतः प्रययौ च पश्चात् ॥ ११

दध्मौ स्वशङ्खं स च भीमचन्द्रः परालिचित्तं बहुभीतिपूर्णम् ।
संकर्तुमस्मिन् विपिने विकीर्णं युद्धाय सन्नद्धममुं फिरोजम् ॥ १२

आकर्ण्य शङ्खध्वनिमत्र शान्ते कान्तारदुर्गालिपरीतदेशे ।
फीरोजखानश्चकितः सवेगं षावाजुखानेन रणार्थमेव ॥ १३

धृत्वा गदां भारभरेण युक्तां भीमाकृतिं प्राप्य रुषा परीतः ।
कुत्रास्ति राणा वद रे दरिद्र तं प्रापयेयं यमसद्म तूर्णम् ॥ १४

नास्त्येव युद्धे भवतो जयस्तु चान्विष्यमाणो व्रजसीह मृत्युम् ।
नैवासि शक्तश्च पुरीं प्रयातुं देवं समाराधय मूर्ख भूपते ॥ १५

इत्येवमुच्चैः प्रवदन् स जाल्मः सानुप्रदेशादवतीर्य सैन्यैः ।
तं भीमचन्द्रं नितरामरौत्सीत् महाट्टहासं प्रविधाय घोरम् ॥ १६

हासेन तस्याखिलकाननं तु भूत्वा प्रहासावृतमेव पूर्णं ।
खानं विहस्यैव कठोरचित्तं त्वामेव मृत्युः समुपैति मूर्ख ॥ १७

इत्येवमुक्त्वा प्रखरं विरेजे पैशाचसंघावृताचित्तसद्म ।
राणाप्रतापाय शुभाशिषस्तु दत्वा प्रकामं मनुजाधिपाय ॥ १८

तूर्णं च सैन्याः उभयोः समक्षं स्थित्वाऽतिघोरं समरं विचक्रुः ।
अन्योन्यखड्गावलिपातनेन छिन्नाश्च योधाः गलिताः पृथिव्याम् ॥ १९

फीरोजखानः सहसा गृहीत्वा गुर्वीं भुजाग्रे स्वगदां बलेन ।
शत्रून् परास्तान् प्रविधातुमेव चालोडयामास गदां तु शून्ये ॥ २०

तत्रैव तस्मिन् चलने भटाश्च राणीयवर्गाः बहुधा मृताश्च ।
अश्वास्तु दूरं दधुवुश्च तूर्णं भिन्नं विजातं बहुधा च जन्यम् ॥ २१

अत्रान्तरे पार्श्वत एव राणा सचेतकश्चास्य पुरः समाययौ ।
दृष्ट्वा तदीयं कटुरुद्ररूपं षाबाजखानः स्वभटैरयुध्यत ॥ २२

अश्वोपरिस्थैः भटयोधवर्गैः दन्तावलिस्थैः यवनैश्च योधकैः ।
वृत्तं तु जन्यं भयदं महाद्भुतं कोलाहलैः हेषचयैः च घींकृतैः ॥ २३

तीक्ष्णैरनेकैः शरवृष्टिपातैः प्रावृट्कृतं पर्वतमस्तकेषु ।
सस्राव रक्तं तु शिलोच्चयेषु युद्धे मृतानां तनुपल्वलेभ्यः ॥ २४

भीमस्तु सर्वं प्रविलोक्य चान्ते नीत्वा गदां पर्वतसानुमेत्य ।
उत्प्लुत्य चोत्प्लुत्य जवेन शून्ये खानं तु चक्रे पटुकम्पिताङ्गम् ॥ २५

फीरोजखानस्तु गदाप्रहारैः संचूर्णयामास नृपालिवर्गम् ।
क्रुद्धः स भीमः सपदं स्वमित्रैः खानस्य सैन्यं विकलं चकार ॥ २६

एकत्र राणा बहुरुद्रमूर्तिः षाबाजुखानेन समं प्रयुध्यन् ।
तुर्कीयसैन्यान् शकलांश्चकार नानाविधैः सङ्गरनीतिमार्गैः ॥ २७

फीरोजखानेन च भीमकृष्णौ षाबाजुखानेन समं प्रतापः ।
स्वीयैः महायोधवरैश्च सार्धं युध्यन्ति घोरं तनुभावहीनाः ॥ २८

अर्धक्षणं सङ्गरसीम्नि योधाः रक्तेन सिक्ताङ्गविराजमानाः ।
आक्रोशमाणाः सपदं पतन्ति संस्तूयमानाः स्वधराधिपं तु ॥ २९

कस्यास्ति तथ्यं विजयस्तु कोऽपि जानाति नैवाखिलभीमयुद्धे ।
सर्वोऽपि संचिन्तयतीहया तु स्वात्मानमेवात्र जयो वृणीते ॥ ३०

एतादृशे भीकरसंगरेऽपि क्लैब्यं भजत्येव न च प्रतापः ।
आकर्ण्य पाण्डित्यममुष्य लोके वीराः भवन्त्येव नतोत्तमाङ्गाः ॥ ३१

एकप्रहारेण लुनाति कण्ठं चालाबुशाकानिव कर्ततेऽङ्गम् ।
सिद्धं करोत्यत्र समस्तशाकान् कालस्य गेहे खलु पाचनाय ॥ ३२

रात्रिंदिवं कारितघोरसंगरे योधाः विपक्षस्य मृताश्च नैके ।
राणां वृणोतीव जयस्तु तथ्यं संदृश्यते भाविंतमेव सर्वैः ॥ ३३

कल्ये स भीमः विविधैः प्रकारैः युध्यन् प्रभूतैः स्वगदाप्रहारैः ।
बीभत्समेवात्र चकार सैन्ये चाखण्डयन् खानबलं महान्तम् ॥ ३४

अत्रान्तरे भीमसहायभूताः भिल्लास्तु बाणैः परपक्षयोधान् ।
संपातयामासुरजस्रयत्नैः मन्दो बभूवाखिलसङ्गरस्तु ॥ ३५

आगत्य खानस्य पुरस्तु भीमः तस्थौ कृतान्ताकृतिवत् सरोषम् ।
मध्ये द्वयोः भीकरयुद्धमेव वृत्तं गदाघट्टनजातशब्दैः ॥ ३६

चञ्चद्भुजभ्रामितवेगयुक्तद्राघिष्ठभारात्तगदाप्रहारैः ।
संवीक्ष्य कालं स च भीमचन्द्रः खानस्य वक्षस्थलमारकोऽभूत् ॥३७

तेन प्रहारेण फिरोजखानः चाक्रोशपूर्वं सपदं धरण्यां ।
द्राघिष्ठतालाकृतिवत् पपात शब्दायमानं प्रविधाय शून्यम् ॥ ३८

श्रुत्वा च तत् क्रन्दनमाशु तत्र षाबाजखानोऽपि गदाधरः सन् ।
भीमेन सार्धं युयुधे महोग्रं पञ्चत्वमातश्च गदाप्रहारैः ॥ ३९

सहसा परिशिष्टयोधकाः निजवाजीरयमेत्य देहलीम् ।
प्रणिपत्य वधं तु खानयोः मुगलायीं जगदुश्च भूपतिम् ॥ ४०

[इति श्रीमत्प्रतापरागायन-महाकाव्ये अरण्यकाण्डे ' फिरोजखानस्य अपि च षाबाजखानस्य वधः ' नाम नवमः सर्गः समाप्तः ॥]

दशमः सर्गः ।

१०. अष्टकष्टपरिवेष्टितः प्रतापः ।

वसन् वने शत्रुविमर्दनं तु विधाय राणा परमुत्सुकोऽभूत् ।
इतः परं शत्रुविदारणेन जयो भवेदेव हि भारतस्य ॥ १

वयं तु सर्वे सहकारबुद्ध्या स्वतन्त्रदेशं प्रविधातुमेव ।
परस्परं स्नेहपरीतभावैः इयन्तमेवं विशदं प्रकुर्मः ॥ २

शनैः स्वमित्रैः चलितः स्वगेहं कथाप्रसङ्गान् बहुलान् विकुर्वन् ।
अजस्रसंग्रामविचूर्णगात्रः श्रमान् विनेतुं यतते स्म राणा ॥ ३

प्रियः सुखः शीतलगन्धवायुः नभस्थले नीरदपङ्क्तिभिश्च ।
वहन् मनोज्ञः बहुधाऽनुकूलः समस्तविश्वाय ददाति तृप्तिम् ॥ ४

अचेतनं चेतनमत्र कर्तुं स शीकराम्भःकणचारुरूपः ।
अनुक्षणं वर्षति शीकरैश्च पयोधरो हृष्ट इवास्य कृत्यैः ॥ ५

तदा विलोक्यैव च वर्षमूर्तिं ऋतुं ननामार्द्रमनाः प्रतापः ।
बभाण शान्तं जलदप्रियोऽसि समस्तलोकस्य महाप्रभो त्वम् ॥ ६

त्वदीयधाराप्रसृतैः जलैश्च सुशीतलैस्तैः करकैः नितान्तम् ।
परालिगात्रस्रुतरक्तसिक्तां वसुन्धरां त्वं विमलां करोषि ॥ ७

नमोऽस्तु ते जीवनदातृमेघ भवेच्च सुस्वागतमत्र लोके ।
इति प्रजल्पन् बहुसिक्तगात्रः प्रपूतदेहेन जगाम सद्म ॥ ८

व्यतीतमेवं खलु कालचक्रं अनेकवर्षक्रमचक्रयानैः ।
प्रतापराणास्थितिरेव जाता दारिद्र्यरेखावलयावृताऽत्र ॥ ९

न सन्ति कुत्रापि च पातुमापः विलूनपर्णा अफलाश्च वृक्षाः ।
ततः प्रतस्थे स्वकुटुम्बसार्धं स्थलान्तरं जीवनरक्षणार्थम् ॥ १०

पदे पदे शत्रुनिरीक्षणेन प्रतिक्षणं शत्रुविनाशनेन ।
निरन्तरं स्थानविपर्ययेण स्वजीवितं यापयति प्रतापः ॥ ११

न विद्यते शान्तिरिहेति राणा शनैश्च कैल्वारनगालिमाशु ।
सुखेन तीर्त्वा कुशलीं जगाम महोन्नतं कुम्भलदुर्गमेव ॥ १२

यथा च वल्मीकमुखे विभान्ति
पिपीलिकाः पङ्क्तिगतास्तथैव ।
क्षणे समैक्येन च यावनास्तु
सुपङ्क्तिगाः तान् बहुधा त्वरुन्धन् ॥ १३

तदा शतघ्नीचयमेव तत्र
सुयोगमापाद्य धनंजयेन ।
अनन्तविध्वे बहुनादितं च
विनाशयामास नृपस्य सेनाः ॥ १४

प्रतापराणाऽनुचरास्तु गाढं
सुतप्ततैलानि विवर्षयन्ति ।
महोग्रदुर्गस्य समस्तभागात्
वितप्तदेहान् मुगलान् विधातुम् ॥ १५

प्रपाततैलेन वितप्तदेहाः
पदातयो भूमिपतेऽक्वरस्य ।
तदैव पञ्चत्वमवापुरत्र
निरन्तराक्रन्दनभूमिपातैः ॥ १६

विलोक्य सैन्यस्य दशां विभीतः
स खानसाहेब्च धराधिपस्य ।
कुदेवराधेन समं च सन्धिं
विधाय कूपेषु विषं ससर्ज ॥ १७

अहर्मुखे चामृतपानसक्ताः
प्रतापयोधाः सलिलं निपीय ।
तदाऽत्र दुर्गस्य विहारकूपे
विपेदिरे तत्क्षणमेव नैके ॥ १८

विलोक्य तन्मारणकर्म दुर्गे
वयं च शिष्टाः जलपानसक्ताः ।
निपीय कूपे जलमत्र तथ्यं
गच्छेम पञ्चत्वमहो शृणुध्वम् ॥ १९

स भानुरुद्घाट्य गवाक्षमार्गं
परानरौत्सीन्निपुणं तदानीम् ।
भृशं नु संसिद्धमहाप्रवाहैः
युतिं प्रपद्यात्र भटीयसैन्यैः ॥ २०

नृपस्य योधाः प्रविदारयन्ति
परस्य योधान् निभृतं कृपाणैः ।
भवन्ति चाल्पाः यवनस्य योधाः
इनस्तु चास्तं व्रजते सरागम् ॥ २१

समागताः यावनराजयोधाः
नवीनशक्त्या महिताः सशक्ताः ।
अनन्तशस्त्रास्त्रपरीवृताश्च
परं विरेजुः जयसूचकास्याः ॥ २२

यमस्य जिह्वासदृशेन तथ्यं
कृपाणहस्तेन स मानसिंहः ।
प्रयुध्यमानः परयोधकण्ठान्
विलूय राशिं कुरुते सरोगम् ॥ २३

रणे प्रभूते बहवो नृपालाः
यमस्य गेहं सयुताश्च जग्मुः ।
अनर्घरूपाः सकलाश्च दुर्गाः
पराधिपस्याशु वशं गताश्च ॥ २४

स कुम्भदुर्गे सहसा प्रपेदे
परस्य हस्तं ननु कालदोषैः ।
विरेजिरे चन्द्रकलापताकाः
विलोक्य भूपान् विकटं हसन्तः ॥ २५

तथैव सर्वे विपुलाश्च दुर्गाः
सदोदयो नाम सुदुर्गराजः ।
बृहत्तमो मङ्गलमत्स्यदुर्गः
गताश्च नैके रिपुराज्यमेव ॥ २६

कुमारिकाभिः गहने चतुर्भिः
सुपुत्रकैः अष्टभिरेव युक्तः ।
सुकन्दमूलैः वनघासयुक्तैः
अपूपखाद्यैः दिवसान् निनाय ॥ २७

फलानि पक्वानि समाहृतानि
विन्यस्य राज्ञः पुरतश्च भिल्लः ।
भुनक्तु राजन् सुखतृप्तिभावैः
इति प्रहर्षं कथयन् जगाम ॥ २८

फलस्य चैकस्य विभागमेकं
मुदा गृहीत्वा रसपूर्णमत्वा ।
फलानि कृष्णाय वितीर्य भूपः
सुखेन सर्वे मधुरं त्वदन्तु ॥ २९

इति प्रियं सादरमेव चोक्त्वा
प्रशान्तभावैः विभरांबभूवे ।
परं प्रियं सर्वफलानि चाप्त्वा
भृशं ननन्दुः सकलाश्च भूपाः ॥ ३०

सुखेषु ये यादृशभावयुक्ताः
तथैव दारिद्र्यदशासु सर्वे ।
विकारभावाननवाप्य शान्तं
विराजिताः भूपतिपाददेशे ॥ ३१

प्रतापभूपं सदृढं तु बद्ध्वा
हृतं ग्रहीतुं यवनाश्च सक्ताः ।
पराक्रमी शात्रवदर्पहारी
प्रतापराणा सुलभो न चासीत् ॥ ३२

नवीनसैन्यैः यवनान् सहेलं
स वीरवलो नाम नराधिपस्य ।
सुहृद्वरो यावनसैन्यजालं
पथि प्रकर्षेण जघान सर्वम् ॥ ३३

समाययौ तत्र समस्तसैन्यैः
पितुः समीपं तु स चामरस्तु ।
बभूव युद्धं तुमुलं च सैन्ययोः
प्रतापराणाऽरिबलान् प्रहन्ति ॥ ३४

मदप्रपूर्णान् यवनान् प्रकामं
पिताकुमारौ कुरुतश्च खण्डान् ।
समेत्य कृष्णः सहसा स्वभूपं
जगाद रात्रिः भयदा विभाति ॥ ३५

गृहे तु राज्ञी वसति स्वपुत्रैः
सुखेन संगच्छतु ते कुटुम्बम् ।
अहं तु शत्रून् यमगेहभाजो
विधाय यास्यामि न ते विचारः ॥ ३६

तदा प्रतापो गृहमेत्य सर्वान् बुभुक्षितान् सः स्वपतो विलोक्य ।
भृशं विनिश्वःस्य विचारमानसो निनाय रात्रिं शिवरात्रितुल्याम् ॥३७

यदा यदा स्वीयकुटुम्बसार्धं स्वभोजनं कर्तुमवस्थितोऽस्ति ।
तदा तदा यावननव्ययोधाः प्रयोद्धुमेवात्र समाययुश्च ॥ ३८

विहीननिद्रालसितश्च रात्रौ दिने विना भोजनमेव योधैः ।
प्रयुध्यमानो विपिने वसन् च स्वजीवितं यापयति स्म कष्टैः ॥ ३९

स्वातन्त्र्यं भारतस्यास्य प्राप्तुकामो दिवानिशम् ।
अष्टकष्टैः समायुक्तः परान् जेतुं समीहते ॥ ४०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये अरण्यकाण्डे ' अष्टकष्टपरिवेष्टितः प्रतापः ' नाम दशमः सर्गः समाप्तः ॥]

एकादशः सर्गः ।

११. प्रतापसिंहावलोकनम् ।

पूर्वाह्णे सैनिकाः सर्वे कृष्णसिंहेन संयुताः ।
भीमचन्द्रादिमित्रैश्च प्रतापं द्रष्टुमागताः ॥ १

प्रतापस्य समक्षं ते समाविष्टाः प्रहर्षिणः ।
वक्ष्यमाणप्रकारेण तान् दृष्ट्वा सपदं नृपः ॥ २

जगाद करुणाऽऽकृष्टः सर्वे यल्लाश्च संगरे ।
अस्मदीया भवन् तथ्यं विफलाः सर्वतोमुखाः ॥ ३

न क्रुध्यतीह देवोऽपि वान्धवाः राजपुत्रकाः ।
साहाय्यं नैव कुर्वन्ति राष्ट्रस्वातन्त्र्यसिद्धये ॥ ४

ह्यस्तनोऽयं प्रदेशस्तु सैन्येन परिभूषितः ।
श्मशानं साम्प्रतं जातः सुन्दरा युवकाः हता ॥ ५

राजा च रामचन्द्रोऽपि मदर्थं त्यक्तजीवितः ।
अहं तस्मै ऋणी जातः नैव किञ्चित् कृतं मया ॥ ६

चतुर्दशीयवर्षीयः खण्डेराजोऽपि निद्रितः ।
मनःसिंहः तथा तस्य सोदरो नैक वान्धवाः ॥ ७

संग्रामाग्नौ परैः सर्वैः शलभा इव दाहिताः ।
वराः कुमाराः सर्वेऽपि श्मश्रुरेखासमञ्चिताः ॥ ८

अत्र संग्रामनाट्यस्य कृतः प्रारम्भ एव हि ।
अङ्काः कति भविष्यन्ति नैव जानाति कोविदः ॥ ९

माहात्म्यमेकलिङ्गस्य सर्वथा शास्ति भारतम् ।
भाति सर्वं च तस्यैव कृपावीक्षणमण्डितम् ॥ १०

शत्रुहस्तं गताः सर्वे दुर्गाः नैकाश्च सुन्दराः ।
राशयः सर्वसम्पत्तेः शून्या जाताश्च साम्प्रतम् ॥ ११

शान्त्या च वसनं राष्ट्रे शक्यं भवति नैव हि ।
वैरिसेनाः प्रवर्धन्ते युद्धानि च दिने दिने ॥ १२

अस्मान् विजेतुं तुर्कोऽसौ फलवृक्षान् च कानने ।
छेदयामास दुष्टात्मा क्रौर्येणाऽसह्यभावनः ॥ १३

दुष्टोऽयं तुर्कभूपालः जेतुमस्मान् बलेन च ।
नैकोपायैः महारण्यं कृतवान् विषपूरितम् ॥ १४

अस्मभ्यो भीतचित्तोऽसौ द्रुतं षावाजुसाहिवः।
देवराधिपमित्राय धनं दत्त्वा चकार च ॥ १५

संधिं शत्रुविनाशाय प्रवृध्यै स्वीयभूपतेः।
आत्मसंरक्षणार्थाय शाश्वतं मैत्रिसंयुतम् ॥ १६

स एव राक्षसः तूर्णं अर्धरात्र्यां तु कानने।
दुर्गेषु विद्यमानेषु कूपेषु गरलं शनैः ॥ १७

निक्षिप्य सर्वपानीयं कृत्वा च विषसन्निभम्।
निर्जगामेति मत्वाऽहं बहुधा खिन्नमानसः ॥ १८

देवराधिपतिः सर्वान् कण्ठान् शान्त्याऽन्यकृन्तत।
सिक्तवस्त्रेण दुष्टोऽसौ योदृग्घृणां कानने वत ॥ १९

पिपासार्दितयोधास्तु कूपकासारकश्मलं।
जलं पीत्वा मृताः सर्वे नाशोऽस्माकं सदाऽजनि ॥ २०

अत्र संजातसंग्रामे मृता नैवास्मदीयकाः।
मृताश्च किन्तु नैकेऽत्र जलपानेन केवलम् ॥ २१

एकत्र शत्रवोऽस्मान् च स्थातुं नेच्छन्ति कानने।
सर्वदा जनयन्त्यत्र कष्टानि बहुलानि भोः ॥ २२

जितान् दुर्गान् स तुर्कीयः स्वायत्तान् प्रविधाय च।
निक्षिप्य तत्र चात्मीयान् दिल्लीं यातः स कौतुकम् ॥ २३

अशक्ताः शत्रवोऽस्मान् च जेतुं जन्ये तु धर्मतः।
कुतन्त्रान् कल्पयन्त्यन्यान् सैन्यनाशाय सर्वथा ॥ २४

अरिंदमाश्च जाताः स्मः संग्रामेष्वेषु निश्चयम्।
एवमेव वयं कुर्मः जयश्चास्मान् वरिष्यति ॥ २५

भानुसिंहस्तु तुर्कीयान् खण्डयित्वा सहस्रशः ।
कृत्वा स्वैरविहारं तु समलंकृतवान् दिवम् ॥ २६

कविराजस्तु संग्रामे दिनराज इव स्वयम् ।
विजृम्भ्य हत्वा शत्रूंश्च मशकानिव तत्क्षणम् ॥ २७

लब्ध्वा कीर्तिं च संसारे चाजरामरणात्मिकाम् ।
पातितः शत्रुवर्गैश्च कुतन्त्रेषु विशारदैः ॥ २८

दुर्गाश्च सर्वे तस्यासन् पताकैः चारुमण्डिताः ।
मुग्लायीचिह्नराजद्भिः ग्लौकलातारकाञ्चितैः २९

काननेऽस्मिन् कुटुम्बीकाः तिष्ठेम, मम बान्धवाः ।
विषाक्तजलपानेन वयं मृत्युं भजेमहि ॥ ३०

अगत्वा ध्येयमन्यत्र वयं वीरास्तु शाश्वतम् ।
संघमृत्युं भजेमात्र तस्मात् गन्तव्यमाशु च ॥ ३१

एकत्र नैव स्थातव्यं हिण्डमानैश्च सर्वदा ।
अस्माभिरिह सर्वत्र भवितव्यं यथास्थिति ॥ ३२

फलानि चावरः सान्तं विल्वयासिंश्च कानने ।
निराहारांश्च कर्तुं नः वृक्षेभ्यो यतते स्वयम् ॥ ३३

यस्य नास्त्यनुकम्पा वा दयाऽन्तःकरणेऽथवा ।
स किं प्रभुः प्रजाराज्ये पशुभ्यो हीन एव सः ॥ ३४

विकटाः भान्ति सर्वेऽपि दिवसाः साम्प्रतं भुवि ।
राणाप्रतापसिंहस्य सदा राष्ट्रहितैषिणः ॥ ३५

विश्वासो नैव संत्याज्यः विश्वासः शक्तिदायकः ।
विश्वासेन हि जीवन्ति भुवि सर्वेऽपि जन्तवः ॥ ३६

यथा मां सर्वसौख्येषु भवन्तस्तु सिषेविरे ।
तथैव चाष्टकष्टेषु सेवन्तेऽह धराधिपाः ॥ ३७

भावना तादृशी लोके नैव संदृश्यतेऽधुना ।
धन्योस्म्यहं सुहृद्वर्याः सहसौख्यं भजेमहि ३८

सहसौख्यं भजेमात्र नो चेत् सहविनाशनम् ।
यत् यत् कृतं सहैवात्र भोक्तव्यं मित्रवान्धवैः ॥ ३९

स्वातन्त्र्यं भारतस्यास्य साधयेम सहानुगैः ।
स्वातन्त्र्यसिद्धिपर्यन्तं सुखं त्यक्त्वा वसेम हि ॥ ४०

एवं चोक्त्वा भूपतिः शान्तचित्तः तूर्णं गेहं प्राविवेशात्मधैर्यः ।
भूपाः सर्वे दीप्तभावाः सहर्षं चेलुः संघे नव्यसंभूतभावैः ॥ ४१

[इति श्रीमत्प्रतापराणायनमहाकाव्ये अरण्यकाण्डे "प्रतापसिंहावलोकनम्" नाम एकादशः सर्गः समाप्तः]

इति श्रीसकलभुवनतलबुधजनविनुतकविकुलपादारविन्दमकरन्दपानमत्तभ्रमराय-मानमानसेन श्री ओगेटि कौसल्यासाम्बमूर्तिदम्पत्योः गर्भशुक्तिमुक्ताफलाय-मानसूनुना गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना ललित-गीतालहरी-अक्षयगीतरामायणम्-यशोधराभहाकाव्यम्-परीक्षिन्नाटकचक्रम्-जानपदनृत्यगीतमञ्जरीकाव्यम्-सौन्दर्यमीमांसादि-काव्यसंचयरचयित्रा पण्डित ओगेटि परीक्षित् शर्मणा विरचिते श्रीमत्प्रतापराणायनमहाकाव्ये अरण्यकाण्डं समाप्तम् ॥

दिल्ली-काण्डम् ।

प्रथमः सर्गः ।

१. अक्बरस्य चारित्र्यम् ।

अक्बरः तुर्कभूपालः राजधानीं विधाय च ।
दिल्लीं भारतराष्ट्रस्य पालयन् भाति भूतले ॥ १

त्रयोदशीयवर्षे सः सिंहासनमधिष्ठितः ।
शान्त्याऽच्छादितभावेन रराजासौ धरातले ॥ २

गोमुखव्याघ्ररूपोऽसौ राजकीयेषु पण्डितः ।
हिन्दूनहिन्दून् सर्वांश्च पपौ स्वीयप्रजा इवः ॥ ३

विना च दौष्ट्यभावात्तं वर्तनं राज्यशासने ।
अदर्शयत् च वैषम्यं सर्वदा सुखलोलुपः ॥ ४

सर्वधर्मसमानत्वं कथयन् मधुरस्वरैः ।
एकत्र सर्वानानीय चक्रे धर्मान्तरस्थितान् ॥ ५

अक्रीणात् राजपुत्रांश्च राजकन्याश्च शाश्वतम् ।
धनं दत्त्वा च दास्यार्थं हितैषी देशवासिनाम् ॥ ६

सुखार्थं मूर्खराजानः स्वार्थे संलग्नमानसाः ।
देशभक्तिविहीनास्ते याताः दास्ये तु शाश्वतम् ॥ ७

स्वसारं मानसिंहस्य चोपयेमे महामनाः ।
अन्याश्च राजपुत्रीश्च रूपाजीवाः चकार सः ॥ ८

तुषसंछन्नरूपेण स्फुलिङ्गत्वमपद्यत ।
अज्ञात्वा तस्य चित्तं तु राजानः शलभायिताः ॥ ९

अक्बरस्यात्मवेत्ता तु राणा चैकोऽस्ति भूतले ।
सदा क्षकिरणत्वेन तस्य रोगचिकित्सकः ॥ १०

नाम राणाप्रतापस्य श्रुत्वा कामं विकम्पते ।
तं जेतुं सर्ववीरान् सः चिक्रिये भारतावनौ ॥ ११

नानाविधबलैर्युक्तं तुर्कराजं महीतले ।
जेतुं न कोऽपि शक्तोऽभूत् तस्मात् दास्यं प्रपेदिरे ॥ १२

राजानो बलसंपन्नाः चैकमत्ये न भासुराः ।
भद्रदर्शनमन्नास्ते तुर्कपादवशं गताः ॥ १३

पञ्चपञ्चाशतिर्लक्षपदातिदलमण्डितः ।
अश्वैः पञ्चदशैः लक्षैः दशपूर्वसहस्रकैः ॥ १४

तोपैश्च बृहदाकारैः भूतले वाहिनीयुतः ।
दशपूर्वसहस्रैश्च वारणैः सज्जितप्रभुः ॥ १५

मोहम्मदु जलालुद्दीन् सार्वभौमाक्बरः प्रियः ।
शशास भारतं शान्त्या मधुलिप्तकृपाणकः ॥ १६

कर्तव्यं विद्यते यच्च नितरां राजकारणे ।
तत् सर्वं कृतवान् तुर्कः राणां जेतुं च संगरे ॥ १७

पयोमुखस्वरूपेण भ्राजते भारते भुवि ।
विषकुम्भसमानोऽसौ निश्चलः शान्तसागरः ॥ १८

अक्बरात् पूर्वमोग्लायाः हिंसाभिः प्रथिता भुवि ।
किन्तु काल्पुष्यभावैश्च प्रसिद्धोऽक्बरभूपतिः ॥ १९

बलिष्ठभूपपुत्रांश्च कृत्वा पादचरान् सदा ।
तैरेव शत्रुसैन्यं तु मारयामास घातकः ॥ २०

कदापि योद्धा नैवाभूत् भीकरे संगरेऽक्वरः ।
अन्तःपुरे वसन् नित्यं बुभुजे सौख्यसम्पदम् ॥ २१

हिन्दू चेस्लामधर्मौ च लोचनद्वयसन्निभौ ।
इतीव दर्शयन् तुर्कः पालयामास भारतम् ॥ २२

नियुज्य गायकं भाग्यैः संगीतज्ञं कलानिधिम् ।
तान्सेनं स्वीयदर्बारे पुपोष रसिकप्रियः ॥ २३

औत्तराहीयसंगीते तान्सेनस्तु पितामहः ।
दर्बारीदीपमेघादितोडिरागेषु पण्डितः ॥ २४

अक्वरेण समादिष्टः बहुरागान् जगौ मुदा ।
अभ्यासीत् तानसेनस्तु नैकरागांश्च नूतनान् ॥ २५

मीरासंगीतमाकर्ण्य तस्यै च ललुभे परम् ।
तिरश्चकार मीरा तं कृष्णभक्तशिरोमणिः ॥ २६

राणी दुर्गावती क्रुद्धा मायावाजारपर्वणि ।
कामुकं तं विजित्याशु प्राणैः तत्याज मानिनी ॥ २७

करुणास्नेहभावाभ्यां भारतीयान् स चाक्वरः ।
स्वाधीनान् प्रविधायासौ विरेजे शक्तिवर्धितः ॥ २८

स्वाधीनभूपतीन् सर्वान् प्रेरयन् परनाशने ।
यच्छन् तेभ्यो धनं प्राज्यं पालयामास भारतम् ॥ २९

अल्लाहोचाक्वरित्येवं सख्यं रामरहीमयोः ।
चैकत्वं कांक्षयन् नित्यं रेजे कृष्णकरीमयोः ॥ ३०

कृत्वाऽन्तःकलहैः युक्तान् महाराजांश्च भारते ।
अशान्तिभावसंयुक्तान् बभौ चासौ कुतन्त्रकः ॥ ३१

सूर्यमाराधयन् नित्यं गङ्गातोयं निपीय च ।
सर्वोपनिषदां सारं श्रुण्वन् तस्थौ स चाक्वरः ॥ ३२

सतीं निर्मूल्य राष्ट्रेऽस्मिन् गोहत्यां वारयन् बभौ ।
सेवनं मद्यमांसानां त्यक्त्वा धर्मपरायणः ॥ ३३

दीनिल्लाहीति धर्मं तु संस्थाप्यासौ सुभावनः ।
सर्वधर्मसमानत्वे पालयामास भारतम् ॥ ३४

समीहते महत्कर्तुं प्रजाजीवनतत्परः ।
भारतं भारतं दिव्यं भूतले विनुतं प्रियम् ॥ ३५

सर्वधर्मसमानाख्यां सभां कृत्वा च पण्डितैः ।
धर्मशास्त्रादिचर्चां तु कुर्वन् रेजे स चाक्वरः ॥ ३६

पठनं लेखनं चैव न जानातीति सर्वदा ।
किंवदन्ती चलत्येव प्रजापालनपण्डिते ॥ ३७

प्रशासकश्च नेताऽसौ कुशलोऽयं धरातले ।
परेषां हृदयस्थं तु जानातीह भृशं सदा ॥ ३८

अतीवचतुरश्चासौ लौकिकः प्रियदर्शनः ।
प्रस्तुतांशं विजानाति पूर्वापरविचक्षणः ॥ ३९

राजकारणहेतुभिः मानसिंहस्य सोदरीम् ।
परिणेमेऽक्बरः कामं राजवर्गजिगीषया ॥ ४०

राजानः मूर्खभावैश्च राजन्ते भारतेऽनिशम् ।
युध्यमानाः सदाऽन्योन्यं तान् जेतुं सुकरं भुवि ॥ ४१

इति नानाऽर्थभावैः सः राजवर्गं स्वपादगम् ।
संविधाय बभौ तुर्कः भारतस्य महाप्रभुः ॥ ४२

मानसिंहं विधायासौ सैन्याध्यक्षं रणेषु च ।
तेनैव सर्वशत्रूंश्च जिगायाजिं निरन्तरम् ॥ ४३

महाराणाप्रतापस्य चारित्र्यं स्तौति सर्वशः ।
भारते तादृशो राजा न भूतो न भविष्यति ॥ ४४

अजस्रमेवं सर्वेषां प्रभूणां संमुखे स्वयम् ।
भणन् राणां महावीरं विनतो भाति वन्दनैः ॥ ४५

पादाक्रान्तं विधातुं तं सर्वोपायैः दिवानिशम् ।
यतते दुष्टभावैश्च शत्रुहीनं स्वभारतम् ॥ ४६

राणा-श्रवणमात्रेण वदनं याति पाण्डुताम् ।
जिह्वा प्रयाति शुष्कत्वं गात्रं घर्मपरीवृतम् ॥ ४७

अक्बरस्य दिवारात्रं स्वप्नसिंहो बभूव सः ।
निद्राति नैव शान्तं सः सर्वदा भीतिभावनः ॥ ४८

दासोऽस्मीति प्रियं चोक्त्वा यदि राणा समेष्यति ।
मामत्र सर्वभूपालैः चार्चयिष्यामि तं प्रियम् ॥ ४९

इत्येवं चिन्तयन् राज्ये बन्धुमित्रसहोदरैः ।
अक्बरः तं प्रतापं तु स्वायत्तं कर्तुमीहते ॥ ५०

राणाप्रतापकीर्तिं तुर्कः चिन्तयित्वा च सावाधम् ।
बहुकृशाङ्गो भूत्वाऽत्र राजधान्यां दुःखे विभाति ॥ ५१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' अक्बरस्य चारित्र्यम् ' नाम प्रथमः सर्गः समाप्तः ॥]

द्वितीयः सर्गः ।

२. दिल्लयां अक्बरस्य भवने कामपानशाला ।

अतुलधवलपीतारक्तहर्म्यालिकाशैः
अभिनवनवरत्नावद्धकुड्यालिरुग्भिः ।
रजतकनकनव्यस्तम्भनिक्षिप्तदीपैः
रजनितिमिरपुञ्जान् वारयन्तीव दिल्ली ॥ १

लसति भवनमस्यां देहलीराजधान्यां
युवतिहसितरोचिष्पूर्णमग्नं महाभम् ।
यवनयुवतिगानोद्भूतमाधुर्यतानैः
विबुधपतिसुसौख्यैः वारुणीमत्तगन्धैः ॥ २

हसितलसितदन्तैः दिव्यमन्दस्मिताभैः
वलनचलनवक्रैः चारुगात्रीविलासैः ।
अमलिनत्रिधुविम्बैः ताम्ररम्याधरोष्ठैः
विशदनटनमग्नाः भान्ति रामाः सुरम्याः ॥ ३

गुरुकुचनतगात्र्या सीधुपानोर्मिनेत्र्या
सरसतुरकभूपः साधुनिर्दिष्टमार्गः ।
गजतुरगपतीनां सर्वभूपेश्वराणां
बहुविधकलरावैः चन्द्रशालां विवेश ॥ ४

अतिचपलकराग्रैः पीनवक्षोजभारं
बहुकठिनतलाभ्यां मर्दयन् कामिनीनाम् ।
विकिरति च सुहासं गाढमालिङ्ग्य रामाः
गिलति खलु सुखं तत् कामुकः सन् स तुर्कः ॥ ५

सुरयुवतिसमानं यौवतं सौधमार्गे
विगलिततनुवस्त्रं भङ्गिमाभिः लसन्तम् ।
हृदि विलसितभावैः चारु संस्थाप्य धूर्तः
प्रतिपदचलनेऽयं याति चुम्बन् सकामम् ॥ ६

जलधरतुलिताभं रम्यधम्मिल्लजालं
करिकरसमहस्ते संगृहीत्वाऽक्वरश्च ।
मुकुरसमकपोले चुम्बनं संविधास्यन्
सरसिजवदनां तां कामरूपां चकार ॥ ७

अगणितशशिकान्तैः तुर्कलोकैः परीतः
चलति चलति मन्दं मद्यपानार्थमेव ।
अतिमधुरसुरागैः तोडिमुल्तानठाणैः
चटुलनटनहेवा मण्डितैरङ्गनाभिः ॥ ८

कनकरुचिरगात्रि मेनकारूपरम्ये
चल मम पदपीठं वारुणीकुम्भहस्ता ।
किरतु चषकपूर्णं वारुणीं मत्तचित्ता
विकलयतु हृदयं कामभावैः विलासैः ॥ ९

अनुपदमतिशान्तं स्वर्णसिंहासने तु
सुरुचिरनवरत्नैः चित्रिते सोपविश्य ।
विलसितनवरूपं श्मश्रुवर्गं प्रमार्ज्य
विलसति स तु तुर्कः चन्द्रशालासुधांशुः ॥ १०

कथककलितलास्या स्मेरवक्त्रारविन्दा
सपदमनुसरन्ती वारुणीवाहिनी तम् ।
विविधमधुरदृग्भिः काव्यसौन्दर्यभावैः
चतुरनटनपद्धथां भूपपीठं जगाम ॥ ११

सहजतुरकवेषैः चाक्वरः चक्रवर्ती
घुमघुमितसुतैलैः चर्चितः कामरूपी ।
मदयुवतिकरस्थैः वीजमानः सहेलं
नरपतिसुखभोगान् तालवृन्तैः भुनक्ति ॥ १२

अनितरकपटात्तः शान्ततुर्कीयराजा
मदकलितयुवत्या चारुसिंहासनस्थः ।
चलमधुरजवानि प्राज्यमद्यात्तकुम्भा
सरसललितविलासैः तुर्कराजस्य वर्गम् ॥ १३

इति मधुरगभीरं सौम्यवाचा विजल्पन्
चकितहरिणनेत्र्यै दर्शयामास तूर्णम् ।
मदमलिनविभान्तं मत्तवेदण्डतुल्यं
स्वपदजलजलग्नं तुर्कराजन्यलोकम् ॥ १४

कुररलपनवत्सारङ्गितन्त्रीनिनादैः
जलदनिनदतब्लावाद्यनिर्यातशब्दैः ।
युवतिचरणनृत्तोत्पन्नशिञ्जाप्रजल्पैः
वनमृगमदगन्धालिप्तलावण्यभाभिः ॥ १५

चतुरनटनदार्द्यैः चञ्चलासास्यदेहैः
घनजघनमनोज्ञैः मन्दयानैः विलासैः ।
चटुलजलजपत्राकाररम्यैः सुनेत्रैः
मधुरमदनभावैः चारुदृग्भिः सकामैः ॥ १६

ज्वलितकनकवर्णैः मञ्जुचित्रप्रभाभिः
निरतमधुरनासाघ्राणसौगन्धधूपैः ।
रजतचषकपूर्णैः वारुणीपानगन्धैः
चटुलनयनयोषित् देहवल्लीप्रभाभिः ॥ १७

नवजलजनिभास्या कुम्भिकुम्भस्तनी सा
पृथुलजघनभारा पादविन्यासरम्या ।
अलिकुलसमकेशा स्निग्धरम्भोरुरामा
किरति मदनभावं दिव्यलावण्ययुक्ता ॥ १८

ललितललितहेला विभ्रमारम्यभावैः
मृदुमधुरनतांसे कम्रबाहुद्वयेन ।
अधरमधुरतुल्यं वारुणीपूर्णकुम्भं
मदगजगतिरम्या याति शान्तं गृहीत्वा ॥ १९

मदनलसितचित्तान् भूपतीन् मारतुल्यान्
विशति सदनमध्यं वारुणीमत्तनेत्रा ।
अधिकचषकमद्यं पीयमानान् प्रमत्तान्
हसितलसितवक्त्रा घूर्णयन्तीव तन्वी ॥ २०

मधुरमधुरशब्दैः चारुभावप्रपूर्णैः
ललितवसनदृष्टैः नग्नसौन्दर्यरम्यैः ।
भ्रुकुटिचटुलभावैः रागवल्लीविहारैः
मदनसदनलोलाः चोरुमध्ये निमग्नाः ॥ २१

झटिति मदनशय्यालुण्ठने सक्तचित्ता
प्रविश विविधपुष्पैः सज्जिताङ्गी सुगन्धा ।
मम भुजयुगमध्ये कीरवाणीं लपन्तीं
सुरतमृदितरम्यां त्वां विधास्येऽह लज्जे ॥ २२

अधरमधुरपाने सक्तचित्ता भवामः
शृणु न हि तव मद्यं रोचते मह्यमद्य ।
अधरमधुरपानात् किञ्चिदूनं हि मद्यं
रसिकमनसि सत्यं द्वन्द्वभावे प्रपन्ने ॥ २३

मधुरवयसि लज्जे फुल्लवक्त्रारविन्दे
कथमिह निवसेयं त्वां विना मोहनाङ्गि ।
अधरमधुपिपासासक्तरोलम्बभूपः
तव भुजयुगमध्ये कामशय्यां कुरुष्व ॥ २४

सकलनृपतिमध्ये मद्यकुम्भं गृहीत्वा
किरति रजतपात्रे कङ्कणस्वानरम्या ।
मधुरमिलनयोग्यां बुद्बुदैः फेनरम्यां
मनसिजसुखधात्रीं वारुणीं वारुणी सा ॥ २५

प्रबलितरसभावे प्राप्य सीत्कारशब्दं
पिबति चषकपूर्णां वारुणीं राजवर्गः ।
सरसमधरपानं यावनीकन्यकायाः
मधुरसुरतगाढालिङ्गने चेष्टमानः ॥ २६

अमलिनरसरूपां चन्द्रिकाशीतलाङ्गीं
सुरयुवतिसमानां मञ्जुलावण्यदेहाम् ।
सरसहसितपुञ्जैः पुष्पितां षोडशीयां
मनसिजमदभावं कारिणीं मद्यनेत्राम् ॥ २७

शरदि विकसिताब्जां पद्मिनीजातिजातां
चलदलिकुलभास्वत् स्निग्धधम्मिल्लयुक्ताम् ।
पृथुलजघनभारां विभ्रमाभिख्यरम्यां
नववयसुकुमारां मारमामाभिरामाम् ॥ २८

बहुलहसितदृग्भिः वाक्यसम्पत्-विलासैः
पुलकितमदगात्रैः व्यङ्ग्यभावार्थशब्दैः ।
मदनकदनभावाकीर्णशृङ्गारहास्यैः
पुलकिततनुगात्रीं कन्यकां रञ्जयन्ति ॥ २९

रसिकजगति ललामे स्निग्धलावण्यरूपे
सरसमधुरगात्रि प्रेमपात्रे विलासैः ।
मणितसुखसमानं पूरयित्वाऽभिलाषां
विचर तनुविलासैः वारुणीभक्तलोके ॥ ३०

तरलतरलनेत्रे पादमञ्जीरशब्दे
मदभरतनुभासा पुष्पगन्धं किरन्ती ।
कुरबकनवरागैः साधुसंलिप्तहस्ते
प्रविश हृदयगेहे रागिणि प्रक्वणन्ती ॥ ३१

कथितबहुलगाथा नव्यनृत्ताभिरम्या
कथकनटनसक्ता पादतालक्रियाभिः ।
विशदनयनभावा संविशन्ती सभायां
तरलसरसदृग्भिः राजदृष्टिं चकर्ष ॥ ३२

सरलमधुरबाई गानलोलाललामा
किसलयनिभहस्तन्यस्तमुद्राभिरामा ।
वपति मदनबीजान् मानसेष्वत्र राज्ञां
मदभरमदिराङ्गी मञ्जुलं हावभावैः ॥ ३३

प्रतिपदनटनात्तौ मञ्जुपादौ विलोक्य
वहवहपदजालैः सभ्यवर्गाः ब्रुवन्ति ।
इह खलु सुरतन्वी भूमिनाकं समेत्य
विकिरति मधुपूर्णान् दिव्यसौन्दर्यभावान् ॥ ३४

ललितचलनरम्या नूपुरालङ्कृता सा
पदगतिकलहंसी मद्यकुम्भं गृहीत्वा ।
विलसितबहुरुग्भिः चित्रिता बाहुमूला
मदनकदनसक्तं राजवर्गं चकार ॥ ३५

स्वनिकटतलयातां यावनीं राजवर्गः
रतिपतिकृतभावैः वीक्ष्य संमोहिताङ्गः ।
अयि मनसिजरेखे पहि मे सन्निधिं त्वं
भृशमिह रतिरम्यां यामिनीं रञ्जयामः ॥ ३६

अयि मदवति रम्यां यामिनीं यापयेम
अविदितरसभावैः मन्मथं तारयेम ।
मदवति मदिराभ्यां लुण्ठनं चारु कृत्वा
वयमिह रतिसौख्ये जीवितं यापयेम ॥ ३७

अधरदिति तदीयं पाणिपद्मं स राजा
सपदि चलनरम्या चञ्चला लोलतन्वी ।
हसितविलसिता स्वां वारुणीकुम्भहस्ता
द्रुतपदगतिरूपा मोचयन्ती जगाम ॥ ३८

किसलयछविहस्ता कापि लावण्ययुक्ता
विकसितकुसुमालिं भूपपादारविन्दे ।
अवनततनुमध्या स्तोकरम्या कुचाभ्यां
विधुवदनसुषमणा विक्षिपे मोहनाङ्गी ॥ ३९

चकितचकितनेत्रा कचिदागत्य रम्यं
मधुपरिमलाक्तं मञ्जुशब्दं भणन्ती ।
रचयति नृपगात्रे पुष्पगन्धं हसन्ती
पुलकिततनुभावं भूपतिं प्रापयन्ती ॥ ४०

प्रचुरनटनतज्ञा नृत्तनृत्यैः चलन्ती
विमलरजतपात्रे धूपसामग्रिजालम् ।
अगरुमिलितचूर्णं साधु संज्वाल्य कामं
परिमलपरिपूतां चन्द्रशालां करोति ॥ ४१

सुरतमृदितरम्या कापि लावण्ययुक्ता
मृगमदकलितार्द्रैः चारुगन्धानुलेपैः ।
क्रमुकशकलचूर्णैः रागताम्बूलपर्णैः
मधुरमदनभावा याति राजन्यपीठम् ॥ ४२

विकसितसुममालां कापि मन्दाक्षरम्या
करकमललसन्तीं हेलया भूपकण्ठे ।
अपरिमितसुहासैः चारु निक्षिप्य लीला-
वलयितललिताङ्गैः मण्डिता निर्जगाम ॥ ४३

लसति सततमल्ला कर्मणा चारुसृष्टिः
पतति निरतमस्मिन् वारुणीपानलोकैः ।
अधिकतरमनोज्ञा सर्वदा सृष्टिदत्ता
मनुजकृतसुमद्यात् सुन्दरी सौख्यदात्री ॥ ४४

इति मधुरमधीरं जल्पमानः स राजा
करकमलममन्दं यावनीकन्यकायाः ।
मदनकदनसक्तः सत्वरं चादधार
नवकुवलयपुष्पं हस्तिराजेव तन्वीम् ॥ ४५

कनकरुचिरगात्री पीनवक्षोजभारा
करकमलगृहीतां सप्ततारां मनोज्ञाम् ।
विविधमधुररागैः मञ्जुलं नादयन्ती
विकसितवदनालिं चन्द्रशालां चकार ॥ ४६

रसधुनिभरिताङ्गी चन्द्रशालां तदानीं
मधुरचलनरम्या सा मियातोडिरागम् ।
स्वरभणननुताङ्गी शस्तसंगीतराज्ञी
स्वरगतबहुनादैः रागपूर्णं चकार ॥ ४७

घनकुचयुगमध्ये चारुवीणां वहन्ती
कररुहदरविद्धैः मञ्जुलं वादयन्ती ।
तिलकललितरागैः तोषयन्ती सभां तां
विकसितमुखपद्मा कीर्तिताङ्गी विरेजे ॥ ४८

शयरुहनखविद्धैः वल्लकीतन्तुजातैः
मधुरललितगीतैः वम्भरान् भ्रामयन्ती ।
मुखरितकलनादैः नादितां चन्द्रशालां
विदधति रसपूर्णं चित्तमेवात्र राज्ञाम् ॥ ४९

विचलितकुचकुम्भा कापि तन्वङ्गिलास्यैः
प्रचुरविपुलमुद्राभावसंपूर्णशास्त्रम् ।
भरतमुनिमताख्यं मञ्जुनाट्यं चकार
रसिकजननुताभं सर्वभावानुकूलम् ॥ ५०

अगणितलखुगीतैः मञ्जुकाव्यादिरूपं
मणितभणनरम्यं सर्वदा श्रोत्रपेयम् ।
रसभरकलनादैः चारुकव्वालिगीतं
श्रवणपथमगात् तत् सर्वभूपालतृप्त्यै ॥ ५१

मृदुहसितकपोलावर्तरम्या लताङ्गी
गमकभरगजालं भावरम्यं ह्यगाषीत् ।
श्रवणनिरतभूपाः मत्तचित्ताः प्रभेणुः
वहवहवहचाल्लालाजवावीतिशब्दैः ॥ ५२

जगदुरिह शुभानल्ला रसाविष्टचित्ताः
पपुरमितसुरां ते सौख्यसौन्दर्यनिष्ठाः ।
अयि तरुणि मदङ्कं चेहि तूर्णं निशीथे
सुरपतिनिजलोकं दर्शयिष्यामि तुभ्यम् ॥ ५३

त्वरितगतिमहीपः शल्यबाधापरीतः
सपदि परमतिष्ठत् सर्वलोकं चचक्षे ।
न किमपि भविताऽहो यामिनीयातयामा
स्थगितमिह तु नाट्यं सीधुपानं च सर्वम् ॥ ५४

इति प्रजल्पन् सहसा सभायाः
जगाम तुर्कोक्वरचक्रवर्ती ।
शनैः शनैः सर्वनृपालवर्गः
ययौ निशान्ते च विघूर्णचित्तः ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' दिल्लयां कामपानशाला ' नाम द्वितीयः सर्गः समाप्तः ॥]

तृतीयः सर्गः ।

१. अक्वरस्य परितापः

ग्रहीतव्यो राणा प्रवलमतिमान् धीरपुरुषो
महासत्त्वो वीरो जलनिधिगभीरो नगसमः ।
कृपावानत्यन्तं विशदरणपाण्डित्यलसितः
न जाने किं लोके भवति रणगाथा निजरुषा ॥ १

सदा शत्रुः कृद्धो मयि सततविद्वेषसहितः
न चाहं कर्ताऽस्मि स्वनगरसंसर्जनविधौ ।
स चैवास्ते लोके स्वकृतफलभोक्ता न हि परो
ध्रुवं भोज्यं कर्म स्वकृतमिह सद्यः फलमयम् ॥ २

व्यथानन्ता तथ्यं ग्रसति बहुधा स्वान्तमनिशं
कथं राष्ट्रं सर्वं बहुविधमताकीर्णमतुलम् ।
विधास्येहं चैकं बहुजनहितायात्र विशदं
विना शत्रुं राज्यं कथमिति परं व्यग्रहृदयः ॥ ३

महायोद्धा लोके भवति रणसीम्नि प्रियचरः
सदा देशौन्नत्यं स्मरति निजमित्रस्य निचये ।
सहेलं प्राणान् सः त्यजति न हि देशीयमननं
महाराणा नित्यं विलसति कथासु प्रियतमः ॥ ४

अहं राजा देशे सकलमणिरत्नालिलसितः
बलं चोष्ट्राणां मे गजतुरगपादीयमतुलम् ।
सदा युद्धे लोके परहृदयमर्मज्ञचतुरः
तथाप्यत्राहं हा विचलितमनाः शत्रुनिवहात् ॥ ५

अगात् राणा रम्यं मुनिजननुतं भव्यसुखदं
वनं सत्त्वाभीलं हरिकिटिलुलायादिभरितम् ।
पुरं त्यक्त्वा तूर्णं मयि गतक्रुधा तप्तहृदयः
अधाक्षीत् भीत्याखोः निजवसतिगेहं खलमतिः ॥ ६

न जाने यद्भव्यं भवति भुवने क्रोधजनितं
भवेद्वाहो युद्धं सकलजनतानाशनकरम् ।
कथं राणा क्रोधं वहति मनसा शुष्कवचसा
विना लक्ष्मीं लोके न भवति भृशं कर्मसफलम् ॥ ७

सदा सर्वे देशे सकलसुखसौख्येषु निरताः
स्वदारामित्राप्तैः मधुमयफलाहारनिचयैः ।
मुदा भोगान् सर्वान् मधुरसरसास्वादनरताः
परं भोक्तुं नित्यं सकलमतसारार्थपठने ॥ ८

कथं राणा लोके स्पृहयति न सौख्याय महते
ऋते सौख्यात् नान्यद् भवति भुवि लोकस्य च हितम् ।
पुरा भूपाः सर्वे प्रथितकुलसंभूतविशदाः
सुखालोला नित्यं बहुविधविधानेषु निरताः ॥ ९

अनन्यं सौभाग्यं मम चरणसंलग्नलसितं
विलोक्यासौ सत्यं भवति बहुविद्वेषयुतः ।
सदाऽसूयेर्ष्यात्तं व्रजति हृदयं तस्य सततं
न चाहं कर्ताऽस्मि प्रबलतरषड्वर्गविषये ॥ १०

न मे द्वेष्यो लोके भवति सहवासेन निरतं
जनानां दारिद्र्यं प्रखरतमसं भूतभयदम् ।
कथं दूरीकर्तुं खलु प्रयतनीयं भुवि भृशम्
तदेवास्ते मे मनसि सततं निश्चलतमम् ॥ ११

वृथाऽश्रौषीत् राणामरिनिचयसंमर्दनचणं
तदारभ्यायं तं भयभरितचिन्ताजडमतिः ।
विनाऽऽहारं निद्रामतिकठिनसंपूर्णदिवसान्
कथंचित् भारात्तान् गमयति भिया रागरहितः ॥ १२

अयं राणा प्राज्यं भयदमदयं मौर्ख्यसहितं
महागर्वं नित्यं विषयविषमासक्तलसितम् ।
सदा क्षेमायुक्तं बहुजनसुखाक्रान्तभरितं
विधायासौ नित्यं लसति मदमातङ्गसदृशम् ॥ १३

तमार्यं देशेऽहं प्रथितमहिमानं पटुधियं
परं श्रुत्वा भव्यं तरणिसमतेजोमयनृपम् ।
मुदा स्वान्ते कामं महितमहिमापूर्णचरितं
लसामि प्राज्यं भारतविनुतराणां गुणनिधिम् ॥ १४

कथं तस्यास्ति श्रीनिधिपटुदृढं शौर्यमतुलं
बलीयःस्नायुश्रीचयविलसितं पीवरतनुम् ।
तदीयाकारं तद् बहुविधश्रुतिं प्राप्य मधुरं
मदीयं चेतः श्रीनृपवदनकामी भवति च ॥ १५

वने वासं कुर्वन् मदमलिनमत्तेभसदृशो
वनं सर्वं स्वीयैः चलनचरितैः शान्तभरितम् ।
विधायायोग्यं सः प्रचुरफलसंभूतलसितं
विना सौख्यं वीरो भजति कटुदारिद्र्यनिवहम् ॥ १६

वने वासः खाद्यं वनचरसमानीतममलं
फलाहारं कुर्वन् निरतमुनिवेषावलियुतः ।
शिलाखण्डे निद्रां विततविटपव्याप्तकुटजे
दिवारात्रं राणा व्यपयति कुटुम्बेन विपिने ॥ १७

अहिंसीत् सर्वान् तान् समरचतुरान् शौर्यभरितान्
शतघ्नीसंचारे बहुनिशिततज्ज्ञान् करिसमान् ।
अनेकानीकव्यूहरतविशदान् बुद्धिचतुरान्
प्रयुध्यन् क्रूरात्मा यमसदनयातान् बलधिया ॥ १८

अनंता धैर्यश्रीः विनुतपटुशौर्यं वरगुणाः
भृशं राणाकाये परमकुशलं भान्ति विशदम् ।
ततश्चास्ते राणा घनविपिनवासे दृढतनुः
निराहारोऽप्येवं लसति खरसूर्येण सदृशम् ॥ १९

महामानी नित्यं भवति शितिकण्ठार्चनपरः
सदाऽटव्यां मत्तैः वनचरमहाभिल्लनिचयैः ।
महत्सख्यं कृत्वा पटुतरसुवीराग्रणिकथाः
दिवारात्रं चोक्त्वा विदधति जनान् दैशिकभटान् ॥ २०

भृशं भिल्लैः सर्वैः चरति बहुसंघात्मकधिया
नवीनं चैतन्यं युवकजनतादिव्यहृदये ।
प्रकल्प्यासौ राज्ये कुटिलतरनीत्या नवछलैः
प्रसारार्थं नित्यं वनचरसमूहैः प्रयतते ॥ २१

सदोत्तुङ्गाद्रेऽसौ तरुवरलताकीर्णकुटजे
रहस्येवं सर्वं विशदरणपाण्डित्यविभवम् ।
मुदा शंसन्नास्ते समरतलकापट्यचलनं
दिवारात्रं नित्यं प्रियवनचरेभ्यः प्रियकरः ॥ २२

कृपाणं नीत्वासौ चलदुरगसाम्येनलसितं
समारुह्य स्वाश्वं पवनगतिवेगेनतुलितं ।
त्रिशूली भूत्वाऽग्रे रणशिरसि तिष्ठेद्यदि रुषा
न कोऽप्येनं जेतुं त्रिभुवनतले चास्ति नृपतिः ॥ २३

प्रियं पीत्वा राजा कटुकलितपर्णाविलजलं
मुदा भ्रामं भ्रामं वनविटपछायाऽऽश्रिततनुः ।
यथालभ्यं ग्रासं रुचिरहितनानाविधफलं
भृशं भुक्त्वा स्वान्ते भजति परमानन्दलहरीम् ॥ २४

अयं स्वप्ने नित्यं परजनबुभुक्षायुतहरिः
प्रयासेनात्यन्तं गिरिगुहतले कार्शिततनुः ।
प्रयात्याशापूर्णो मदमालिनगण्डस्थलगजं
प्रहन्तुं स्वैरं हा मृगपतिरितीहावृतनखी ॥ २५

क्व भोगा भूपानां त्रिदिवनुतमेवाडवसतां
क्व चैवं कान्तारे मुनिजनसुयोग्या निवसतिः ।
स्वयं सर्वं जानन्नपि चरति चिन्ताजडमतिः
जनः सत्यं मेघाजनित बहुरूग्णेन तपते ॥ २६

अहो तापं तापं वनगिरिगुहासक्तहृदयः
कुटुम्बेनासौ संव्रजति च गिरिं सैन्यसहितः ।
तथाप्येवं राणा प्रकृतिविकृतिं नैव भजते
क्रियाशूरोऽत्रायं न हि भजति लेशं शवलताम् ॥ २७

अयं भूत्वा शल्यं खनति हृदयं निर्दयपरः
न मे विश्रान्तिश्चाप्यशनकरणे निद्रितुमहो ।
परं योद्धा शत्रुः कथमहममुं संगरतले
विजेष्यामीत्येवं व्यथयति भृशं चित्तमधुना ॥ २८

महातल्पे दिव्ये परमसुखसौभाग्यलसिते
भृशं सुप्तं भुक्तं कनकरजते पात्रनिवहे ।
महाराजो भूत्वा बहुविधसुपीताम्बरधरः
वने वासं कुर्वन् गिरिजनयुतो वल्कलधरः ॥ २९

अनैक्ये संदीप्ते बहुनृपतियुद्धे प्रतिदिनं
अनास्थासंयुक्तं विविधमतवैषम्यसहितम् ।
अखण्डं कृत्वाऽहं सकलजनसौख्याय निरतं
परं भुञ्जे देशं सुखकृतसमैक्येन कलितम् ॥ ३०

भृशं हिन्दुः भूत्वा बहुयुगसमाक्रान्तमदयं
समाजे कृत्वाऽहं सहगमननिर्मूलनमहो ।
सदा सौख्ये देशं विलसितममुं वीक्ष्य सुतरां
अमन्दानन्दात्मा जननुतिपरं यामि निरतम् ॥ ३१

जनाः सर्वे भक्त्या मनसि मम पूजां बहुविधां
मुदा कृत्वा स्वच्छैः कुसुमफलगन्धैः प्रतिदिनम् ।
सुरागैः गीतैः ते स्वजनसममेवाखिलजनैः
स्तुवन्ति श्रीरामप्रभुकृतसुराज्यं सृजति सः ॥ ३१

अहं सौख्ये शान्तं त्रिदिवसमरम्ये स्वभवने
सदाऽऽनन्दे मज्जन् सकलभुवि सौख्यं खलु भजे ।
इतीवाहो लोके प्रभवति कथा वच्मि सकलं
परं कस्मै दुःखे बहुहृदयदग्धं कथमिह ॥ ३३

सदाऽवूकूटेऽसौ चलति शिशुभिः सभ्रमरया
निवासं निर्माय प्रचुरतरुगुल्मच्छदचये ।
अमन्दानन्दे तु प्रकृतितरुणीतल्पलुलितो
महाभोगान् भुङ्क्ते प्रतिदिनमहो स्वर्ग्यमतुलम् ॥ ३४

जघानाहो दस्युं मदभरितवामेतरभुजं
मदीये सैन्याङ्गे खरमसफुखानं रणभुवि ।
कुठाराघातैः तं नवसमरकापट्यमरितं
जगद्विख्यातोऽसावरिगजघटाभेदनपटुः ॥ ३५

फरीदूखानं तं रणजलधिवह्निं छलधियं
त्रिशूलाघातैः साल्पुडगिरिलताकुञ्जनिकरे ।
छुरीछिन्नाभिन्नं ततउसमगात्रं भुवि गतं
रुषा चक्रे राणा पितृपतिसमः संगरविभुः ॥ ३६

तमब्दुल्लाखानं महिषसमरूपं जडमतिं
महाक्रूरं तस्मिन् वनचरकुरूपं खरसमं ।
खरैः शूलाघातैः रणभुवि नृपाः वायसकुलं
यथा देहं चञ्च्वा कुटति च तथा जघ्नुरतुलम् ॥ ३७

सकार्शिखानः तैः सपदमरिवीरैः रणचणैः
कृधाऽघानि स्वीयैः करतलकरालैः सुनिशितैः ।
रुषा सर्वैः सर्वे मम पदरजोभूषितभटाः
वृथा निर्दाक्षिण्यं यमसदनपाकाय निहताः ॥ ३८

यदा शत्रुः चित्तं विशति च कृपाणायुतकरः
तदाऽज्ञातं कम्पं व्रजति बहुघर्माऽविलतनुः ।
महायोधाः सर्वे मम नयनदृष्ट्यां विनिहताः
अयं जातः शल्यो मम शयनपार्श्वे कटुमतिः ॥ ३९

फिरोजीखानं ते पटुतरगदायुद्धचतुरं
गदाघातैः चूर्णं रणभुवि विधायास्य चपलम् ।
असृङ्मेदोमांसैः गिरिवनतलं सिक्तमतुलं
परं चक्रुः घोरं रणचणनृपा निर्दययुताः ॥ ४०

समग्रेऽस्मिन् राष्ट्रे स्फुरति निरतं शान्तिरचला
परं मेवाड् देशे चलति सततं युद्धमतुलम् ।
यदि स्याद्देशोऽयं मम भुवि विलीनः सुखकरः
खुरानेनाल्लां तं प्रतिदिनमहो मक्कनगरे ॥ ४१

भृशं षड्वारं नामिततनुरहं दिव्यमनसा
नमाजुं प्रोद्गीतैः अमृतनिचयस्यन्दिभणनैः ।
मनोवाक्कायैर्भूविनुतचरितो दीप्तिसहितो
विधास्याम्यस्मिन् तं बहुविधसलामान् मम जनैः ॥ ४२

विषं पीत्वा सैन्यं शमनसदनं यास्यति भृशं
तथैवाहं मत्वा बहुकपटनाट्येरताधियम् ।
षबाजूखानं मे जलमयतलं मिश्रितविषं
क्षमादिष्टं कर्तुं कुटिलतरभावैश्च रहसि ॥ ४३

कु-षाबाजूखानं स्थलजलवनान्तेषु वसितं
नदीवापीकूपे सरसि रससंप्लावितवने ।
कृतं पूर्णं चाशीविषजविषसंमिश्रितजलं
सजीवं तं चक्रुः स्थलगतसमाधिं नृपवराः ॥ ४४

अकार्षीत् ध्वंसं तत् दलपतिहयं तस्य सकलं
पदातिं सर्वं तद् गजपतिबलं दन्तिनिचयम् ।
न जाने कस्मात् सो भजति सकलं धैर्यममरं
अहो धिङ्मे शौर्यं मतिरहितभीमं पशुबलम् ॥ ४५

अनन्तैः तोफैः मे पृथुबलसुसैन्यावलियुता
चमूर्नित्यं याति प्रखरकरवालैः हयचयैः ।
प्रयोद्धुं घोरं तैर्गिरिवनगुहावासनिवहैः
तथाप्येषो नाशं न भजति कथं सैन्यसहितः ॥ ४६

विषाक्तं पानीयं श्रमजनिततृष्णा नृपवराः
भृशं पीत्वा पीत्वा व्यपगतबलाः श्वासनिवहाः ।
गताः पञ्चत्वं ते दशशतकसंख्यापरिमिताः
तथाप्येते शिष्टाः शमनसमरूपाः बलयुताः ॥ ४७

कथं शक्ताः सर्वे वनजफलकन्दैः किसलयैः
प्रियैः धान्यैः बीजैः भुजबलयुताः भान्ति निरतम् ।
इयन्तं कालं ते प्रकृतिजननीलालितनृपाः
प्रयोद्धुं वर्तन्ते खलु भुवि सदाऽऽश्चर्यजनकम् ॥ ४८

मदीयं सैन्यं तैः अवासितमभूत् सर्वचतुरैः
उपायैरत्यन्तैः नृपकृतमहायत्ननिचयैः ।
अजेय्या सान्तत्यं भवति वरमेवाडधरणी
प्रतापः सत्यं हा विलसति भृशं ग्रीष्मतरणिः ॥ ४९

अरौत्सीत् सैन्यं मे प्रथितखरशस्त्रास्त्रसहितं
लसत्तोफाभारैः बहुशकटयोघालिभरितम् ।
गजाश्वोष्ट्राभीलं पटुभयदहेषाविलसितं
मदीयं सर्वस्वं हरिसमनृपो भिल्लनिवहैः ॥ ५०

महाराजं तं मे भुवि भुजबलप्राप्तयशसं
प्रतापस्याप्तं भारतनृपवलज्ञानविशदम् ।
महायोद्धारं संगरविशदपाण्डित्यलसितं
दृढं सन्धिं कर्तुं गिरिवनहरिं माननृपतिम् ॥ ५१

प्रतापेनासान्तं वहुविनुतचर्चारसरतं
महावीरं राणातुलितवलसम्पच्चययुतम् ।
रणे राणासाकं विविधरणसंचारकलितैः
प्रडीनोड्डीनैः संकलितचतुरं शात्रवहरिम् ॥ ५२

समाहूयात्रास्मिन् मम भवनपर्यङ्कसदने
उपावेश्याहं तं कृतविविधसत्कारलसितम् ।
विधायाशान्तं हे मम नृपतिसङ्घे वरमते
भृशं त्वय्यासन्ने किमिति वहुवाधां प्रतिदिनम् ॥ ५३

भजामीत्येवं त्वां कथयितुमहो दुःखशमनं
त्वया लब्धं भूयादिति रुचिरभावादिसहितः ।
कदा देशेऽखण्डं सुखमययुतं लोकनिवहैः
सुराष्ट्रं पश्येयं परहृदयमर्मज्ञचतुर ॥ ५४

सनिश्वासोच्छ्वासं मृदुविशदतल्पे प्रविलुठन्
न शान्तिं प्राप्यैवं निकटतटदौवारिकमसौ ।
समाहूयात्यन्तं कथय गुणिनं माननृपतिं
भृशं द्रष्टव्योऽहं द्रुतमिति च सायं चल भट ॥ ५५

शनैः शनैः शान्तिमवाप्तुमेव प्रयत्नशीलो नितरां स तस्थौ ।
शुद्धान्तनारीजनमेत्य तूर्णं चकार सेवां वहुशान्तिदात्रीम् ॥ ५६

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' अक्षरस्य परितापः ' नाम तृतीयः सर्गः समाप्तः ॥]

चतुर्थः सर्गः

शत्रुपक्षे शक्तसिंहस्य प्रवेशः ।

सहोदरेण ननु तदावमानितः स शक्तसिंहनृपतिः दुःखनामितः ।
महाक्वरस्य पदजलेजपूजने रतः प्रियो भवितुमनन्तभाबुकः ॥ १

रुषाऽग्रजं मनसि विनिन्दयन् भृशं विलोकितुं तुरकमहीपतिं नृपः ।
स शक्तिमान् सपदि तुरङ्गमाश्रितः विभासितं प्रबलमरिं बलश्रिया ॥२

प्रचोदयन् तुरगमनन्तरंहसा महोग्रभावपरिहितः प्रपीडितः ।
स देहलीं बहुविधराजकारणैः परीवृतां चकितमनाः प्रविष्टवान् ॥ ३

तुरङ्गमात् कटुमनसाऽवतीर्य सः प्रविश्य निश्चलगमनक्रियान्वितः ।
समीक्ष्य रक्षकभटवर्गमाशया शनैः शनैः स्वपरिचयं ददौ नृपः ॥ ४

प्रविश्य चाक्वरवरमन्दिरं भटः सलामरूपनमनमादिकं प्रियम् ।
विधाय चाल्पविषयवर्णपूर्वकं जगाद भावभरितशान्तनामकम् ॥ ५

निशम्य परजनसोदरं हृदा विहस्य च पटुकपटात्तमानसः ।
स तुर्कभूपतिरतिमोदनिर्भरः समागतं पदतलमेव काङ्क्षितम् ॥ ६

प्रवेशयात्र विचलितात्मभासुरं नरेन्द्रनन्दनमतिभव्यमन्दिरम् ।
न कोऽपि चास्तिवह मम मन्दिरांतरे चकास्तु सर्वमभितसुन्दरं प्रियम् ॥७

स शक्तिमान् जनगणरक्षकं स्मितैः विधाय तूर्णमवनतोत्तमाङ्गकः ।
सलामिति प्रियमधुराक्षरैः ब्रुवन् तमक्वरं मृदुमधुभाषणैः ययौ ॥ ८

विलोक्य तस्य नमनपूर्वकं तनुः किमर्थमत्र रहसि मां धराधिप ।
समेत्य नामिततनुषा विराजसे वदस्व तथ्यमिह न वाऽस्ति संशयः ॥९

अलङ्कुरु प्रविमलमानसो भवान् त्वदीयपीठमिह विराजते नृप ।
सुदीर्घमार्गहयविचालने भृशं श्रमेण जर्जरितमिवास्ति ते तनुः ॥ १०

अलङ्कृतः प्रविमलदेहदीप्तिभिः सुखासने बहुविधचारभावनः ।
प्रतापसिंहकृतवचांसि संस्मरन् रुषाऽभिजातसमदमत्सराञ्चितः ॥११

क्रमेण शक्तनृपतिः वृत्तभण्डनं प्रतापभूपतिकटुदुष्टभाषणम् ।
धरामरेन्द्रमरणजातसंकुलं बभूव चात्र तुमलयुद्धकारणम् ॥ १२

प्रतापसिंहकठिनशब्दशासनं चकार मां भुवि तलहीनभूपतिम् ।
तदर्थमेव खलु समागतोऽस्मि भोः धराधिपस्य पदतलं समर्चितुम् ॥१३

न मामकीनमिति भुवीह भाति मे विना च तावकमृदुपादपङ्कजम् ।
अहं भजामि कमपि देशवासिनं प्रकल्पयात्र मम सदा सुखं विभो ॥ १४

मुदा प्रियाः विदधति तुभ्यमेव भो निरन्तरं मधुरगुणाभिमण्डिताः ।
सहायताकरणविशिष्टमानसाः महार्हभारतभुवि राजवंशजाः ॥ १५

पिता स्वयं खलु जगमल्लनामकं चकार भूपमतिविशालबुद्धिमान् ।
स कृष्णभूमिपतिरपीह शान्तिमान् बभूव तातवचनकार्यपालकः ॥ १६

निनिन्द कृष्णनृपतिमल्लभूपतीः प्रतापसिंहनरपतिः दुरोदरः ।
रुषाऽवमानकरपदालिभाषणैः निरन्तरं भुजबलगर्वदर्पितः ॥ १७

तथाऽवमानितजगकृष्ण भूपती प्रतापभूमिपतिबलेन कम्पितौ ।
प्रतापमेव नरपतिं विचक्रतुः मनीषिणौ खलबलदूषितौ भृशम् ॥ १८

न कोऽपि तं व्रजति धराधिपः प्रियः कदापि तेन मधुरभाषणे रतः ।
अशान्तिभावभरितमस्य मानसं तदीयवाक्कुलिशसमं विभाति भोः ॥१९

सः सवदा विटपलतालिकानने कृपाणकार्मुकखरबाणसज्जितः ।
प्रयाति भूधरभयकन्दरेषु च हयाधिरूढसुभटवीरभासुरः ॥ २०

स एव राजपदसुयोग्यभूपतिः न चास्ति भूप इति विशालभूतले ।
विना च तं भवति न कोऽपि रक्षिता पवित्रभारतधरणीं धराधिपः ॥२१

न सूचिकाग्रतलसमानमेदिनी विभाति ते चल तव मित्रमण्डलम् ।
भवादृशः च जगति भूमिभारकः रुषा विभूषितमदमत्सरावृतः ॥ २२

समस्तराजकुलनृपालसंततिः तदीयपादतलरजोविभूषिता ।
विचारयन् वदति विना मनः प्रियं स एव भपकुलमहान् शिरोमणिः ॥१३

न चास्ति तस्य सुखानुभूतिभावना परं तु लोकसुखहिताय काङ्क्षते ।
विचित्रभावविकलमानसो भृशं करोति शाश्वतवनवासमेव हि ॥ २४

अयं विभाति विपिनलोककीर्तितः धराधिपावलिपटुभावगर्हितः ।
तदीयमित्रनिवहभावभूषितः सदाऽस्ति शत्रुजनविदूषणैः भृशम् ॥ २५

निरन्तरं तव बलहेलनं पुनः सदाऽवमानकरकुभाषणैः प्रभो ।
विनिन्दतीति निखिलशासनं भृशं स्वभारते परजनपालनं कुतः ॥२६

त्वदीयपादतलनिवासिनां गुणान् विगर्हतीति भवति पिष्टपेषणम् ।
समस्तवृत्तकथनमेव भूपते न चास्ति योग्यमिह भाषणं पुनः ॥ २७

सचेतकश्चरति वनेषु दीक्षितः दिवानिशं परजनखण्डनं कदा ।
विधाय भण्डनममरं भृशं प्रियं भवेयमाशु भरतराष्ट्रभूपतिः ॥ २८

पराजिभीकरगजघोटकादिकं विजित्य तुर्कदलमहार्थनिश्चयात् ।
मदीयभारतभुवि राजशासनं करोमि देशहितसुखाय केवलम् ॥ २९

इति प्रजल्पित वहुभावभूषितः तनोति दिव्यभरतदेशसंस्कृतिम् ।
प्रजामनःसु दशदिशान्तभूमिषु परम्परागतमुनिभावपूरिताम् ॥ ३०

सदाऽत्र शत्रुजनगणं नृपः परं
विचार्य कीटकचयनिस्तुलं धिया ।
विराजते धरणिसुखान्वितो भृशं
विचिन्तयन् समरतले हरः स्वयम् ॥ ३१

यदा कदापि विचलिताधिपो हृतं
मदीयरूपमपि धरातलेऽचिरम् ।
अभान्तमेव करणतत्परो भवेत्
इदं हि सत्यकथनमेव भूपते ॥ ३२

सकौतुकं पटुतररोषरञ्जितः
विना च गोप्यमखिलराजभावनाम् ।
न्यवेदयं सरसभावनिर्भरं
भवत्कृते विमलमनाः शुभाशया ॥ ३३

अवोचमस्मि भरतदेशपालकं
यथार्थमेव बहुवितप्तभावनः ।
अहं सविस्तरमभिमानपूरितं
प्रतापभूपनवविधानमाशयौ ॥ ३४

निशम्य शक्तकथितशत्रुवर्तनं
विहस्य शान्तनयनदीर्घलोचनः ।
उदीरितं बहुविधभावगर्भितं
मुदावहं भवति च शक्तकेसरी ॥ ३५

सदाऽक्वरः सकलजनालिसौख्यदः
न सन्ति तस्य च भुवनेषु शत्रवः ।
यदि स्युः तस्य भवति कारणं महत्
न चाक्वरीयगुणगणालिमूलकम् ॥ ३६

नितान्तगर्वभरितमानुषः सदा
न पश्यतीह च महनीयवंशजान्।
स्वदेशवैभवजपरम्पराः प्रियाः
सुखास्पदाः स्मरति नृपांश्च भूतले ॥ ३७

स्वयं हि सैव विनुतमानुषः प्रियः
न कोऽपि भाति च पुरतः ततः परम्।
सदाऽभिमानपटुवितापितो वृथा
नवं नवं दहति च जीवने भृशम् ॥ ३८

त्वमत्र राजभवनसौधमण्डले
भुनक्तु भौतिकबहुसौख्यसम्पदम्।
त्वमेव मामकनृपबन्धुमण्डले
विराजसे नवयुवकेषु मन्मथः ॥ ३९

परस्परं तौ बहुमानपूर्वं
संभाषणं साधुतरं विधाय।
उत्थाय यातौ परिचारिकाभिः
संदर्शिते मार्गतले चलन्तौ ॥ ४०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे 'शत्रुपक्षे शक्तसिंहस्य प्रवेशः' नाम चतुर्थः सर्गः समाप्तः ॥]

पञ्चमः सर्गः ।

५. मानसिंहस्य व्यक्तित्वम् ।

श्रीरामचन्द्रपुत्रस्य कुशस्यान्वयसूतिनः ।
महाराजस्य वंशेऽयं मानसिंहोऽप्यजायत ॥ १

बाल्यादेवास्ति वीरोऽयं धनुर्विद्याविचक्षणः ।
राजकारणमार्गेषु तज्ञः सर्वकलानिधिः ॥ २

शस्त्रास्त्रविद्यातज्ञश्च गजघोट्टाणचालकः ।
व्यूहापोहविशेषज्ञः नर्मभाषणपण्डितः ॥ ३

प्रतापो लववंशीयः द्वावप्येतौ सहोदरौ ।
मानसिंहप्रतापौ तु सर्वदा द्वन्द्वभासुरौ ॥ ४

रामकृष्णौ सदा द्वन्द्वे कृष्णार्जुनसमौ रणे ।
रामलक्ष्मणसंकाशौ बाल्यादेतौ महाबलौ ॥ ५

दुर्दैवकृतभावेन द्वावप्येतौ विभाजितौ ।
विना समैक्यभावं तु परस्परविरोधिनौ ॥ ६

मानस्तु काङ्क्षते नित्यं जीवने सौख्यसम्पदम् ।
राणाप्रतापसिंहस्तु काङ्क्षते राष्ट्रपालनम् ॥ ७

दृष्टिकोणास्तु राज्ञोश्च वर्तेते भिन्नवर्त्मनोः ।
तयोश्च जीवनं तद्वत् तथैवासीद् ध्रुवं भुवि ॥ ८

विलोक्य मानसिंहस्तु बाल्यात् राणामहर्निशम् ।
देशभक्तं प्रतापं च शौर्योपेतं विशङ्कितः ॥ ९

अयं सत्यं महायोद्धा भविता भारते ध्रुवम् ।
अनेन युद्धकरणं कठिनं भवति निश्चयम् ॥ १०

बाल्ये राणां प्रवीक्ष्यैव मानसिंहो जगाद च ।
पुष्पस्य गन्धमाहात्म्यं कुड्मले ज्ञायते सदा ॥ ११

शक्तिमान् मानसिंहस्तु सैन्यसंचलने चणः ।
अनेकानीकसंव्याप्तः रणव्यूहविशारदः ॥ १२

राजपुत्रान् परित्यज्य शत्रुपक्षे जगाम सः ।
राष्ट्रमुद्दिश्य नास्त्येव तस्य भक्तिः कदापि च ॥ १३

मज्जनं सर्वसौख्येषु सृजनं शत्रुसंचयम् ।
विसर्जनं स्वधर्मं च मानसिंहस्य लक्षणम् ॥ १४

इमे तस्य गुणाः सन्ति सहजाताः प्रियाः भुवि ।
आसीत् दुरभिमानी च दुर्विदग्धश्च दाम्भिकः ॥ १५

धीरोद्धतगुणैर्युक्तः वाचालः न तु भावुकः ।
मदमत्सरसंपृक्तः द्वन्द्वभावेन संयुतः ॥ १६

मानसिंहसहायेन चाक्वरः शक्तिमान् कृतः ।
राधेयेण यथापूर्वं भारते तु दुरोदरः ॥ १७

राधेयस्य सहायेन यथा युद्धं दुरोदरः ।
चकार पाण्डवैः साकं तथा मानेन चाक्वरः ॥ १८

राधेयसदृशो मानः भ्रातृपक्षं ययौ न हि ।
जीवितं यापयन्नासीत् शत्रुपक्षे सुखास्पदे ॥ १९

एकत्र यदि वीरौ द्वौ वर्तेतां सोदराविव ।
जयः तत्र भवेत् तथ्यं विना विघ्नेन सर्वदा ॥ २०

अज्ञात्वा सत्यमेतद्धि मानसिंहः परान् गतः ।
विस्मृत्य राष्ट्रं सर्वस्वं धनलोभेन निश्चयम् ॥ २१

सत्यमेतद् विदित्वाऽसौ मानसिंहं स चाक्वरः ।
अन्यैश्च राजपुत्रैश्च सौख्यं दत्वा विचिक्रिये ॥ २२

जानाति मानसिंहस्तु स्वकृतं कर्म गर्हितम् ।
तथापि धनलोभेन तुष्टः सौख्येन सर्वदा ॥ २३

स्वात्मानं तृप्तमाधातुं स्वकृतं साध्विति प्रियम् ।
प्रजाश्च गदितुं दासं कर्तुं राणां समीहितः ॥ २४

पादपीठे तु तुर्कस्य स्वात्मशान्त्यै विशेषतः ।
समं विभक्तं दुःखं तु मनःशान्तिं प्रयच्छति ॥ २५

राणाप्रतापभूपस्तु महायोद्धा धरातले ।
तथेति तस्मिन् काले तु किंवदन्ती प्रचक्रमे ॥ २६

कस्यापि शक्तिः नास्त्येव तं जेतुं समरे भुवि ।
जानाति मानसिंहस्तु तथेत्यात्मनि सर्वदा ॥ २७

एकलिङ्गेश्वरः साक्षात् राणारूपेण वर्तते ।
भारतं रक्षितुं तुर्कात् इत्येवं मनुते स्वयम् ॥ २८

महाभारतयुद्धं तु प्रवृत्तं कर्णमूलकम् ।
प्रतापाक्वरयोः युद्धं मानसिंहस्य मूलकम् ॥ २९

प्रतापेन समं युद्धं कर्तुं मानस्तु शङ्कते ।
तस्मात् तेन समं सन्धिं विधातुं प्रसमीक्षते ॥ ३०

समक्षं सः प्रतापस्य गन्तुं भीत्या विकम्पते ।
संभाषणं प्रतापेन कर्तुं नैव समीहते ॥ ३१

मेवाडधरणीभूपाः महाशक्तिसमन्विताः ।
शीघ्रं त्यक्ष्यन्ति प्राणांश्च देशभक्तिं कदापि न ॥ ३२

तथेत्येनं विजानाति मानसिंहः स्वशैशवात् ।
तस्मात् प्रतापराणां सः पूजयन् भाति जीवने ॥ ३३

देशद्रोहीति जानाति मानसिंहः स्वतः सदा ।
तस्मात् द्रष्टुं प्रतापं तं काङ्क्षते लघुमानसः ॥ ३४

प्रतापेन समं वस्तुं काङ्क्षते नैव भूपतिः ।
संत्यक्तुं चाक्बरं नैव शक्तिमान् जायते तदा ॥ ३५

द्वन्द्वभावेन युध्यन् सः यापयन् जीवितं भृशम् ।
दुरभिमानेन संयुक्तः जीवच्छवसमो भुवि ॥ ३६

विभाति राजदर्बारे राजवेषेण भूषितः ।
विधास्यन् यन्त्रवत् सर्वं तुर्कभूपेन शासितः ॥ ३७

एवं मानः रिपुगणमध्ये तुर्कस्यान्ते बहुविधसौख्ये ।
मग्नो दक्षः गजहययूथे वीरो भूत्वा विलसति दिल्ल्याम् ॥ ३८

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे 'मानसिंहस्य व्यक्तित्वं' नाम पञ्चमः सर्गः समाप्तः ॥]

षष्ठः सर्गः ।

६. अक्बरमानसिंहयोः मन्त्रणा ।

श्यालकं मानसिंहं तु रहस्यालोचनाय सः ।
एकान्तमाह्वयामास मन्त्रिमण्डलमन्दिरम् ॥ १

तत्क्षणं मानसिंहस्तु राजलाञ्छनभूषितः ।
प्रविष्टश्चाक्बरो वेश्म स्वयं राजेति भावयन् ॥ २

अक्बरं तत्रपीठस्थं प्रणनाम स मानसः ।
मोगलाधिप्रपातेन हस्तमस्तकचालकः ॥ ३

आगतं मानसिंहं तं दृष्ट्वा मन्दस्मितः परम् ।
समुखं तस्य गत्वाऽसौ एहि मे मित्रबान्धव ॥ ४

व्याहरन् स्वागतं त्वेवं आलिलिङ्ग प्रियं हृदा ।
आदिदेश सुखासीनं पीठे भवितुमाशु तम् ॥ ५

उपविष्टः सुखं मानः किमत्रापतितं विभो ।
समाहूतस्त्वया कस्मात् कर्तव्यं किमु विद्यते ॥

वदस्व साम्प्रतं क्षिप्रम् आपत्तिं तां समागताम् ।
विना च संशयं देव विस्तृतं विशदीकुरु ॥ ७

श्रुत्वा तस्य वचः शान्तं चिन्तयन् बहुनिःश्वसन् ।
चिन्ताभारभरेणासौ जडत्वं प्राप्य निश्चलः ॥

अक्बरः चक्रवर्तित्वं दर्शयन् गर्वनिष्ठितम् ।
जगाद मानसिंहं तु विचाराधीनमानसः ॥ ९

मानसिंह स्वयं वच्मि शृणु शान्तं महाबल ।
त्रयोदशीयवर्षेऽहं राज्यभारेण नामितः ॥ १०

सर्वेशकृपया सर्वं शान्तिमार्गे विरच्य च ।
देशं क्षीरप्रवाहैश्च सस्यपूर्णं करोम्यहम् ॥ ११

शतधा भारतं सर्वं कलहैः शकलायितम् ।
राज्यानि रणपूर्णानि भान्ति नित्यं स्मशानवत् ॥ १२

अखण्डभारतं वीक्ष्ये कदा मे जीवने वद ।
शालस्त्वं परमास्त्रश्च सदा मे क्षेमकारकः ॥ १३

राज्याभिषिक्तदिवसात् संपूर्णं भारतं दृढम् ।
लक्ष्मीविराजितं कर्तुं प्रयतेऽहं निरन्तरम् ॥ १४

कीर्तयन्ति जनाः सर्वे प्रत्यूषपवनाङ्कुरम् ।
अक्बरं शान्तिराज्यस्य स्थापकं शासकं प्रियम् ॥ १५

चिन्तयन्ति च सर्वे मां भोगभाग्यपरीवृतम् ।
किन्तु सौख्यं विना राज्ये जातं च मम जीवनम् ॥ १६

निस्सीमितां च बाधां मे वक्ष्ये कं किं प्रयोजनम् ।
कथने नैव सन्तीह मम दुःखप्रशामकाः ॥ १७

सहे विंशतिवर्षेभ्यः दुःखाग्निं हृदये भृशम् ।
अधुना ते वदामीह नास्त्यन्यः त्वदृते प्रियः ॥ १८

मेवाडराज्यहीनं तु केवलं मम शासनम् ।
सर्वत्र भारते भाति तदेतत् तुदतीह माम् ॥ १९

दुर्विदग्धः प्रतापोऽसौ युष्मान्मे बन्धुवर्गकम् ।
पङ्क्तिबाह्यान् चकारेति श्रुत्वाऽहं खेदमाप्नुवम् ॥ २०

जल्पन्त्यज्ञानिनो नित्यं असूयावृतमानसाः ।
राज्यतृष्णापरीतं मे हृदयं परिपूरितम् ॥ २१

सर्वे जानन्ति मां लोके मित्रामित्रजनाः प्रियाः ।
सहगमनदुराचारनाशकोऽहमिति ध्रुवम् ॥ २२

मद्यमांसनिषेद्धारं संगीते बहुलोलुपम् ।
रक्षकं सर्वधर्माणां करुणाकरमानसम् ॥ २३

कण्टकं चरणे विद्धं हैन्दवानां भवेद्यदि ।
भेजेऽहं दुःखमत्यन्तं पादो मे कण्टकक्षतः ॥ २४

दिवारात्रं विना निद्रां विनाऽऽहारं च बाधया ।
करोमि शतधा श्याल राष्ट्रस्य हितचिन्तनाम् ॥ २५

राणा राज्यात् न मे किञ्चित् लाभो भवति तत्त्वतः ।
स्थापयित्वा प्रजाः सर्वाः गिरेरासन्नभूमिषु ॥ २६

पत्तनानीह सर्वाणि नाशयामास मूर्खतः ।
सस्यश्यामलराष्ट्रं तु क्षारपूर्णं चकार सः ॥ २७

राजतेऽसौ भृशं मूर्खः मूषकेभ्यः परं भिया ।
लक्ष्मीविलाससंराजं दग्धवान् स्वनिकेतनम् ॥ २८

देवांशजन्मना पूतः सूर्यवंशे महायशाः ।
यवनोऽहं सदा मूर्खः ततो वैरी भवत्यहो ॥ २९

जनाः केचन तं नित्यं निन्दन्ति कटुभाषणैः ।
अन्धः सन् योद्धुमायत्तः पापात्मा देशनाशकः ॥ ३०

वर्तितव्यं सदा दूरे अस्माभिः भयमानसैः ।
वयं योद्धुं प्रयास्यामः मृतानस्मान् स पश्यति ॥ ३१

ये यथा मामसेवन्त तथा ते भोगभाजिनः ।
सर्वे जाताश्च राजानः संपुष्टाः सकलैः सुखैः ॥ ३२

राणाऽयं बहुपाषण्डः यदि मामाश्रयेत् प्रियं ।
लोके तस्य चरित्रस्य कलङ्कः प्रभविष्यति ॥ ३३

एकान्तमागतं भूपं त्वामहं मनसा ब्रुवन् ।
मदीयं कृतवानस्मि भोगभाग्यैः परीवृतम् ॥ ३४

विषान्नं भुज्यते किं भोस्त्वया मे राज्यपालने ।
अन्योन्यसहकारेण वर्धते जीवनं भुवि ॥ ३५

कदाप्यहं न वक्ष्ये तं कुरु दास्यं सुखाय वै ।
इदं वच्मि सदा राणां युद्धं मास्त्विति भारते ॥ ३६

चरितं राजपुत्राणां जानामि बहुविश्रुतं ।
सीमोल्लङ्घनमाकुर्वन् न ब्रवीमि कदापि भोः ॥ ३७

राजाऽहम् अन्यराजेभ्यः दातव्या मानवन्दना ।
आदानं च प्रदानं च जानामि विशदं भुवि ॥ ३८

शृणु मे भावनां वीर विशालं भारतं कदा ।
निर्मातुं शक्तिसद्भावैः प्रभवामीह जीवने ॥ ३९

द्वौ स्वतन्त्रौ न योग्यौ च राष्ट्रेऽस्मिन् राज्यपालने ।
इत्येवं साधु संभाव्य कथयामि न चाशया ॥ ४०

यद्यहं युद्धसंनद्धः भवामि गजसेनया ।
न कोऽप्याहवभूमौ मां रोद्धुमर्हति मानवः ॥ ४१

कियती तस्य शक्तिस्तु कियत् तत् राज्यवैभवम् ।
वीक्ष्याहं बन्धुवर्गैश्च शान्तवृत्या भवामि च ॥ ४२

यदहं वायुवेगेन गत्वा तस्य पुरीं द्रुतम् ।
अवरोत्स्ये न कोऽप्यस्ति रोद्धुं मामाहवे नृप ॥ ४३

अनया चिन्तया नित्यं भेजे कात्स्न्र्यं तनुः भृशम् ।
यथा च कर्करोगेण शरीरी भजते दशाम् ॥ ४४

त्वादृशेनापि युक्तोऽहं चिन्ताव्यथितमानसः ।
भवामीति परं भूप प्रबलं दूयते मनः ॥ ४५

इत्युक्त्वा विररामासौ चिन्ताव्यापृतचेतनः ।
अक्बरो मानसिंहस्य पुरतोऽसह्यवेदनः ॥ ४६

तं तथा चिन्तया दग्धं अक्बरं वीक्ष्य भूपतिः ।
जगाद वचनं प्रीत्या चोद्वेगेन प्रचोदितः ॥ ४७

राजन् किं ते विचारोऽस्ति मयि जीवति भूतले ।
सामन्तं च करिष्यामि प्रतापं माऽस्तु भो व्यथा ॥ ४८

यदुच्यते त्वया सत्यं भवत्येव महीतले ।
सुखाय त्वं ब्रवीष्येवं न स्वार्थाय परं विभो ॥ ४९

यथाकालं यथाशक्ति गत्वा राणामहीपतिम् ।
भाषणे तं वशीकृत्य चानयिष्यामि तेऽग्रतः ॥ ५०

पारंपर्येण राणास्तु प्राधिकारेण शोभिताः ।
तेषां सेवाऽस्मदीयानां साम्प्रदाया भवेद् ध्रुवम् ॥ ५१

अवश्यं राजसिंहं तं निर्जित्याहं तु भाषणे ।
व्रजामि पादपद्मं ते दासोऽहं हे महाप्रभो ॥ ५२

आनयेयं प्रतापं तु तव पादाब्जसंस्थितम् ।
करिष्यामि न ते चिन्ता सर्वभारतभूपते ॥ ५३

शिरीषः सहते पादं भ्रमरस्य न पक्षिणः ।
देहस्ते सहते नैव परवीररणाङ्गणम् ॥ ५४

मयि जीवति लोकेऽस्मिन् क ते चिन्ता भवत्यहो ।
धुरं विसृज्य मे स्कन्धे निश्चिन्तः सुखमाप्नुहि ॥ ५५

भुज्यतेऽत्र मया सौख्ये लवणं राजभोजनम् ।
कर्तव्यं मेऽस्ति राज्येऽस्मिन् विश्वासं कुरु हे प्रभो ॥ ५६

यदि नेच्छति संधिं सः भेदोपायेन शाश्वतम् ।
करिष्यामि च सामन्तं तथ्यं भूयाच्च मे वचः ॥ ५७

अन्तिमो राजकीयेषु बहुधा स प्रयुज्यते ।
दण्डोपायो महोपायः निश्चयं कार्यसाधकः ॥ ५८

इत्येवं भाषणं श्रुत्वा स्वयं चाक्बरभूपतिः ।
मौनेन दर्शयामास स्वाङ्गीकारं हसन्मुखः ॥ ५९

भाषणान्ते च तौ द्वौ प्रोत्थाय सोत्साहं जवेन ।
निर्गतौ स्वस्थानानि संविधातुं स्वकर्तव्यानि ॥ ६०

[इति श्रीमत्प्रतापरायणन-महाकाव्ये दिल्लीकाण्डे 'अक्बर-मानसिंहयोः मन्त्रणा' नाम षष्ठः सर्गः समाप्तः ॥]

सप्तमः सर्गः ।

७. उदयसागरतटे मानसिंहप्रतापयोः समागमः ।

मातरिश्वजवघोटकभास्वत् म्लेच्छवंशजविभूत्तमबन्धुः ।
मानसिंह इति नाम महीपः संजगाम निजमातुलगेहम् ॥ १

आविलोक्य निजबान्धवलोकं व्याजहार कुशलादिकमाशु ।
मातुलं च जयमल्लकबन्धुं स्वामिदर्शनसुखाय दिदेश ॥ २

द्रष्टुमिच्छुक इति प्रियराणाम् आगतोऽस्मि तव सन्निधिमेवम् ।
योजकोऽसि मम सौख्यहितैषी कल्पयिष्यसि च दर्शनमस्य ॥ ३

विश्रमस्व बहुशान्तमनास्त्वं प्रेषयेयमधुना विभुपादम् ।
कामनां तव वनेचरसार्धं किं भविष्यति परं नहि जाने ॥ ४

एवमेव समुदीर्य च वार्तां प्राहिणोत् रविकुलोद्भवमूर्त्यै ।
द्वावपीह निजबान्धवसख्ये रेजतुः परमनन्तकथाभिः ॥ ५

सत्वरं वनचरः शुभवार्ताम् आनिनाय धरणीपतिराणात् ।
मेलनं च भवितोदयसिंधौ मानसिंहनृपतेः परमाशु ॥ ६

एवमाप्तवचनं प्रभुराणात् श्रोत्रपेयममलं च निशम्य ।
मानसिंहनृपतिः तुरगेण द्रष्टुमुत्सुकमनाः निजगाम ॥ ७

एनमाशुबहुफुल्लितचित्तः संततं भुजबलाधिकदृप्तः ।
बोधयन् निजसुखार्णवभोगान् सान्त्वयेयमिह चाक्बरदास्ये ॥ ८

कल्पनाबलविचित्रितबुद्धिः संप्रविश्य बहुभूषितदेशम् ।
आलुलोक परितः सकलं सः शान्ततालितसागरदेशम् ॥ ९

तत्र पार्श्वगतभूधरभूमौ आसनानि कुशसंग्रथितानि ।
सारितानि बहुशोभितरीत्या चित्रितानि मधुगन्धिलपुष्पैः ॥ १०

पार्श्वभूमिकुशनिर्मितपीठे शान्तचित्तमयरूपितराणा ।
मौनमुद्रितमनोहरमूर्तिः राजते स्म निजवैभवभासा ॥ ११

पौरुषेण मधुभासितमूर्तिं मानसिंहनृपतिः सहसा तम् ।
भूमिभागतलनामितभालः स्वाभिमानपरितः प्रणनाम ॥ १२

सादरं लसितभूधररूपस्तं जगाद मृदुलोक्तिपरीतम् ।
अम्बराधिपतिमानसिंहः स्वीकरोतु भवदीयसुपीठम् ॥ १६

त्वादृशो मधुरपौरुषमूर्तिः राजकीयमतिमान् न हि देशे
शान्तिहीनबहुकर्मणि लग्नः राजसे हि बहुधा प्रवदन्ति ॥ १४

ग्रीष्मकालरविदीधितितप्तः भूमिधूसररजोगुणलिप्तः ।
दूरभूमितुरगोपरिनुन्नः आगतोऽसि वद वाञ्छति चित्तम् ॥ १५

धर्मरक्षणकृते गतसौख्यः बन्धुवर्गममलं परिवारम् ।
सौख्यभूमिसकलं परिहृत्य कानने वसति कः तव भावः ॥ १६

कर्तुमिच्छसि सदा बहुभद्रं भागधेयमसि भारतदेशे ।
आगतोऽसि दरहाससुरम्यं द्रष्टुमत्र मधुरं तव रूपम् ॥ १७

सत्यमेव सफलं मम जन्म दर्शनेन तव जातमिदानीम् ।
फुल्लितं नयननीरजयुग्मं काङ्क्षितं मम न चास्ति नरेन्द्र ॥ १८

अद्रयो विनुतचारुवलीयाः शाश्वताः जगति दिव्यसुधर्माः ।
छत्रितानि खलु भूजकुलानि चासनानि कटुशैलतलानि ॥ १९

पुष्पगुच्छकृतचामरदण्डैः वान्ति भूरुहलताः प्रसमीक्ष्य।
विश्वपालनमयीं तव शक्तिं स्तौमि हे मधुरभीमगुणाढ्य ॥ २०

मौनभावमवलम्बितमेनं सुस्मितेन वचसा स तु मानः।
यंच्च वक्तुममुमागतवान् तत् स्पष्टवाक्यसरणिः प्रबभाषे ॥ २१

भाषणीयविषयं मम नास्ति सन्निधौ तव विभो जगदीश।
किंतु चञ्चलमनोविभवः सन् श्रावयामि विनयेन मदुक्तिम् ॥ २२

नैकलक्षगजवाडवसैन्यैः नाल्पसंख्ययमभीकरतोफैः।
भासते हि जगतीतलचन्द्रः शासयन्निव सदाऽक्बरराजा ॥ २३

पक्षपातरहितः सहितैश्च हैन्दवैः सकलयावनसंघैः।
संयुतोऽत्र निजलोचनसाम्यं शास्ति लोकमयमादरभावैः ॥ २४

नन्दनं भवति पीडितवर्गे शौर्यविक्रमकलावृतमूर्तिः।
हैन्दवीयवहुमन्दिरजालं पूजयन् वसुमतीं परिपाति ॥ २५

मार्गपार्श्वतलभूमिजपङ्क्तिं नैककूपवनराशितटाकम्।
सर्वभाषकविकोकिलजालं पोषयन् भजति सौख्यमनन्यम् ॥ २६

स्वीयशासनशिरोधरवर्गं मित्रभावभरितं मनुते तम्।
राजदानचयतोषितवर्गे कल्पवृक्षमिव भाति महात्मा ॥ २७

प्रत्यहं भजति गोसमुदायम् चाम्बराधिपतिदिव्यमहाभम्।
त्यक्तमांसमधुपानपलाण्डुः भासते जगति सात्त्विकभावैः ॥ २८

भारतावनिमहीपतिरेवं रागयोजनरतो पटुदक्षः।
स्वामिनायकमहीपतिचन्द्रः कानने बहुविरक्तगुणोऽस्ति ॥ २९

लोचने मम युवां गुरुमूर्ती युष्मदीयपदपङ्कजयुग्मम्।
उत्तमाङ्गपरिवाहनयोग्यं भाति भारतधराधिपदेव ॥ ३०

लोकवन्द्यममलं तव भावं पूजयेयमहमानतशीर्षः ।
देशकालनिजशक्तिपरीतः चावलोक्य कुरु सर्वमिदं भोः ॥ ३१

सर्वसाधकमियं भुवि नीतिः व्यर्थमेव कुरुषे तव जन्म ।
कष्टनष्टपरिपूरितभावैः साधयस्व पुरुषार्थमहो त्वम् ॥ ३२

वीरधर्म इति दर्शितपन्थाः देशनाशककथावलिजातः ।
सस्यपूर्णहरितोज्ज्वलभूमिः चोषरा भवति पश्य महीश ॥ ३३

भोजनं वसतिहीनजनोऽयं म्लानपङ्कजमुखावलिभासा ।
भाति वीरजनशोभितदेशः अस्थिपञ्जरसमानमिहात्र ॥ ३४

भाग्यदैवतविनर्तितरम्यां भाग्यहीनधरणीं प्रविलोक्य ।
एकभुक्तपरितोषितभूपं भारतेऽत्र दहते मम चित्तम् ॥ ३५

उन्नतेन भवता भवितव्यं किं विचार्य कुरुषे भुवि राजन् ।
मामकीनवचनं शृणु सत्यं भावयात्र सहजं मम वन्द्यो ॥ ३७

धर्मबुद्धिरिति नीतिपदानि देशभक्तिरिति नव्यपदानि ।
कल्पितानि सततं सकलानि दुर्बलैः भुवि नपुंसकवर्गैः ॥ ३७

अक्बरोऽस्ति बलपूरितशत्रुः तेन सार्धमधुना कृतवैरः ।
क्षीरनीरमिव मिश्रितभावः जीवनं रचय साधुविचारे ॥ ३८

वैरभावपरिपूरितचित्तः नैव भावयति योद्धुमहोऽत्र ।
योद्धुमिच्छसि कृतान्त इव त्वं नूनमेव समरो भविताऽस्ति ॥ ३९

शङ्करोपमितशक्तिसमेतः भाससे त्वमिह रागविहीनः ।
अक्बरश्च परिवारपरीतः विष्णुदेव इव भाति सुखेषु ॥ ४०

युद्धमेव यदि योग्यमितीह निश्चितं भवति भूमिचराश्च ।
भोगभाग्यविलसत् धरणीयं पञ्चभूतमिलिताश्च भवन्ति ॥ ४१

युद्धकारणवशात् धरणीयं मैतु नाशनवशा धरणीप ।
संधिरेव हि भृशं करणीयः सर्वमस्ति तव हस्तजळेजे ॥ ४२

एवं चोक्त्वा मानसिंहः प्रशान्तं राणां नत्वा गन्तुकामः प्रतस्थे ।
उद्वेगात्तो मन्दमन्दं प्रतापः स्वाभिप्रायं वक्तुमेनं चकाङ्क्ष ॥ ४३

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' उदयसागरतटे मानसिंह-प्रतापयोः समागमो ' नाम सप्तमः सर्गः समाप्तः ॥]

अष्टमः सर्गः

८. प्रतापेण मानसिंहाय प्रत्युत्तरदानम् ।

आनिशम्य सकलं कथितं सः मानसिंहविभुना सविकासम् ।
मन्दमन्दममलैः सुवचोभिः सूक्तिपूर्वकमिदं प्रबभाषे ॥ १

मानसिंह मयि ते गुरुभक्तिः शाश्वती बहुमुखा निजरूपा ।
त्वामहं मम सुखार्थिनमत्र भावपुष्पनिचयैः बहुशंसे ॥ २

सूर्यवंशज नराधिपजन्म कष्टकर्मणि सदा बहुमग्नम् ।
पूर्वजैः सततधर्मपरैः तु यत् कृतं नु तदहं विदधामि ॥ ३

अष्टकष्टबहुलीकृतकाले धैर्यमेव फलसाधकमस्ति ।
दैवदत्तमिति कष्टमनन्तं स्वीकरोमि परमोत्सुकबुद्धिः ॥ ४

दुःखमेव वरमस्ति सुखाच्च यच्च शान्तिमयजीवनदाता ।
दुःखतप्तजनता विदधाति सर्वथैव बहुराष्ट्रहितानि ॥ ५

साम्प्रतं तपति भारतदेशः मोचनाय परकर्कशहस्तात् ।
रक्तसिक्तकरपङ्कजहस्तैः तर्पयेयमिह भारतभूमिम् ॥ ६

केवलं भणनमद्य न कार्यं सर्वकष्टसहने भवितव्यम् ।
पौरुषेण भुवि यापयितव्यं जीवनं भरतदास्यविमुक्त्यै ॥ ७

नीरसैः मलिनशुष्कवचोभिः दाम्भिकैः प्रबलतन्द्रमनोभिः ।
भोगभाग्यचयभौतिकसौख्यैः जीवने भवति नैव विकासः ॥ ८

मामकीनपटुकष्टपरीतं जीवनं नहि विचारय मान ।
स्वीकरोमि महिदुर्भरकष्टं नाहमत्र विचलामि च धर्मात् ॥ ९

मानसिंह तव भावविलासैः मानसं च मम फुल्लितमासीत् ।
मानवेन शतधा भवितव्यं देशरक्षणपरायणभावैः ॥ १०

रक्षणीयमिह भारतराष्ट्रं राष्ट्रभक्तजनवीरनरेन्द्रैः ।
अन्यलोकपरिपालितराष्ट्रं नैव कोऽपि सहते भुवि वीरः ॥ ११

अन्यपालनरता भुवि मूर्खाः दास्यवृत्तिमपि साधु भजन्ते ।
आश्रयन्ति गुणमानविहीनाः स्वार्थजीवनपरा भुवि मान ॥ १२

दैवमस्ति निरतं खलु धर्मे राजनीतिरविनीतिसमाक्ता ।
धर्म एव जगतीतलरक्षां कारयन् चलति निश्चलरूपः ॥ १३

पौरुषं महि विहाय कथं भोः अक्वरस्य पदसेवनतृप्त्या ।
यापयेयममलं मम जन्म हीनपौरुषजनो भुवि भारः ॥ १४

त्वादृशाश्च कथयन्ति धरित्र्याम् अक्वरः सकलसद्गुणशाली ।
एवमेव भणनं मम कर्णे प्राविशत् पटुतरं बहुपूर्वम् ॥ १५

अक्वरं न कथयामि कदापि दुष्टबुद्धिरिति वञ्चनशीलः ।
गौरवं सततमेव ममास्मिन् विद्यते विमलमानवभावैः ॥ १६

उत्तमो यवनवंशसुदीपः भाति केवलममानुषरूपः ।
सैन्यमस्ति विनुतं भुवि तथ्यं स्वीयधर्मपरिपालनदक्षः ॥ १७

हैन्दवाचरणयोग्यमनन्तं स्वीयधर्म इति मानितवृत्तिः ।
कारयन् धरणिकीर्तित आसीत् भारतीयजनता नहि रुन्ध्यात् ॥ १८

युद्धभूम्नि च पराजितभूपाः शात्रवः प्रबलवैरयुताश्च ।
शत्रवो मम कदापि धरित्र्यां मा भवन्त्विति सदा कृतमैत्रिः ॥ १९

संचकार पटुदीक्षितभावा राजवंशविनुता मम दुर्गा ।
साऽपि चात्ववररणे बहु चक्रे तूलतूलमिव शत्रुखण्डनम् ॥ २०

सङ्गराङ्गणरता च विपेदे पारतन्त्र्यमसहिष्णुरिवासौ ।
देशरक्षणविधावनुरक्ता स्वीयनाम च शिलासु विलिख्य ॥ २१

भैरवाः सततराजितभूपाः भ्रातरः क्षुभितसैंहिकरूपाः ।
शात्रवप्रबलकृत्रिमभावैः वञ्चिताश्च निहताश्चरणेषु ॥ २२

तादृशाः प्रमदमण्डलवर्गाः भीकराहवरताः विवशाश्च ।
संप्रयुध्य मरणं खलु जग्मुः नैव सन्धिकरणे सुमुखास्ताः ॥ २३

क्षामकालभवमारणयज्ञे नाशमाप वरगुर्जरदेशः ।
वैभवेषु निवसन् खलु वङ्के नाटकं व्यरचयत् बहुवक्री ॥ २४

केवलं धनबलेन महात्मा जायते न कदापि धरण्यां ।
धर्मकार्यकरणेन नितान्तं पूर्वजन्मकृतपुण्यबलेन ॥ २५

जन्मभूमिरिह मे खलु पूता नाकलोकतुलनादपि गुर्वी ।
दास्यलब्धवरहेमनगाच्च स्वेच्छयाऽऽगतनगोऽत्र वरिष्ठः ॥ २६

अक्बरेण न कदापि च सन्धिः जीवने मम भवेदिति सत्यम् ।
चिन्तनीयमिह नैव तवास्ति दूरमेव वरमत्र ममास्मात् ॥ २७

पत्तनेषु सततं प्रचलन्ति जङ्घनामितनमांसि महन्ति ।
भावहीनहसितानि भवन्ति दर्शनानि विषपूर्णमयानि ॥ २८

काङ्क्षते न हि च मे हृदयं तु वेषभूषणसुभूषितरूपम् ।
पर्णसद्मवसने सुखमस्ति रोचते वहुधरातलशय्या ॥ २९

कानने तरुतलानि भवन्ति नन्दनेन तुलितानि नितान्तम् ।
स्वर्गधाम इव काननवासः भाति मेऽत्र मनुजाधिपवन्धो ॥ ३०

वैजयन्तनिभपर्णकुटीरैः निर्जरैः सम वनौकसमित्रैः ।
बन्धुभिः बहुमुखं भुवि दिव्यं सौख्यमेव हि मुदा नृप भुञ्जे ॥ ३१

दिव्यगन्धभरितानि वनानि चामृतेन तुलितानि जलानि ।
रम्यपत्रिलसितानि सरांसि सन्ति चेन्द्रियसुखाय महीप ॥ ३२

तृप्तिमेष्यति यदा भुवि जन्तुः तस्य भाति सुखसौख्यपरीतम् ।
जीवनं रसमयं न कदापि चाशया ज्वलितमानसराज्ञाम् ॥ ३३

धर्म एव परिरक्षति देशं दैशिकं भवति शाश्वतमस्मिन् ।
देशभक्तिपरिपूरितलोकाः नैव शत्रुपदगाश्च भवन्ति ॥ ३४

राणावचनं श्रुत्वा विदित्वा तस्याभिप्रायं प्रशान्तम् ।
मानसिंहः पुनस्तं किञ्चिदधिकं प्रोक्तुं प्रारेभे तदा ॥ ३५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे 'प्रतापेन मानसिंहाय प्रत्युत्तरदानम्' नाम अष्टमः सर्गः समाप्तः ॥]

नवमः सर्गः ।

९. अक्बरस्यौन्नत्यं निगद्य मानसिंहः राणाप्रतापं तर्जयति ।

यस्य नास्ति निजदैशिकधर्मः नैव चास्ति भुवि धर्मविचारः ।
अक्बरो भवितुमस्ति स एव सर्वविश्वपरिपालनदक्षः ॥ १

नैव युक्तमिदमत्र महात्मन् मत्तवारणबलैः प्रथितेन ।
सागरोपमितसैन्ययुतेन वैरिणा प्रबलवैरमनन्तम् ॥ २

अन्यराजनियमाः खलु तुभ्यं भान्ति नैव, नृप नूतनसन्धिम् ।
संविरच्य सुपथा नियमैश्च कारयेयमहमानतशीर्षः ॥ ३

तावकीनमबलाजनषण्डं प्रस्थितुं च दशरात्रिषु दिल्लीम् ।
नव्यमार्गसकलार्थपरीतं सन्धिभाषणमहो जननाथ ॥ ४

युष्मदीयविषये कृतदोषो मामकीन इति पार्थिव मन्ये ।
कण्टकाभिहततावकपादं वीक्ष्य मे भवति दुःखमनन्तम् ॥ ५

ओं करिष्यति भवान् चपलं भोः अक्बरं सपदमेव रजन्याम् ।
आनयेयमिह गुप्तशरीरं चान्यदृष्टिमनवाप्तपथि त्वाम् ॥ ६

पालयस्व शतघोदयदेशं काम्यसे यदि गृहाण चितौडम् ।
आनयेयमिह चाक्बरभूपं सन्धिकार्यकरणाय नरेन्द्र ॥ ७

जीवने मम सदा गुरुमूर्तिं त्वामहं बहु भजामि सदाऽऽर्यम् ।
युष्मदीयपदराजितधूलिं चर्चयामि मम भालतले भोः ॥ ८

अद्य तावदधिकं मम नास्ति संधिमानितमतादधिकं च।
नन्दनेन तुलितं वरदेशं संगरेण न हि नाशय भूप ॥ ९

अक्बरो वहति वारिगवेगे को हि नाम खलु तं प्रविरोद्धुम्।
प्रैति तस्य पुरतः स्ववलेन चाग्रहेण पटुदीपितशक्तिः ॥ १०

अकूबरो महितकीर्तिपरीतः देशमेनमतुलं परिपाति।
तावकीनमतिभेदविचारः नैव योग्य इह भाति ममात्र ॥ ११

साम्प्रतं लसति नैकचमूभिः उष्ट्रवाजिमदमत्तगजेन्द्रैः।
शान्तिसागरगभीरमहिम्ना युद्धकालमिह पश्यति भूपः ॥ १२

श्रेणिसैन्यपरिसर्पितदेशः सर्ववीरचयमण्डितराजः।
वर्धिता ग्रहपरीवृतशक्तिः मां विलोक्य नहि याति च योद्धुम् ॥ १३

आग्रहेण यदि योद्धुमनन्तैः वाहिनीचयसमावृततोपैः।
आगमिष्यति भवन्तमिदानीं रक्षितुं भुवि न कोऽपि समर्थः ॥ १४

शिक्षितं तव वनेचरसैन्यं शक्तिहीनमिव शस्त्रवलेन।
तस्य सैन्यमभितो नहि यातुं सक्षमो भवति राजवरेण्य ॥ १५

संगरो यदि भवेत् शृणु वीर अकूबरो भवति निश्चितजेता।
संकटे पतिततावकसैन्यं कोऽपि पश्यति च नैव शृणोति ॥ १६

संगरे निधनमेव यदि स्यात् जीवनेन न च साधितमासीत्।
भुङ्क्ष्व नाकसुखमत्र महीप सन्धिरूपकृतभौतिकराज्ये ॥ १७

सर्ववान्धवविनाशकमूलं क्षामकालपरिकल्पनदक्षम्।
युद्धमेव जनताहरकन्दं माऽस्तु संगरमहो जननाथ ॥ १८

मूर्खभावकृतभीकरयुद्धे राजसैन्यनिहताः तव सैन्याः।
रक्तसिक्तधरणीतलमग्नाः रोदनैश्च मरणं हि भजेयुः ॥ १९

साम्यमेव सततं प्रतिभाति क्लेहलग्नरणभूमिषु राजन् ।
दृश्यतेऽत्र न मया तव साम्यं सन्धिरेव हि मुदा करणीयः ॥ २०

शक्तिहीनकृतकर्मधरण्यां हास्यरूपमनिशं व्रजतेऽत्र ।
सज्जनास्तु भुवि कर्म विचार्य कुर्वतेऽतिविषमासु दशासु ॥ २१

अकवरस्य तव चात्र धरण्यां साम्यमेव न विभाति ममापि ।
शक्तिहीनपुरुषेण कदापि साध्यते किमिह काङ्क्षितवस्तु ॥ २२

केवलं त्वमसि शून्यविहारी कल्पनाकृतरणाङ्गणयोद्धा ।
राजकीयविषयेऽव्यवहारी नास्ति ते किमपि लौकिकबुद्धिः ॥ २३

अस्मदीयकुलशेखरवीर लोकनीतिविषयेष्वनभिज्ञ ।
लोकनीतिभृतं मम वाक्यं सर्वथा बहु विचारय नूनम् ॥ २४

सर्वदाऽहितमभून्मम वाक्यं साम्प्रतं प्रभणितं तव राजन् ।
कालकालकवलीकृतकाले सर्वथा हितमिदं प्रतिभाति ॥ २५

मामकीनवचनेषु सुदीर्घा सर्वदा लसति देशमनीषा ।
श्रोतुमेव नितरां ललितार्द्रा भावनागहनसंस्कृतवाणी ॥ २६

नास्ति कोऽपि भवतश्च हितैषी मित्रशत्रुनिचयेष्वपि सत्यम् ।
शत्रुपक्षगतमित्रमहं ते मामकीनवचनं शृणु राजन् ॥ २७

अन्तरं भवति कर्मणि तन्त्रे भाषणेषु सततं भुवि वीर ।
सूक्ष्मबुद्धिविशदं भवतीह जीवनं न शतमूर्खविचारैः ॥ २८

जीवनं सततसौख्यमयं तत् योग्यमस्तु मरणावधि यावत् ।
ज्ञायते भुवि कदापि न केन किं भवेच्च मरणोत्तरकाले ॥ २९

पद्यभावपरिपूरितलोकः सर्वथा च कुरुते निजसौख्यम् ।
बुद्बुदोपमितजीवनकाले नोचनीचगणनाकृतभावैः ॥ ३०

सर्वमानवसुखावलिमूलं लोकसौख्यपुरुषार्थवरिष्ठम् ।
अर्थमेनमपहाय जनेन्द्र साध्यते जगति किं भवताऽत्र ॥ ३१

यज्ञयागसवनादिसुकर्म भूतले निरतदीक्षितदक्षाः ।
कुर्वते मधुरभावनयाऽपि मानवाः सुखमवाप्तुमनन्यम् ॥ ३२

अर्थ एव हि सदा तव बन्धुः बान्धवाः खलु तवात्र न सन्ति ।
कष्टकालसमये सति सर्वे त्वां विहाय चपलं खलु यान्ति ॥ ३३

सर्वशास्त्रचयपिण्डितनीतिः सर्वलोकजनताकृतरीतिः ।
लोककार्यकरणे पटुशक्तिः सर्वथा लसति भूमितलेऽर्थे ॥ ३४

मुदाऽधुना भवान् स्वयं मया समेहि साम्प्रतम् ।
इति प्रियं भणन् चलन् दिदेश तं नृपं शनैः ॥ ३५

श्रीमत्प्रतापराणायनमहाकाव्ये दिल्लीकाण्डे "अक्बरस्यौन्नत्यं निगद्य मानसिंहः राणाप्रतापं तर्जयति" नाम नवमः सर्गः समाप्तः ।

दशमः सर्गः ।

१०. क्रुद्धेन राणाप्रतापेन मानसिंहाय प्रत्युत्तरदानम् ।

आकर्ण्य तस्य वचनं कटुदास्यपूर्णं
राणाप्रतापविभुरेवमवोचदेनम् ।
हे मानसिंह तव वाक्श्रवणेन सत्यं
मे दृष्टिमेति वनपञ्जरकीरगाथा ॥ १

स्वेच्छाविहारलसितं वनकीरराजं
पक्वं सुबीजफलसंततिमेव वन्यम् ।
आलोक्य खादनरतं रसमत्तचित्तं
चेर्ष्यायुतो भणति पञ्जरकीरराजः ॥ २

सौवर्णपञ्जरगृहे सततं लसन्तं
नानाप्रकारमधुपक्वफलान्यदन्तम् ।
सानन्दसुन्दरविलासजनैः वसन्तं
दृष्ट्वैव मां त्वमपि पञ्जरमेहि मित्र ॥ ३

तद्वत् त्वदीयभणनं प्रतिभाति मेऽद्य
तुर्कस्य दास्यमदपञ्जरसंस्थितस्य ।
जानामि नैव परदास्यनिवाससौख्यं
हे मानसिंह बहुधा परदास्यमग्नः ॥ ४

तुभ्यं यदत्र मधुरं बहु रोचतेऽद्य
तत् तद्विधाय कटुशात्रवहस्तगोऽसि ।
देशीयवैभवमिनस्य कुलं विहाय
स्वार्थे रमन् प्रखरदास्यविचेष्टमानः ॥ ५

नैवास्ति कोऽपि परदास्यरतः पुरा मे
वंशोद्भवेषु वरमित्रगणेषु राजा ।
देशप्रशासक इतीह जगन्निवासः
किं चाक्बरं नु ससृजे वद मानसिंह ॥ ६

राजाधिराजमनुजेश्वरकन्यकाश्च
तस्याभवन् शयनमन्दिरकामभोग्याः ।
स्त्रीणां सुशीलमनिशं नृपविक्रमालिः
देशीयजीवनहिताय लसन्ति लोके ॥ ७

यः कोऽपि नाम मम भारतवंशजानां
आपादयेद्यदि कलङ्कमहं विलूय ।
खड्गेन नैकशकलांश्च तदीयजिह्वां
कृत्वा न दिक्षु विकिरामि विना दयां किम् ॥ ८

आनन्त्यसस्यफलसञ्जितपुण्यभूमिं
देशं त्वमत्र परहस्तगतं विलोक्य ।
नैवासि तप्तहृदयेन विभासमानः
कालुष्यभावभरितं खलु तेऽद्य चित्तम् ॥ ९

सान्तत्यसंगरमतिः तव तुर्कराजः
देशीयराजकुलसारसदन्तिरूपः ।
राजन्यमत्र पददास्यरतं विधाय
देशं च भारतममुं स्ववशं करोति ॥ १०

यद्येवमेव स च मे भरतान्वयस्य
बाधां विधाय मरणाधिकहानिरूपे ।
शास्तुं समीहितमनाः प्रतिभाति लोके
भूयासमेव पदशात्रवकण्ठहारी ॥ ११

श्वासानिलो वहति यावदमुत्र देहे
तावत् प्रियो भवति दैशिकभक्तिभावः ।
आकाशपातनमपीह चिरं सहेयं
काङ्क्षे न चापि परशासनदास्यवृत्तिम् ॥ १२

शक्तिः यदा भवति हीनतरा मदीया
तमक्बरं शुभदवारतिथौ प्रशान्तम् ।
आश्रित्य जीवनदशां चरमां मदीयां
संयापयेयमिह माऽस्तु च ते सहायम् ॥ १३

आवां च कृष्णबलरामसमानवीरौ
कृष्णार्जुनौ तरणिवंशजभूपपुत्रौ ।
एकत्र वीरपुरुषौ निवसेव मान
देशे परांश्च समरे विजयेव हीह ॥ १४

राष्ट्रे भृशं दुरभिमानदुरोदरोऽसि
राष्ट्रात् सुखं बहुविधं महिमाऽन्वितं ते ।
अत्युत्तमं भवति सौख्यदजीवनं हि
जानाम्यहं तदपि शैशववर्तनेन ॥ १५

यत् यत् सुखं भवति तत् भवतोऽनुकूलं
कृत्वैव जीवसि विचारविहीन राजन् ।
अस्मादृशास्तु जननीपदपद्मचित्ताः
संतप्तजीवनयुताः गहनप्रविष्टाः ॥ १६

नाहं भवेयमिह तावकमार्गगामी
त्वं नैव यद्यपि भवेः मम मार्गयायी ।
मार्गद्वयं च निभृतं परिसेव्यमानौ
तिष्ठेव भारतधरातलसौख्यजीवौ ॥ १७

सान्तत्यदैशिकविचारनिमग्नबुध्या
संप्रेत्य मां नृपवराग्रणिभावदीप्तः ।
सार्धं मया खरपरावलिसैन्यजालं
खड्गाग्रलेन शतधा कुरु मानसिंह ॥ १८

सर्वस्य भारतधरारमणीमतल्लयाः
पूजां विधाय वसनं खलु योग्यमत्र ।
राष्ट्रीयतात्त्विकविचारविहीनमर्त्यः
जीवच्छवेन सदृशं भवतीह लोके ॥ १९

विद्रोहबुद्धिपरिणद्धविचारमूर्तिः
नैवात्र यास्यति गतिं परमां महीप।
त्वमेव चाक्वरधराधिपपादसेवां
संत्यज्य दैशिकविचारधनी भवस्व॥ २०

आवां भवेव परकन्धरकृन्तनेन
कृष्णार्जुनौ प्रवलभारतयुद्धभूम्याम्।
आवां न कोऽपि भुवि शात्रवभावदृप्तः
जेतुं समेष्यति रणे नृप मानसिंह॥ २१

संघात्मभावरहिताः वहुराजपुत्राः
कापट्यपूर्णमनसो निजसौख्यमग्नाः।
गोप्येन भारतधराधिपमानसस्थितिं
लक्ष्मीविलोभनधियो निगदन्ति तुर्कम्॥ २२

नीचातिनीचधिषणायुतराजपुत्राः
विस्मृत्य भारतमहीं परमां पवित्राम्।
तुच्छेषु भौतिकसुखेषु विरंस्यमानाः
प्राचीनगौरवगुणान् परिमार्जयन्ति॥ २३

अस्मान् विजेतुमिह शक्तिविचारहीनाः
वैदेशिकाः प्रवलनाशनतत्परास्तु।
कापट्यबुद्धिरचितेषु विनूतनेषु
व्यूहेषु संततधियो वहुधा भवन्ति॥ २४

ते नाम के भुवि दयारहिताः कठोराः
कोष्णं च मांसरुधिरं निजकण्ठदग्नम्।
पीत्वा च वन्धुपितृमित्रसुताः स्वसेति
भावेन हीनमतयो विचरन्ति धर्मे॥ २५

सर्वाः प्रजाः विमलनैतिकपालनैस्ते
संरक्षयन्ति विनुतैश्च सुवर्तनैश्च ।
इत्येवमेव कथने न हि सत्यमस्ति
तान् तादृशान् प्रति दयारहितान् च मान ॥ २६

व्याघ्राश्च भीलवनराजिविराजमानान्
घ्नन्त्यत्र हेलमनिशं खलु सर्वजन्तून् ।
तान् नैव कोऽपि धिषणायुतमानवेषु
संकीर्तयिष्यति महानयनीतियुक्तान् ॥ २७

शान्त्या स्वकीयमतधर्मचयप्रचारं
तुर्कों दयाविविधदानगुणप्रभावैः ।
कुर्वन् सदा सकलभारतमानवालिं
स्वायत्तमेव कुरुते खलु मानसिंह ॥ २८

राजः स्वजातिनिजशौर्यगुणप्रभावान्
विस्मृत्य यान्ति परपादजलेजसक्ताः ।
प्राज्यं महार्हममलं निजराष्ट्रभावं
धूल्यां मिलाप्य विलसन्ति पदाधिकारे ॥ २९

राष्ट्रीयभक्तिविभवेन नृपाश्च केचित्
मां प्राप्य मह्यमतिभक्तिमयैः स्वभावैः ।
साहाय्यमेव यदि ते रणभूम्नि कुर्युः
दास्यात् विमुक्तमिह भारतमेव कुर्याम् ॥ ३०

भव्यं मदीयवचनं यदि मानसिंह
श्रुत्वा त्वमेसि मम पक्षमनन्यशक्त्या ।
त्वामेव भारतधराधिपमाशु कुर्यां
भूयासमेव तव जीवनरक्षकोऽहम् ॥ ३१

नैवास्ति मेऽत्र धरणीपरिपालनाशा
बाभाति दिव्यभरतावनिभक्तिभावः ।
यः कोऽपि वा भवतु भारतदेशजातः
राष्ट्रस्य पालनपरो मम योग्य एव ॥ ३२

एनां सतीमुनिजनावलिपूतदेहां
विज्ञानजातविभवादिसुकीर्तिताङ्गाम् ।
प्राचीनसंस्कृतिविराजितदिव्यरूपां
राष्ट्रीय एव परिपालयितुं हि दक्षः ॥ ३३

जानीमहे सकलवैदिकमन्त्रपूतं
राष्ट्रीयभावपरिपूरितदेशभक्ताः ।
आशासितुं च वयमेव हि भव्यदेशं
योग्याश्च नान्यपरदैशिकभूमिपालाः ॥ ३४

आप्त्वा भवन्तमिति चाक्वर नाम तुर्कः
धैर्येण भारतमहीपतिरेव जातः ।
त्वं मामवाप्य यदि सैनिकचालकोऽसि
मक्कां प्रयास्यति विहाय च देशमेनम् ॥ ३५

योद्धा च नैव भविताऽक्वरनामधारी
तस्मादयं बहुविधानकुतन्त्रकार्यैः ।
देशीयराजनिचयं धनराशिदानैः
क्रीत्वा प्रशास्ति सभयं मम यत्नमीक्ष्य ॥ ३६

त्वामत्र वीक्ष्य मम शौर्यगुणैः समानं
मां जेतुमेव भवति प्रियबन्धुभावः ।
नास्त्येव बन्धुनिचयेषु कदापि चित्तं
सर्वं च केन्द्रितमहो निरतं पदेऽस्मिन् ॥ ३७

नैवास्ति भारतजनेषु दया कदापि
शास्त्रेषु दैशिककलासु रसोऽपि तस्य ।
तत् केवलं जगति साधयितुं मनस्थं
स्वार्थं परं भवति सत्यमिदं शृणु त्वम् ॥ ३८

आभाति तस्य करणं बहुधा पवित्रं
वाग्रीतिरस्ति सततं मधुविन्दुसिक्ता ।
विभ्राजते मधुरकान्तगुणाभियुक्तः
सर्वं च यल्लसति तन्न च काञ्चनं हि ॥ ३९

आकर्ण्य मामकवचांसि यथामति त्वं
कर्तुं यतस्व सुखदं खलु रोचते ते ।
नाहं भजामि धरणी जलराशिमग्ना
तुर्कस्य पादजलजेऽपि च बम्भरत्वम् ॥ ४०

नानाप्रकारैः हितकारिसूक्तैः
गीर्भिः प्रियं तं खलु मानसिंहम् ।
आभाष्य राणा परमाप्तवाचाः
शान्ताब्धिरूपेण भृशं चकासे ॥ ४१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे 'क्रुद्धेन राणाप्रतापेन मानसिंहाय प्रत्युत्तरदानम्' नाम दशमः सर्गः समाप्तः ॥]

एकादशः सर्गः ।

११. मानसिंहं प्रति कृष्णसिंहस्योद्गारः ।

इत्थं निशम्य जनतापतिवाक्यजालं
तं मानसिंहमगदत् सपदं स कृष्णः ।
उन्मत्तभावपरिवेष्टितदृप्तचित्त
हे मानसिंह तव धीः खलु कश्मलात्ता ॥ १

दास्यान्धकारजलधिं गतमातृभूमिं
को नाम देशजपतत्पररराजचन्द्रः ।
दृष्ट्वा परेषु कृतदास्यपरीतभावं
किं नैव निन्दति भृशं तव मानसिंह ॥ २

एतादृशं कपटभीकरदास्यभावं
स्वीकृत्य राजससुखे विमतिस्त्वमासीः ।
प्रोक्त्वाऽत्र दास्यगुणमन्त्रचयं मदान्ध
किं चास्य मानसमहो कलुषीकरोषि ॥ ३

किं ते भविष्यति सुखं धरणीतलेऽस्मिन्
दुर्नाटकं नटवराश्रयशिक्षितं तत् ।
प्रारभ्य पश्यसि धरां नृप मानसिंह
त्वां पश्यतीह जगतः पतिरेक एव ॥ ४

किं सर्ववैधिकगतिं परिहृत्य सान्तं
गाढान्धकारपरिणद्धतमिस्रकाले ।
संधिं विधातुमरिवीरजनाधिपं त्वं
चानीय पावनगतिं मलिनीकरोषि ॥ ५

कार्यं प्रतापनृपतिः जनताऽऽप्तबन्धुः
गौप्येन संधिकरणं क्व च मानसिंह ।
आश्रित्य यावनपदं कुशराजकीर्तिं
लज्जाविहीन सुतरां कलुषीकरोषि ॥ ६

राणाप्रतापसदृशा विरला हि लोके
वीराः ध्रुवं परमशौर्यगुणाभिषिक्ताः ।
संख्यासहस्रयवनाक्बरतुल्यवीराः
राणासमं नहि भवन्ति च मानसिंह ॥ ७

आशासयन् जलधिचुम्बितरत्नगर्भां
न्याय्यात् पथो न हि कदापि चलिष्यतीह ।
तं तादृशं जगति वीरवरं कथं त्वं
संचालयिष्यसि वृथा तव सर्वयत्नः ॥ ८

चिन्ता न ते भवितुमर्हति साम्प्रतं नु
नैवास्त्ययं जगति चैकवरः प्रयोद्धा ।
आभान्त्यसंख्यकटिबद्धकराः सुवीराः
सैंहीयविक्रमपराक्रममित्रवर्गाः ॥ ९

किं ते भयं प्रबलशत्रुरितीह युद्धे
मा भूत् तवेत्थमवलोकितुमक्बरं च ।
घासः स्वयं भुवि भविष्यति मेरुतुल्यः
मेरुश्च चूर्णनिचयं जगदीशदृष्ट्या ॥ १०

आगत्य वीर धरणीपतिशान्तचित्तं
त्रैलोक्यपूर्णममलां लवराजकीर्तिम् ।
राणाप्रतापनृपसत्त्वगुणालिराशिं
हा सर्वमत्र मलिनीकरणे रतोऽसि ॥ ११

भ्रष्टः स्वयं वनचरः चपलो विधत्ते
वंशं स्वकीयमनिशं बहुधा प्रनष्टम् ।
दर्वीकरात् बहु विभाति च वृश्चिकोऽपि
त्वत्तो वरो भवति चाक्वरचक्रवर्ती ॥ १२

सान्तत्यमेव जगतीतलवीरवर्गं
स्वीयं करोति च कुलं शतधोन्नतं च ।
सत्यं त्वमेव तव शीलकुले समस्ते
देशीयतत्त्वमनिशं च मृतं करोषि ॥ १३

प्राभञ्जनेन तुलितः प्रभुरस्मदीयः
साक्षात् स्वयं लसति भीमसमं महीन्ना ।
त्वं तावकः प्रबलसैन्ययुतोक्वरश्च
स्थातुं च नैव भवतः खलु संपराये ॥ १४

गत्वा च तूर्णमवनीपतिपादपद्मं
आचक्ष्व मामकवचांसि कटुश्रुतानि ।
राणाप्रतापवनजीवनलब्धवृद्धिं
शौर्योपबृंहितचमूचयशक्तियुक्तीं ॥ १५

राणा कदापि निजजीवनकीर्तिकान्त्यां
न स्वीकरिष्यति भयेन चंदास्यवृत्तिम् ।
मानापमानरहिताः खलु मानवास्तु
नैच्यं परं भयददास्यमिहाद्रियन्ते ॥ १६

गर्ह्यं सदा धरणिवीरवरैश्च नैच्यं
दास्यं परं भयदमस्थिरभावयुक्तम् ।
आनन्त्यदास्यमधुरात् परमान्नखाद्यात्
स्वातन्त्र्यलब्धकटुमण्डमहोऽत्र स्वादु ॥ १७

दास्याब्धितारकमहीपतिरस्ति मान
सत्यं भवान् प्रवलतौर्किकराजवर्गे ।
तुल्यं त्वया न हि विभाति च कोऽपि लोके
हा तेऽन्वयं बहुविधं प्रतिभात्यनन्यम् ॥ १८

बृहत्तमं भवति तेऽन्वयभव्यशौर्यं
त्वामेव भूपमनिशं बहुधा स्तुवन्ति ।
तां संस्तुतिं सुभगकर्णरसायनं त्वं
श्रुत्वा परं निवस तावकभावसिन्धौ ॥ १९

अन्तःपुरे सकलयौवतमध्यगस्त्वं
ते कीर्तिकान्तपरिरम्भणसौख्यमग्नः ।
श्यालेन सार्धममलैर्भवदीयशौर्यैः
तं चाक्बरं स्तुहि हितैः भवदीयवर्गैः ॥ २०

राणा स्वयं लसति शंकररूपमाप्त्वा
देशस्य शंकरणकंकणवद्धहस्तः ।
संभाविभीकररणाङ्गणशत्रुहन्ता
तं नैव कोऽपि भवतीह विजेतुकामः ॥ २१

सर्वे वयं प्रमथभीकरमित्रवर्गाः
साहाय्यकार्यकरणे निभृतं तु दक्षाः ।
अस्मान् विजित्य समरे तु तवाक्बरस्य
गन्तव्यमस्ति पृथिवीपतिमेव सैन्यैः ॥ २२

लोके सुवीरकुलजातमहीपवर्गाः
सर्वे प्रतापनृपपादजलेजभक्ताः ।
भूत्वा च तस्य नयनान्तविलोलदृक्षु
संयापनं जगति जीवनभाग्यमेव ॥ २३

यद्येवमेव सकला नृपसौलिवीराः
राणाप्रतापसममेव जिगीषन्ति ।
अद्यैव भारतधरा भवतीह साधु
राणाप्रतापपरमेश्वरहस्तगाऽऽशु ॥ २४

तस्मात् भवान् परजनाश्रयमत्तचित्तः
सत्यप्रकाशविशदीकृतचित्तगेहः ।
संत्यज्य तं तुरकभूपतिमेव तूर्णं
राणाप्रतापधरणीपतिम् पाहि वीर ॥ २५

राष्ट्रं स्विदं भरतपुत्रविवर्धितं च
प्राज्ञैः महानृपतिमण्डलपालितं च ।
आनैन्त्यसंस्कृतिपुनीतविलासरम्यं
वाभाति दिव्यमनिशं खलु हैन्दवानाम् ॥ २६

देशः प्रियो भवति हैन्दवभूपतीनां
सत्यं दयालसितपालनपावनानाम् ।
आर्षीयवैदिकविधाननिमज्जितानां
सौख्यात् हितं च भुवि नान्यदपीह भाति ॥ २७

सेयं धरा भवति हैन्दवनामकानां
ते केवलं भरतमेदिनिपालकाश्च ।
नैवात्र कोऽपि सहते परपालनं तु
देशीयवैभवविचारनिमग्नमर्त्यः ॥ २८

ते के भवन्ति धरणीपरिपालकास्तु
जानन्ति नैव खलु भारतधर्मसूक्तीः ।
संस्कारजन्यऋजुवर्तनहीनतुर्काः
दाक्षिण्यभावरहिताः पशुवर्तनस्थाः ॥ २९

ते केवलं विनुतपाशवशक्तियुक्ताः
सर्वाः प्रजाः सपदमेव हि पादलग्नाः ।
संधाय सर्वपरमप्रियदैवगेहान्
प्रध्वंसरूपलसितान् बहुधा विकुर्युः ॥ ३०

माधुर्यपूरितवचोविभवैः प्रशास्ति
माध्वीकलिप्तिकृपाणसमोऽस्ति तुर्कः ।
तस्यान्तरङ्गनिहितो रचनालिरस्ति
सर्वं हि भारतमिदं गिलितुं च तूर्णम् ॥ ३१

राणा तदीयहृदयं सपदं पपाठ
द्रष्टुं च नैव मनुते किमुतास्ति नान्यत् ।
नैच्यं तदीयकपटावृतचित्तभावं
दूराच्च सर्वरचनां मनसा विमाति ॥ ३२

त्वं चापि ते नटवरः प्रियमित्रवर्गाः
धुन्वन्ति नैव जगतीतलवीरराणाम् ।
तस्मात् त्वमेव रभसं विभुपक्षमेत्य
राणा समं विचर हे प्रिय मानसिंह ॥ ३३

पञ्चाधिकं वयमितीह शतेन नित्यं
न्याय्येन बन्धुभगिनीसममेव युत्या ।
कृत्वा च भारतजनेषु समैक्यभावं
शत्रून् जयेम समरे प्रिय मानसिंह ॥ ३४

सर्वे हि राजकुलजातनराधिपास्तु
केनापि कारणयुताः भुवि दृष्टभावैः ।
विद्वेषपूर्णमनसा प्रविराजमानाः
देशस्य नाशनविधौ बहुधा यतन्ते ॥ ३५

यद्रोचते तदिह मानमहीपते ते
राणाप्रतापकथनं बहुधा विचार्य ।
स्वेच्छामतेन मनसा च विमन्थनेन
संतुष्टभावनिचयैः सहसा विधेहि ॥ ३६

अत्रान्तरे विनयनामितदीर्घगात्रः
तूर्णं प्रविश्य निजगाद च कर्मचारी ।
मध्याह्नभोजनदशा प्रतिभाति देव
सूर्यः प्रचण्डकिरणैः प्रतिभाति शून्ये ॥ ३७

ओंकारशब्देन निवेद्य भावं
राणा प्रतस्थे निजपर्णवेश्म ।
प्रोत्थाय सर्वे सपदं विचेलुः
स्वीयेषु कार्येषु रता भवन्तः ॥ ३८

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' मानसिंहं प्रति कृष्णसिंहस्योद्गारः ' नाम एकादशः सर्गः समाप्तः ॥]

द्वादशः सर्गः

१२. अतिथिभोजनोत्सवे कलहः ।

रचितमत्र नवं खलु मण्डपं वनलतासहकारकदम्बकैः ।
हसितसुन्दरपुष्पसमूहकैः तरुवरैः कदलीदलराजितैः ॥ १

मृदुलतान्तलतापरिवेष्टितं विकचसारसगन्धविलेपितम् ।
नवरसालसुपल्लवचित्रितं हृदयमोहकसुन्दरमण्डपम् ॥ २

विरचितं नृपमण्डलमण्डलैः सपदमेव वनीधरभूतले ।
धरणिमानधराधिपशान्तिदं सुखदभोजनसद्म नवं वने ॥ ३

मणिगणैः बहुभूषितमासनं निखिलसूनपरागसुगन्धिलम् ।
हरितपीतसितारुणमण्डपं नयनसुन्दरमस्ति सुखावहम् ॥ ४

अतिथिभूपतिगौरवसूचकं तुरकशासकवान्धवसौख्यदम् ।
प्रथितराजकुलान्वयकीर्तिदं विविधपात्रचयं वनमागतम् ॥ ५

बहुलशाकफलावलिराशितं घृतदधीक्षुरसैः पयसा प्लुतम् ।
मधुरपक्वसुमोदकगन्धिलैः परमरोचकभोजनभासितम् ॥ ६

सपदमेव महीभुजमोहकं खचितरत्नमयूखविलेपितम् ।
रजतकाञ्चनपात्रचयं प्रियं लसितमत्र वने कृतमण्डपे ॥ ७

कलमतण्डुलपुष्पितमोदनं विविधशाककदुष्णितचोष्यकम् ।
मधुरपायसपूरितपात्रकं गगननिर्झरजीवनमागतम् ॥ ८

सकलमेव कुतूहलराजकं सपरिवारपरीवृतमागतम् ।
अनुपदं बहुधा परिवेषितं रजतहेमसुपात्रचयेषु च ॥ ९

सकलराजकुलान्वयमण्डलं विविधपङ्क्तिसुशोभितमास्थितम् ।
लसितमण्डलमीक्ष्य स मानसो मनसि चिन्तितवान् बहुशङ्कितः ॥ १०

विपुललोचनवीक्षणसारितां नृपतिमानसवल्गितभावनाम् ।
मधुरशान्तदृगञ्चलवीक्षणैः सपदमेव समीक्ष्य सकौतुकम् ॥ ११

अमरसिंह इति प्रियनन्दनः सविनयं निजगाद महीपतेः ।
ललितमञ्जुलशब्दसमूहकैः कुरुत भोजनमत्र सुखं प्रियम् ॥ १२

अमलशब्दविराजितभाषणं श्रवणसौख्यदमानसशीतलम् ।
चपलमत्र सुशोभितमाशयं बहु निशम्य जगाद स भूपतिः ॥ १३

न हि मुदा मम लोकगुरुः प्रियः विमलदैशिकभावविभासितः ।
वदत पङ्क्तिगतो मम राजते कथमहं करवाणि च भोजनम् ॥ १४

जनविभुः बहुरुग्णवितापितः मम नियुक्तिमिमं विचकार सः ।
अखिलराजकसौख्यविलोकने सकलकामितदानसुभोजने ॥ १५

तव पिता खलु पङ्क्तिगतो न मे कथमहं भविताऽशनतत्परः ।
भण सहेयमिमामवहेलनां अमरसिंह समाह्वय तं गुरुम् ॥ १६

वदनमण्डलनिर्गतवाचकं लघु निशम्य च काननभूपतिः ।
बहिरमन्दगतिश्च समेत्य तं नृपमवेक्ष्य जगाद गृहाच्छनैः ॥ १७

यवनवर्गविलीनजनैः समं नहि कदापि च पङ्क्तिगतोऽसि भोः ।
यदि भवेदपरं करवाणि ते कथय मान सुखेन च भुज्यताम् ॥ १८

विशदमामकभावसुमालिभिः तव पदद्वयपूजनतत्परम् ।
प्रबलशत्रुमिहापि विधाय रे भणसि राजसगर्वविभासुरः ॥ १९

बत विधाय च शाश्वतवैरिणं सकललोकधराधिपबान्धवम् ।
लससि मानधनी वसुधातले नहि सुखं भवता खलु भुज्यते ॥ २०

तव शिरोधरराजितमस्तकः भवितुमर्हसि नैव धराधिप ।
विदलितं खलु बान्धववन्धनं प्रखरितं मम पश्य पराक्रमम् ॥ २१

त्वमसि तामसपूर्णगुणान्वितः भणसि राजसशौर्यपराक्रमैः ।
किमिह मामकबान्धवमण्डलैः तव गृहान्तिकमेत्य सभक्तिकम् ॥ २२

इति मनोहरमञ्जुलभाषणैः हरितकुङ्कुमगन्धविलेपनैः ।
विनयपूर्वकमेव न चाह्वयं मम निकेतनमेहि नरोत्तम ॥ २३

वचनजालममुष्य निशम्य च स्वयमनूह्य विभावविचक्षणः ।
रुधिरकूपमवाप्तमुखेन सः बहुविधं निजगाद शनैः शनैः ॥ २४

अतिथिरूपगतं तव बान्धवं कथमिमं बहुभूपतिमण्डले ।
यवनभूपतिसैन्यविचालकं त्वदयमेव करोषि जनाधिप ॥ २५

यवनबान्धवभासितजीवनः तव गुणावलिदीपकरोऽभवम् ।
अनुदिनं तव सद्गुणकीर्तनं भवति यावनराजसभासु च ॥ २६

प्रतिदिनं तु विभो शृणु तावकं विशदकीर्तिचयं बहुधा मया ।
प्रतिपदं विविधोत्कटगोष्ठिभिः निगदितं बहुमानितपूर्वकम् ॥ २७

अहममुं यवनाधिपतिं स्वयं स्ववलचालनतत्परमानसम् ।
अकरवं न कदापि महीपते भुवि ततस्त्वमसीति विचारय ॥ २८

विगततावकवैभवजीवनः त्वमिह नैव भवेः प्रियभूपते ।
कथमिहास्ति सुजीवनमीदृशं तव विचारय मां हृदि संस्मरन् ॥ २९

अकरवं तव योग्यकरं ध्रुवं कथमहं मम नैतिकजीवनम् ।
तव सुखाय करोमि च कश्मलं त्वमिदमत्र नयेन विचारय ॥ ३०

परिचयेन भवान् मम वेश्मनि भणितुमेव तवाधिपभाषणम् ।
निशितराजस-भावनया गिरा कपटभावचयैश्च समागतः ॥ ३१

वदसि तौर्किकभूपतिनिश्चयं रहसि मन्त्रिततावकभाषणं ।
अपि च मां तव पङ्क्तिगतं नृपं त्वनवलोकितमत्र विजल्पसि ॥ ३२

सततभीकरसंकटचालकं प्रमलिनामृतपानविराजितम् ।
अधिककष्टपरंपरया वृतं बहुविधं करवाणि वनेचर ॥ ३३

भणनमत्र न योग्यमहो मम प्रचल मान महारणभूतलम् ।
उभयपक्षबलाबलदर्शनं भवति चाह्वय तेऽक्वरभूपतिम् ॥ ३४

त्वमसि कृत्रिमवर्तनभूषितः कपटभावसमावृतभूपतिः ।
सततदास्यमलीमसबौद्धिकः द्युमणिवंशजकीर्तिविघातुकः ॥ ३५

विनुतभारतसंस्कृतिनाशकः प्रबलशात्रवपक्षनिवेशिकः ।
अहितगौरवबर्धनचिन्तकः सकलहैन्दवगौरवघस्मरः ॥ ३६

किमिह जल्पसि कल्मषजीवनः तुरकशात्रवकिल्बिषमज्जितः ।
कपटवञ्चनवाक्सरणीयुतः निरतदास्यविहारमदावृत ॥ ३७

विगतदैशिकभावविचक्षणः परजनावलिलग्नमहामनाः ।
त्वमपि जीवनमूल्यगुणावलिं वदसि साम्प्रतमत्र महाबल ॥ ३८

सततमेव मदीयकथां भुवि बहु जपिष्यसि पश्य रणे यशः ।
मम तवात्र विनाशनमेव भोः कुरु रणे शिवनामजपादिकम् ॥ ३९

इति परं निजगाद स मानसः मदपरीतपदावलिभूषितः ।
मदजलाश्चितदन्तिसमं रुषा भ्रुकुटिनर्तनदर्शितभावनः ॥ ४०

अनुपदं बहुरुष्टविजल्पनैः मदभरैः प्रियकृष्णधराधिपः ।
नियमितैः कटुनर्मविभासितैः प्रहसितैः बहुधा निजगाद च ॥ ४१

अतुलगर्वविभासितमक्वरं तव सलीममसुं युधि भीकरम् ।
समरपण्डितमण्डलतल्लजं सपदमानय संगरमेदिनीम् ॥ ४२

क्व च तवाक्वरमूर्खमहीपतिः क्व च विभुर्मम नाकपुरन्दरः ।
भवति चान्तरमत्र सदा भुवि व्रज महीप सुखं तव भूपतिम् ॥ ४३

चलति संप्रति भाषणमावयोः लपितुमत्र न योग्यमिदं तव ।
तदपि नैव कथं भुवि भाव्यते विगतलौकिकबुद्धिविचक्षणः ॥ ४४

त्वमसि शंकरसन्निधिवाहनो भणसि राजमतेन समं मिया ।
तव गतिं तु विचारय रे खल इति वदन् स चचाल रुषा श्वसन् ॥ ४५

कृष्णभूपतिमहीपतिवर्गः मानसिंहमदयं परिहासैः ।
ष्ठीवनादिकृतकर्कशवाक्यैः प्रैषयल्लघुतरं प्रियदिल्लीम् ॥ ४६

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे 'अतिथिभोजनोत्सवे कलहः' नाम द्वादशः सर्गः समाप्तः ॥]

त्रयोदशः सर्गः ।

१३. ग्रीष्मर्तुवर्णनम् ।

प्रचण्डतेग्मांशुवितापितानि तडाककासारनदीजलानि ।
प्रकाशपूर्णानि दिगन्तराणि दावाग्निदग्धानि वनान्तराणि ॥ १

दिवाकरातापितरूक्षधात्री रजोगुणाक्ता विरसा च खिन्ना ।
विदीर्णरूपा विवृताननना सा वर्षाम्बुपानाय विरौति कामम् ॥ २

बिभग्नसंधिः नृपमानसिंहः कृतावमानेन भृशं विततः ।
समेत्य दिल्लीं निजबादशा च निमन्त्रणार्थं चक्रमे व्यथाऽविलः ॥ ३

राणां विजेतुं बहुदूषितोऽसौ विधातुमेवात्र रणं महान्तम् ।
चमूचयं शिक्षितमेव कर्तुं रुषा वितनः कृतनिश्चयोऽसौ ॥ ४

विचेतनाचेतनदीप्तविश्वे करोति सर्वं मरणोन्मुखं च ।
अत्युष्णसंवाहितमातरिश्वा निदाघसूर्यातपदग्धरूपः ॥ ५

विभाकरातापितभूमिभागे सौरं महो भाति जलाशयाभम् ।
तदर्थमेवात्र मृगा जलार्थं भ्रमन्ति धावन्ति मरीचिकांश्च ॥ ६

मयूरवर्गाः प्रविदग्धबर्हाः व्यपास्तसौन्दर्यविभासमानाः ।
अदृश्यमानाः गहने प्रशान्तं तपन्ति खिद्यन्ति विषादभावैः ॥ ७

ग्रीष्माभिसंतप्तलुलायवर्गः निमील्य नेत्रे विटपानघोधः ।
रोमन्थमभ्यस्यति शान्तभावे कुत्रापि गन्तुं विगतस्पृहश्च ॥ ८

प्रभूतदावानलदग्धपर्णं विलोक्य पारावतशङ्कया ते ।
प्रयान्ति नागाः निग्रहीतुमेव विशिष्य वक्त्रैः द्रुतसर्पणैश्च ॥ ९

नानाविधाः सर्पसरीसृपाश्च विचित्रवर्णाः सरटाः सवेगम् ।
विलोलपुच्छाः सततं वनेषु चरन्ति कीटाशनतत्पराश्च ॥ १०

द्रुमालिनीडेषु पतत्रिवर्गः विधाय पक्षच्छदमध्यभागे ।
स्वकीयचञ्चुं स्वपतत्रिपोतैः प्रशान्तगत्या स्वपतीव भाति ॥ ११

महार्हसंपच्चयराजमानान् भूमौ सुनिक्षेप्तुमिति स्वकीयान् ।
सर्वान् स्फुलिङ्गान् पृथुवायुशूर्पे संगृह्य विड्क्ते गमस्तिबिम्बम् ॥ १२

तदा तदाऽवर्तितवायुवेगः महोग्ररूपेण रजो गृहीत्वा ।
नभस्थलव्याप्तामिदं विधाय सर्वां धरित्रीं विदधाति चान्धाम् ॥ १३

सुवर्णपक्वाम्रफलावृतोऽयं निदाघकालो मधुरं चकास्ति ।
पुण्यात् प्रभूतैरिव दिव्यरूपैः प्रियैः फलैः पूर्णमनोरथैश्च ॥ १४

खरैः स्वदंष्ट्रैः वनसूकरास्तु खनन्ति मूलानि हलोपमैश्च ।
तदीयकण्ठोद्गतघुर्घुरैस्तं निन्दन्ति कालं बहुधा वनान्ते ॥ १५

प्रियं दिनान्ते सितचन्द्रिकासु समस्तपुष्पावलिगन्धमाल्यैः ।
कदुष्णशैत्यावृतभक्ष्यचोष्यैः खाद्यैश्च सौख्येषु रता भवन्ति ॥ १६

लतान्तपात्रेषु मरन्दतत्पराः द्विरेफमाला बहुधा प्रतप्ताः ।
निरस्तभावा मधुपानकर्मणि स्वपन्ति पुष्पेषु विना प्रयाणम् ॥ १७

अत्युष्णवाताहतमानवास्तु संचर्वयन्ति स्म सुखोपचारैः ।
कर्पूरसंमिश्रितरक्तगन्धैः भृशं शरीराणि सुखाय नित्यम् ॥ १८

घर्मातिसिक्तं सततं स्वदेहं सुतप्तवातैः कृतकालरूपम् ।
वशीवृतैः गन्धिलतालवृन्तैः संवीजयन्ति प्रचुरं प्रजास्तु ॥ १९

सुशर्करामिश्रितरम्यतक्रं नीहारखण्डावलिमिश्रितं च ।
रसेन निम्बस्य विमिश्रितं च कृत्वा पिवन्त्यत्र दिनेषु लोकाः ॥ २०

निशासु निर्वातबहिःस्थलीषु शुक्लाम्बराच्छादितमञ्चकेषु ।
मयूरपिच्छैः कृतवीजनैश्च निद्रासुखं यान्ति जनाः सकष्टम् ॥ २१

शाखोपशाखाकृतभूप्ररोहाः न्यग्रोधवृक्षा बहुशीतलाश्च ।
समाह्वयन्तीव धरातलस्थान् स्वच्छायया सान्त्वयितुं विभान्ति ॥२२

वाताशनाः निर्गतजीवरूपाः विनाऽशनाः कोष्णसमीरतप्ताः ।
अहानि कष्टेन समापयन्ति प्रविश्य भूगर्भविलेषु तूर्णम् ॥ २३

वैविध्यमल्लीसुममण्डितोऽपि सुचन्दनाराञ्जितगन्धदेही ।
रसालमाधुर्यरसोपभोगी विलोक्यते चण्डगुणाभियुक्तः ॥ २४

रसार्द्रचित्तः सरसः प्रचण्डः फलावृतः स्वैरविहारशीलः ।
सदाऽनभिज्ञः पटुकर्कशाङ्गः निदाघकालो भयदो जनेभ्यः ॥ २५

विलोकने साधुविहृष्यमानः आकर्णने केवलमात्मदाता ।
अस्पृश्यताभावपरीतचित्तः शृङ्गारभावैकरसप्रपूर्णः ॥ २६

सर्वत्र मल्लीचयवल्लरीषु भवन्ति पुष्पाणि सुगन्धिलानि ।
भूतापशान्त्यै मिहिराय नूनं दत्तानि पुष्पाञ्जलिरूपकानि ॥ २७

औशीरवृन्तानिलवीजनैश्च पाटीरगन्धैः हरिचन्दनैश्च ।
मल्लीप्रसूनानिलगन्धवातैः निदाघकाले निवसन्ति पौराः ॥ २८

वृक्षाच्च वृक्षं न पतत्रिवर्गः कदापि विस्मृत्य तनुप्रभावम् ।
करोति वेगोड्डयनं दिनेषु प्राणास्तु सर्वस्य गुडं हि श्लोके ॥ २९

प्रचण्डतीक्ष्णांशुखरान् स्वशस्त्रान् प्रस्निग्धतैलाक्तशिलातलेषु ।
उल्लीढवन्तः सकलाश्च योधाः योग्यान् प्रकुर्वन्ति रणाय भावि ॥ ३०

राणाप्रतापस्य महोग्रतेजः तन्मानसिंहस्य पराभवाग्निः ।
आभांत एवात्र युतिं मुदाऽऽप्त्वा ग्रीष्मं वितप्तं प्रविधाय तथ्यम् ॥ ३१

परं सहस्रांशुवितप्तवायुः प्रवासविश्रान्तिसुखे रतानाम् ।
वेगेन कर्णेन्द्रियताडनेन द्वितीयकर्णात् बहिरेति तूर्णम् ॥ ३२

गोपालकाः स्वीयगवां समूहं विसृज्य घासाचरणे रतं तम् ।
द्रष्टुं स्वयूथं नहि शक्तियुक्ताः कामं स्वपन्त्येव तरोरधस्ते ॥ ३३

अथात्र सूर्यस्य सुतीक्ष्णभाभिः ते शाल्मलीवृक्षशलाटवश्च ।
वितापितास्तूलमनल्पपुञ्जान् त्यजन्ति राणायनकीर्तिरूपान् ॥ ३४

रसः सहस्रांशुभयेन तूर्णं प्रधाव्य भूम्याः पटुग्रीष्मकाले ।
प्रच्छन्नरूपेण रसात्मना च द्राक्षाफलेष्वेव परं चकास्ति ॥ ३५

प्रचण्डतिग्मांशुकरेण कृष्टा वसुन्धरा कामवितप्तदेहा ।
अशान्तभावा च पिपासया सा विरौति दुःखाग्निपरीतचित्ता ॥ ३६

ग्रीष्मः प्रयासेन विना महीपः प्राप्नोति सर्वं मृगयामकुर्वन् ।
क्रव्यं मृगाणां मृदुनव्यरूपं चानारतं सो मृगतृष्णिकासु ॥ ३७

मदेन घूर्णाश्च लुलायवर्गाः सुतीक्ष्णकाठिन्यविषाणकुन्तैः ।
धरातलं तापविलोलजीवाः पानीयलब्ध्यै प्रखनन्ति वेगम् ॥ ३८

वृक्षाश्रये शाद्वलशीतलेषु स्वैरं चलन्त्येव हि मक्षिकाश्च ।
उपान्त्यभागेषु जलाशयानां प्रोद्घाटिते व्याघ्रमुखे प्रशान्तम् ॥ ३९

वृक्षाग्रभागे मधुमक्षिकाश्च पीत्वा मरन्दं निजकुक्षिपूर्णम् ।
अन्यत्र गन्तुं सहसा क्षमास्ते निःशब्दभावेन परं लसन्ते ॥ ४०

काकाः प्रमोदं कटुनिम्बवृक्षे भुक्त्वा प्रियं निम्बफलानि तुष्टाः ।
मलन्ति बीजानि च तत्र पार्श्वे भीताश्च सूर्यातपदर्शनात् किम् ॥ ४१

जनाः प्रयासं खरपृष्टभागान् क्रमेलकानामधिरुह्य काममम् ।
प्रयान्ति मृग्यासु वयासिसीषु विलम्ब्य झंझायुतमारुतेषु ॥ ४२

उशीरघासावरणावृतानि वितानवातायनमार्गकानि ।
उशीरसंमिश्रितपेयकानि चोशीरपूर्णो हि निदाघकालः ॥ ४३

लुलायसंमज्जनपङ्किलानि जलानि कासारतलेऽल्पकानि ।
दिनान्तरम्याणि च वासराणि निदाघकाले खलु जीवनानि ॥ ४४

निदाघघर्माविलसिक्तहस्तः कंदर्पदेवः स्वकरेण चापम् ।
धर्तुं न शेकेऽत्र इवावभासे स्रस्तं स्वहस्तात् यत एव चापम् ॥ ४५

मित्रातपातापितभूमिरागः प्रवेगवात्या गगनोद्गतश्च ।
प्रसार्य सर्वं क्षितिजातले तु प्राप्नोति लोकं च शनैः शनैश्च ॥ ४६

अनारतं पङ्किलजीवनेषु तपन्ति मेघोदयभव्यभूत्यै ।
जलाशयेषु प्रखराङ्कानि मृणालनालानि वितापितानि ॥ ४७

संध्यासु मन्दोष्णभराः प्रवाताः प्रविश्य नासापुटिकासु तीक्ष्णम् ।
उच्छ्वासनिःश्वासपरीतरूपाः प्रकल्पयन्ते रुधिरं प्रजानाम् ॥ ४८

इतीव लोके दलिताः प्रकामं सदार्ककायाः स्वचितूलपुञ्जैः ।
राणाप्रतापस्य पवित्रकीर्तिं तन्वन्ति सर्वासु दिशासु भान्ति ॥ ४९

एवंविधाभिः बहुवर्तनाभिः निदाघकालः सहजां स्वशक्तिम् ।
लोकाय कामं खलु दर्शयित्वा विभासते स्वीयदशावशेषैः ॥ ५०

सूर्यातपेन तप्ता मेदिनी कामं विरौत्यत्र ।
राणाप्रतापतप्तः राजा मानसिंहः खिद्यति ॥ ५१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' ग्रीष्मर्तुवर्णनम् ' नाम त्रयोदशः सर्गः समाप्तः ॥]

चतुर्दशः सर्गः

१४. राणाप्रतापवर्तनमुद्दिश्य अक्बरचक्रवर्तिने मानसिंहनिवेदनम् ।

स मानसिंहभूपतिः सवेगमेव देहलीं
विलुप्तदैत्यभावखिन्नमानमानसः परम् ।
जगाम बादशाक्बरं कुमन्त्रतन्त्रवेदिनं
कृशानुवत् रुषा ज्वलन् महोग्रमूर्तिमान् तदा ॥ १

ज्वलन्तमेनमागतं विलोक्य वादशा स्वयं
कथं कृतं किमावृतं वद प्रियं दृतं नृप ।
इति श्रमेण बाधितं विचार्य सोत्सुकोऽक्बरो
रराज कामितार्थभाजने प्रफुल्ललोचनः ॥ २

विधाय पादवन्दनं बभाण तं धराधिपः
नितान्तदृप्तभावदास्यसक्तचित्तभासितः ।
अदृष्टपूर्वमेव तत्र चित्रमीदृशं भुवि
वनेऽपि स प्रतापसिंहभूपतिस्तु केसरी ॥ ३

बभूव पौरमण्डलं प्रमत्तवीरमण्डलं
नगेन्द्रसानुकन्दराः हरिप्रियाऽभभूषिताः ।
लतान्तवृक्षकुञ्जवेल्लितं वनेचरप्रियं
समस्तकाननं चकास्ति तस्य शासने नवम् ॥ ४

रराज वन्यजीवभिल्लमण्डलं स तत्परं
प्रतापसिंहभूपतेः पदारविन्दपूजने ।
चतुष्पदाभिसर्वपत्रिजीवितं सुधारितं
प्रभासितं प्रभावितं तदीयवर्तनैर्वरम् ॥ ५

बभौ वसुन्धरा निसर्गरम्यवस्तुसंचयैः
तदीयवेश्मसु प्रसन्नता परं प्रतिष्ठिता ।
विजायते च सर्वमेव निर्मलं महावने
वसन् प्रतापसिंहभूपतिस्तु भोगमश्नुते ॥ ६

प्रभाऽन्वितं चकास्ति तत्र वन्यजीवमण्डलं
यथाऽत्र पत्तनेषु लोकसंहतिः विभाति च ।
विदृश्यते न चान्तरं कदापि मे द्वयोः परं
निरन्तरं विभाति तत्र सर्वमेकमेव हि ॥ ७

विलोक्य तं हृदा प्रतापभूपतिं प्रभाविता
वसुन्धरा ददाति सर्वसौख्यवस्तुसंततिम् ।
वनेचराः समाहिताः तदीयपादसन्निधिं
प्रयान्ति वन्यभक्ष्यभोज्यकन्दमूलसंचयैः ॥ ८

भृशं प्रतापसेवकाः विभूय वीरसैनिकाः
तदीयशासनं वहन्ति नम्रभावमस्तकाः ।
विभूतिवत् तदीयपादधूलिलिप्तदेहिनो
लसन्ति चैकलिङ्गकिङ्करा इवात्र कानने ॥ ९

यथा च राजभोगमन्दिरेषु सेवकाश्च ते
तथैव काननेषु भक्तिभावमञ्जिताऽनिशम् ।
किमस्ति तस्य सन्निधौ न कोऽपि वक्तुमुत्सहेत्
प्रशस्तशक्तिमान् विभाति चित्रभानुवद् भृशम् ॥ १०

अहं प्रियं तदाऽब्रवं सुशब्दभावभाषणैः
त्वयोदितं वचोनिधिं सुसन्धिभावनायुतम् ।
अनेकभावसन्धिसूत्रजालभूषणं विभो
तथापि नैव किञ्चिदाशया जगाद मां नृपः ॥ ११

क्षणे तदा समस्तशाकपाकगन्धमिश्रितः
सदागतिः प्रयाति रोदसीतलं घृतप्लुतः ।
समाह्वयन् च भोजनार्थमेव कर्मचारिणो
यथोचितं प्रतापराजगौरवैश्च राजकम् ॥ १२

ततः स्वयं जनाधिराजकर्मचारिमण्डलं
विशालहेमचित्रपात्रविस्तरेषु चोदनम् ।
विधाय सूपशाकचोष्यपेयलेह्यसंहृतं
दिदेश भोक्तुमेव सर्वराजमण्डलं सुखम् ॥ १३

अनागतं प्रतापसिंहभूपतिं सपङ्क्तिकं
विलोक्य रागपूर्णलोचनः तदाऽभवं स्वयम् ।
कुतोऽत्र नास्ति भूपतिः कथं समाह्वयन्तु तं
विना नृपेण हा कथं स्वभोजनं करोमि भोः ॥ १४

इति प्रकोपचित्तवाचिकेन तं यदाऽवदं
तदामरश्च गर्वपूर्णशब्दभावसंयुतः ।
बभाण तस्य पुत्रकः परं त्वनादरेण मां
न चागतः पिताऽधुना शरीरतापतापितः ॥ १५

निशम्य तस्य वाचिकं विलोक्य पङ्क्तिं तदा
किमत्र मां तृणीकरोति ते पिता कथं वद ।
अपङ्क्तिकं विधाय राजराजभूपतिं नृप
करोति चाप्रियं सदाऽरिभावमेव शाश्वतम् ॥ १६

इति प्रकोपभावनायुतं मदीयवाचिकं
निशम्य राट् स्वयं समेत्य मां जगाद निष्ठुरम् ।
न चाह्वयं भवन्तमत्र गन्धपुष्पकुङ्कुमैः
समेहि मान मामकीनपर्णसद्मसन्निधिम् ॥ १७

प्रमत्तभावनाऽभिभूषितः प्रतापभूपतिः
परम्परात्तराजगर्वदीपितः पदे पदे ।
अहं तु शत्रुतुर्कपक्षरक्षकेण भोजनं
विधाय वंशगौरवं न नाशयेयमर्कजम् ॥ १८

न चार्हताऽपि विद्यते कदापि मानभूपते
मया समं च भावितुं तवात्र साम्प्रतं शृणु ।
मतान्तरे विचेष्टमानसूर्यवंशनाशकैः
करोति नैव भाषणं प्रतापसिंहभूपतिः ॥ १९

सुदौत्यभावमण्डितैश्च तुर्कराजवान्धवैः
समागतैश्च भाषणं स्वधर्मरक्षणं भवेत ।
इति प्रियं विभाषितं तु मान्यमेव मे शृणु
न रोचते च भाषणं कदापि राष्ट्रवञ्चकैः ॥ २०

इति प्रतापभूपतिः निनिन्द मां सहेतुकं
परम्पराऽऽगताभिमानमत्तचित्तदीपितः ।
प्रदूषयन् विदूरयन् करोषि दौत्यभावनां
चरित्रमेव मानसिंहपापपङ्किलं तव ॥ २१

शनैः शनैः प्रशाम्यमानमानसः परं धिया
प्रतापसिंहभूपतिः त्वमेव मां समेहि भोः ।
वयं तमक्वरं विजित्य शाश्वतं श्रिया परं
मुदा स्वतन्त्रमातृभूमिरक्षका भवेम किम् ॥ २२

विना प्रतापमानसिंह कृष्णसिंह भूपतीन्
समस्तभारते न कोऽपि राष्ट्रयोग्यभूपतिः ।
त्वमेहि मां कृपाणहस्तधारकः सकौतुकं
दिनद्वयेन भारतं स्वभारतं विधेमहि ॥ २३

विना च कर्णपात्रमत्र भारते पुरा शृणु
वदन्ति नास्ति भारतं तथेति किं वदन्ति च ।
त्वया विना स्वभारतेऽधुना न चास्ति सङ्गरः
त्वमेव मानसिंहरूपकर्णपात्रधारकः ॥ २४

विभासि पञ्जरस्थकीरवत् त्वमेव बन्धनैः
अहं तु कानने वसामि वन्यजीवमण्डलैः ।
स्वतन्त्रतां विना स्वजीवनं न भाति भूतले
लसन्ति जन्तवः स्वतन्त्रमार्गजीवितैः ॥ २५

स्वतन्त्रताऽस्ति जन्मतः समागता महीतले
समस्तजीवलोकसौख्यदा विकासशीलदा ।
धरातले तु यस्य नास्ति भोः स्वतन्त्रता नृप
स एव भाति जीवने मृतः स्वयं हि सर्वथा ॥ २६

परस्य दास्यबन्धने कथं हि मानवः श्रिया
स्वकीयशेमुषीत्विषा प्रभावितो भविष्यति ।
परार्थजीवने जनः सुखं न चैव विन्दते
स्वदेशरक्षणे भवेम नायका वयं शृणु ॥ २७

विशङ्कनुमश्च कर्तुमेव भूम्नि शक्तिसंभृताः
सुखास्पदं च भारतं सुभारतं स्वभारतम् ।
अनारतं विशारदं शुभास्पदं जनैः समं
ततः त्वमेव भूपते तवाक्वरं त्यज श्रियै ॥ २८

वदास्मदीयदेशरक्षणे च कोऽस्ति सोक्वरः
न चापि तस्य वर्ततेऽत्र संस्कृतिः पुरातनी ।
विभाति धूर्तभावनावृतः प्रशान्तमूर्तिमान्
विभासुरं तु सर्वमत्र नैव हेम चिन्तय ॥ २९

इलातले तु नैकधर्मभव्यभावतत्पराः
प्रसारयन्ति धर्मबद्धसूक्तिसंततिं सदा ।
नृपात्मजाः स्वभारते भवन्ति दास्यलोलुपाः
घृणास्पदाः धनेच्छुकाः च लम्पटत्वमञ्जिताः ॥ ३०

अहिन्दुजातिहस्तगं च याति नैव भारतं
तवाक्वरं धराधिपं वद स्वयं विषावृतम् ।
अपेहि सत्वरं विसृज्य भारतं च हैन्दवं
तथा न चेद्धि युद्धमेव सत्यमत्र दर्शयेत् ॥ ३१

कथं महीपतिं च वञ्चयेयमात्मबान्धवं
स्वजीवितं प्रजार्थमेव यापयन्तमक्वरम् ।
इयन्तमेव कालमत्र भक्तिचेतसा प्रियं
सुसेवितं दयार्द्रचित्त भावभारनामितम् ॥ ३२

अहं ब्रुवन् विभुञ्जमानराजमण्डलं क्षणे
विसृज्य भोजनं च पञ्चभक्ष्यपूरितं महत् ।
विषात्तमेव भावयन् महारुषा महाप्रभो
कृतावमानदग्धचित्तभासुरः पदे पदे ॥ ३३

तदाऽवदं प्रपश्य वीर मामकीनपौरुषं
रणाङ्गणे भवन्तमेव तप्यमानजीवितम् ।
करोमि नैव मानसिंह नाम भूतले हतं
विलुप्तमेव शाश्वतं भविष्यतीह भूपते ॥ ३४

विधाय सर्वनाशनं त्वदीयसैन्यसञ्चयं
मदीयनाम मन्त्रवज्जपन्तमेव शाश्वतम् ।
करोमि नैव सूर्यवंशजो भवामि भारते
शृणु क्षणं मदीयभाषणं प्रमत्तभूपते ॥ ३५

उदीरितं तथा मया श्रुतं तदीयबान्धवैः
तदैव कृष्णसिंहभूपतिः परं ज्वलन् रुषा ।
तथैव सर्वमत्र संगरे विलोकयेम रे
त्वया समं सलीमबान्धवं समानय स्वयम् ॥ ३६

अखर्वगर्वनर्मगर्भकर्कशातिभाषणैः
निनिन्द युष्मदीयपालनं स कृष्णभूपतिः ।
तदातिरागपूर्णलोचनो ह्यद्वितीयकः
समागतोऽस्मि तावकीनपादपद्मसन्निधिम् ॥ ३७

निशम्य तस्य भाषणं रुषा प्रपञ्चितं भृशं
विदह्यमानसन्निवेशचित्रितं स चाक्बरः।
तुरीयदण्डनीतिमण्डनप्रभावितो नृपैः
चकार शीघ्रमेव सर्वमन्त्रिमेलनं तदा ॥ ३८

अनेकमन्त्रिमण्डलैः विचार्य बादशा स्वयं
जगाद साम्प्रतं च संपराय एव भाविकम्।
इति स्वपुत्रकं सलीं महोग्रपूर्णसेनया
स मानसिंहरक्षणे सकौतुकं दिदेश तम् ॥ ३९

इत्येवमाशु च दिदेश स तुर्कराजः
बीगूंदमध्यखमणोरुशिलोच्चयानाम्।
मध्ये भविष्यति च भीकरसंगरोऽयम्
हल्दीति पूर्वपदमण्डितघाटकेषु ॥ ४०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये दिल्लीकाण्डे ' राणाप्रतापावर्तनमुद्दिश्य अक्बरचक्रवर्तिने मानसिंह-निवेदनम् ' नाम चतुर्दशः सर्गः समाप्तः ॥]

इति श्रीसकलभुवनतलबुधजनविनुतकविकुलपादारविन्दमकरन्दपानमत्तभ्रमराय-मानमानसेन श्री ओगेटि कौसल्यासाम्बमूर्तिदम्पत्योः गर्भशुक्तिमुक्ताफलाय-मानसूनुना गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना ललित-गीतालहरी-अक्षयगीतरामायणम्-यशोधराभहाकाव्यम्-परीक्षिन्नाटकचक्रम्-जानपदनृत्यगीतमञ्जरीकाव्यम्-सौन्दर्यमीमांसादि-काव्यसंचयरचयित्रा पण्डित ओगेटि परीक्षित् शर्मणा विरचिते श्रीमत्प्रतापराणायनमहाकाव्ये दिल्लीकाण्डं समाप्तम्।

हल्दिघाट्-काण्डम् ।

प्रथमः सर्गः

१. हल्दिघाटस्य स्वरूपवर्णनम् ।

राजपुत्रधरणीतलभूधरमार्गे
चोदयस्य नगरीरमणीमणिपादे ।
हल्दिघाट् कविकुलावलिकीर्तितरम्यं
राजते खलु विशालरणाङ्गणरूपे ॥ १

बोंगुदाख्यघमणोरुधराधरमध्ये
हल्दिघाट् लसति कीर्तितभारतदेशे ।
सान्द्रकण्टकितमार्गविभासितदेहा
चोष्णतैः बहुनगालिपरीवृतरूपा ॥ २

सूर्यकान्तिनिभचित्रितरम्यहरिद्रा-
रङ्गयुक्तधरणीतलदर्शितशोभा ।
हल्दिघाटिति जनैः बहुधा प्रथिताख्या
भूमिरत्र बहुलाऽसमलोष्टविलिप्ता ॥ ३

तत्र नैव धरणीतलजीवनसक्तो
मानवो विशति वीक्षितुमेव च लोके ।
मूर्खभावलसितो यदि गच्छति तथ्यं
प्रैति भीतिमनसा मरणं खलु सद्यः ॥ ४

विद्यते न हि जनावलिदर्शनभाग्यं
पादयानमपि दुष्करमेव विमन्ये ।
रोदसीतलमहोऽत्र विगायति गीतं
प्रेतभूतलपिशाचगणैः सहितं नु ॥ ५

एवमेव वसुधा बहुचित्रितदृश्या
रागरञ्जितहरिद्रगुणावलिसक्ता ।
लोकजीवनधरां परिहाय विभिन्ना
नीरसा तपति शुष्कविदारितचित्ता ॥ ६

वायुरेत्य सहसा श्रवणेन्द्रियपार्श्वं
शंसतीव वचनैः कृतकेतरपूर्णैः ।
निस्वनैश्च रहसि प्रियवीररसार्त्तं
हल्दिघाद् भुवि तदा कृतयुद्धचरित्रम् ॥ ७

तत्र भान्ति विरला पृथिवीभववर्गाः
मृग्यमस्ति सलिलं खलु पातुं ।
वायुरेति रभसं च रजोगुणयुक्तो
ताडयन् खलु कपोलतलानि जनानाम् ॥ ८

आतपः पतति तीक्ष्णकरात् बहुतप्तः
विस्फुलिङ्गनिचयैः बहुलं खलु घाट्याम् ।
तस्य पातनवशात् हि चराचरलोकः
दग्ध एव भवतीति शतेन च तथ्यम् ॥ ९

हल्दिघाट्धरणिभूधरसन्निधिमार्गे
वर्ततेऽतिलघुहीनतरा खलु पन्थाः ।
तत्र भारतमहारणसन्निभयुद्धं
मानसिंहनृपराणविशांपतिमध्ये ॥ १०

तत्र जन्यमतुलं भयदं प्रथितं यत्
काञ्चनाक्षरसुपङ्क्तिषु चित्रितमास्ते ।
भारतीयचरिते विनुतं ननु जातं
देशभक्तगणकर्णरसायनरम्यम् ॥ ११

भान्ति तीक्ष्णकटुदीर्घतराणि निगूढं
प्रस्तराणि बहुधा खचितानि निसर्गे ।
यानमत्र बहुदुष्करमस्ति गजानां
नैव शक्यमिह मानवमात्रबलानाम् ॥ १२

तत्र भाति च विशालरणाङ्गणभूमिः
नैकलक्षहयदन्तिपदातिसुयोग्या ।
धीरयोधरणवीरविहारकृतान्त-
प्रेतभूमिरिव भीषणदृष्टिसमाक्ता ॥ १३

प्रस्तराणि कथयन्ति कथां बहुरम्यां
जन्यजातचरिते भुवि साधुपदार्थैः ।
ये च तत्र धरणीप्रविलोकनसक्ताः
यान्ति तान् प्रति विमौनविलोकनभावैः ॥ १४

पक्षिणो विविधकूजनभाषणमार्गैः
अक्षरैश्च डयनैर्गगने नववृत्तैः ।
आलपन्त इव मञ्जुलकूजनगीर्भिः
भाति मन्दगतिराजितचञ्चलपक्षैः ॥ १५

वायुरत्र चलनैश्च पहाडिसुरागैः
निस्वनस्वनविलोलरसप्लुतगीतैः ।
वीचिकालसिततानवितानननिनादैः
हल्दिघाटू-चरितमत्र विगायति नित्यम् ॥ १६

केकिनो विपुलरम्यवितानितपिच्छैः
तालबद्धपदचालनरञ्जितनाट्यैः ।
कीर्तयन्ति चरितं खलु नव्यविलासैः
गीतिकाभिरिह भारतयुद्धमिदं नु ॥ १७

देशभक्तिलसितैः नुतराजकुलाग्र्यैः
पातिता खलु धरा ननु भारतराष्ट्रे ।
हल्दिघाटवनिदर्शनमात्रमनन्यां
चेतनां हृदि जनाः सततं हि भजन्ते ॥ १८

दर्शनेन सुतरां मनसि प्रियभावाः
संभवन्ति रुधिरं भजते परमोष्णम् ।
मानवो लसति रौद्रवितापितदेहः
रागलोचनयुतः सहसा प्रतिभाति ॥ १९

चेतकस्य रणधावनतेजितरूपं
दृष्टिमेत्य तुदतीव मनांसि निगूढम् ।
हल्दिघाटिबहुचालितशाब्दिकचित्रं
शाश्वतं हि मनसि प्रचुरं खलु भाति ॥ २०

तत्र चेतकशफाः वसुधातलभूषाः
सर्वदिक्षु निशिताः मधुराकृतिदीक्षाः ।
अस्मदीयहृदि मुद्रितरूपविभान्ताः
नित्यनूतनसुखं शतधा जनयन्ति ॥ २१

शब्दितं लसति तत्र दिगन्तमनन्तं
जन्यसैनिकमदोत्कटभाषणपूर्णं ।
खड्गयुद्धकटुनादविसर्पणभीलं
संगरं रसिकलोकसमक्षमुपैति ॥ २२

सन्ध्ययोः मधुरचित्रितभूधरभूमिः
सर्ववर्णसमलङ्कृतचित्रविचित्रा ।
सन्ततं कविकुलाग्रणिभावसुचित्रे
हल्दिघाट्समरभूमिरिवात्र विभाति ॥ २३

पीतरागलसिताऽपि धराऽत्र विभाति
नित्यनूतनरुचा बहुला नवरङ्गी ।
सङ्गरं च समभूदिह घोरमिदानीं
रक्तमांससहिता ननु सत्यमिवाद्य ॥ २४

उग्रमूर्तिरिह चेतकवाहनराजः
शत्रुमण्डलममोघरुषाऽऽश्रितशक्त्या ।
खण्डयन् खरकरालकृपाणकुठारैः
शाकराशिमिव संगरभूम्नि विरेजे ॥ २५

सः सदा गतिसमं निजचेतकसार्धं
शासयन् रणभटान् बहुतेजितशब्दैः ।
चञ्चलाचपलवेगहयोद्धतयानैः
युद्धरङ्गमभितः चपलासममेति ॥ २६

लेलिहानततयः सततं बहुशान्तं
मूषकालिहननाय नगालिविलेषु ।
प्रस्तरेषु सरणं प्रविधाय चिरेण
स्वीययत्नफलितानि गिलन्ति ॥ २७

वामलूरशिखराग्रविनर्तितनागाः
वायुभक्षणरताः कुशलं विचरन्तः ।
खेलनैः सहचरैः सममेव हि चाखून्
भक्षयन्ति च विना स्वविलेषु विरोधम् ॥ २८

कौशिकाः खलु नगौककुरूपविरूपाः
आरटन्ति सततं विचरन्ति भीलम् ।
तैलपायिकयुताः शतशो वनवृक्षाः
कण्टकालिलसिता विकटं प्रहसन्ति ॥ २९

हल्दिघाट्भुवि विमत्तशिखण्डसमूहाः
पन्नगावलिविदारणशान्तबुभुक्षाः ।
स्थानमेतदतुलं वरपन्नगयुक्तं
नैव यान्ति च विहाय तलान्तरमन्यत् ॥ ३०

अस्थिपञ्जरवितानितभीकरदृश्या
चोर्वरी लसति कालनिकेतनतुल्या ।
सान्ध्यरागपरिचर्चितरागविलासा
रुद्रमूर्तिरिव भीकरताण्डवभासा ॥ ३१

तत्र सन्ति बहवः पललासनयूथाः
जम्बुकाः गिरिगुहासु च फेरवनादैः ।
संचरन्त इव भूमिधराधरसक्ताः
पूयमांसयुतजीर्णकषेरुकलब्ध्यै ॥ ३२

नित्यशः क्षणभरं नभसंगमवर्णाः
संप्रडीनगतिभिः मधुरं भुवि याताः ।
कुण्डलीन्द्रधरणं प्रविधाय पदाग्रैः
व्योममण्डलमहो त्वरितं प्रविशन्ति ॥ ३३

कालपूरुषविजृम्भणसारिततुण्डे
रक्तहल्दिधरणी रसनेव विभाति ।
तत्र वीरभटतुर्कनृपावलियोधाः
खाद्यवस्तुनिचयेन समं च विरेजुः ॥ ३४

द्रष्टुमेव नास्ति तत्र किञ्चित्
सर्वमस्ति शुष्कदर्शनार्थम् ।
ग्रीष्मतप्तमेदिनी सदाऽस्ति
चास्थिलोष्ठशल्यकण्टकात्ता ॥ ३५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' हल्दिघाट्स्वरूपवर्णनम् ' नाम प्रथमः सर्गः समाप्तः ॥]

द्वितीयः सर्गः ।

२. अक्बरेण समादिष्टः मानसिंहः हल्दिघाट्समराङ्गणं प्रति चमूं चालयति ।

उपायसामदानभेदभावमन्त्रणैः भृशं
सुभाषणं विधाय शान्तिकामुका वयं कथम् ।
विनिर्जिताऽभवाम दृष्टमत्र चाधुना नृपाः
तमन्तिमं च दण्डनीतिमेव दर्शयेम भोः ॥ १

स्वमन्त्रिमण्डलैः समेत एव सर्वसम्मतिं
त्ववाप्य निर्जगाद हल्दिघाट्धराधरं द्रुतम् ।
पदातिकैश्च गोठकैः गजैः महाक्रमेलकैः
सशस्त्रयोद्धृभिश्च पूर्णितं विधेम साम्प्रतम् ॥ २

अयं धरातले प्रशंसनीयविक्रमी प्रियो
महावली च नर्ममर्मकार्यतत्परो महान् ।
सुखेन नैव शक्यते विजेतुमेनमत्र भोः
ममाभिमानपात्रमानसिंहभूपते शृणु ॥ ३

स चाल्पसैन्ययुक्तराजपुत्रकेसरी महान्
जघान स्वानुमण्डलं च निर्दयं स्वमण्डलैः ।
रणाङ्गणे तु ते कृतान्तका इवाखिला धिया
विहारमेव चक्रुरत्र वीरयोधचालनैः ॥ ४

प्रतापसिंहभूपतिस्तु संघशक्तिसंयुतो
यदस्ति सर्वमेव साधनीयमस्य भूतले
प्रसाधयन् विकासभावमाप्य पूर्णतः सुखे
विराजते वनाधिराजराजभावमेत्य भोः ॥ ५

इदं च हल्दिघाट्महारणं तु विश्ववेद्यमे-
व शाश्वतं भविष्यतीह विश्ववाङ्मये चिरम् ।
वहिष्यति प्रचण्डजन्यवीरयोधकृन्तनैः
तरङ्गिणीव रक्तमत्र मांसमस्थिमज्जिता ॥ ६

विशालभारते च भारताख्यसंगरेण सा-
म्यमेत्य हल्दिघाट्रणाङ्गणं कथासु शाश्वतम् ।
विराजतां पवित्रभव्यदेशभक्तिसंयुता-
त्मनां सुमानसेषु मुद्रितं च भद्रितं भृशम् ॥ ७

शृणोतु मण्डलं दिवे दिवे नमाजुमत्र चा-
स्मदीयमण्डलैर्मसीदुषु प्रियं सभक्तिकम् ।
करोतु च प्रकर्षहर्षपूर्णमानमानसाः
खुरानुदिव्यसूक्तपङ्क्तिभिः जयाय केवलम् ॥ ८

समाचरन्तु राजमण्डलानि वेदमन्त्रघो-
षितानि शैववैष्णवीयमन्दिराणि निश्चयम् ।
जयाय चास्मदीयहल्दिघाट्रणाङ्गणे ध्रुवं
महाभिषेकसंयुतानि चार्चनादिभिः मुदा ॥ ९

महार्हदानकर्मभिश्च संविधाय दैनिकीं
विधिं स चाक्बरः प्रभाकराय चार्घ्यदानमे-।
व चाशु संवितीर्य भूमिपातनेन मञ्जुलं
खुरानुसूफिवाचनेन सत्वरं खुदां जगौ ॥ १०

अक्बरस्तु मानसिंहभूपतिं विलोक्य तं
बभाण गाढभावनावृतात्मसन्निभं नृपः।
सलीमुना समं प्रयाहि सर्वशस्त्रतोफकैः
क्रमेलकादिदन्तिघोटकैः पदातिभिः समम् ॥ ११

प्रतापसिंहभूपतिं महाभिमानिनं धिया
धरातलेऽत्र हल्दिघाट्प्रदेशभूषिते रुषा।
विरोद्धुमेव याहि मानसिंहभूपते सली-
मुना महोग्रसेनया शतघ्निमण्डलैर्युतः ॥ १२

पदालिभिः पदालिभिः हयालिभिः धनुर्धरैः
शरासनादिदण्डकार्मुकैः कुठारतोमरैः।
ध्वजालिसज्जितैः रथैश्च संयुतैः हयैः प्रियं
वरूथिनीबलैः प्रयाहि मन्त्रशक्तिसंयुतः ॥ १३

अरण्यवासिना प्रतापसिंहभूभृतावने
समस्तभिल्लवर्गकैश्च सौख्यमेव सर्वदा।
विरच्य तत्र तैः समं सशस्त्रधारिभिः दिने-
दिने प्रवर्धते बलेन सर्वशक्तिभिः गुणैः ॥ १४

प्रतापसिंहभूपतिं तु संपरायवेदिनं
कदापि नैव जेतुमत्र शक्यते च शूलिना।
अनेकजन्यतत्त्वपण्डितं भृशं त्वमत्र किं
कथं हि मान चास्मदीयसेनया विजेष्यसि ॥ १५

वसुन्धरा तु हल्दिघाटवृहच्छिलाप्रभासिनी
न चास्ति तत्र पातुमेव निर्मलोदकं कदा- ।
ऽपि वृक्षसंततिश्च नैव छायया समाश्रितान्
वितापितान् प्रशान्तचित्तमानसान् करोति च ॥ १६

उरश्छदैश्च तैः तनुत्रकैश्च पादरक्षकैः
पदातिकं सुरक्षितं विरच्य वाहिनीयुतः ।
इमैः अमोघवाणखड्गहस्तधारिभिः दृढं
निषादिभिः नियन्तृभिः समाहितः सुखं व्रज ॥ १७

कदापि तस्य संमुखं न यातु साहसी भवान्
वनेचरैश्च संयुतस्य मित्रवर्गरक्षितुः ।
सचेतकः प्रियः भटालिवेष्टितः प्रवर्तते
महेश्वरस्य रूपमाश्रितः सदा विभासते ॥ १८

यथा त्वमीक्षसे तथा न चास्ति चैकलिङ्गदे-
वता प्रसादमाप्य सर्वशक्तिमान् विराजते ।
नितान्तदेवतार्चने स तत्परः समस्तरा-
जवर्गनाशनेऽपि पण्डितः सदाऽरिकृन्तने ॥ १९

सलीमुना युतो मदोत्कटेन भासितो भवान्
कुमारदेवतासमो रणाङ्गणेऽसि धारकः ।
विपक्षपक्षवीरसैनिकान् च शाल्मलीवितू-
लतूलवच्च खण्डशश्च खण्डितान् विधेहि भोः ॥ २०

भृशं विभूषितः समानभूपतिः तनुत्रशी-
र्षरक्षणादियुद्धयोग्यशस्त्रजालकार्मुकैः ।
उरश्छदैः अनीकिनीपदातिभिस्तुरङ्गमैः
ध्वजैः विमण्डितैः रथैश्च संयुतो ययौ तदा ॥ २१

शतघ्निवाहकाश्च शाकटायनादिचालकाः
शनैः शनैश्च मानसिंहपार्श्वभागसंस्थिताः ।
अनेकपाश्च सुन्दरं विभूषितास्तु मानसि-
हवाहिनो नयन्ति हल्दिघाट् धरातलं नु किम् ॥ २२

इतीव चाग्रतः प्रयान्ति वृंहितैश्च भीकरैः
इलातलं नभस्तलं रसातलं प्रतिक्षणम् ।
विघूर्णयन्त एव पादचालनैः यथा च ते
समागतं तु साम्प्रतं विनाशनं धरातले ॥ २३

चचाल वाहिनीसुसज्जितातपत्रमण्डलैः
भटालिघोटकालिहेषितालितूर्यनादिता ।
निरंतरं च काहळालिनादनिर्गतस्वनैः
च रोदसीतलं विरौति भीकरस्वनैः भिया ॥ २४

समस्तसैन्यरक्षणं त्वमेव साधुसंगरे
कुरुष्व भूपते विनाऽवरुन्धनं च योधकान् ।
यथा समक्षमेति सैनिकः तथैव हन्तु मे-
व तान् सदादिश प्रकृष्टमन्त्रशक्तिसंयुतः ॥ २५

दिवे दिवे वरूथिनी तु हल्दिघाट्प्रदेशमे-
त्य चास्मदीय सैन्यरक्षणाय संगरे क्षता-।
ङ्गलोकवैद्यकीयशीतलोपचारकर्मणि
प्रशान्तनव्यभव्यभावनां विधास्यति प्रिया ॥ २६

वनेचराः सदा निसर्गवैद्यशास्त्रतत्पराः
प्रतापसैनिकान् क्षताङ्गिनः प्रहृष्टमानसान् ।
प्रकुर्वते समस्तवैद्यकीयपथ्यपानले-
ह्यपेयकंदमूलपर्णसारपानकैः लघु ॥ २७

इदं हि सर्वमेव लक्ष्यपूर्वकं विलोक्य ते
मनस्थितिं चमूस्थितिं परिस्थितिं परस्थितिम् ।
सलीमुना त्वदङ्गरक्षरक्षकैः समावृतो
नृपाग्रगण्यखड्गचालनं कुरुष्व सर्वदा ॥ २८

मदीयसर्वकामनाः त्वयि प्रियं विकेन्द्रिताः
त्वमेव भाविभारतस्य रक्षको भविष्यसि ।
कुरुष्व भारतं तु शत्रुहीनभासितं ध्रुवं
वयं हि शाश्वतं पुरन्दरा भवेम भारते ॥ २९

इदं सुमङ्गलं गजेन्द्रमेव सर्वसुन्दरं
सुभूषणैः समञ्चितं स्वजित्वरैः परीवृतम् ।
सुधारितैः भटाग्रमण्डलैः पुरःसरैः भृशं
प्रयोदृधुमेव गच्छ हे नृपाग्रवर्य सर्वदा ॥ ३०

यदा यदा च शत्रवो गजेन्द्रसन्निधिं रुषा
प्रयान्ति जित्वराश्च तान् विहाय चान्यमार्गगाः ।
कुरुष्व शत्रुमर्दनं विनाऽवरोधनं खुदाऽऽ-
शिषो ददातु जेतुमत्र शाश्वतं दिने दिने ॥ ३१

अनीकिनीसमावृतोऽपि सामरीयशेमुषी-
युतः परं पदातिचालनं विलोक्य निश्चयम् ।
मदीयमानसिंह सर्वमेव युद्धकौशलं
प्रदर्शयन् परालिकृन्तनं विरच्य एहि भोः ॥ ३२

सदाऽत्र भूपराग एव दृश्यते च धूम्रवत्
न चापि दन्तिमण्डलं हयालिचालनं कदा ।
क्वचिच्च डिंडिमादिताडनोद्भवो ध्वनिः परं
करोति संततं दिशस्तु शब्दिता धरातले ॥ ३३

चमूप्रचालनेन भूपरागसंहतिश्चिरं
विहायसि प्रयाति चक्रवत् भ्रमन् शनैः शनैः।
विमज्जति प्रियं च शून्यनिर्झरीप्रवाहके
करोति निर्झरीं च कर्दमावृतां तदा भृशम्॥ ३४

सदासवप्रभावघूर्णितैः भटालिचालनैः
सुयोधमण्डलस्य वीरपानजातभाषणैः।
निरन्तरं च वारुणीप्रभावमत्तचित्तजैः
विभासिता च सिंधुजैः तरङ्गसंङ्गराजिता॥ ३५

वरूथिनी च नैकलक्षसंख्यया विभासिता
विलोलवीचिकालिवेगसिन्धुना समानता।
धरातलं च सर्वमेव मार्जनं विधातुमे-
व याति किं तथेति द्रष्टुमस्ति नास्ति संशयम्॥ ३६

तकत् तकत् धिमित् धिमित् ध्वनन् मृदंगतालिका
पदे पदे स्ववीरमुद्रमुद्रिता सुवेगिनी।
ससार वाहिनी तुरंगयूथशोभिनी परं
विशांपतिं चमूपतिं प्रतापसिंहभूपतिम्॥ ३७

अनुक्षणं प्रतिक्षणं पदातिवेगचालिता
तदीयवाहिनी ययौ च हल्दिघाट्धराधरम्।
विमत्तसैनिका स्फुरत्पदातिवेगघोषिता
करालशस्त्रशूलकुन्तमुद्गरादिशोभिता॥ ३८

अनेकगन्धसिन्धुरादिधींकृतं दिशासुखं
चमूसुवेगरूपितं विलोलवीचिचालनम्।
अभङ्गमर्दलादिवाद्यजातभीमनादकं
विसंख्यसंख्यवाजियूथशोभितं चमूचयम्॥ ३९

समस्तसंपरायशोभया परीवृता मही
परागभूषिताऽपि सान्ध्यरागचर्चिता सती ।
भृशं नु घोटकादिपादघट्टनेन धूसरा
विभाति मानसिंहरोषजातरागवत् तदा ॥ ४०

रणे समस्तदन्तिनः समेत्य बादशा-बले
प्रविश्य घींकृता इव प्रलोभनं विचक्रिरे ।
समस्तशासकीयसैन्यसंपदा परीवृतः
स मानसिंहभूपतिः तदन्तिकं रुषा ययौ ॥ ४१

मही चचाल वाहिनीगजाश्वभारघूर्णिता
विघोषिताः तदीयघोषया नगेन्द्रकन्दराः ।
ननाम पन्नगेन्द्रशस्तमस्तकालिपीडिता
विघूर्णिता वसुन्धरा नगेन्द्रतुङ्गशृङ्गका ॥ ४२

विराट्स्वरूपसंगरे प्रबुद्धयुद्धपण्डितैः
सुमण्डितं सुमङ्गलीयदिव्यपञ्चमङ्गलम् ।
अनेकपं सुचारुभासुरं स्ववल्गुभिः परं
त्वधिष्ठितः स भूपतिस्तु मानसिंह विक्रमी ॥ ४३

गजालि घींकरोति शुण्डया प्रणामपूर्वकं
धरातले स्वपादघट्टनं विधाय शाब्दिकम् ।
अजस्रकर्णचालने सहस्रनादघोषितं
करोति भूतलं वियत्-तलं रसातलं रुषा ॥ ४४

नगेन्द्रशीर्षहेषरोषशुक्लपुच्छभूषिताः
विशन्ति निर्झरा इव प्रपातफेनिलायुताः ।
उपत्यकाग्रिमप्रदेशराजिता चमूचयाः
पराक्रमप्रभापरीतमानसिंहरूपकाः ॥ ४५

कृपाणशस्त्रतेजसा परीवृतं चमूचयं
समस्तपादशीर्षदेहरक्षणादिकैः दृढम् ।
पदातिसैन्यजालकं रणाङ्गणे प्रवर्तितं
धरातलात् प्रसूतमस्ति किं तथेति भासते ॥ ६४

मानसिंहवाहिनी तु शनैः शनैः सा संचलन्ती ।
हल्दिघाट्नगगताऽस्ति राणासैन्येन सार्धं च योद्धुम् ॥ ४७

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' अक्बरेण समादिष्टः मानसिंहः हल्दिघाट्समराङ्गणं प्रति चमूं चालयति ' नाम द्वितीयः सर्गः समाप्तः।]

तृतीयः सर्गः ।

३. चमूचालनमुद्दिश्य राणाप्रतापाय भिल्लनिवेदनं, ततः परं कृष्णासिंहादीनां मन्त्रणा च ।

हल्दिघाट्यां तु केचन भिल्लाः गोसमुदायं चारयन्तश्च ।
कथाप्रसङ्गेषु विभुं तं कीर्तयन्तो व्यराजन् सानन्दम् ॥ १

चर्वितचर्वणेषु ते कथाप्रसङ्गेषु राणां राष्ट्रभक्तम् ।
स्मृत्वा परमानन्दे ममज्जुः विस्मृत्य लोकं बाह्यं खलु ॥ २

तेषु भिल्लयुवा शनैः स्वीयां गां परावर्तयितुं क्षेत्राच्च ।
सुदीर्घदर्शी भूत्वा दूरतो धूलिपटलमपश्यत् क्षिप्रम् ॥ ३

प्रथमं चिन्तयामास किमिदं धूलिसञ्चयं सर्वं तनोति ।
द्वितीयं कानने किं दावाग्नेः संजातधूमस्तोमो नु ॥ ४

तृतीयं तत्क्षणं सः विचिन्तयामास सो झंझामारुत इति ।
अन्ततश्चानीकमिति ज्ञात्वा कम्पिततनुस्तत्र संतस्थौ ॥ ५

शनैः स्वनिकटमागतां विलोक्यापारां निर्निमेषचक्षुषा ।
विगणयन् संख्याक्रमं वाहिनीं सोरस्ताडमाक्रोशन् सः ॥ ६

स्वीयभिल्लैः मिलित्वा राणाप्रतापं वक्तुं वार्तां तां तु ।
सान्तत्यधावनेन हि राणापर्णकुटीरमागतो भिल्लः ॥ ७

समायातां वाहिनीं राणाप्रियचरः भिल्लस्तां प्रविलोक्य ।
फेनपुञ्जान् वमन् सः वार्तां वक्तुं धावन् समायातश्च ॥ ८

दृढदण्डधरश्चासौ बहुजीर्णपदत्राणसमलङ्कृतः सन् ।
श्मश्रुभूषितः भिल्लः चोर्णवस्त्राच्छादितशरीरयष्टिश्च ॥ ९

राणानिकटं समेत्य धावनेन जातोच्छ्वासनिश्वासास्तु ।
पादद्वयं प्रणिपत्य शुष्कवदनः भाषितुमशक्तोऽभूत् सः ॥ १०

पानीयं पीत्वा सः पश्चादल्पवचोभिः कथयांबभूव ।
राजन् शत्रवः परं बहुभयदानीकैः रोद्धुं समायान्ति ॥ ११

समस्तदिल्लीनगरं प्रोत्थाय समायाति सक्रोधं भृशम् ।
प्रयोद्धुमिव प्रतिभाति नास्ति संदेहलेशोऽप्यत्र विचारय ॥ १२

बहुरथतुरगदन्तिभिः ध्वजिनीसमञ्चितपदातिभिः प्रबलैश्च ।
संयुता वाहिनी खलु समायाति धरित्रीं कम्पयन्ती सा ॥ १३

तां वाहिनीं विलोक्य च मे लोचनद्वयं तमिस्रया व्याप्तम् ।
पादद्वयं कम्पितं शरीरं घर्माविलं जातं भयेन ॥ १४

क्षितिजातलं सर्वं हि पदातिरथतुरगगजचालनेन जातम् ।
धूलिपरिव्याप्तं ननु धूमस्तोम इव नयनयोः संजातः ॥ १५

नैकगजबलव्याप्तं लक्षाधिकतुरगकमेलकैः सहितम् ।
अनेकलक्षविभान्तं सैन्यचालनमपश्यं बहुदूरतोऽत्र ॥ १६

मदगजबृंहितैः युतां वाजिहेषाप्रतिध्वानिताशान्तां च ।
काहळध्वनिगर्जितां चातिरथिमहारथिसुमण्डितां चमूम् ॥ १७

अल्लाहोचाक्वर इति समुदायगानसमञ्चितपदातिचयम् ।
क्रमशिक्षणायुतं बहु जलधितरङ्गवत् क्रमेण विचलन्तं च ॥ १८

मदमत्तवेदण्डगणसमुद्धृतशुण्डालमण्डलसमुपेताः ।
घींकारैः पदातयः प्रचलन्ति दिगन्तेभ्यः समागता इव ॥ १९

बहुशतघ्नीदलान्यपि मदमातङ्गनिभानि सन्ति चोभयतः ।
स्वमुखान्युद्घाट्य परं समायान्ति पिशाचा इव चमूचयेन ॥ २०

सैन्यं सर्वमपि याति कटुहल्दिघाटपरिसरप्रान्तं शनैः ।
विनाऽवधिं श्रेणिषु नगाधिरोहणमवरोहणं प्रविधाय ॥ २१

यत् दृष्टं तत् सुकथितं प्रसीद प्रतापविभो चाप्रियकथने ।
अहमपि तव साहाय्यं करिष्यामि शत्रुसंहरणे शाधि माम् ॥ २२

इत्युक्त्वा सः तस्मात् निर्ययौ स्वीयगाः समानेतुं द्रुतम् ।
स्वीयमित्रैः समेतं भणितुं राणासहायार्थमागन्तुम् ॥ २३

श्रुत्वा प्रकथनं तस्य चानुपदं राणा मित्रैः समावृतः ।
कर्तव्यं शीघ्रमेव भवत्यालस्यममृतं विषं मित्राणि ॥ २४

क्रुद्धो मानसिंहश्च श्यालेन सलीमुना सार्धमागतोऽत्र ।
प्रबलैः अनन्तसैन्यैः तुर्कभूपतिना समादिष्टः तूर्णम् ॥ २५

हल्दिघाट्प्रदेशे खलु महाभारतसंग्रामोऽत्र भविष्यति च।
अस्तीयमधुना नान्दी हल्दिघाटभारतयुद्धस्य केवलम् ॥ २६

वयं सर्वे मिलित्वा समरे तु परानीकान् प्ररुध्य बाढम्।
विजयिनश्च भवेम भोः जननीरक्षणदीक्षितभारतयोधाः ॥ २७

अश्वारूढाः भूत्वा नैकत्र समरे युध्यमानाश्चतुरम्।
वयं तुर्कसैन्यं ननु सकृत् खड्गप्रहारैः खण्डयेम भोः ॥ २८

शत्रुः बलवत्तरश्च पूर्ण सकलशस्त्रसमञ्चितो बलवान्।
शस्त्रसमञ्चिता वयं धर्मपरिरक्षकाः देशहितैषिणश्च ॥ २९

अवश्यं जेतारश्च वयमेव भविष्यामः माऽस्तु चिन्ताऽपि।
सज्जीभवन्तु सर्वे युद्धपरिकरैः सानन्दं सोल्लासम् ॥ ३०

शृण्वन्तु मद्वाक्यं तु यावत् शरीरेषु प्राणाः मित्राणि।
सन्ति तावदवधि नृपाः युध्यन्तु परवीरनाशनं कुर्वन्तु ॥ ३१

तस्य कथनं श्रुत्वा च कृष्णसिंहस्तु सादराञ्जलिर्जगाद।
स्याम एव विभो वयं तव पादानुवर्तिनः किङ्कराश्चिरम् ॥ ३२

भूत्वा सैन्याधिपतिः सैन्यं चालयेयं चतुर्धा विभज्य।
बहुलंजाग्रदवस्थया तान् शत्रून् जेतुं शक्त्या प्रयतिष्ये ॥ ३३

माहुः भवान् भिल्लाश्च सर्वे गच्छन्तु प्राग्दिशं सवेगम्।
मनःसिंहेन सार्धं व्रजेयमहं प्रतीचीं सूर्यध्वजेन ॥ ३४

अन्ये भिल्लवर्गास्तु दक्षिणायां दिशि यमभटा इव बाढम्।
श्यामसिंहादियोधाः चोत्तरहरिदन्ते स्थास्यन्ति रणाय ॥ ३५

भवान् मानसिंहं तं केवलं पश्यतु माऽस्तु चिन्ताऽन्येषाम्।
वयं पश्येम सर्वे तत्रभवन्तं विलोकयन्तः युद्धे ॥ ३६

सर्वदिक्विभागेभ्यः वयं विपक्षान् विरुध्य तस्य सैन्यं तु ।
विचूर्णयेम तत्क्षणं कर्तयाँ तु क्रमुकमिव पदे पदे भोः ॥ ३७

वक्ष्यमाणप्रकारं सर्वे वयं दृढतनुत्राणपिनद्धाः ।
कृपाणपरशुसहिताश्च तुरङ्गाधिरूढाः सत्वरं गच्छेम ॥ ३८

राणा रुद्रो भूत्वा चेतकसमीपं गत्वा सप्रश्रयम् ।
नत्वा चाश्वतल्लजं बभाणैवं सप्रियं सकरुणं भृशम् ॥ ३९

गच्छामि योद्धुं मम मित्रवर्य जयोऽस्तु मे भारतरक्षणार्थम् ।
भवादृशो नैव ममात्र मित्रं नमोस्तु तुभ्यं वरचेतकाश्व ॥ ४०

[इति श्रीमत्प्रतापराणायनमहाकाव्ये हल्दिघाट्काण्डे "चमूचालनमुद्दिश्य राणा-प्रतापाय भिल्लनिवेदनं ततः परं कृष्णसिंहादीनां मन्त्रणा च" नाम तृतीयः सर्गः समाप्तः।]

चतुर्थः सर्गः ।

४. स्वानुचरान् संबोधयन् राणाप्रतापः चमूं चालयति हल्दिघाट्प्रदेशम् अपि च प्रयुध्यति शत्रुभिः ।

प्रतापसिंहभूपतिस्तु पत्रधारकात् स्वयं
तदाऽक्बरस्य पत्रमाश्ववाप घोरसंगरः ।
भविष्यतीति हल्दिघाट्समीपभूधरेष्विति
प्रपाठ्य भावविक्लवं विना बभौ पराक्रमी ॥ १

सदैव सत्वरं च धेनुपालकान्निशम्य वा-
हिनीचयस्य पूर्गचालनादिकं महाद्भुतम् ।
मदेभघींकृतिं हयालिहेषयावृतं परा-
लिवर्तनं प्रतापसिंहभूपतिः सुहृद्वरैः ॥ २

विचार्य सत्वरं समस्तभिल्लराजमण्डलैः
अनीकिनीं विरच्य सर्वशस्त्रजालसज्जिताम् ।
कृपाणवाणशूलतूणखड्गमुद्गरैर्युतां
तनुत्रकैश्च पादरक्षकैश्चकार सज्जिताम् ॥ ३

प्रतापसिंहभूपतिः भविष्यतीह सत्वरं
महोग्रभीकरश्च हल्दिघाट्धरातले महान् ।
परस्परं तु संगरोऽस्मदीयसैन्ययोश्चिरं
कुभावतुर्कभूपतेश्च सैन्ययोरिति स्वयम् ॥ ४

जगाद सर्वसैनिकान् महाप्रतापसंयुतान्
अनेकभावसंयुतान् च सम्परायतत्परान् ।
समस्तयुद्धतत्त्वसाम्प्रदायतज्ज्ञवंशजैः
नुतान् वरांश्च वन्यभिल्लयोधवर्गतल्लजान् ॥ ५

प्रियांश्च सर्वसैनिकान् हयावलीषु संस्थितान्
महोग्रकृष्णसिंहभूपतींश्च भिल्लसैनिकान् ।
प्रहृष्टमानसो बभूव वीररूपराशितान्
जयस्तु सत्वरं भविष्यतीति चिन्तयन् स्वयम् ॥ ६

जयो भवेद्यदि प्रियाः मुदैव भारतं वयं
प्रपालयेम शाश्वतं प्रजाभिरेव सौख्यदम् ।
भवेत्तथा हि नैव तर्पणं क्षताङ्गसंस्थितैः
विधेम भारताय रक्तवाहिनीचयैः मुदा ॥ ७

न चास्ति मार्ग एव राजवंशजन्मनामहो
भवन्तु सर्वसैनिकाः समर्पणप्रभाविताः ।
विभूषितात्मसंयुताः स्वराज्यसाधने रताः
चरन्तु संगरे तु संस्मरन्तु चन्द्रशेखरम् ॥ ८

यदा कदापि जन्तवो मृता भवन्ति जीवने
यदि स्वयं स्वमातृभूमिरक्षणे भवन्ति ते ।
मृताः तदेव चात्र नाकधाम्नि शाश्वतं प्रियाः
वसेयुरेव भारतीयभव्यकाव्यसञ्चये ॥ ९

अनेकपाश्च सन्ति नैव चास्मदीयसन्निधौ
शतघ्निनामकाश्च शत्रुनाशने प्रकीर्तिताः ।
अशेषशेमुषीप्रभावसंघशक्तिसंयुताः
तथापि शत्रुमर्दने भृशं सुकीर्तिता वयम् ॥ १०

धनेन सुप्रजाभिरेव नाप्नुयाम शाश्वतीं
स्थितिं भजन्तु नित्यशः प्रियं त्वदीयगौरवम् ।
तदर्थमेव शाश्वतैः प्रजोपयोगकर्मभिः
शरीरपातनैश्च शाश्वतत्वमाप्नुयाम रे ॥ ११

सदाऽल्पसैन्यमण्डिता रणाङ्गणे रता वयं
तथापि सत्यमेव चास्ति भारतीयवासिनाम् ।
जयस्य कारणं महीतले मदीययोधकाः
न चास्तु भीतिरेव यान्तु हन्तुमेव तौर्किकान् ॥ १२

प्रतिक्षणं तु दृग्भिरेव चावगम्य वर्तनं
परालिकर्तनं विधातुमेव यान्तु सैनिकाः ।
शिलासमानचेतनाः दयाविहीनभावुकाः
निरन्तरं च मातृभूमिरक्षणे भवन्त्विह ॥ १३

प्रयान्तु शत्रुसन्निधिं तु संघशक्तिसंयुताः
कदापि नैव यान्तु सैनिकाः स्वयं परान् रुषा ।
विना च संघभावमत्र शत्रुमर्दनं कथं
भवेत् स्वयं विचारयन्तु सर्वसैनिकाः प्रियाः ॥ १४

द्रुतं धियाऽत्र यान्तु मातृभूमिरक्षणात्मकाः
परालिभूमिजातभञ्जने प्रभञ्जनाशुगाः ।
मदात्तशत्रुभूधरान् विदारणे पविप्रभाः
विधातुमेव देशमेनमात्मवश्यमासितम् ॥ १५

अरीन् भृशं विदग्धुमेव चैकलिङ्गनेत्रजाः
रणाङ्गणे तु तप्तहेमवर्णकान्तिभासुराः ।
नभस्थलस्थपुष्करादिगर्जनाभिसंयुताः
महेश्वरस्य ताण्डवेषु जातशब्दभीकराः ॥ १६

सदागतिस्वरूपवैरिवातभक्षणे रताः
विषात्तवासुकिद्विजिह्वरूपवीरसैनिकाः ।
महारिपन्नगालिखण्डनेषु तार्क्ष्यरूपकाः
लसन्तु भूतले वियत्तले च शत्रुनाशकाः ॥ १७

लुलायरूपराक्षसालिमर्दने तु चण्डिका-
कराग्रसंलसत्कृपाणतुल्यनिर्दया नृपाः ।
रणेषु मारणेषु याम्यकिङ्करस्वभाविनो
हरन्तु तुर्कसैनिकान् महारणेषु सैनिकाः ॥ १८

रणाङ्गणे प्रतापभूपभास्करस्य दीधिति-
प्रकाशतुल्यभव्यकान्तिभासिताः महाभटाः ।
रणेषु शिक्षिता महापराक्रमैः विभूषिताः
बुभुक्षिताश्च सैंहिकाः भृशं चरन्तु सङ्गरे ॥ १९

अनेकपालिदेहतुल्यतच्छतघ्निमण्डलं
कृपाविहीननाशने तु वन्यसिंहविक्रमाः ।
निशाचरालिखण्डने तु षण्मुखीयवंशजाः
कुमारमारसंनिभाः चलन्तु भो रणाङ्गणम् ॥ २०

नितान्तमातृभूमिरञ्जने च रागरञ्जिताः
पिनाकपाणिहस्तदीप्ततीक्ष्णशूलसन्निभाः ।
कृतान्तविम्बिताः महारणे च खेलनात्मकाः
चलन्तु शत्रुशीर्षकन्दुकैः प्रखेलितुं प्रियाः ॥ २१

भटान् च सैन्यमण्डले नवीनचालनैः युतान्
अमोघचापवाणतूणसंविराजितान् त्विषा ।
तदैव कृष्णसिंहभूपतिं च सैन्यचालने
नियोज्य वाहिनीं प्रशासयन् जगाम चेतकम् ॥ २२

स तुर्कभूपतिस्तु सामदानभेदनीतिसं-
चयैः पदानुगं विधातुमेव मां तु भारते ।
अशक्तिमान् बभूव संगरं विधाय शक्तितो
विजित्य मां प्रशास्तुमीहते समग्रभारतम् ॥ २३

समेत्य चेतकं बभाण नम्रभावनायुतो
हयाधिराज हे ममात्र संगरेषु शाश्वतम् ।
जयोस्तु भारते च राष्ट्रवासिनां महौजसां
प्रतापसिंहसन्निधौ विवर्धमानचेतसाम् ॥ २४

भवानमुत्र मित्रमस्ति संगरे हयाधिप
प्रतापरक्षणे सदा प्रयत्नभावमण्डितः ।
विलोक्य शत्रुचालनं स्वचक्षुषा निरंतरं
चलस्व संगरे तु मामकीनवाहिनीप्रभो ॥ २५

परेषु सन्ति मत्तहस्तिसञ्चयैः सुयोधकाः
खलीनयुक्तहस्तमत्तवाहकाश्च जित्वराः ।
शतघ्निमण्डलैश्च संयुता बभूवुरेव भोः
भजस्व मा भयं तु संगरे हयालितल्लज ॥ २६

इति प्रियं निगद्य सः प्रदक्षिणां विधाय तं
समर्च्य मित्रबन्धुभिः समं पवित्रभावना- ।
समञ्चितः पदेपदे च हस्तचालनेन तं
सचेतनं विधाय संस्पृशन् भृशं वदन् बभौ ॥ २७

तदा प्रतापसिंहभूपतिस्त्वधिष्ठितः स्वयं
तदीयचेतकाख्यवाजिराजघोटकं रुषा ।
सुधामरीचिजालफेनपुञ्जमञ्जुशोभितं
मरालकाशशेषहासमल्लिका सुहासितम् ॥ २८

परीवृतः समस्तमित्रतुल्यमित्रमण्डलैः
स्वकीयभानुसिंहकृष्णसिंहभीमभिल्लकैः ।
रवीन्द्रवाजितुल्यवेगधावने चणैः हयैः
द्रुतं च हल्दिघाट्स्थलं ययौ स्वयं मरुत्सखा ॥ २९

विचित्रतीक्ष्णसायुधाः पराक्रमाभिरामकाः
कुमारमारभासुराः रणोद्धताः कुमारकाः ।
स्वमातृभूमिरक्षणे च संयमप्रभाविताः
धराधरेषु खेलने ययुश्च वज्रसन्निभाः ॥ ३०

भजन्तु वीरसैनिकाः पुरारिनामदैवतं
स्तुवन्तु शूलधारकाः त्रिशूलनामधारिणम् ।
ज्वलन्तु कामनाः ध्रुवं स्मरान्तकस्य चिन्तया
जपन्तु संततं धिया तदेकलिङ्गदैवतम् ॥ ३१

पुरारिनामकीर्तनं परालिसैन्यकर्तनं
भवच्छिदाभिगायनं नितान्तमर्दने ध्रुवम् ।
ददाति शक्तिजीवनं सदा त्रिनेत्रचिन्तनं
भणन्तु धीरसैनिकाः हरं हरं हरं हरम् ॥ ३२

सदागतिप्रवेगयानतत्परास्तु दैवतं
महेश्वरं पुरच्छिदं तमेकलिङ्गनामकम् ।
स्वराष्ट्रभक्तिगीतगायनादिमन्त्रसञ्चयैः
समर्चयन्तु कोष्णरक्तचोदितैः पदे पदे ॥ ३३

मृगेन्द्रगर्जनानुकारिरुद्रशाब्दिकैः चिरं
स्वगर्जनाभिरेव मूर्छितं विधाय शाश्वतम् ।
विनाशयन्तु संप्लुतं परालितामसीचयं
सहस्रधांशुमालिदीप्तिभासितैः कृपाणकैः ॥ ३४

विराजते प्रियो महेश्वरः स्वयं वियाण्डवे
गणैश्च भस्मलिप्तलिङ्गधारिवीरभद्रकैः ।
तदा चमूचये च वीरपानपानघूर्णितैः
कृपाणहस्तभासितैः कृपाविहीनमानसैः ॥ ३५

विशालभालभागभस्मरेखभासुरैः वरं
सुबद्धदीर्घकेशपाशमञ्जुलैः कपर्दकैः ।
निदाघकालरुद्ररूपरूपितैः मरुद्गणैः
तदेकलिङ्गदीप्तिभिः विराजितं रणाङ्गणम् ॥ ३६

तदा भवत्तथा रणाङ्गणं यथा विकासिता
त्रिलोचनोग्रलोचनाग्निदीप्तिभिः विसारिता ।
पिनाकपाणिदेहसक्तलेलिहानसर्पिता
प्रलयवीरपञ्चशाखमुष्टिखड्गभासिता ॥ ३७

प्रतापसिंहशैवयोधजालकं प्रचालितं
कपर्दिने विधातुमेव लक्षदीपिकारतिम् ।
परालिमस्तकाद्विनिर्गतैः त्विषां समुच्चयैः
कवोष्णरक्तधारया महाभिषेकपूर्वकम् ॥ ३८

क्षणेन युद्धभूमिसन्निधिं जगाम पादगाः
सलीममानसिंहसैन्यपूरितं मरुस्थलम् ।
प्रतापसिंहवाहिनी विलोलखड्गवल्लरी
विसारिता विकासिता विभासिता पदे पदे ॥ ३९

तथाऽऽगतं रणार्थिनं सलीमबन्धुमानसं
प्रतापसिंहभूपतिः जगाद मन्युना तदा ।
प्रदातुमेव युद्धभैक्ष्यमत्र सङ्गरे प्रियं
समागतोऽस्मि मानसिंह पश्य वाहिनीं मम ॥ ४०

उपत्यकालिहल्दिघाटभूतले तदाऽभवत्
द्वयोश्च संगरं महातिघोरभीलदर्शकम् ।
विशालभूतलं परिप्लुतं च रक्तकुल्यकैः
विसान्द्रितं विलेपितं वसादिमज्जपूयकैः ॥ ४१

निरस्तपादहस्तशीर्षकाः तदातिनादकैः
रटन्ति रक्तसिक्तगात्रभासिताः प्रकूजनैः ।
महारणे मदेभवाजियूथखण्डिताङ्गकैः
रणाङ्गणं यमालयं बभूव मांसराशिभिः ॥ ४२

शतघ्निजालकं च यावनीयसैनिकाः परं
प्रयुञ्जते प्रभूतमेव शत्रुसैन्यनाशकम् ।
विराजमानराजपुत्रवीरवर्गकं विना
भयं प्रकुर्वते सुयुद्धमेव सिंहभीकरम् ॥ ४३

स चैकलिङ्गपूजकः समस्तशत्रुसञ्चयं
करोति खण्डशः तदीयखड्गधारयाऽनिशम्।
विरौति वीरभद्रमूर्तिभद्रकालितेजसा
हरामि तं लुनामि तं धुनोमि तं नभस्थले॥ ४३

वितूलयन् यमान्तकः प्रपीडयन् रणे जनं
धमन् तदीयशङ्खमेव कालभैरवाख्यकम्।
तमक्बरीयभूपतिः सलीमसंयुतं तदा
प्रतापसिंहभूपतिः समाक्रमत् पदे पदे॥ ४५

कविं तु चन्द्रभट्टनामकं शमक्षमावृतं
स्वराजपुत्रदेशगौरवादिमूलकारकम्।
रणे च तेन सार्धमेव योद्धुमक्षमश्चिरं
स यावनीययोधको जघान तं महाऽऽयुधैः॥ ४६

विभाकरीयतेजसां निधिं च सिंहभूपतिं
विलोक्य भीतिकम्पितः तदा समानभूपतिः।
छलेन तोफगोलिकालिचालनेन पार्श्वतः
यमान्तिकं निनाय तं मदेन निर्दयः तदा॥ ४७

अनेकमोगलायिसैनिका रयेण भीकरं
रणप्रियेण भीमरूपधारिणा च भानुना।
रणे विमर्दिताश्च निर्दयं तमेव बाधितुं
समेत्य जघ्नुरेव वक्रितैः कुतन्त्रचालनैः॥ ४८

तुरुष्कसैनिकाश्च हल्दिघाटसंयुगे प्रियं
सुषोडशीयवर्षयुक्तखण्डरायभूपतिम्।
अजय्यमित्यनेकवञ्चनादियुद्धतत्पराः
दिवं गतं विधाय तं विचेलुरेव निर्दयाः॥ ४९

प्रतोनकादिचालनेन शत्रुसैन्यसञ्चयं
प्रतापसिंहवाहिनीविचूर्णितं समाकरोत् ।
पदे पदे च खड्गधारया चमूपतिः स्वयं
तुरंगमेन सार्धमेव युद्धभूमिमावृणोत् ॥ ५०

अनेकवीरवर्गपङ्क्तिकण्ठकृन्तनं तदा
विलक्षणेन चालनेन शत्रुनाशनं रुषा ।
त्रिशूलरूपशूलसूचिभीतिमेव दर्शयन्
चकार संयुगे ह्यनीकमर्दनं सनिर्दयम् ॥ ५१

प्रतापभूपतिः विभाति सूर्यदेवसन्निभः
करालखड्गशूलशस्त्रधारविम्बितः परम् ।
सुचेतनैश्च चेतकस्य वैनतेयचालनैः
विदारयन् विपक्षपक्षपन्नगालिसैनिकान् ॥ ५२

प्रतापरायमन्थनेन शत्रुसागरे विषं
प्रसूय खड्गचल्लरी स्वरूपमेत्य निर्दयम् ।
कृतान्तकस्य पाशवत् पराऽरिकण्ठबन्धनं
करोति सत्वरं लुनाति शत्रुजीवसंचयम् ॥ ५३

एवं प्रयुध्य सहसा स प्रतापसिंहः
तं मानसिंहनृपतिं प्रतिरोद्धुमेव ।
यत्रैव सो वसति सैन्यसमेत एव
तत्रैव कृष्णसहितः प्रययौ च हल्दीम् ॥ ५४

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' स्वानुचरान् संबोधयन् राणाप्रतापः चमूं चालयति हल्दिघाट्प्रदेशम् अपि च प्रयुध्यति शत्रुभिः ' नाम चतुर्थः सर्गः समाप्तः ।]

पञ्चमः सर्गः ।

५ हल्दिघाट्रणाङ्गणम् ।

शीर्षत्राणपरीवृतेन शिरसा राणा तनुत्राणकैः
स्कन्धोरस्थलबाहुकूर्परतलान् बध्वा दृढं तत्क्षणम् ।
पादत्राणपिनद्धपादलसितः संग्रामरङ्गे प्रियं
धृत्वा शूलममोघखड्गकलितो बाभाति रुद्राकृतिः ॥ १

चञ्चत्बम्भरकालवर्णनिभसुश्मश्रुश्रिया भूषितः
सौन्दर्यप्रदमूलकं सुतिलकं हिन्दुप्रजालक्षणम् ।
मध्ये पुष्पितकिंशुकारुणसमं भाले भ्रुवोर्दीपितं
कृत्वा पश्यति चेतकोपरि लसन् तं मानभूपं प्रभुः ॥ २

तस्मिन् हल्दिघटालिसंनिधिमहावेदण्डयूथान्विताः
रङ्गोत्तुङ्गतरङ्गिणीव बलसैन्याभीलरावैर्युताः ।
मध्याह्ने प्रचुरं सहस्रकिरणे चण्डत्वमाप्ते तदा
तीव्रं चञ्चलवाहिनां पटुतरं योद्धुं समुज्जृम्भते ॥ ३

निस्त्राणध्वनिजातभैरवरवैः व्योमस्तु शब्दायते
वाहिन्योत्थितधूलिधूसरजगत् सर्वत्र ताम्रायते ।
काम्भोजावलिपादघट्टनविचूर्णाद्रिः परागायते
तत्सर्वं खलु दन्तिकुम्भविगलत् दानेन पङ्कायते ॥ ४

अस्मिन्नातपतीव्रतापितमहाझंझानिलावर्तके
जिह्वालोलपरीतशोषितमुखाक्रोशस्य सैन्यस्य वा।
नास्त्येवात्र वने वनं प्रविमलं तृष्णोपशान्त्यै क्वचित्
तस्मिन् सात्पुडभूधरस्य निकटे चारावलीसन्निधौ॥ ५

एकान्ते च मरुप्रदेशलसिते निर्नीरशैलोच्चये
नित्यं दर्पितमानसिंहपतिना वाञ्छाभिसिध्यै प्रियम्।
कर्तुं हल्दिघटालिनामचरिते सौवर्णवर्णाङ्कितं
ग्रीष्मार्तावधिकं प्रतापनृपतिः युद्धाय रुद्रायते॥ ६

रम्यं चित्रितपञ्चमङ्गलगजे श्यालेन सालीमुना
युक्तो माननृपश्च तत्र विशदं पश्यन् प्रतापाधिपम्।
संग्रामाभ्वानिमूर्तिमन्तममरं भीमाकृतिं सत्वरं।
तस्थौ क्रोधविदग्धचित्तगहनः तथ्यं जिगीषामतिः॥ ७

आस्तां तत्र महोग्ररोषरसितौ शश्वत् भ्रमन्तौ भृशम्
वीरौ तौ समराङ्गणे प्रबलदोर्वीर्याभिसंराजिनौ।
एकान्ते समवीक्ष्य चेरतुरहो सत्यं जिगीषापरौ
स्वात्मानं बहुमन्यमानधिषणासंपृक्तराजन्यकौ॥ ८

अन्योन्याश्रयभावदर्शनपरौ वीरौ भ्रमन्तौ चिरं
वीरावेशविनर्तितास्यविकटभ्रूभङ्गविन्यासकैः।
एकत्रैव समेत्य दृष्टिनिचयप्रस्थापने तत्परौ
चास्तां रक्तजलेजभास्वरविशालालोलनेत्राञ्चलैः॥ ९

ज्ञात्वा तस्य मनोगतार्थमखिलं भावं धिया मानसः
त्यक्त्वा तं पुरतः परत्र रिपुणा युद्धाय गच्छत्यसौ।
शत्रुं मेरुनगाधिधीरममरं राणां भयेनाहवे
सूर्यात् भीतदिवान्धवर्तनविधानालोलसंत्रस्तकः॥ १०

भीष्माकारसुदीप्यमानमचलप्राभावभद्राकृतिं
चैतन्याकृतिचेतकोपरिलसद्दैवीयतेजास्विनम् ।
एकान्ते भवमेकलिङ्गमहिमासंप्राप्तरुद्राकृतिं
शस्त्रास्त्रावृतदीप्तिमन्त्रममरं राणाप्रतापाधिपम् ॥ ११

दृष्ट्वा तं बहुभीतिकम्पिततनुस्विन्नो निवृत्ताननः
शैलाम्द्राकृतिपद्मभङ्गलगजेन्द्राधिष्ठितः सत्वरम् ।
कृष्णाहार्यविराजमाननृपतिः श्यालेन सालीमुना
चाशुद्राक्षितदन्तिराजलसितः सो मानसिंहो ययौ ॥ १२

गन्तारं सहसाऽऽहवात् परजनं वीक्ष्यैव राणा स्वयं
मुष्ट्यां दीपितदीर्घशूलमनिशं संभ्रामयन् शूलिनः ।
रे रे मान धरेन्द्र पश्य विशदं युद्धे महाकौशलं
तत् राणायनवीर्यशौर्यममलं पुण्येन ते वीक्षणैः ॥ १३

इत्युद्गीर्य तदीयपीवरभुजाग्रायत्तशूलेन तं
राणा चेतकसैन्धवस्य भयदैः प्रोड्डीनहेषारवैः ।
हन्तुं माननृपं गजोपरि रुषा युध्यन्तमाकस्मिकं
चोद्युक्तः चपलं दधाव समरात् दन्ती निवृत्ताननः ॥ १४

लाङ्गूलाकृतिखड्गचालनविधानानेकसंडीनकैः
युद्धं भीषणगर्जनाजनितरागव्याप्तरौद्रेक्षणैः ।
अन्योन्यं समरोचितोद्वयनवीरावेशसंचालनैः
घोरं चक्रतुरेव तत्र भयदं शार्दूलविक्रीडितम् ॥ १५

शार्दूलद्वययुध्यमानवरवीराग्रीयसेनावलिः
प्रत्यक्षं बहुसंगरक्रमिकचक्रव्यूहसंडीनकम् ।
वीक्ष्यानन्तसहस्रलोचनभरं हाहारवैः संगरं
द्यूते चित्रमिवात्र मञ्जुलतमं शार्दूलविक्रीडितम् ॥ १६

युद्धं यद्भवतीह सैन्यनिचयैः वीरालिहाहारवैः
गर्जाघोषदलद्धियत्तलरणप्रश्लिष्टदंभोलिवत् ।
शस्त्राघट्टननिर्गमद्बहुलवह्निज्वालशम्पायितं
कल्पान्ते घनगर्जनप्रतिरवप्रायं दरीदृश्यते ॥ १७

मन्थानाचलतौल्यमानभुजदण्डामथ्नशत्रूदधिं
खड्गाघातविकृन्तकण्ठविगलद्रक्तार्द्रशीर्षैः प्रियं ।
खेलन्तं समराङ्गणे बहुविधक्रीडाप्रकारैश्चिरं
राणां कोऽपि विरोद्धुमत्र शतधा शेके न यत्नैस्तदा ॥ १८

ग्रीष्मतौ बहुतप्यमानतरणिः नूनं प्रतापाकृतिं
लब्ध्वा युध्यति खड्गबिम्बितकरैः तीक्ष्णांशुसंप्लाविते: ।
द्रष्टुं तं भुवि तप्यमानमिहिरं शक्त्या विहीनाः पराः
खड्गापातरयो विदारितकराश्चेलुस्तदा संगरात् ॥ १९

एकाकी बहु युध्यति स्म नृपतिः गत्वाऽग्रभागं रणे
धृत्वा तन्निजकेतनं च समरे विद्युत्प्रभादीपितः ।
सर्वं मारयतीह शत्रुनिचयं दोःशक्तिघातेन तत्
ध्वान्तं तं परवीरवर्गमदयं खड्गांशुभिः खण्डशः ॥ २०

हेषाहस्तताडित्समानविचलत्पुच्छोन्नतश्वेतक-
श्रोत्प्लुत्याग्रपदोन्नतोऽग्रखुरविन्यासैश्च संपीडितम् ।
चक्रे बृंहणदर्पितं मदगजं संत्रस्तधींकारितं
युद्धे शात्रवकेतनं च बहुधा प्रभ्रष्टरूपे स्थितम् ॥ २१

संग्रामे रिपुकण्ठलुण्ठनरतः खड्गास्त्रधारायुतः
तीक्ष्णं धूर्जटिनेत्रगह्वरकृशानुज्वालसंकीलितः ।
खड्गं रुद्रकरालभीकरमहातेजःपरिस्फारितं
एकत्रीकृतमौर्वरूपलसितं शस्त्रं गृहीत्वा रुषा ॥ २२

रे रे मानस जर्झरोऽसि समरे सालीम किं कम्पसे
चाल्लां त्वं समरे जपस्व चपलं नास्त्येव कालः परम् ।
खड्गं मे तव कण्ठकृन्तनरतं नैवास्ति रोद्धुं भुवि
चास्त्येवात्र कृतान्तराडिति परं त्वामेव संरक्षितुम् ॥ २३

प्राञ्चद्दोर्बलखड्गचालनरयः प्राधिक्षयभीतावहो
खड्गाघातभरेण खण्डिततनुर्मत्तेभसंचालकः ।
आक्रोशन् पृथिवीतले विपतितो रक्ताभिषिक्ताङ्गकः
पञ्चत्वं सहसा जगाम समरे घोरातिघोरं तदा ॥ २४

घोरं तत् सकलं समीक्ष्य भयदं सर्वेऽपि भीत्या गताः
सालीम् श्यालयुतस्स माननृपतिः त्रस्तो महत्संगरात् ।
मृत्योः भीकरगह्वरात् द्रुततमं चावां वहिर्निर्गतौ
चास्माकं किमु संगरेण चल रे भद्राणि पश्याव रे ॥ २५

तस्मिन् संगरजातभीकरकृतिं राणाप्रतापस्य च
दृष्ट्वा प्राणभयेन जीवनिचयं धृत्वा समालिङ्ग्य तौ ।
पश्यावः तदनन्तरं रणतले राणाप्रतापाधिपं
मास्त्वद्येति विचाररीतिनिरतौ वेगेन दूरं गतौ ॥ २६

सत्यं तद्भयदं महोग्रमतुलं सद्धर्मदीक्षायुतं
युद्धं भीकरहल्दिघाटिचलितं वीक्ष्यैव शत्रुः परम् ।
आहो किं कथयेयमद्य भयदं जन्यं समुद्दिश्य भोः
द्रष्टव्यं यदि विद्यते तदखिलं दृष्टं तदद्यैव मे ॥ २७

किं शौर्यं किमु धैर्यमत्र नितरां नीतिः सुधर्मायुता
लोके भाति महाद्भुताश्रितरसः पूर्णं प्रभावान्वितः ।
एवं ता जगदुश्च पीतवसनाः सेनाः स्वहाहारवैः
कष्टे सत्यपि नीतिवद्धचरितो राणा महाभारते ॥ २८

यद्येवंविधशत्रुसीमितमहायुद्धप्रदेशे द्रुतं
भीतौ तौ पृथिवीपतिश्च रभसं नीत्वा स्वकक्षान्तरे।
खड्गेनाखिलगात्रकृन्तनरतः तथ्यं भवेन्निर्दयं
को नामास्ति महीतले रणविभुं रोद्धुं प्रतापाधिपम्॥ २९

तत्त्वज्ञैः धरणीतले नयविदां राष्ट्रीयचिन्तात्मनां
हिन्दूनां बहुधर्मयुद्धनिरतिः सत्यं प्रशंसीकृता।
हिन्दून् ये परिपीडयन्ति सततं ते पापिनो भान्त्यहो
तेषां नैव भवत्यवद्यममलं स्वर्गीयभव्यं सुखम्॥ ३०

यावन्मे क्षरदेहभस्त्रिभरिताः प्राणाश्चरन्त्यक्षरं
तावत् दिव्यममुत्र हैन्दवजनस्याराधने निश्चलम्।
भूत्वाऽहं खलु यापयामि विमलं शान्त्या युतं जीवनम्
अद्यैवेदमभूच्च जन्म सफलं राणाविभोर्दर्शने॥ ३१

एवं चाक्वरचक्रवर्तिसचिवः सद्धर्ममार्गे रतः
पश्यन्त्योरुभयोरनीकदलयोर्मध्ये स्वहस्तायुधम्।
चिक्षेपामलभावपूर्णसरणिश्चारावलीपर्वते
चाश्चर्याकलितां तदीयघटनां वीक्ष्यैव संचालितः॥ ३२

तस्मिन् संकुलसंगरेऽयमपरः स्वीयो न वा ज्ञायते
इत्येवंविधशङ्कया रणचमूः प्राप्नोत्यकर्तव्यताम्।
तस्मात् क्षत्रियवंशजा बहु हता नाकं प्रविष्टास्तदा
मेवाडीयनभोमणिर्विजयते संदिग्धकाले ननु॥ ३३

मन्देहादिनिशाचरान् च परितो वेगं प्रयुध्यन् यथा
सूर्यो भाति तथैव सूर्यकुलजो राणाऽपि युद्धे चिरम्।
शस्त्राघातविदीर्णछिद्रविसरद्रक्तौघमज्जन् प्रभुः
प्राणाशां प्रविहाय शत्रुनिचये स्वैरं परं युध्यति॥ ३४

दृष्ट्वा तद्धरणीपते भयदशां ते राजपुत्रा रुषा
संतप्ताः प्रबलं जवेन नृपतिं चेरुः प्रवाता इव ।
नत्वा तं सहसा प्रतापनृपतेः हस्ताच्च सूर्यध्वजं
नीत्वा निर्गत एव दूरमतुलो वीरो मनस्सिंसहकः ॥ ३५

सिंहः सत्वरमेव भूपतिशिरस्त्राणं गृहीत्वा रणे
क्षिप्त्वा स्त्रीयशिरोजमण्डललसत्स्वीयोत्तमाङ्गे दृढं ।
संग्रामात् लघुदूरमेव गतवान् क्रोधेन तीक्ष्णं ज्वलन्
मत्वा तं परवीरयौधनिचयं राणा प्रयाति स्वयम् ॥ ३६

एवं वैभ्रमजातभावनिचयैर्गत्वा तदा तौर्किकाः
योद्धुं स्वीयहयप्रचारगतिभिः तीक्ष्णैः कृपाणैर्युता ।
राणारूपनिभं कृपाणसहितं तीक्ष्णार्कसंराजिनं
मानं भारतसैन्यचालनपरं क्षिप्रं प्रचेरुः स्वयम् ॥ ३७

यत्रास्ते रविकेतनं विलसितं तत्रैव राणास्थितिः
भूयादेव तथाऽनुमीय सकलं मोग्लायिसेनाचयः ।
क्षिप्रं तत्र दधाव योद्धुमखिलो हाहारवैः धावनैः
युद्धावेशनिबद्धमानसभवोद्वेगाभिसंराजिनः ॥ ३८

शूलाशूलि बभूव युद्धममरं सूर्यध्वजस्यान्तिके
खड्गाखड्गिविजातकर्कशरवावेगप्रतिध्वानितम् ।
आशामण्डलमानकादिपटहैः वीरार्तनादैस्तदा
व्याप्तं यत् भणतीव केवलमयं लोकावसानं ध्रुवम् ॥ ३९

सीरासीरि रुषा बभूव तुमुलं युद्धं भटाक्रोशनैः
सर्वैः सोदरबन्धुवर्गसुभटैः युध्यन् मनस्सिंसहकः ।
विस्मृत्यैव तदीयजीवनसुखं राष्ट्रस्य भाग्याय वै
पञ्चत्वं नवसोदरैः परिवृतः प्राप्तो हसन् संगरे ॥ ४०

तत्रैवायुधसंगरे बहु हता दृप्ता महायोधकाः
राणाशस्त्रकुठारहेतिनिचयान्निष्यन्दशोणार्द्रिताः ।
निक्षेपास्त्रवितानहेतिततिभिर्गाढं व्यथापीडिताः
प्राक्रोशैः सततं रटन्ति बहुधा यास्यं प्रविष्टा इव ॥ ४१

वीक्ष्यैनं खलु युद्धमग्नमचलं गम्भीररूपस्थितं
दिव्यं वीरकुमारयुद्धसरणीयुध्यन्तमेनं नृपम् ।
मत्वा जर्झरिताङ्गनिर्झरितमन्दोष्णात्तरक्ताञ्चितं
चालिन्या तुलितं त्वनेकविलछिद्राकीर्णराणां भिया ॥ ४२

यद्येवं खलु युध्यतीह समरे राणाप्रतापाधिपः
तथ्यं नाकनिकेतनं हि भजते चालस्यमेवास्तु न ।
भूपेन्द्रं मम चित्तशायिनमहो संरक्ष्य पृथ्वीतले
कुर्यां जीवितवन्तमत्र सकलैर्यत्नैः मदीयं प्रभुम् ॥ ४३

शूलाघातकृपाणहेतिततिभिः सर्वाङ्गसंछिद्रितः
शान्तात्मा प्रविचार्य चेतकइयो भक्त्या महत्या तदा ।
क्षेमेणैव जवेन भूतलमहाराजाधिराजं सुखं
राणां तद्दुःखस्थपीडिततनुं जन्यान्निनायान्यतः ॥ ४४

एवं युद्धरतस्य हिन्दुधरणीराष्ट्रस्य वास्तोष्पतेः
राणा भूमिपतेश्च दैहिकदशां दृष्ट्वा परं दुःखितः ।
युद्धाद्रक्षितुमेव शाश्वतमहो पारे नदं धावितः
नीत्वा तं बहुघोरहेतिदलितं चित्राङ्गकश्चेतकः ॥ ४५

सर्वे योधवराः समेत्य शतधा प्रोचुर्महाभूपतिं
नैवं ते खलु योग्यमत्र सुतरां स्थातुं महायोधक ।
क्रौर्योपेतपरालिवर्तनयुतां सद्यःस्थितिं भीकरां
निन्युस्तं नगकन्दरात् नरपतिं रक्ताङ्गसक्तप्रभुम् ॥ ४६

पङ्गुश्चेतकवोटकोऽपि सपदं भूम्यां पतित्वा तदा
पञ्चत्वं सहसा जगाम विपिने मौनेन शान्ताकृतिः ।
दृष्ट्वा तस्य हयस्य तत्र निधनं राणा स्वयं क्रन्दनं
चक्रे विस्मृतगात्रहेतिततिसंभूतात्मपीडो भृशम् ॥ ४७

तस्मिन् हल्दिघटालिघोरसमरे लक्षत्रयं सैन्यकं
नष्टं यावनपक्षयोधनिचये सर्वाङ्गसंभारिते ।
राणासैन्यकमण्डलेषु सुतरां संभाररहित्यके
ध्वस्तं षोडशसंख्यपूर्वकचमूस्साहस्रिकं केवलम् ॥ ४८

संध्यारागविचित्ररश्मिलसितं सूर्यध्वजं वीक्ष्यते
राणा तत्र विराजतेति रभसं गत्वा च तस्यान्तिकम् ।
तीक्ष्णं शस्त्रचयं तथान्यछुरिका क्षिप्यन्ति तस्योपरि
निर्दाक्षिण्ययुताः पराः प्रतिपदं युध्यन्ति शान्ताः परम् ॥ ४९

इत्थं स्वीयकुलोद्भवप्रबलराजेन्द्रस्य कष्टस्थितिं
द्रष्टुं नाक्षम एव चित्रकिरणस्तां पश्चिमाशां गतः ।
शेषे संगरसैन्ययूथनिवहे सर्वेऽपि छिन्नाङ्गकाः
स्थातुं योग्यमितीह नैव चपलं ते स्वीयगेहं ययुः ॥ ५०

सर्वो वान्धववर्ग एव समरे यातो यमस्यान्तिकं
नाहं स्थातुमहो भुवीह सुचिरं नेच्छामि भो वान्धवाः ।
यावच्छक्ति रणे चरन् सुमहता यत्नेन योत्स्येऽरिणा
नान्दीभूतमिदं स्वतन्त्रसमरं तथ्यं महाभारते ॥ ५१

देव त्वां न वयं भणाम सुतरां शक्त्या विहीनोऽसि भोः
जानीमो वयमत्र ते गुरुबलं केनाप्यजय्यं भुवि ।
किन्त्वद्यैव न योग्यमित्यनुचितं युद्धं परैर्भीकरं
धीराः शक्तियुता हि युद्धसमयं पश्यन्ति योग्यं सदा ॥ ५२

नित्यं मञ्जुलमन्दहासलसितं संपूर्णचन्द्राननं
त्वद्यैवाधिकदुःखमग्नभयदं संदृश्यते ग्लापितम् ।
यद्यद्दत्तमिहैकलिङ्गविभुना तेनैव संतुष्यतां
वैषम्यं कुरुते च कालपुरुषो नैवास्तु चिन्ता हृदि ॥ ५३

नैवास्त्येव समग्रसाधनलसत्संपूर्णशास्त्रावलिः
पर्याप्तं न हि विद्यते च समरे योधाङ्गरक्षाततिः ।
तस्मादेवमभूत् प्रभो न हि भवत्येवान्यहेतुर्भुवि
नीत्वाऽद्यैव विराममेव सहसा कुर्याम युद्धं पुनः ॥ ५४

मातृद्रोहपरायणा बहुगताः शत्रोः समक्षं ह्रियं
त्यक्त्वा वंशपरम्परां भुवि नुतां विस्मृत्य तां संस्कृतिम् ।
लोके मानवजातिरेव निरतं कालानुसारं यमं
यात्येवं न हि देशसंस्कृतिरहो मूर्खा न जानन्ति किम् ॥ ५५

पूर्वं ते मम देशजाः प्रतिभया विज्ञानदृष्टथाऽभवन्
सर्वं सर्वजनानुमोदसमताशान्त्याभिसिद्ध्यै चिरम् ।
कृत्वा धर्मरतां विधाय जनतां सद्धर्मसंचारिणीं
याताश्चात्र सदा स्वधर्मवसनं सत्यं बहुश्रेयसे ॥ ५६

लोके यान्ति जनाः परत्र निरतं लक्ष्मीसमासादने
देशं बान्धववर्गजालममरां प्राचीनदिव्यां भुवम् ।
त्यक्त्वा नैवमिमे कदापि शतधा चिन्तां परं कुर्वते
योग्यं जीवनपानमेव निलये क्षीरात् सदा धावने ॥ ५७

आ सायं सततं तदीयपदराजीवालिरागावृताः
ये दासाः सुतरां स्वकीयसहजं मानावमानं द्रुतम् ।
त्यक्त्वा स्वार्थसुखे नितान्तनिरताः चिन्तां न वा कुर्वते
श्रैष्ठ्यं कश्मलपारतन्त्र्यवसनात् स्वातन्त्र्यदेशे स्थितिः ॥ ५८

एनं तं बहुरक्तसिक्तभयदं राणाप्रभुं सान्त्वनैः
अङ्गीकारमुखं विधाय बहुधा यत्नेन सर्वेक्षणैः।
आनीयाशु महोग्रजन्यनिरतं शत्रुक्षयंकारिणं
जग्मुस्ते सहसा विहाय समरं सर्वे स्वमित्रैः सह ॥ ५९

संख्यातीतचमूचयस्य मरणात् सर्वत्र भूमण्डले
हारीतायितसानुभूधरपरीतानन्तरामण्यकम्।
सत्यं मांसवसादिकोष्णरुधिरस्रोतस्विनीप्लावनैः
हारिद्रायितकारणेन कथितं हल्दीघटालिस्थलम् ॥ ६०

विश्वासमूर्तिं ननु चेतकं तं विलोकयन् साश्रुमुखेन खिन्नः।
संकीर्तयन् तस्य गुणान् वियोगे चाक्रन्दते बाल इव प्रतापः ॥ ६१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' हल्दिघाट्रणाङ्गणम् '
नाम पञ्चमः सर्गः समाप्तः ॥]

षष्ठः सर्गः।

६. चेतकस्य कृते प्रतापविलापः।

अथ किं कथयाश्वतल्लज कथमेवं कृतवानसि स्वयम्।
निवसन् मम संनिधौ सखे अनधीतोऽसि मदीयभावनाम् ॥ १

त्वयि ता निवसन्ति सर्वदा मम पञ्चेन्द्रियचालनक्रियाः।
विधिना खलु दुष्कृतं प्रिय! भुवि चाहं ननु निष्क्रियोऽभवम् ॥ २

भवति प्रिय भारतं मया ननु निक्षिप्तमहोऽत्र जीवने ।
सकलं परिहाय निश्चलं गतवानस्ति दिवं कथं भवान् ॥ ३

न कदापि मया विचिन्तितं न च मे सूचितमेव हि त्वया ।
कथमेवमकारणं च मां बहुदूरं खलु नीतवानसि ॥ ४

सततं भवदीयवर्तनैः बहुधा विश्वसितोऽस्मि चेतक ।
अधुना विदितं महीतले न हि विश्वासपदं हि विद्यते ॥ ५

निरतं तव रम्यदृक्पथो मम मार्गे भवतीति भावितः ।
अधुना गतवानसीह मां परिहृत्यैव विचेतनोऽसि रे ॥ ६

वद मे हय विश्वभूषण कथमेवं कृतवानसि स्वयम् ।
अकृतं कृतमेव शाश्वतं मम पञ्चेन्द्रियभावरूपक ॥ ७

त्वयि सन्ति ममाशयाः प्रिय ! मम भावावलिराशिरूपक ।
हृदि विश्वसिमीह चेतक न हि मित्रं भुवि मेऽस्ति चिन्तय ॥ ८

शृणु चेतक विश्वमण्डले वरमित्रं भविता न मे प्रियः ।
मनसा वचसा च कर्मणा त्वयि लग्नाः मम सर्वभावनाः ॥ ९

मम संनिधिवर्तनेन किं व्यथितं भोः तव मानसं हय ।
सततं कटुसंगराश्रितं बहुहेयं भवतीति जीवनम् ॥ १०

गहनेषु शिलोच्चयेषु च गमनं दुष्करमस्ति किं तव ।
यदिदं भवदीयकारणं प्रिय मे चेतक मां क्षमस्व रे ॥ ११

व्यथया विलपन्तमेव मां प्रविलोक्यैव सुशान्तमानस ।
न च किं भणसीह निश्चल शतधा मौनमनर्थकारणम् ॥ १२

तव वौद्धिकरम्यचालनैः सकलं चाक्वरवाहिनीचयम् ।
समराङ्गणविस्तृतं तदा व्यतरं वीरविहारवर्तनैः ॥ १३

विविधेषु रणेषु निश्चलं गहने सर्वनगालिमस्तके ।
सततं मम संनिधौ स्थितः कृतवानेव जयं हयाधिप ॥ १४

न हि ते सदृशं रणाङ्गणे हयराजो भवतीति मे मतिः
तव सुन्दरचालनं वपुः कथमन्यो भजते धरातले ॥ १५

दुहिणः ससृजे चतुष्पदि सकलज्ञानयुतं तुरङ्गमम् ।
कटुहल्दिघटाहवस्य किं न हि चेत् ते मरणं कथं त्विह ॥ १६

तव जन्म बभूव निश्चयं सहसोच्चैःश्रवसा पयोदधौ ।
अत एव वपुश्च तावकं पयसां चिक्कणवल्गुलेपितम् ॥ १७

तव मञ्जुलभीकराञ्चितं पटुहेषाकलितं प्रधावनम् ।
प्रविलोक्य परास्तु शाश्वतं पतिता वायुहता इवाहवे ॥ १८

तव वैद्युतचालनं रणे प्रविलोक्याहवशत्रुमण्डलम् ।
ननु जातमहोऽन्धमण्डलं किमु वक्तव्यमतःपरं वद ॥ १९

मरणं प्रति तेऽत्र कारणं न हि वक्तुं प्रभवामि चेतक ।
अचिरं मरणं विलोक्यते प्रथमं क्ष्मातलरम्यजन्तुषु ॥ २०

तव देशकृते तुरङ्गम बहुसेवां प्रविधाय जीविते ।
गहने बहुतृप्तजीवनो मृतवानस्ति सुशंसितो भवान् ॥ २१

वद रे हय पीतहारितं हरितं ग्रासचयं तु केवलम् ।
विपिने प्रसृतं महीभृति प्रिय जग्ध्वा कृतवानसि प्रियम् ॥ २२

अतुलं मम कर्म जीवने प्रविधायात्र गतोऽसि चेतक ।
सलिलं खलु पल्वलस्थितं ननु पीत्वा बहुपङ्किलं हय ॥ २३

तव देशहिताय जीवितं त्वविचार्यैव समर्पितं सखे ।
अमरं त्रिदिवीयजीवनं सुखदं ते भवतीति मे मतिः ॥ २४

अभिमानधना भवन्ति रे रघुवंशीयनृपा धरातले ।
सकलं भवता च विस्मृतं सहजा ते मयि भक्तिभावना ॥ २५

समरात् बहुभीतमानसः स च राणा सह चेतकेन किं ।
प्रययौ खलु दूरमाहतस्त्विति सर्वः शतधा वदेत् वत ॥ २६

मम जीवितमत्र साम्प्रतं समरे कश्मलदूषितं खलु ।
अपकीर्तिमयाच्च जीवितात् मरणं योग्यमहो हयाधिप ॥ २७

रघुवंशधराधिपाः सदा प्रथमं राष्ट्रमिदं विमन्वते ।
प्रबलं वरदेशसंस्कृतिं न च ते स्वार्थमना भवन्ति रे ॥ २८

क्षतगात्रमिमं प्रतापिनं बहुदूरं प्रणिनाय संगरात् ।
अपकीर्तिभरेण नामितं कृतवानस्ति मदीयचेतक ॥ २९

प्रबलं मम दुःखकारणं भवतः द्वे खलु कारणे भुवि ।
भवतो मरणं तथा मम रविवंशस्य कलङ्कलेपनम् ॥ ३०

सकलं पटुशिक्षितोऽपि सन् बहुजानास्यपि वर्तनं मम ।
अतिबुद्धिबलेन दर्पितः पशुभावेन विधाय यासि रे ॥ ३१

महता निजजन्मना युतः प्रतिभाबुद्धिबलेन मण्डितः ।
समये सति संकटे जनो भजते मन्दमतित्वमेव हि ॥ ३२

इह हल्दिघटाद्रिसंनिधौ कटुयुद्धं नु बभूव भूतले ।
अयमस्ति च भारताहवः चरिते तत् प्रथितं च चेतक ॥ ३३

इतिहासकथासु चित्रणां मम कीर्तिं तव वर्तनादिकम् ।
विनुतैः कनकाक्षरैः प्रियं विलिखिष्यन्ति सदैतिहासिकाः ॥ ३४

रणहेतिविताडितोऽपि किं बहुवेगेन नदीं वितीर्य भोः ।
मम जीवनरक्षणे रतो ननु ते कृत्यमिहास्ति कीर्तितम् ॥ ३५

अविचार्य सुखं तु तावकं तव भूपं बहुधा ररक्षिथ ।
मम रक्षणकारिणे च ते न हि दत्तं हयपारितोषिकम् ॥ ३६

शृणु रे मम मित्रबान्धवाः परदास्ये निरताश्च संततम् ।
न कदापि विचारयन्ति ते परधर्मो भुवि दुःखदायकः ॥ ३७

बहुधा कटुकघ्टतापितो भवतो राष्ट्रहिताय केवलम् ।
प्रथितं च समस्तजीवनं समरे चात्र समर्प्य यासि रे ॥ ३८

भवता कृतमत्र संगरे मम साहाय्यममोघभावुक ।
गिरिकाननजीवने प्रिय न च कोऽप्यस्ति सहायकोऽधुना ॥ ३९

सततं मम देशरक्षणे निरतोऽहं विपिनेऽपि संवसन् ।
सकला वसुधाधिपाः भुवि न हि जानन्ति सुदेशवैभवम् ॥ ४०

प्रिय मानसमावयोरिति शतधा संग्लपितं वदामि रे ।
मम रक्षणमत्र साम्प्रतं भवता हेतुपुरस्सरं कृतम् ॥ ४१

वसतो विपिने हयाधिप दशवर्षाणि नवाधिकानि मे ।
लसितानि सुखावृतानि ते सहवासात् परमाप्तवीक्षणात् ॥ ४२

रुदितं न कदापि जीवने प्रविरोदामि भवत्कृतेऽधुना ।
अहमस्मि हताशयो वने मम यत्नाः विफला गता भुवि ॥ ४३

पलितं गलितं वयश्च मे हृदयं त्वद्गमने विदारितम् ।
दलितं मम राष्ट्रवैभवं त्वविचार्यैव गतोऽसि घोटक ॥ ४४

सकलं बहुसत्कृतं त्वया पृथुसंग्रामपरालिनाशने ।
तदिदं प्रविलोक्य शत्रवो कृतवन्तस्त्वयि चेदृशीं दशाम् ॥ ४५

घनचञ्चलचञ्चलासमं तव चाञ्चल्यगतिं विभाव्य च ।
ममलोचनयुग्मकं द्रुतं जलधारापरिवाहितं हय ॥ ४६

तव जीवितमेव शाश्वतं भवतीह प्रियवाहिनीपते ।
पशुरूपमवाप्य भूतले त्वगमः शाश्वतकीर्तिसम्पदम् ॥ ४७

सततं हृदयं चतुष्पदि भुवि तेजोमयमश्वतल्लजम् ।
मुमुदे प्रविलोक्य बान्धव न च मे त्वत्सदृशो भविष्यति ॥ ४८

न हि मे हृदयंगमः प्रियः मम भावानुगकर्मकारकः ।
निरतं मम रक्षणे रतो हययूथेषु कदापि विद्यते ॥ ४९

मम चित्तमनारतं त्वयि प्रबलं स्निह्यति वाहिनीपते ।
असति त्वयि जीवितं विभो व्यथितं भाति निरंतरं शृणु ॥ ५०

अहमस्मि सदा धरातले व्यथितः प्रेमविहीनपार्थिवः ।
तव वर्तनमूलकं सखे हृदयं मे परिवर्तितं प्रियम् ॥ ५१

मम तिष्ठति पश्यतः पुरः सततं घोटकयुद्धमेव हि ।
हृदये तु भवान् पदे पदे रमसे वैद्युतवल्लरीव भोः ॥ ५२

बहुजन्मसु चावयोः ध्रुवं प्रबलं संनिहितत्वमेव हि ।
अविभाज्यमिवात्र दृश्यते कतिजन्मानि च याति तद्वद ॥ ५३

इति चाश्वखुरान् विसंस्पृशन् वचनानि प्रवदन् पदे पदे ।
प्रविचुम्ब्य शिरस्तदीयकं प्रणिपत्यैव रुरोद बालवत् ॥ ५४

ऋतुस्वरमहाप्राणे विधावाषाढमासिके ।
एकविंशतिसंख्यात्ते दिनेऽश्वः चेतको मृतः ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे 'चेतकस्य कृते प्रताप-विलापः' नाम षष्ठः सर्गः समाप्तः ॥]

सप्तमः सर्गः ।

७. दास्ये संतप्तः शक्तिसिंहः हल्दिघाट्युद्धे राणाप्रतापेन सहितः मानसिंहादिभिः योद्धुं प्रतस्थे ।

हल्दिघाट्यां महायुद्धं भविता चाक्षरं ध्रुवम् ।
राणाप्रतापभूपस्य मध्ये मानमहीपतेः ॥ १

अस्मिन् युद्धे स तुर्कस्तु प्रयुङ्क्ते सर्ववाहिनीम् ।
शतघ्नीसंयुतां भीमां स नानायोधसमावृताम् ॥ २

कं वीरं जयलक्ष्मीस्तु वृणीतेह रणे स्वयम् ।
न कोऽपि जानात्येवात्र जीवितं संशयास्पदम् ॥ ३

महाभारतयुद्धेन तुलितो धर्मसंगरः ।
भविता हल्दिघाट्यां तु भीकरो जननाशकः ॥ ४

इत्येवं बहुधा शक्तः श्रुत्वा लोकस्य भाषणम् ।
नैकभावपरिव्याप्तः चिन्तयामास दुःखितः ॥ ५

प्रचोदितोऽसौ दुःखेन दास्यबन्धनपीडितः ।
बौद्धिकैः भावसंचारैः दिवारात्रं व्यथाविलः ॥ ६

तुर्कराज्ये प्रतप्तोऽसौ दास्ये मानधनो नृपः ।
शक्तिसिंहस्तदा मेने स्वेच्छाजीवनमेव हि ॥ ७

योग्यं लोकेऽत्र जीवानां सर्वोच्चसुखदायकम् ।
स्वातन्त्र्यं जन्मनः सिद्धं न कोऽप्याहर्तुमस्ति तत् ॥ ८

अन्येषां कथनेनैव सत्यं न ज्ञायते भुवि ।
स्वात्मानुभवसुज्ञानैः ज्ञायते जीवने सदा ॥ ९

मोहो दम्भश्च गर्वश्च सुज्ञानेन पलायिताः ।
अधुनाऽऽत्मा प्रशान्तश्च शत्रुनाशनतत्परः ॥ १०

पवित्रे भारते वर्षे राजाऽहं जन्मनो भृशम् ।
तथ्यं स्वातन्त्र्यमालम्ब्य जीवेयं देशजैः सुखे ॥ ११

दास्ये स्थित्वा च लोकेऽस्मिन् पञ्चभक्ष्याशनादपि ।
मण्डपानं सुयोग्यं हि स्वातन्त्र्ये भारतावनौ ॥ १२

द्रोहः कृतो मया तथ्यं मदेनाज्ञानसंपदा ।
अग्रजाय च राष्ट्राय पापात्माऽहं महीतले ॥ १३

कासौ प्रतापराणा तु क च तुर्कोऽन्यदेशजः ।
विद्यते चान्तरं मध्ये द्वयोः सिंहशृगालयोः ॥ १४

भ्राता प्रतापसिंहोऽयं नारसिंहाकृतिः स्वयम् ।
दानवान् तुर्कयोधांश्च प्रविदारणशक्तिमान् ॥ १५

अहं तु मदमत्तोऽस्मि वृथाऽनिन्दं ममाग्रजम् ।
त्रैलोक्यशासने योग्यं धर्माधर्मविचक्षणम् ॥ १६

भृशं खिन्नोऽस्मि संजातः पश्चात्तापेन साम्प्रतम् ।
न चास्ति मम मार्गोऽन्यः भ्रातृपादाश्रयात् भुवि ॥ १७

भ्रातरं तथ्यमेवाहं गत्वा पादाभिवन्दनम् ।
कृत्वा क्षमस्व भो वीर पापिनं चानुजं तव ॥ १८

इति पृच्छामि चाद्यैव गच्छेयं मम भूपतिम् ।
प्रतापमग्रजं वीरं भाविभारतशासकम् ॥ १९

यदा निश्चित्य शक्तस्तु गन्तुं राणां समीहितः ।
तदैव तत्र युद्धं तु प्रारब्धं हल्दिघाट्तले ॥ २०

श्रुत्वा वार्तां तु युद्धस्य दिल्लयां स्थातुं शशाक न ।
तुरगाधिष्ठितः तूर्णं हल्दिघाटवनीं ययौ ॥ २१

भ्रातरं चाग्रजं मत्तः तिरस्कृत्य पदे पदे ।
भयदात् दास्यपङ्काच्च प्रोत्थितुं प्रभवाम्यहम् ॥ २२

गाढदेशीयभावेन स्वातन्त्र्याकाङ्क्षिणा मया ।
आसादिता नवीनात्र शक्तिः पीयूषरूपिणी ॥ २३

पीत्वा पीयूषसारं तु संजातोऽस्मीह चामरः ।
करिष्यति न मां कोऽपि किमपीह धरातले ॥ २४

भ्रात्रा समं च तुर्कीयान् कर्तयेयं महारणे ।
तेषां शिरैश्च सर्वेषां क्रीडयेयं नभस्थले ॥ २५

बहुधा तप्तचित्तोऽसौ प्रतापं संगरस्थितम् ।
कशया ताडयन् चाश्वं गन्तुं वेगेन पश्यति ॥ २६

तत्र युद्धं भवत्येव तुमुलं भयदं तदा ।
प्रतापराणाभूपस्य मध्ये मानस्य संमुखम् ॥ २७

निषूदने च शत्रूणां रामकृष्णौ रणाङ्गणे ।
भवावः शाश्वतं प्राज्ये विना साम्यं स्वभारते ॥ २८

क्रुद्धोऽभवं तदा तत्र दूषयित्वा ममाग्रजम् ।
ब्रह्महत्यां विधायैव चागतोऽस्मीह देहलीम् ॥ २९

प्रबुद्धोऽस्मीह सत्यं च तथ्यातथ्यमनीषया ।
तदाऽभवं मदान्धस्तु मूढभावेन सर्वशः ॥ ३०

अकृतं कृतमेवास्ति मया राज्ञा स्वभारते ।
अभिमानी प्रतापस्तु भ्राजते कानने हरिः ॥ ३१

धर्मभीरुः प्रतापस्तु कृतवान् न्यायमेव हि ।
मूढात्मा चाभवं तत्र तदानीं मदभासुरः ॥ ३२

भारतेऽस्मिन् महायुद्धे नास्ति भ्रातृसमो भुवि ।
वीरः प्रख्यातयोद्धा च न भूतो न भविष्यति ॥ ३३

तादृशं भ्रातरं त्यक्त्वा गतोऽहं दास्यपञ्जरम् ।
अज्ञाने प्रभवन्त्याशु धियो मालिन्यपूरिताः ॥ ३४

अकर्तव्यं सुकर्तव्यं यौवने नैव भाव्यते ।
ज्ञातं चैवानुमानेन चाप्तवाक्येन केवलम् ॥ ३५

पश्चात्तापेन संदग्धः दास्यभावेन जीर्णितः ।
मनीषया सुसंदीप्तः ययौ राणां स शक्तिमान् ॥ ३६

वायुवेगेन यस्मात् सः मनोवेगेन भूषितः ।
प्रययौ हल्दिघाटं तु प्रज्वलन् वह्निमानिव ॥ ३७

अदृष्ट्वा भ्रातरं तत्र संपराये महाद्युतिः ।
शक्तः सर्वान् परांश्चैव हन्ति खड्गेन खण्डशः ॥ ३८

वह्नौ क्रोधस्य शक्तस्य पेतुश्च शलभा इव ।
शत्रवः संगरे तस्मिन् लाजा इव सुमर्जिताः ॥ ३९

विज्ञायासौ तदा तस्मिन् संगरे मित्रयोधकात् ।
राणाप्रतापसिंहस्तु गृहीतः चेतकेन सः ॥ ४०

सर्वाङ्गक्षतसंयुक्तं प्रभुं राणां स चेतकः ।
गृहीत्वा बहुदूरं तु दधाव स्वामिरक्षकः ॥ ४१

इति श्रुत्वा प्रतप्तोऽसौ कृत्वा चाक्रन्दनं महत् ।
तदा न भूयते चास्मिन् यदाऽहं जीवितो भुवि ॥ ४२

तूर्णं जगाम राणां तु यत्रास्ते चेतकेन तम् ।
हयद्वितीयशक्तस्तु दुःखसंतप्तमानसः ॥ ४३

तत्र तस्मै चरन् शक्तः तं न पश्यन् विभुं क्वचित् ।
अरण्यरोदनं चक्रे नैकभावपरीवृतः ॥ ४४

तदा तत्रस्थयोधेन गृहीतोऽसौ नृपं प्रति ।
यत्रास्ते चेतकस्यार्थे विलपन् भाषयन् स्वयम् ॥ ४५

विलपन्तं तदा तत्र राणां दृष्ट्वा विकम्पितः ।
अवतीर्य हयात् शक्तः न तस्थौ न ययौ भिया ॥ ४६

पुष्पितं किंशुकं वृक्षं यथा पश्यन्ति मानवाः ।
तथैव भ्रातरं राणां प्रापश्यत् रक्तरञ्जितम् ॥ ४७

रक्तेन सकलो देहः सिञ्चितो भाति सर्वशः ।
तथापि चेतकस्यार्थे तपते दुःखपूरितः ॥ ४८

विषादाच्छादितं दृश्यं विलोक्य सहसा नृपः ।
अपनीय शिरस्त्राणं हस्ते धृत्वा शनैः शनैः ॥ ४९

गत्वा च भ्रातरं भक्त्या चक्रे पादाभिवन्दनम् ।
क्षाळयामास पादौ च कवोष्णाश्रुजलैः परम् ॥ ५०

दुःखप्रतप्तचित्तोऽसौ समालिङ्ग्याग्रजं भृशम् ।
कृतापराधिनं मां तु क्षमस्व मनुजाधिप ॥ ५१

अधुना संकटे चास्मिन् तव पादं समागतः ।
चेतकस्यावसाने तु मां गृहाण तवास्म्यहम् ॥ ५२

माऽस्तु चिन्ता भवेन्नूनं स्वीकरोतु हयं मम।
साधयावो बृहत्कार्यं चावां शत्रुविनाशकौ ॥ ५३

इति चिन्ताप्रदग्धोऽसौ सान्त्वयन् भ्रातरं हृदा।
रुरोद चेतकस्यार्थे स्पृशन् हस्तेन घोटकम् ॥ ५४

भ्रातरं सान्त्वयन् सः चेतकं विलोक्य पदे पदे।
अश्रुपूर्णलोचनश्च भ्रातरं निनाय सानुदेशम् ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' दास्ये संतप्तः शक्तिसिंहः हल्दिघाट्युद्धे राणाप्रतापेन सहितः मानसिंहादिभिः योद्धुं प्रतस्थे ' नाम सप्तमः सर्गः समाप्तः।]

अष्टमः सर्गः।

८. रक्तकासार-वर्णनम्।

राणां पादाक्रान्तं कर्तुमीहमानस्तुर्कश्च।
तुर्कजिगीषया नृपः हल्दिघाट्रणं प्रारभेताम्। १

सर्वमपि भारतं सः स्वायत्तं कर्तुं चाक्वरः।
परपालनमन्तयितुं प्रतापश्च प्रायतेतां हि ॥ २

राजस्थानादित्यः श्रीराणाप्रतापदेवस्तु।
तुर्कान्धपालनां तां नाशयितुं प्रयतते काममम् ॥ ३

तुर्को यतते नित्यं रविं मेघच्छन्नं कर्तुम् ।
किन्तु श्रीरविदेवः भ्रामयति च तं तथा कर्तुम् ॥ ४

तथा परस्परद्वेषसंभूते विश्वनुते रणे ।
पवित्रभारतवर्षे नैकवीरा मृताः प्रवृत्ते ॥ ५

हल्दिघाटस्य भयदे महावलवन्तः सुयोधाश्च ।
उभयानीकयोः तत्र निहता जाताश्च विकलाङ्गाः ॥ ६

नैके पादपङ्गवः करविहीनाः शूलिताङ्गाश्च ।
निर्गतशीर्षाः केचन जर्झरिताङ्गाश्चान्ये सन्ति ॥ ७

द्विधा विभाक्ताङ्गाश्च विचेष्टमानाः प्राणान्ते च ।
आक्रोशन्तोच्चैः हेतिभिः बाध्यमानाः सन्ति ॥ ८

एकत्र गजाः मृताश्च विगतशुण्डालमण्डलाः खलु ।
बृहत्कायोपेताश्च भान्ति शिला इव द्रष्टृणाम् ॥ ९

ध्वस्तशतघ्नादयश्च रक्ते निमज्जन्तः कामम् ।
समाह्वयन्ति सैनिकान् रक्षणार्थमुद्बाहव इव ॥ १०

रथाङ्गानि भ्रष्टानि विखण्डितयुगाः व्यासास्तत्र ।
प्रमथाधिपगृहभावं संजनयन्ति दिदृक्षूणां च ॥ ११

विकलाङ्गान् योधान् ते कर्मचारिणः तत्र दूरम् ।
संवाहकैः सार्थं नु विनीय स्थापयन्ति निम्ने ॥ १२

खण्डितावयवांश्च च शाकानिव नयन्ति शकटेषु ।
सहस्राधिकवाहकाः निम्नतले सान्तत्यं तत्र ॥ १३

तस्मात् हल्दिघाटाद्धि वहन्ति रक्तकुल्याः वेगैः ।
प्रावृड्कालसंजातनिम्नगा इव निम्नस्थलानि ॥ १४

रक्तमांसवसादिभिः परिप्लाविता हल्दिघाट्भूः ।
दुर्गन्धपूरिता ननु विराजते यमपुरीव तत्र ॥ १५

एकस्मिन् दिने तत्र पञ्चविंशतिसहस्रात्मिका ।
सेना नष्टा युद्धे रक्तसरोवरविनिर्माणे ॥ १६

सकलहल्दिघाट्स्थलं तु पीतरुधिरपिशाचसंनिभम् ।
विकृतभयदरूपे खलु विभाति दुर्गन्धपूरितं च ॥ १७

रक्तपद्मतुलितानि क्रोशान्तरे स्थितकासारे ।
शिरांसि सन्ति भयदानि मृणालसदृशाङ्कानि च ॥ १८

कतिपयदिनपर्यन्तं धरागर्भे नागाद्रक्तम् ।
कासारो बभूवात्र गृध्रगोमायुपरिव्याप्तः ॥ १९

परशुरामकृतमिवात्र शमन्तपञ्चकमाप्त्वा ।
बभौ रक्तकासारः चिक्कणरक्तसंप्लावितश्च ॥ २०

छत्राकृतिमाप्त्वा च नभसंगमाः शून्ये चेलुः ।
तदा तदा संडीनैः नीत्वा शान्तं मांसखण्डान् ॥ २१

केचन विहंगवर्गाः चञ्चुकुट्टनं प्रकुर्वन्तः ।
मांसखण्डानदन्ति च परस्परं युध्यन्तस्तत्र ॥ २२

शृगालाः गोमायवः फेरवः शुनकादयस्तत्र ।
समाहिताः खादन्ति च शल्यमांसं दन्तदंशनैः ॥ २३

पादं निक्षेप्तुमपि नास्ति च स्थलं हल्दिघाट्याम् ।
निक्षिप्यते यदि तत्र पादो भवति रक्तमज्जितः ॥ २४

तत्र रक्तकासारः समाकीर्णः पतत्रिवर्गैः ।
चित्रविचित्रपक्षैश्च संदृश्यते न तु रक्तेन ॥ २५

पतत्रिणः दृश्यन्ते समस्तधरायाः समागताः ।
सुदीर्घचञ्चुभासिताः नानाविधमांसादनरताः ॥ १६

नैकोडुपा इव शवाः रक्तकासारे प्लवन्ते ।
दुर्गन्धवाहकाः खलु प्रवाताहताः पदे पदे च ॥ २७

हल्दिघाट्रणाङ्गणं तु बीभत्सरणार्णवो जातः ।
तुर्करक्तसिक्तत्वात् राणाप्रतापस्याहवाच्च ॥ १८

हल्दिघाट्यां तु काकाः रक्तवर्णाः संदृश्यन्ते ।
यतस्ते रक्तसिक्ताः सदा कासारविहारत्वात् ॥ १९

श्रीराणाप्रतापस्य तुर्केषु य क्रोधभावोऽस्ति ।
स भावः सर्वस्तत्र रक्तरूपेण संदृश्यते ॥ ३०

तत्र हल्दिघाट्युद्धे नैकलक्षप्राणिनः मृताः ।
बभूव स प्रदेशस्तु रक्तेन सागरोपमितश्च ॥ ३१

रक्तकासारनिकटे भूः सर्वाऽपि रक्तरञ्जिता ।
विभाति बहुरुष्टेव हल्दिघाट्संगरेण हि ॥ ३१

मांसादिनः पक्षिणः रक्तकासारे गजशवेषु ।
स्थिताः नौचालका इव शवान् संचालयन्ति कामम् ॥ ३३

पतत्रिणश्चान्योन्यं मांसभक्षणाय समाहिताः ।
अहमहमिकया चातुं प्रयुध्यन्तः रटन्तः सन्ति ॥ ३४

धरित्री पीतवर्णा रक्तप्रवाहेन विजाता ।
हल्दिघाट्यां तस्माच्च तन्नाम सार्थकं जातं हि ॥ ३५

न जातं तस्मिन् समये चैतादृशसमरं भूतले ।
प्रथितं राष्ट्रचरित्रे तद् भारतयुद्धानन्तरम् ॥ ३६

पीतवर्णा लसन्ते हल्दिघाट्यां ग्रावादयश्च ।
किञ्चित् रक्तवर्णास्ते चास्मात् युद्धानन्तरमेव ॥ ३७

बहुरक्तपूर्णं सरः बहुदिनपर्यन्तं न शुष्कम् ।
किन्त्वाहारकेन्द्रं च संजातं द्विचतुष्पदानाम् ॥ ३८

सर्वत्र हल्दिघाट्यां वसामज्जपूयरक्तमयी ।
सर्वसहा दृश्यते दुर्गन्धभरिता चाशौचा ॥ ३९

लोके सर्वसाक्षिणौ सूर्यचन्द्रमसावपश्यताम् ।
भयदं जातं जन्यं चाहरहः तद्हल्दिघाट्याम् ॥ ४०

रक्तकासारे रविः विम्बितः मध्याह्ने नित्यम् ।
दृश्यते विलोकिनां तु भारतेतरेभ्यः क्रुद्ध इव ॥ ४१

रुधिरप्रसिक्ता धरा न प्रसूते च किमपि सस्यं ।
ऊषरक्षेत्ररूपा नित्यशश्चाहल्या जाता ॥ ४२

हल्दिघाट्क्षेत्रं जनाः स्मशानमिति मत्वा न यान्ति च ।
किन्वितिहासस्थलमिति द्रष्टुं प्रयान्ति देशभक्ताः ॥ ४३

प्रतापः समक्षमेति रक्तकासारविलोकनेन ।
वपुरापादमस्तकं पुलकितं कदुष्णितं च भवति ॥ ४४

राष्ट्रियभावसंयुतः स्वातन्त्र्यरक्षणमूलकश्च ।
रक्तकासारो भवति देशभक्तिप्रचोदकस्त्विह ॥ ४५

राष्ट्रभक्तिहीनानां रक्तसरोवरदर्शनेन हि ।
स्वराष्ट्रभक्तिरुद्भूय चानन्दं जनयति चेतःसु ॥ ४६

रक्तकासारो नाम भारतस्वातन्त्र्याय तदा ।
नान्दीभूतसर इति राष्ट्रभक्तानां सिद्धान्तः ॥ ४७

प्रतापेन दत्तमिदं सरः राष्ट्रहिताय केवलम् ।
स्वीयांशदानमिवास्ति पूर्णस्वातन्त्र्यार्जनाय च ॥ ४८

अयं कासारो नास्ति राणादेशभक्तिरूपकः ।
रक्तकासारः सदा भारतेतिहाससारमयः ॥ ४९

चारित्र्यं देशभक्तिं च बोधयन् भाति भारते ।
कासारोऽयं गुरुर्नित्यराष्ट्रभक्त्यार्जने ध्रुवम् ॥ ५०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' रक्तकासार-वर्णनम् ' नाम अष्टमः सर्गः समाप्तः।]

नवमः सर्गः

९. क्षतगात्रं प्रतापं गिरिगुहायां प्रवेशयन्ति विश्रान्त्यर्थं कृष्णसिंहादयः ।

प्रतापराणा क्षतगात्रयुक्तः विस्मृत्य सर्वं मृतचेतकार्थम् ।
भृशं व्यथापूरितमानसेन विचेष्टते नव्यमनोविकारैः ॥ १

नाकोद्भवं भासुरचेतकाख्यं स्तौमीह रम्यं हयरूपदेवम् ।
नैकेषु संग्रामतलेषु मह्यं जयश्रियां दायिनमेव नित्यम् ॥ २

रे चेतक साधुकृतं त्वया न सूर्यस्य वंशोद्भवभूपतीनाम् ।
एवं समानीय रणात् सुदूरं कलङ्कितां कीर्तिरमामकार्षीः ॥ ३

जवेन यातोऽसि दिवं त्वदीयं महान्तमुच्चैःश्रवसं स्वमित्रम् ।
विहाय मित्रं भुवि बद्धसख्यं विचित्रचित्तोऽसि ममाश्वमित्र ॥ ४

यस्मात् प्रदेशात् भुवमागतोऽसि तमेव देशं पुनरेव यातः ।
यानद्वयं शाश्वतमत्रलोके मध्यं द्वयोः शाश्वतमेव नास्ति ॥ ५

तं चेतकानीतममुत्र दृष्ट्वा स भीमचन्द्रः सह कृष्णराज्ञा ।
समेत्य तस्थौ च तदा हयार्थे रुदन्तमालोक्य विषादचित्तः ॥ ६

अश्वार्थमेवं बहुतप्तचित्तं राणाप्रतापं सहशक्तभासुरम् ।
सुपुष्पितं किंशुकवृक्षतुल्यं विलोक्य चेरुः सहसा धरेन्द्राः ॥ ७

विषादचित्तः स च भूपतिस्तु प्राप्य शक्ताश्ववरं स बाढम् ।
योद्धुं प्रयातुं चकमे सरोषं किन्तु स्वयोधा ह्यनिवारयन् तम् ॥ ८

एवं निरुद्धं व्रणितं नरेन्द्रं विलोक्य सर्वे किमयं धरिज्याम् ।
एकत्रमूर्तीकृतशान्तचित्तः तितिक्षया भाति विपत्तिकाले ॥ ९

विपत्सु संपत्सु महानुभावाः समानरूपेण विभान्ति लोके ।
संदृश्यते नैव हि तेषु दैन्यं सर्वे गुणाः जन्मत एव भान्ति ॥ १०

प्रतापराणा सहसा स्ववन्धून् नयन्तु मां हल्दिघट्टालिदेशम् ।
योद्धुं प्रयास्यामि परान् स्वयं नु यावच्च शक्तिर्मम विद्यतेऽत्र ॥ ११

परैः सशक्तः प्रभवामि योद्धुं हयं समायत्तमिमं प्रकुर्वताम् ।
इति प्रकर्षं शतधाऽप्यभावत तत्याज तं नैव स कृष्णसिंहः ॥ १२

श्रुत्वा तदीयं वचनं स कृष्णः प्रभो भवान् गच्छतु मा प्रयोद्धुम् ।
निषूदयामो वयमेव शत्रून् विश्रान्तिसौख्यं भजतु प्रशान्तम् ॥ १३

यावच्च मे जीवलवो विभाति तनौ प्रियाः संगर एव धर्मः ।
प्रतिक्षणं राष्ट्रहिताय कर्म कुर्यां च मे मातृविमोचनाय ॥ १४

श्रुत्वा तदीयं दृढनिश्चयं ते प्रभो भवान् शक्ष्यति योद्धुमस्मिन्।
रणे तथापि क्षतगात्रदेही तथा न कुर्यादिति भावयामः॥ १५

कालस्तु सर्वो विकटो विभाति यत्नाश्च सर्वे विफला हि जाताः।
जनस्तु तथ्यं मनुते च कश्चित् स्रष्टा करोत्यन्यतमं धरातले॥ १६

सर्वे प्रयत्ना विफलास्तु जाताः तथा भवन्तो न हि भोः भणन्तु।
श्व एव गत्वा वयमत्र सर्वान् विनाशयेम प्रखरैः कृपाणैः॥ १७

अस्मत्प्रयत्नस्य न जात एव सहाययोगो नृप विश्वमूर्तेः।
अस्माद्धि सर्वं विफलं हि जातं व्यथाविला मा प्रभवन्तु देव॥ १८

यद्यस्मदीयैः नवयत्नभावैः तदीयदृष्टिः यदि युज्यतेऽत्र।
कार्यं भवत्येव न संशयोऽस्ति यदा कदा वा समयो भवेद्धि॥ १९

यदा च देवं विकटं प्रवर्तते जना न किञ्चित् करणेषु शक्ताः।
सुयोग्यकालावधिवीक्षणं हि योग्यं भवत्यत्र महामतीनाम्॥ २०

यः कोऽपि वीरः समयं विलोक्य करोति कार्यं समये सुयोग्यम्।
स एव चाप्नोति जयं श्रियश्च तमेव सम्पत् मनसा वृणोति॥ २१

न चास्ति किञ्चित् कथने ममात्र जानासि सर्वं मम राष्ट्रनेतः।
वक्तव्यमित्येवमहं ब्रवीमि यद्रोचते तत् कुरु राजराज॥ २२

विश्रान्तिसौख्यं ह्यनुभूय दर्यां पुनर्नवां शक्तिमपारमाप्त्वा।
विखण्डयारीन् खरखड्गघातैः विद्युल्लताचञ्चलचालनैः प्रभो॥ २३

अत्यन्तघोरे निहताश्च योधाः साहस्रिकाः षोडशसंख्यपूर्वकाः।
मेवाडराजस्य चमूचयेषु सप्ताहसंजातमहारणेऽस्मिन्॥ २४

तुर्काक्वरस्याहवनाशिताश्च लक्षत्रयेणाधिकवीरयोधाः।
ये चात्र सन्त्येव महारणेऽस्मिन् सर्वेऽपि खड्गक्षतगात्रिणश्च॥ २५

मन्दाक्षसंराजितपङ्कजास्यं कलाविहीनं लसतेऽद्य राजन् ।
यद्येकलिङ्गेन च दन्तमासीत् तेनैव संतुष्यतु भूतलेऽस्मिन् ॥ २६

कालस्तु योग्यो न हि विद्यते नः वयं न किञ्चित् करवाम दैवम् ।
ध्रुवं प्रभो साधनसंचयस्य चाभावमूलेन हि जातमेतत् ॥ २७

अपास्य बन्धून् समरे तु नैकान् अहं कथं मित्र वसेयमत्र ।
न चास्ति लेशः श्रम एव मेऽद्य यावच्च शक्तिः हननं विधेयम् ॥ २८

क्षणे क्षणे गच्छति जीवितं तु शत्रुक्षयं नैव भवत्यहोऽत्र ।
व्यर्थे क्षणे जीवति शत्रुरेव एवं भवेत् तर्हि कथं जयेम ॥ २९

प्रतिक्षणं मामकशक्तिरत्र संक्षीयते निष्फलमेव कृष्ण ।
अनुक्षणं शत्रुविदारणेन देशैक्यतां कर्तुमहं यतेऽत्र ॥ ३०

स्ववंशजस्याखिलकष्टजालं द्रष्टुं ह्यशक्तः सुतरां बभूव ।
तथेति सूर्योऽस्तमयं प्रयाति शनैः शनैः पश्चिमसागरे नु ॥ ३१

तं रक्तसिक्तं गजसंनिभं ते महाबलाढ्या युगपत् गृहीत्वा ।
शनैः शनैः पर्वतकंदरं नु धृत्वा विनिन्युः भुजदण्डबन्धैः ॥ ३२

कृष्णेन सार्धं स च भीमचन्द्रः राणां प्रगृह्यैव दरीं विवेश ।
तदीयसेवानिरताश्च भिल्लाः सिषेविरे मूलवनस्पतीभिः ॥ ३३

शक्तस्तु ते संहित एव भूप विराजते माऽस्तु तवात्र चिन्ता ।
जयस्तु तथ्यं भविताऽस्मदीयः शान्त्या सुखं तिष्ठतु तावदेव ॥ ३४

अन्तः समानीय तदीयभिल्लाः विरच्य पुष्पस्तवकैश्च शय्याम् ।
तं भूपतिं तत्र विनेतुकामाः राणां ग्रहीतुं कथयन्ति योधान् ॥ ३५

आदिष्टपूर्वाः सपदं भटास्तु तं भूपतिं सान्द्रशिलातले हि ।
निक्षिप्य याताः सहसा प्रयोद्धुं रणाङ्गणे शत्रुचयैस्तदानीम् ॥ ३६

तत्रत्यविस्तारशिलातले तु निक्षिप्य तं सर्वनृपा रणार्थम्।
गताः सशस्त्राः हयवाहनैश्च सदागतित्वेन च हल्दिघाटीम्॥ ३७

आपूर्य सारं मृदुपद्मपत्रे भिल्लस्तदानीं खलु चोषधीनाम्।
पातुं ददौ निम्बकपायतुल्यं शीघ्रोपशान्त्यै च तनुक्षतानाम्॥ ३८

राणाप्रतापं बहुहेतिसक्तं नानाविधैरौषधिपट्टिकाभिः।
विधाय शान्तं शमितव्रणाङ्गं विरेजिरे फुल्लमुखारविन्दाः॥ ३९

आनीय कश्चित् हरितानि तूर्णं पर्णानि रासायनिकानि सद्यः।
निष्पीड्य तेभ्यः च्युतविन्दुवर्गैः संचर्चयामास तदीयदेहम्॥ ४०

अन्यः समानीय च मूलकानि संमर्दनं चारु विधाय तत्र।
गन्धं गृहीत्वा स्वकरेण शान्तं व्रणेषु संलिम्पति मार्दवेन॥ ४१

मयूरपत्रैः कृतवीजनैश्च प्रकामभक्त्या खलु वीजयन् सः।
संसेवयन् भिल्लवरस्तदानीं राणां करोत्यत्र स शान्तचित्तम्॥ ४२

दुग्धं समानीय ददाति कश्चित् प्रातश्च संध्यासमये प्रकृष्टम्।
वल्मीकसंभूतमधुप्रपूर्णं पात्रं समानीय ददाति कश्चित्॥ ४३

फलानि चानीय मनोहराणि नानाविधान्याशु वनोद्भवानि।
ददाति कश्चित् शतवन्दनैश्च राणाप्रतापाय सभक्तिकं नु॥ ४४

आनीय गाङ्गं मधुवारि कश्चित् ददाति तस्मै तृषिताय सत्वरम्।
स्नानार्थमेवात्र दिने दिने च तदीयसेवानिरतो वनस्थः॥ ४५

राणा प्रसुप्तश्च शिलातले हि क्षताङ्कितैः वीरतनुप्रकाशैः।
अहर्निशं तत्र भटास्तु सेवां विधाय तं पूर्ववदेव चक्रुः॥ ४६

समेत्य कश्चित् चलितं च युद्धं विवर्णयन् गायति तालबद्धम्।
पुरः प्रतापस्य पहाडिरागैः मित्रेण सार्धं ननु भावपूर्णम्॥ ४७

सा वीरपत्नी खलु वीरमाता पाटेश्वरी पुत्रयुता तदानीम् ।
तस्थौ हयुपान्ते खलु तस्य राज्ञः सेवारता मूर्तिमतीव राज्ञी ॥ ४८

तस्यामरो नाम कुमारवीरः खड्गं गृहीत्वा चपलं प्रतस्थे ।
शत्रून् हनिष्यामि रणेऽधुनाऽहं हरेः शिशुर्न त्यजति प्रतापम् ॥ ४९

सुक्षत्रियोऽसीह कुमारवीर पुरः समायान्ति दिनानि तुभ्यम् ।
असाम्प्रतं साम्प्रतमत्र योद्धुं तदा प्रयुध्यस्व तथेति चोक्तवान् ॥५०

राणाप्रतापस्तु तदीयपुत्रं चाङ्के गृहीत्वा बहुधा चुचुम्ब ।
तत् प्रेक्षणीयं सकलाश्च भिल्लाः विलोक्य दृश्यं विचकासिरे भृशम् ॥५१

पाटेश्वरी साश्रुमुखारविन्दा बभाण राणां बहुधा प्रहृष्टा ।
अद्यैव दृष्टौ खलु पुत्रचुम्बनं विश्रान्तिकालश्च मया प्रभोऽत्र ॥ ५२

ग्रीष्मावसानं भवतीव भाभिः नभस्थले वारिदपङ्क्तिरेति ।
तदा तदा गर्जति वारिवाहः तपात्ययः संविशतीव भाति ॥ ५३

अत्रान्तरे हल्दिघटस्य योधाः समेत्य भेणुः नृपतिं सहर्षम् ।
प्रभो पराः संगरहेतिदीर्णाः स्थातुं न शक्ताः रणसीम्नि याताः ॥ ५४

ग्रीष्मान्तमासीदिति चादिदेश युद्धक्षतान् तान् खलु मानसिंहः ।
युद्धात् विरम्यैव गताश्च तुर्काः दिल्लीं तु विश्रान्तिसुखार्थमेव ॥ ५५

श्रुत्वा च वाक्यं खलु योधकानां राणा जगादाशु विराम एव ।
युद्धाद्बलानां भविता सुखाय भिल्लाः प्रयान्त्वाशु कुटुम्बतृप्त्यै ॥ ५६

एवमादिमृदुभाषणजालैः स्वीययोधचयमाशु दिदेश ।
सोऽपि किञ्चिदपि शान्तिविहीनः भव्यभारतरणं प्रति मेने ॥ ५८

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' क्षतगात्रं प्रतापं गिरिगुहायां प्रवेशयन्ति विश्रान्त्यर्थं कृष्णासिंहादयः ' नाम नवमः सर्गः समाप्तः]

दशमः सर्गः ।

१०. प्रावृज्जृम्भणम् ।

मौनेन संदर्शयतीह या वपुः सा मेदिनी निश्चलभावविभ्रमैः ।
काव्यत्वमापद्य रसश्रिया सदा निःशब्दगत्याऽत्र तनोति भावनाम् ॥ १

जीमूत मा गर्ज मदेन वर्षय रे मत्तो वृषस्त्वं तव गाढसेचनैः ।
गौरस्म्यहं तावकसंगमोत्सुकी मामुद्धरेत्यादिविभाववीक्षणैः ॥ २

आस्ते विवृत्यैव कवोष्णनिश्वसैः ग्रीष्मारुणस्यातपतापिता धरा ।
संदर्शयन्ती जघनं च विस्तृतं प्रावृड्धरेन्द्राय च वर्षणाय किम् ॥ ३

इत्येवमास्ते पटुकामिनी मही कामं वितप्ता बहुधूलिधूसरा ।
वैराग्यभावाविलदैन्यमानसा वर्षं विना माऽस्तु न कोऽपि मेऽधुना ॥

सर्वंसहा हल्दिघटालिसंगरैः म्लेच्छादितुर्कीयपदातिनिर्गतैः ।
रक्तैः परिप्लावितदेहभासुरा प्राप्नोति चासह्यशरीरवेदनाम् ॥ ५

भूत्वा प्रकामं ह्यपवित्रदर्शिनी स्नातुं च तूर्णं भजति स्म तोयदान् ।
तस्माद्धि सद्यो जलदागमस्थितः संप्रार्थना नैव भवन्ति निष्फलाः ॥६

पर्जन्यमालाभरितं नभस्थलं विद्युत्पताकालसितं नभोऽन्तरम् ।
आशीतलं वायुतरङ्गरञ्जितं चालोक्य भूमिः मुदिता विराजते ॥ ७

नैके विहङ्गाः लघुपक्षकीटकाः स्वैरप्रचारैः विलसन्ति खेतले ।
मेघानधोधो तृषिताश्च चातकाः तृष्णाकुला भान्ति समं सुहृद्वरैः ॥ ८

मत्ता मयूराः विपिनेषु सर्वतः केकारताः स्वीयकलापमण्डनैः।
सुस्वागतं ते नटनाभिरञ्जिताः धराधरेभ्यः कथयन्ति हार्दिकम्॥ ९

सर्वं जगत् स्वीयमनोगतं प्रियं नानाविधैः सुन्दरभङ्गिमाचयैः।
व्याहृत्य चाभाति सुखाभिलाषया सौख्यं हि मूलं खलु जीवने भुवि॥१०

ग्रीष्मे नितान्तं बहुतप्तजीवनाः जीवाश्च मेघोदयजातशीतलैः।
वायुप्रचारैः त्रिदिवीयसौख्यदैः मोमुद्यमाना विलसन्ति भूतले॥११

इन्द्रस्य चापात् निसृतैश्च सायकैः धाराप्रपातैः मुसलानुकारिभिः।
साम्यं प्रपद्याखिलदेशसीम्नि वर्षन्ति वेगेन बलाहकाः सुखम्॥ १२

आरावलीपर्वतमस्तकेषु ते वर्षीयमेघास्तु समेत्य सत्वरम्।
स्थित्वाऽनुकूलं जलपातवत् ननु प्रावृष्य धात्रीं सरसां प्रकुर्वते॥१३

निम्नस्थलेष्वापतितानि सर्वतः वारीणि रक्तेन परिप्लुतानि च।
दुर्गन्धपूर्णानि लसन्ति भूतले मांसैश्च सेनाङ्गगजाजिसंचयैः॥ १४

तद्वर्षितं सर्वजलं निपीय सा जाता प्रशान्ता नवगर्भधारिणी।
सद्यः प्रसूते नवशष्पसंपदो वन्ध्या भवेयं न कदापि वारिद॥ १५

संदर्शयन् स्वीयपवित्रसंपदं हृष्टं करोतीव वसुन्धरा प्रियम्।
सर्वत्र जाता पुलकाञ्चितेव सा मेघं तदीयोद्गतचारुकान्तिभिः॥१६

हृष्टाश्च भेकाः प्रचुरं प्लवन्ति ते कीटाशने मग्नमनाश्च पल्वले।
माण्डूक्यमन्त्रैः वरुणं पदे पदे संप्रार्थयन्तीव परस्परारवैः॥ १७

शष्पाङ्कुराः सर्वमहीतले भृशं रूढ्वा हरिद्राऽरुणपीतवर्णकाः।
श्यामायमानं प्रविधाय काननं भान्तीव मांगल्यगुणाञ्चितप्रभाः॥१८

सर्वत्र धात्री जलपूतमङ्गला चाभ्यञ्जनस्नानविधानभास्वरा।
नानाविधैः वर्णविचित्रिताम्बरैः चावेष्टिता शान्तमनाश्च तिष्ठति॥१९

दीर्घोच्छिलीन्ध्राः निभृतं हि भूतले
दृष्टाः प्रहृष्टा इव तत्र कानने ।
आसेक्तुमेवात्र धरां तु वारिदाः
संयान्ति चाशान्तवनानि सोत्सुकाः ॥ २०

एकत्र नीलोत्पलकान्तिसंनिभैः
अन्यत्र कालाञ्जनवल्गुतुल्यकैः ।
सर्वत्र कालान्तकशत्रुदीप्तिभिः
व्याप्तं भृशं शून्यमहो जलोदरैः ॥ २१

शष्पोत्करैः चित्रितरम्यवृक्षकैः
आरावलीयानि विभान्ति मञ्जुलम् ।
नानाविधैः कान्तिचयैश्च मण्डितैः
संजातहारीतमनोज्ञपल्लवैः ॥ २२

आभीक्ष्णमाशासु चलन्त एव ते
मेघास्तु कुर्वन्ति च गर्जनं भृशम् ।
आकर्ण्य तेषां ध्वनितं तु यौवतं
प्राप्नोति गाढं प्रियबाहुबन्धनम् ॥ २३

श्वेतः परागो बहुकीटकाञ्चितो
नैकैश्च पत्रावलिचूर्णराशिभिः ।
आप्त्वा च संमिश्रणमाशु वारिभिः
शैलेयपातैः पततीह मञ्जुलम् ॥ २४

सर्वे प्रपाताः नगमस्तकात् द्रुतं
निम्नं प्रयान्त्यत्र विवक्रचालनैः ।
ईशानशीर्षात् सततं प्रचारिणो
नागेन्द्रबाला इव वर्षनिम्नगाः ॥ २५

शुभ्रैश्च पाषाणततिप्रकाशिताः
पृथ्वीधराः प्रस्रवणैश्च मण्डिताः ।
नृत्यप्रवीणैः शिखियूथनर्तनैः
नेत्रोत्सवं संजनयन्ति सर्वथा ॥ २६

नानाविधैः रम्यगुणप्रभूषितः
प्राणप्रियः सर्वधरातलस्य च ।
प्रावृट्पयोदावृत एष सुन्दरो
नित्यं शुभान् सर्वगुणान् ददातु ॥ २७

तत् सात्पुडापर्वतमस्तकं भृशं
ग्रीष्मातपे तप्तमहस्करांशुभिः ।
कादम्बिनीजालविनिर्गतैः जलैः
शान्तं नवं भाति नवोद्गमाङ्कुरैः ॥ २८

गन्धायितं काननमेव निस्तुलं
तत् केतकीगन्धविलेपनेन च ।
आनन्दितं सर्वजनस्य मानसं
करोति योन्मत्तमनन्तभावैः ॥ २९

चम्पाप्रसूनानि बहूनि कानने
भूमातृचित्तोद्भवभावना इव ।
धुन्वन्ति चित्तानि पथि प्रवासिनां
संगीतसाहित्यकलाविलासिनाम् ॥ ३०

आरक्तरूपाणि च दाडिमीफला-
न्यास्वादयोग्यानि मधुप्रदानि च ।
वृक्षेषु भास्वन्ति मनोरथा इव
राणाप्रतापस्य रणे महाप्रभोः ॥ ३१

आभान्ति वर्षासु कुरण्टकारुणाः
ते कण्टकाङ्गाः विपिनेषु रञ्जिताः ।
रागान्तरङ्गाः प्रमदा इवोंहवे
कामस्य चित्तं बहुधा तुदन्ति ते ॥ ३२

भास्वन्ति कालारुणजाम्बवानि सु-
स्निग्धानि माधुर्यगुणान्वितानि च ।
आस्वादयोग्यानि मनोहराणि च
नीलानि चाम्लानि महीतलेऽधुना ॥ ३३

वर्षागमः चारु करोति भूतले
शुष्कं वनं पल्लवितं च पुष्पितम् ।
भावैर्विहीनं हृदयं सुशिक्षितं
सान्तत्यसंभोगरतं नपुंसकम् ॥ ३४

गायन्ति चैकत्र वनेषु षट्पदाः
नृत्यन्ति हृष्टाः शिखिनो मुहुर्मुहुः ।
अन्यत्र चैरावततुल्यदन्तिनः
भान्त्यत्र सर्वत्र वनानि मञ्जुलम् ॥ ३५

वर्षप्रवेगैः ध्वनिताश्च कन्दराः
नष्टस्वरूपाः प्रवहन्ति वारिगाः ।
कूटानि भान्त्यत्र महामहीभृतां
तारायुता रात्रिरतारकेव हि ॥ ३६

झंझामरुत्संयुतसान्द्रिताम्बरे
विद्युल्लतावद्धघनाश्च शब्दिताः ।
यच्छन्ति वारीणि विनैव चालनं
रात्रिंदिवं भूतलवासिनां कृते ॥ ३७

सारंगयूथाश्च लसन्ति कानने
वृक्षालिशाखानिचयेषु संततं ।
निःशब्दगत्या हि चराचरं तदा
प्राणांश्च धृत्वा लसतीह प्रावृषि ॥ ३८

भिल्लास्तु निस्त्रिंशशिलीमुखानि च
प्रक्षाल्य वर्षासु पदे पदे तदा ।
तूणीरपात्रेषु शिलीमुखानि ते
निक्षिप्य खड्गान् त्सरुभासितानिह ॥ ३९

आलक्ष्य वर्षागम एव संततं
राणाप्रतापस्य परिस्थितिं तदा ।
रोरूयमाणो भयदैश्च निःस्वनैः
वर्षाश्रु स स्रावयतीव भासते ॥ ४०

अस्वस्थरूपं कठिनस्थले स्थितं
राणाप्रतापं बहुहेतिचित्रितम् ।
आत्मीयरूपं स्वकुलोद्भवं रविः
चालोक्य नोदेति च दुर्दिनेष्विह ॥ ४१

एनानि सर्वाणि दिनानि साम्प्रतं
चाभान्ति मेघावृतदुर्दिनान्यहो ।
बाभाति सूर्यो निरतं विहायसि
नायाति लोकं प्रविलोकितुं कुतः ॥ ४२

धूलिः प्रशान्ता सहिमाश्च वायवः
ऊष्मा प्रशान्तश्च निदाघदीपितः ।
युद्धानि शान्तानि महीतले नृणां
यान्त्यत्र पान्थाः खलु चात्ममन्दिरम् ॥ ४३

मेघाश्च गर्जन्ति महोग्रनिःस्वनैः
मत्ता गजेन्द्रा इव संगरस्थिताः ।
संग्रामकाले बहुखड्गघातिताः
वीरा इवात्रस्थमहोग्रसंगरे ॥ ४४

मुक्तासमं पत्रपुटेषु संस्थितं
पानीयमाशाकलिता विहङ्गमाः ।
पीत्वा शनैः स्वच्छजलं वसन्ति ते
नीडेषु वृक्षाग्रकृतेषु डिम्भकैः ॥ ४५

चैतन्ययुक्तं खलु चेतनं भृशं
नैती ति नाचेतनमत्र चेतनम् ।
सर्वत्र सर्वः खलु कामवर्धितः
रन्तुं यथाकाममहो विपश्यति ॥ ४६

ध्वस्ते च शुष्के च समेति यौवनं
भूम्यां यदा वर्षति वारि वारिदः ।
सर्वं विभात्यत्र नवं नवं क्षणे
कालोऽयमेवास्ति नितान्तसुन्दरः ॥ ४७

वर्षासु सिक्ताः बहुकम्पितस्वरैः
सीत्कारशब्दैः निखिलं च काननम् ।
शाखामृगाः निःस्वनवायुमिश्रितैः
शब्दायितं शाश्वतमेव कुर्वते ॥ ४८

आनीय तोयं खलु सागरान्मुहुः
मत्तेभतुल्याः सततं च तोयदाः ।
शुण्डैः प्रकामं विकिरन्ति भूतले
स्वच्छां महीं कर्तुमिवात्मशक्तिभिः ॥ ४९

वर्षं सहर्षं घनमर्दलस्वनैः
झंझानिलानिर्गतचारुनिस्वनैः ।
नाट्यैः मयूखावलिकेकयान्वितैः
निर्माति विश्वं खलु नाट्यमन्दिरम् ॥ ५०

रागाननेकान् प्रविरच्य साम्प्रतं
मल्हारमेघादिमनोहरान् प्रियः ।
रागार्णवं नाम मनोहरां कृतिं
विश्वाय संयच्छति वर्षदैवतम् ॥ ५१

इन्द्रस्य चापस्तु तदा तदा क्षणे
संदृश्यते चित्रविचित्रमञ्जुलैः ।
वर्णैः प्रियं रञ्जितचारुवल्गुभिः
प्रतापराजस्य धनुर्यथा रणे ॥ ५२

पार्श्वस्थवृक्षान् पतितान् विधाय च
ताः कामिनीरूपमवाप्य निम्नगाः ।
वेगातुराः कङ्कणनिक्वणैः ध्रुवं
संयान्ति तल्लीनसुखाय सागरम् ॥ ५३

रक्तारुणाः केचन मेघपुञ्जकाः
तूलाकृतिं प्राप्य विहायसि क्षणे ।
शुक्लाम्बराच्छादनबद्धरूपकाः
प्राभान्ति राणातनुहेतिदर्शकाः ॥ ५४

शान्ताश्च वर्षाः सकला वसुन्धरा
प्रक्षालितादर्श इवाबभौ तदा ।
भिल्लाश्च सर्वे पुनरेव कानने
संचारमाप्तुं खलु निर्गता द्रुतम् ॥ ५५

राणाप्रतापः सुखदैश्च वारिदैः
सान्तत्यशुभ्रैः पवनैश्च सेवितः ।
विश्रान्तिसौख्येन सतीसुसेवया
भिल्लप्रदानैश्च महोषधिप्रियैः ॥ ५६

पूर्वस्थितिं प्राप्य नवीनशक्तिभिः
योद्धुं हि सन्नद्ध इवावभौ वने ।
तस्मिन् क्षणे शक्तसमं तुरङ्गमं
चारुह्य सर्वेक्षणभावनायुतः ॥ ५७

गत्वा च सर्वत्र विलोक्य काननं
धात्र्यां च हल्दयाः समराङ्गणं रुषा ।
मानस्तु संरक्षित एव संगरे
जातश्च दन्तावलचालनेन हि ॥ ५८

मां चेतकः स्वामिनमत्र रक्षितुं
दूरं निनायामलभक्तिसंयुतः ।
नोचेत् स मानो यमपाकमन्दिरे
गत्वाऽभविष्यत् यमदूतभोजनम् ॥ ५९

आभाष्य सर्वं प्रतिशक्तिसिंहं
प्रत्यङ्मुखोऽभूत् गमने प्रतापः ।
द्वौ राजपुत्रौ हयमास्थितौ तौ
संरेजतुश्चाच्युतरामतुल्यौ ॥ ६०

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे 'प्रावृड्ज्जृम्भणं' नाम दशमः सर्गः समाप्तः ॥]

एकादशः सर्गः ।

११. बालिकायाः हस्तात् मार्जारेण अपूपापहरणं अपि च राणाप्रतापेन षण्मासकालावधि विश्रान्त्यर्थम् अक्बराय पत्रप्रेषणम् ।

आभाति शारदरमा नवबृंहणरूपैः
नैसर्ग्यभावरचितामलरागवर्णैः ।
शब्दैश्च मञ्जुलसमासविलासलासैः
गीर्वाणयौवततनोरमलैः विलासैः ॥ १

शुक्लाम्बराकलितसुन्दरपद्मवक्त्रा
काशैश्च संतुलितमञ्जुलदेहवर्णा ।
प्राता च शारदरुचा बहुसंतुलाङ्गी
भावैश्च चारुहसिता सुरभारतीव ॥ २

पुष्पैः धरा कुमुदबान्धवरम्यरात्रिः
स्वच्छैर्जलैः मधुरपद्मचयैः सरांसि ।
नानाविधैः कुसुमगन्धचयैः वनानि
भान्त्यत्र जीवहितदिव्यफलैः प्रियाणि ॥ ३

नद्यः प्रियं बहुलवक्रगतिप्रकारैः
स्वच्छैः सुशीतलजलैश्च वहन्ति शान्तम् ।
लावण्ययुक्तरसभावविलासमत्ताः
ह्रीभिः प्रियाः प्रियगृहं गमनोन्मुखाश्च ॥ ४

राणाप्रतापनृपवर्यममुत्र काशैः
व्योमप्रभुं धवलनीरदमण्डलैश्च ।
सान्तत्यचालनरताः पवनाश्च सद्यः
संवीजयन्ति बहुधा वनशून्यमध्ये ॥ ५

नक्षत्रपङ्क्तिकृतभूषणमादधाना
ग्लौर्बिम्बरम्यमधुरास्यविकासमाना ।
काशैश्च संकलितचन्द्रिकया हसन्ती
रम्या च शारदनिशा वरवर्णिनीव ॥ ६

सर्वत्र भासितसरांसि मनोहराणि
माधुर्यपङ्कजविकासितवम्भराणि ।
कल्ये च मन्दपवनाङ्कुरसञ्जितानि
वाभान्ति पत्त्रिगणकूजनशब्दितानि ॥ ७

आशान्तशान्तधरणीतलमत्र वीक्ष्य
राणाप्रतापनृपतिः स्वबलेन सार्धम् ।
संभाषितुं सकलमित्रवनेचरैश्च
एकत्रितं सपदमेव चकार सर्वान् ॥ ८

सर्वेऽपि तस्य नयनाञ्चलवर्धमानाः
राणाप्रतापनृपवर्यसहानुगाश्च ।
संप्रेत्य भूपतिपदाब्जसमक्षमेव
पद्मासनेषु बहुपङ्क्तिषु चोपविष्टाः ॥ ९

एवं विचार्य जगदाधिपवीरमूर्तिः
मित्रैश्च वन्यजनभिल्लधराधिपैश्च ।
पश्यन्तु चात्र शरदागम एव जातः
योद्धुं च काल इति तुर्कमहीपतिस्तु ॥ १०

सैन्यानि सर्वनिचयानि दिगन्तराणि
संप्रेष्य योद्धुमरिवीरबलोद्धतानि।
अस्मभ्यमेव च गुहासु वनान्तरेषु
स्थातुं च कालमिह नैव ददाति तुर्कः ॥ ११

अल्पाल्पसैन्यनिवहं खलु चोरपद्भ्यः
संप्रेष्य चात्र सकलां च चमूमजस्रम्।
अस्मान् च शान्तिरहितान् प्रविधातुमेव
कापट्यपूर्णनिवहैः समरं विधत्ते ॥ १२

चारेक्षणैः सततमत्र वने तु भव्यं
अस्माभिरेव दृढशत्रुविनाशनं च।
कार्यं च देशहितकर्मवनेचरैश्च
गच्छेम कर्तुममलानि च दैनिकानि ॥ १३

ये ये मृताः समरमूर्ध्नि पवित्रराष्ट्र-
स्वातन्त्र्यमार्गपरिनिष्ठितभावयुक्ताः।
तेभ्यो वयं परमशान्तिपुनीतहृद्भिः
संतर्पयेम करुणाश्रुतिलाञ्जलींश्च ॥ १४

आत्मा प्रशान्तिमधिगच्छतु चेतकस्य
प्राणप्रियस्य मम शत्रुविनाशकस्य।
मित्रस्य भूतलमहाश्ववराधिपस्य
वेगानिलस्य भुवि शत्रुभयङ्करस्य ॥ १५

राणाप्रतापनृपतिः प्रियमित्रवर्गैः
वर्तिष्यमाणसमरं प्रति दीर्घचर्चाम्।
कर्तुं च शात्रववलस्य विशेषशङ्कित
त्यक्तांश्च भूतलमिदं स्वपरस्य पक्षात् ॥ १६

वीराश्च ये परमराष्ट्रियभक्तिभावैः
जन्ये मृताः नृपवराश्च मदीयभक्ताः।
आत्मा च शाश्वतपदे परमात्मरूपे
रारज्जतामिति भजेम विधेम तेषाम् ॥ १७

इत्येवमादिविषयान् बहुसंप्रभाष्य
भिल्लैश्च कृष्णमनभूपसुतैश्च सार्धम्।
युद्धाय योग्यमिति शस्त्रचयं विधातुं
यातः प्रतापविभुरेवकुटीरमाशु ॥ १८

मोघास्त्रशस्त्रनिचयं प्रविधाय सर्वे
चोल्लीढतीक्ष्णलसितं च नवीनरूपम्।
सर्वे च घोटकचयं रणसज्जितं तदा
कृत्वा च युद्धनिरतां विभरांबभूवुः ॥ १९

नावीन्यपूर्णबहुशक्तियुताश्च तुर्काः
नाकुण्ठितास्त्रछुरिकादिकृपाणबाणैः।
संसज्जिताः तुरगदन्तिचयैश्च युक्ताः
चारौत्सिषुः सर्वनृपालविशालदुर्गान् ॥ २०

राणाप्रभुं मदभराः खलु यावनीयाः
नावीन्यसैन्यनिवहैः वनमध्यसंस्थम्।
आहर्तुमेव सहसा चतुरान् दिगन्तान्
आचक्रमुः गहनपर्वतभागसीम्नि ॥ २१

तस्मिन् क्षणे विपिनगूढचरैः समस्तं
ज्ञात्वा प्रतापनृपतिः सहसा प्रतस्थे।
मित्रैश्च भिल्लनिवहैश्च परान् विरोद्धुं
वेगेन वैद्युतनिभं नवशक्तियुक्तः ॥ २२

जातं च युद्धमतुलं तुमुलं वनान्ते
राणाप्रतापनृपतिः प्रबलं विजृम्भन् ।
शत्रून् विदाहयति काननसंगरेऽस्मिन्
दावाग्निशुष्कवनकाष्ठवदेव शीघ्रम् ॥ २३

सर्वं च शत्रुनिचयं स्वकृपाणघातैः
कृत्वा विखण्डनमयं कटुवज्रपातैः ।
राशिं करोति खलु शत्रुशिरांसि नूनं
संग्रामतार्किकगणं गणयन्निवासौ ॥ २४

राणा विधाय गहने बहुसंपरायान्
सायं प्रयाति निलयं रुधिरप्रसिक्तः ।
सूर्यो यथा गगनसीम्नि विहारमादि
कृत्वाऽरुणो निलयमेति तथा दिनान्ते ॥ २५

एवं च राट् प्रतिदिनं तु निषूद्य शत्रून्
शान्तः स्वमित्रनिवहैश्च कुटीरमेति ।
अन्नं विना प्रतिदिनं गहनेऽत्र भूपाः
संयापयन्ति शिवरात्रिसमं दिनानि ॥ २६

सर्वत्र नव्यगहनं तु सुरम्यमेव
संदृश्यते नववधूरिव सुन्दरं नु ।
खाद्योपयोग्यफलसञ्चयमत्र नास्ति
भात्येव भूतलमिदं नवशष्पयुक्तम् ॥ २७

भिल्लस्तु सर्वधरणीपतिजीवनं तत्
प्रालोक्य दग्धमनसा स्वलवित्रहस्तः ।
आनेतुमेव गतवान् वनमध्यदेशं
मोल्नामशष्पनिचयं खलु पाककृत्यै ॥ २८

शष्पं विलूय बहुलं स्वलवित्रकेन
बद्ध्वा च भारमखिलं नवतालपत्रैः।
निक्षिप्य मूर्ध्नि सहसा स्खलयन् च पद्भ्यां
चागत्य भूपतिकुटीरतले ससर्ज ॥ २९

राज्ञी प्रतापनृपतेः सहसा च शष्पम्
प्रक्षाल्य नव्यविमलैः जलसेचनैश्च।
तद्घासमर्दनविजातसुपेषणात्त-
पिण्डैश्च खाद्यनिचयं प्रविधाय सर्वम् ॥ ३०

राज्ञः पुरः सुललिते नवपद्मपत्रे
संस्थाप्य चैकममराय ददौ मतल्ली।
एकं च शैशवदशापरिभूषितायै
पुत्र्यै प्रदाय निरता प्रययौ स्वकृत्ये ॥ ३१

तस्थौ विलग्ननृपतिः परमात्मरूपं
ध्यायन् प्रशान्तहृदये प्रभुमेकलिङ्गम्।
विस्मृत्य लोकमखिलं मनसाऽत्र शान्तं
दर्भासने च जलजासनबन्धधीरः ॥ ३२

ओतुः प्रशान्तगतिनाऽत्र समेत्य भोक्तुं
पुत्र्याश्च हस्तगतखाद्यमपूपखण्डम्।
दृष्ट्वा तदीयनिशितैश्च नखैर्विदीर्य
वक्षस्त्वपूपशकलं प्रययौ गृहीत्वा ॥ ३३

तारस्वरेण बहुपीडितपुत्रिका सा
चाक्रन्दते स्म रुधिरावृतदुर्बलाङ्गी।
आकर्ण्य दीर्घतररोदनमाशु माता
चागत्य तां मधुरचुम्बनमाचरन्ती ॥ ३४

मा क्रन्द मे नयनकौमुदि खाद्यमन्यत्
दास्यामि ते विरम चेति विचुम्ब्य बालाम्।
चीराञ्चलेन रुधिरावृतदुर्बलाङ्गीम्
आमृज्य तां बहुलचुम्बनमाचकार॥ ३५

ध्यानात् प्रतापनृपतिः बहुतृप्तिमाप्त्वा
प्रोत्थाय तां रुधिरलिप्ततनुप्रभाङ्गीम्।
पाटेश्वरीं च बहुशान्तमनस्विनीं सः
प्रालोक्य खेदमतुलं शतधा प्रपेदे॥ ३६

तत् वज्रपञ्जरनिभं हृदयं तदाऽभूत्
तद्दर्शनेन शिशुरोदनमन्थनेन।
विद्राविते तरलवारिसमुद्रतुल्यं
नानाविधं स्रवणपूर्वकभावतोयैः॥ ३७

किं साधितं वनचरेण मया धरित्र्यां
नैकाः समाः बहुलकष्टयुता व्यतीताः।
स्वप्नेऽपि सर्वसुखसौख्यनिदानभूतं
मे जीवितं न खलु यापयितुं च काङ्क्षे॥ ३८

दुर्गाश्च सैन्यनिचयाश्च महार्हकोशाः
जाताश्च शत्रुशयगाश्च रणेषु वीराः।
याताश्च नाकगृहवाससुखाय नैके
नाहं कदापि सविचारमनाऽभवं च॥ ३९

वीरोऽयमत्र बहुधा च सदाऽऽपदभ्र
भोक्तुं हि जात इति चिन्तयति स्वयं तु।
किन्त्वत्र शैशवदशास्थितपुत्रिकायाः
कष्टानि वीक्षितुमपीह न शक्तिरस्ति॥ ४०

सेवाजनस्य निरतं बहुलोपचारान्
भुक्त्वा च सौख्यमयसागरतारणार्हाः ।
हंसच्छदालिशयने च सुषुप्तियोग्याः
सर्वे स्वपन्ति कटुशैलशिलातलेषु ॥ ४१

एतेषु कोऽपि भविता न सुखस्य भोक्ता
सर्वेऽपि कष्टनिचयेषु निमग्नजीवाः ।
भाविप्रशासकयुवाऽमरसिंहपुत्रः
सिंहो भविष्यति न वोत विडालबालः ॥ ४२

ये नाम काञ्चनलताधृतदोलिकासु
योग्याश्च हेममयरौप्यकमञ्चकेषु ।
आनन्त्यभौतिकसुखैः स्वपितुं च योग्याः
निद्रान्ति धूलिभरितेषु तलेषु नित्यम् ॥ ४३

मे पूर्वपुण्यपरिपाकलतालिजात-
मंदारपुष्पसमगन्धिलचारुदेवी ।
पाटेश्वरी विनुतसौख्यचयं शश्वत्
नावाप्यं दुःखमिह भोक्तुमिवागताऽस्ति ॥ ४४

रात्रिंदिवं प्रखरघोररणाङ्गणेषु
चापूर्य कुक्षिमिह शष्पकृतैश्च खाद्यैः ।
शत्रून् निहत्य शतधा वनवासिनश्च
कालं कियन्तमिह यापयितुं वसेम ॥ ४५

कायं मदीयमपि वज्रसमानरूपं
कालं कियन्तमिति शक्ष्यति योद्धुमत्र ।
दारिद्र्यपीडितनराधमजातकोऽपि
क्रौटुम्बिकैः वसति नैजगृहे सुखेन ॥ ४६

राणाप्रतापनृपतेः न हि विद्यतेऽत्र
स्वीयं च वस्तुमिह शान्तिसुखैश्च सख्यम् ।
बोभुज्यमानसमयेऽपि वियोद्युमेव
गन्तव्यमस्ति गहने ननु जीवितं किम् ॥ ४७

अस्मिन् क्षणे विचलितं हृदयं व्यथार्त्तं
चिन्तापि चेतसि पदं कुरुते तुदन्ती ।
आपादमस्तकमहो दहतीव दुःखं
शक्त्या विहीन इव भामि विकम्पनेन ॥ ४८

विश्वासपात्रममरं प्रभुभक्तियुक्तं
मित्रं च चेतकहयो मरणं प्रपेदे ।
पञ्चत्वमाप समरे मम मित्रवर्गः
हन्ताऽभवं जगति चात्मविहीनरूपः ॥ ४९

आरोग्यमेव मम कानननवासिनश्च
नास्त्येव कश्चिदपि भाति न चान्यहेतुः ।
माऽस्त्वत्र युद्धमधुना व्रज शान्तिभावं
षण्मासकालकलिते समयावधौ हि ॥ ५०

इत्येवमादिबहुलैः विविधैश्च भावैः
आलोच्य किञ्चिदवनीपतिरत्र शान्तम् ।
तालद्रुमस्य ललिते सुमनोज्ञपत्रे
किञ्चिद् विलिख्य च ददौ हि वनेचराय ॥ ५१

रे मित्र पहि लिखितं च मदीयपत्रं
दिल्लीश्वराय लघु यच्छ चलस्व सद्यः ।
एवं प्रभाष्य बहुयत्नमतिश्च मग्नः
ध्याने तदा परमशान्तिविहीनभावः ॥ ५२

पाटेश्वरी चलितमाशु विलोक्य शान्तं
किञ्चित् विषण्णवदना बहुकालमत्र ।
तस्थौ च तस्य वदनस्थविषादभावं
प्रष्टुं च कारणमिदं नृपतेः समक्षम् ॥ ५३

राणाप्रतापनृपतिः ध्याने मग्नः विचारधारावृतश्च ।
मुखे शबलता विभाति पिहितुं तां प्रयत्नतोऽपि विफलोऽभूच्च ॥ ५४

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे 'बालिकायाः हस्तात् मार्जालेन अपूपापहरणं अपि च राणाप्रतापेन षण्मासकालावधि विश्रान्त्यर्थं पत्र-प्रेषणम्' नाम एकादशः सर्गः समाप्तः ।]

द्वादशः सर्गः

१२. पाटेश्वरी राणाप्रतापं कर्तव्यं ब्रूते ।

प्रशान्तभावेन विलोक्य सर्वं समेत्य राणां जपतत्परं सा ।
तत्रैव खाद्यं त्वविलोकिनं तं निर्विण्णभावा व्यथिता च तस्थौ ॥ १

अनंतरं स्वामिपदारविन्दे प्रणम्य दारान् मनुजाधिपस्य ।
मानाभिमाना नतमस्तका सा पाटेश्वरी स्वादुपदैः बभाण ॥ २

कदापि चिन्ताकुलितं पुराऽत्र मुखं न दृष्टं मम जीवनेऽस्मिन् ।
खाद्यान्नपात्रं निहितं च पीठे विस्मृत्य चिन्ताजडितोऽस्ति भूप ॥ ३

मनोहरैश्चित्रितनव्यरत्नैः समञ्चिते काञ्चनरौप्यरम्ये ।
सिंहासनाऽधिष्ठितभव्यकाले प्राशासने मञ्जुलहासरम्यम् ॥ ४

उपोषणे नृत्यति मन्दहासे मुखं सदा शैलगुहानिवासे ।
अद्यैव किं तादृशहासपूर्णं प्राप्नोति दैन्यं वदतु प्रभो मे ॥ ५

अपूपपत्रं न हि पश्यतीह बुभुक्षितोऽप्यस्ति भवान् व्यथार्तः ।
किं दुष्करं चापतितं च कर्म सर्वं विहायात्र भुनक्तु शान्तम् ॥ ६

विलोकयन् भूमितलं नितान्तं तदेकदृष्ट्या च विचारदृग्भिः ।
आभाति किं कारणमत्र राजन् मौनं सदा हानिकरं विभाति ॥ ७

भवान् प्रकृत्या प्रकृतेरतीतः किमर्थमेवं व्यथितोऽस्ति देव ।
आपत्सु धैर्येण समं न चास्ति लोके सदा भेषजमेव तच्च ॥ ८

सुखेषु दुःखेषु च युष्मदीयसमस्तकार्येष्वपि राजचन्द्र ।
अर्धाङ्गिनी भाम्यनिशं शृणोतु स्वातन्त्र्यमस्तीति ममात्र राष्ट्रे ॥ ९

तदा प्रतापः करुणान्वितश्च जगाद शान्तं ललितं सवाधम् ।
अर्धाङ्गिनि त्वं खलु जीवितं मे सर्वं हि तुभ्यं कथयेयमत्र ॥ १०

सुवर्णहंसच्छददोलिकासु महार्हसौधेषु सुखं शयानाः ।
सर्वे भवन्तः मम कारणत्वात् नैकानि कष्टानि भजन्ति नूनम् ॥ ११

अहं तु सर्वान् प्रविलोक्य नित्यं समस्तवाधापरिपीड्यमानान् ।
दुःखेन संतप्तमनाः प्रकामं क्लिश्नामि चिन्ताज्वलितश्च गाढम् ॥ १२

अपत्यजातं सततं गृहीत्वा वनात् वनं पर्वतमस्तकेषु ।
वीराधिवीरस्य रमा सकष्टं यात्यत्र मार्जाल इवेति खिन्नः ॥ १३

अनेककष्टान्यनुभूय सर्वे भवन्त एवात्र वसंति सार्धम् ।
कस्मादहं संगरमादधामि जानामि नाहं मम भाग्यराशिम् ॥ १४

समाश्च नैकाः चलिताः सुगात्रि वनौकसां संगरमज्जितानाम्।
नाहं कदा चाभवमेव तप्तः तप्तो यथात्राद्य भवामि खिन्नः॥ १५

उपोषितायाः खलु वालिकायाः शयात् गृहीत्वा खलु खाद्यखण्डम्।
ओतुः दधावाशु तदीयवक्षः तीक्ष्णैः नखाग्रैश्च विदीर्य देवि॥ १६

अखण्डिताक्रन्दनमालिकाभिः प्रकामवाधाकलितां च पुत्रीं।
आरक्तसिक्तां स्तनपां विलोक्य विद्रावितं मे हृदयं नृपात्मजे॥१७

विकम्पितोऽहं वदनं विलोक्य प्रचण्डदुःखाकुलरक्तवर्णम्।
नेत्राश्रुधारापरिपूरितं च प्रारक्तवक्षस्थलमत्र पुत्र्याः॥ १८

विचार्य सर्वं खलु चाक्वराय विलिख्य चाप्रेषयमाशु पत्रम्।
षण्मासकालावधि मह्यमत्र विश्रान्तिकालोऽयमपेक्ष्यतेति॥ १९

तदाप्रभृत्येव मदीयचित्तं व्यथाविलं दह्यति मां तु देवि।
वंशो मदीयश्च कलङ्कितः किं चेत्येव भीतिं बहुधा भजामि॥ २०

अकार्यमेवात्र मया कृतं किम् अनार्ययोग्यं बहुकश्मलं नु।
विस्मृत्य कीर्तिं मम पूर्वजानां वंशस्य सूर्यस्य च गौरवं हि॥ २१

निशम्य भावं सकलं सशान्तं विषादभावाविलपूर्णचित्ता।
सेत्थं बभाषे मृदुलैश्च शब्दैः पाटेश्वरी तं खलु बोधयन्ती॥ २२

अहं तु साध्वी तव पादलग्ना न चास्ति वक्तुं मम संनिधौ प्रियम्।
अल्पाल्पभावैः परिनिष्ठिताहं वाचालता मां मुखरीकरोति॥ २३

अहं तु कन्या नृपवंशजानां प्रतापराणा नृपवीरपत्नी।
माता सुतानां वरजन्मदात्री संग्रामरङ्गेषु च साधु योध्री॥ २४

मदीयवाक्यं तु निशम्य राजन् प्रशान्तबुद्ध्या च करोतु योग्यम्।
अर्धाङ्गिनी ते प्रवदामि किञ्चित् रुष्टश्च मा भूरिति कामयेऽहम्॥२५

वदामि हे नाथ भवान् कदापि करोत्यनालोच्य न किंचिदत्र ।
षण्मासकालावधि तुभ्यमत्र विश्रान्तिकालोऽयमपेक्ष्यतेति ॥ २६

अनेन काळेन च याचितेन पराश्च जीवन्ति बलैर्महद्भिः ।
एवं यदि स्यात् अपकार एव संजायते तेऽत्र न चोपकारः ॥ २७

कथं नु खड्गं भवदीयमत्र प्रशान्तिमाप्त्वा बहुकालमेव ।
शत्रून् पुनः शक्ष्यति संगरेषु हन्तुं तदेतत् वदतु प्रभो मे ॥ २८

धरातळे सन्ति न चैव धीराः भवन्त एवाखिलवीरवीराः ।
विश्रान्तिहीनाः भुवि कार्यलग्नाः रात्रिंदिवं कर्मणि तत्पराश्च ॥ २९

समर्प्य सर्वं निजराष्ट्रलक्ष्ये महानुभावाः सततं विलग्नाः ।
स्वातन्त्र्यदीक्षामवलम्ब्य वीराः नैवाद्रियन्ते खलु हीनकर्म ॥ ३०

पयोधराकारितपौरुषश्रीः सदोद्यमाक्रामितनीरदश्रीः ।
झञ्झानिळेनातुलितां महीप विश्रान्तिमेवं वृणुषे कथं त्वं ॥ ३१

अनेककष्टैः परिवेष्टितं वृहत् स्वराष्ट्रं ह्यविलोक्य भूप ।
कष्टेषु लोकं प्रविलोक्य नूनं विश्रान्तिसौख्यं कथमाप्स्यतीह ॥ ३२

न चास्ति रक्षा खलु मानिनीनां कुटुम्बसौख्यं करणोत्सुकोऽस्ति ।
स्वातन्त्र्ययुद्धं तु विरम्य वीर प्राप्नोति सौख्यं कथमेव राष्ट्रे ॥ ३३

भवादृशो दीक्षितराजपुत्रः स्वराज्यसंपादनसक्तचित्तः ।
राष्ट्रे न कुत्रापि विलोकितश्च च लोके कदाप्यश्रुतपूर्व एव ॥ ३४

भवादृशानां जननात्स्वराष्ट्रं मही च वंशश्च कुलं च सर्वे ।
पूताश्च दीप्ताश्च महानुभाव दिव्याश्च धन्योऽस्ति भवान् स्वराष्ट्रे ॥३५

चकास्ति वज्रं बहुघर्षणेन ददाति गन्धं खलु चन्दनोऽपि ।
कष्टेषु भान्त्येव महानुभावाः चिन्ता न कार्या मम जीवितेश ॥ ३६

न तेऽस्तु चिन्ता यदि सर्वसैन्यं प्रयाति तुर्कं तदपीह युद्धे ।
पार्श्वेश्वरी ते खलु पार्श्वभागे स्थित्वा कुमारैश्च कृपाणहस्ता ॥ ३७

समं प्रतापेन विधुध्य शत्रून् विनाश्य सर्वान् जयमाप्स्यतीह ।
सुक्षत्रियाणां कुलजा सुपत्नी राणाप्रतापस्य च वीरमाता ॥ ३८

स्मितं तु वक्त्रे भवतः प्रभोऽत्र विलोक्य तुष्टा भवितुं च काङ्क्षे ।
द्रष्टव्यमत्रास्ति तदेव देव वाञ्छापि नान्या भुवि कीर्तनीय ॥ ३९

अयोग्यविश्रान्तिमवाप्य नूनं अकर्मभावं भजते भवान् किं ।
कर्माणि राष्ट्राय हितानि कृत्वा स्वर्गीयकाम्यानि भुनक्तु देव ॥ ४०

भवादृशाः पूर्वमहानुभावाः स्वकीयकृत्यैः किल योग्यकाले ।
प्रारभ्य ते राष्ट्रहितानि नूनं जेगीयमाना नितरां भवन्ति ॥ ४१

अकीर्तिमूलानि विधाय भूप क्षणेऽत्र कृत्यानि कलङ्कितश्च ।
अस्वर्ग्यपूर्णं बहुहेयकर्म संधातुमार्यप्रभवो विभासि ॥ ४२

अनेकवर्षाणि विलूय निर्दयं परालिकण्ठान् भवदीयखड्गः ।
षण्मासकालावधि शान्तिमाप्त्वा चानन्तरं कुण्ठित एव भूयात् ॥४३

अशाश्वतं भौतिकमेव सर्वं सदाश्रितं शाश्वतमेव सर्वैः ।
देशीयभावैः भुवि पूर्वजैश्च तस्माच्च तानेव वृणीष्व भूप ॥ ४४

स्वगौरवाभावनराधमानां विभाति केषांचन योग्य एव ।
एतादृशं कर्म न शोभते च युष्मादृशानां भुवि राजराज ॥ ४५

समर्पणं गन्धिलमेव भाति स्वजीवितं राष्ट्रहिताय देव ।
आदर्शहीनात् पशुजीवनाच्च दुर्गन्धसंपूरितजीवनाच्च ॥ ४६

भवन्ति ये राष्ट्रहिताय सर्वं समर्प्य कुर्वन्ति त एव नित्याः ।
ते प्राप्नुवन्त्याशु दिवं महात्मन् कीर्तिं वृथा मा मलिनीं करोतु ॥४७

महात्मनां प्रज्वलितेषु पत्सु स्त्रियः सदा पार्श्वतलेषु दीपाः ।
सा भामती प्राप्य पतिप्रिया हि बाभाति विश्वे खलु भामतीति ॥४८

निशम्य तस्याः कथनं प्रतापः शनैः शनैः सुस्मितभावपूर्णः ।
वीरोचितं देवि विजल्पितं नु नित्यं भवाम्यत्र कृतज्ञ एव ॥ ४९

त्वमेव सत्यं मम नेत्रकान्तिः घनान्धकारेषु तडित्प्रकाशः ।
धन्योस्मि जातः खलु वीरपत्नीं संप्राप्य नूनं बहुधा कृतार्थः ॥ ५०

यदैव कोपस्तु तनोति देहे तदा च चित्तं विफलं प्रभाति ।
भावैरशान्तैः मम सौख्यमेव संकल्प्य राजन् ननु राजसे त्वम् ॥ ५१

शृणु प्रिये त्वां कथयामि तथ्यं सहायमाप्त्वा नितरां भवत्याः ।
स्वातन्त्र्यमार्गात् विचलामि नैव सर्वापदोऽहं त्वितरेयमत्र ॥ ५२

प्रतापगंभीरपदानि शान्तं निशम्य हृष्टा सपदं शुभांगी ।
पाटेश्वरी तं निजगाद खाद्यं पत्रस्थितं साधु सुखं भुनक्तु ॥ ५३

श्रुतश्च तत्रैव हि शङ्खनादः महानजस्रं जयसूचकश्च ।
अत्रान्तरे कृष्णनृपाः समेत्य युद्धस्य वार्तां जगदुः सहर्षम् ॥ ५४

चमूश्च मुग्लाधिनृपस्य नित्यं समेत्य राणानिचयं प्रहन्ति ।
नैके हताश्चोभयपक्षवीराः संजातयुद्धेषु पुनः पुनश्च ॥ ५५

प्रतिदिनमिह राणा सर्वतुर्कैः प्रयुध्यन्
मनुजपतिसमूहैः पर्वतश्रेणिमध्ये ।
खपतिरिव च मन्दं पश्चिमाशां विशन् सो
विलसति च कुटीरे रक्तदेहो दिनान्ते ॥ ५६

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे 'पाटेश्वरी राणाप्रतापं कर्तव्यं ब्रूते' नाम द्वादशः सर्गः समाप्तः।]

त्रयोदशः सर्गः ।

१३. दिल्ल्याम् अक्बरराजसभा ।

उष्णीषभूषितो भिल्लः दण्डधारी महोन्नतः ।
पादत्राणे च धृत्वा सः श्मश्रुणा शोभिताननः ॥ १

आच्छाद्य चोर्णवस्त्रं सः स्कन्धभागेषु सुन्दरम् ।
जानुपर्यन्तवस्त्रेण प्रययौ पत्रधारकः ॥ २

पाथेयं च गृहीत्वाऽसौ प्रतस्थे वायुवेगवत् ।
दिल्लीपत्तनदिग्भागं चिन्तयन् स्वगतं तदा ॥ ३

गच्छन् मनसि चैवं सः चिन्तयामास पीड़ितः ।
क्व स राणाप्रतापश्च कासौ तुर्कमहीपतिः ॥ ४

एतयोरन्तरं भाति वसुधानाकलोकयोः ।
समग्रभारतं वर्षं कर्तुं स्वायत्तमेव हि ॥ ५

चिन्तयन् निरतं भाति तुर्कदेशीयभूपतिः ।
प्रतापराणा देवस्तु स्वातन्त्र्यं भारतस्य च ॥ ६

भारतं भारतीयानां नान्येषामस्ति तत्त्वतः ।
कथमेवं स तुर्कस्तु यतते वञ्चनादिभिः ॥ ७

राणाप्रतापभूपस्तु तथ्यं स्वातन्त्र्यमाप्स्यति ।
देवांशभूतो राजासौ सूर्यवंशप्रदीपकः ॥ ८

इत्येवं चिन्तयन् भिल्लः शीघ्रगत्या विवेश च ।
दिल्लीसीमनि हृष्टः सन् पाथेयं चात्तुमेव हि ॥ ९

यमुनायास्तटे शान्तं वृक्षच्छायासु चाशनं ।
समाप्य पीत्वा नद्याश्च पानीयं स्वस्थमानसः ॥ १०

उद्गारांश्च विधायासौ विश्रान्तिं प्राप्य निश्चलाम् ।
प्रचलन् मन्दगत्याऽसौ दिल्लीं पश्यन् महाद्भुताम् ॥ ११

पदमार्गांश्च वीथींश्च तीर्त्वा पृच्छन् परान् भृशम् ।
राणाप्रतापदूतस्तु ययौ दिल्लीं शनैः शनैः ॥ १२

सिंहद्वारं प्रविष्टं तं रुरुधाते च पूरुषौ ।
द्वाःस्थौ शूलभृतौ तत्र भूपतेः पत्रधारिणम् ॥ १३

गत्यन्तरं विहीनोऽसौ कर्तव्यं किमतः परम् ।
इत्येवं चिन्तयन् भीत्या सर्वान् पश्यन् महाद्भुतम् ॥ १४

तत्रैव तस्थौ पार्श्वेऽथ सिंहद्वारस्य पार्श्वतः ।
पत्रहस्तस्तु भिल्लोऽसौ पश्यन् निर्विण्ण एव च ॥ १५

अत्रान्तरे फिरङ्गादिपटहानकभेरयः ।
आकाशं ध्वानयन्तश्च शब्दिताश्च दिगन्तरे ॥ १६

पदातयश्च वीथ्यायाः उभयोः पार्श्वयोस्तदा ।
चलन्ति स्म सुमध्ये तु घोटकाधिष्ठिता नृपाः ॥ १७

चित्रितं गजमारुह्य चाक्बरो याति राजसम् ।
विलोक्यागमनं तस्य द्वाःस्थौ नेमतुरानतौ ॥ १८

चक्रतुर्घोषणामुच्चैः चाक्बरो जीवतु प्रियः ।
नैकवर्षाणि देशेऽस्मिन् प्रजाशासनतत्परः ॥ १९

श्रुत्वा च घोषणां तत्र दृष्ट्वा तुर्कं महाक्वरम् ।
भिल्लः तस्य पुरो गत्वा तस्थौ नामितशीर्षकः ॥ २०

शनैश्च तं तदाऽयातं कस्त्वं कस्मात् समागतः ।
इति पप्रच्छ कुद्धोऽसौ तं भिल्लं तु विलोकयन् ॥ २१

राणाप्रतापपत्रं तु गृहीत्वात्र समागतः ।
मेवाडदेशभिल्लोऽहं प्रतापस्य च सेवकः ॥ २२

इत्युक्त्वा त्वरितं तस्य संनिधिं प्राप्य भिल्लकः ।
सानन्दं प्रददौ तस्मै पत्रं राणामहीपतेः ॥ २३

तत् गृहीत्वा पपाठाशु स्वान्ते तुष्यन् तदाक्वरः ।
क्षणं विचार्य सानन्दं चानन्दाश्रुविमोचकः ॥ २४

भिल्लेन सार्धं तुर्कोऽसौ ययौ चान्तःपुरं द्रुतम् ।
कुर्वन् मन्दस्मितं साधु परमानन्दनिर्भरः ॥ २५

अलङ्कर्तुं च दिल्लीं सः प्रादिदेश महामतिः ।
नैकदीपैश्च रङ्गैश्च नानापुष्पैश्च गन्धिलैः ॥ २६

राणासन्देशमानीय भिल्लः दिल्लीं समागतः ।
इति श्रुत्वा च पौरास्ते चालंचक्रुः पुरं तदा ॥ २७

चन्द्रध्वजास्तु नृत्यन्ति सर्वत्र च पुरे तदा ।
रम्भास्तम्भैश्च पत्रैश्च चूतपल्लवतोरणैः ॥ २८

कुराणं मसजीदेषु वेदाः देवालयेषु च ।
पठ्यन्ते प्रार्थनास्तत्र संततं पुरसंस्थितैः ॥ २९

राजाज्ञया च कुर्वन्ति चान्नदानं निरंतरम् ।
प्रजाभ्यो यानि रोचन्ते दीयन्ते तानि सर्वशः ॥ ३०

घोषणां सर्वदिल्यां तु क्रियते तुर्कवर्गकैः।
रथ्यासु पुरवीथ्यासु सर्वलोकानुरञ्जनीम् ॥ ३१

अद्य मध्याह्नकाले तु सार्वभौमाक्बरः प्रियः।
सभां करोति सानन्दं सभ्याः सर्वेऽत्र यान्तु च ॥ ३२

सामन्ताः सर्वसेनान्यः सभामायान्तु सत्वरम्।
शुभं भवति राष्ट्रस्य चेति वार्ता श्रुता जनैः ॥ ३३

सभाभवनपीठेषु सेनान्यः सर्वमन्त्रिणः।
सामन्ताश्च तथा न्याये समायाताः क्रमेण हि ॥ ३४

कवयः पण्डिताश्चैव गायकाः वर्तकाः तदा।
योग्यासनेषु चासीनाः भान्ति हृष्टाश्च सर्वथा ॥ ३५

दक्षिणे चोपविष्टाश्च तदा सिंहासनस्य च।
युवराजः सलीमश्च तथान्ये राजबान्धवाः ॥ ३६

अत्रान्तरे च वाद्यानि नदन्ते मञ्जुलस्वरैः।
गजोपरि समासीनः बादशा याति सुस्मितैः। ३७

तस्य पश्चाच्च सौवर्णे पल्यङ्के समुपस्थितः।
राणा भिल्लः समायाति तत् सभाभवनं शनैः ॥ ३८

आयान्तं बादशां दृष्ट्वा तस्थुः सभ्याः सभास्थिताः।
अवाकिरन् च पुष्पाणि तत्रस्थाः सुन्दराङ्गनाः ॥ ३९

सिंहासनस्य सामीप्यं बादशा संययौ यदा।
तदैव गौरवार्थाय फिरङ्गयः नादिताः भृशम् ॥ ४०

अक्बरेण समादिष्टः चोर्णवस्त्रेण संयुतः।
उपविष्टश्च भिलोऽसौ दण्डेन सहितः सुखम् ॥ ४१

अक्बरः सर्वसभ्यान् च दृष्ट्वा तोषेण मञ्जुलाम् ।
वार्तामेकां प्रवक्तुं भोः सभामेनां करोम्यहम् ॥ ४२

एतादृशीं सुवार्तां तु नैवाहं प्रोक्तवान् पुरा ।
भवद्भिः न श्रुतं चैव कर्णान् यच्छन्तु सत्वरम् ॥ ४३

एवमुक्त्वा च पार्श्वस्थं पृथ्वीराजं विलोक्य च ।
भिल्लेनानीतपत्रं तु पठन्त्वत्र महाशयाः ॥ ४४

इति तस्मै सुपत्रं तत् ददौ राजा सकौतुकम् ।
किन्तु कम्पितगात्रेण नापठत् पृथ्विभूपतिः ॥ ४५

भवन्तो न पठन्त्यत्र पत्रं किं कारणं प्रभो ।
किमर्थमेवं पश्यन्ति विचारावृतमानसाः ॥ ४६

पृथ्वीराजो जगादाशु भ्रमते मे शिरः प्रभो ।
प्रातः प्रभृति तस्माच्च वक्तुं लज्जां भजाम्यहम् ॥ ४७

प्रधानमन्त्रिणं पश्चात् रेहमानं मुदाब्दुलम् ।
पप्रच्छाक्बरभूपस्तु पठितुं पत्रमेव हि ॥ ४८

उत्थाय च जगादाशु स्वास्थ्यं मे साधु नास्ति भोः ।
इत्येवं प्रोक्तवानब्दुल् शक्तिहीनो यथा तथा ॥ ४९

एवं श्रुत्वाक्बरः शान्तं प्रारेभे पत्रवाचनम् ।
सभ्याः सर्वेऽपि शान्ताश्च कर्णान् दत्वा सकौतुकम् ॥ ५०

नैकयुद्धप्रभावेन ज्वरार्तोऽस्मीह भूपते ।
विश्रान्त्यभावमूलेन चानारोग्येण कानने ॥ ५१

इच्छा यदि भवेत् तूर्णं विरामो दीयतां नृप ।
षण्मासकालपर्यन्तं सप्तमे मासि पूर्ववत् ॥ ५२

युद्धायाहं तु संनद्धो भवेयमिति साम्प्रतम् ।
कथयामि यतस्त्वं तु बुद्धिमानिति भारते ॥ ५३

साध्वसाधूनि सर्वाणि जानासीति भवान् भुवि ।
कालावधिं तु पृच्छामि निर्णयं वार्तय स्वयम् ॥ ५४

एवं पठित्वा तुर्कस्तु विस्तरेण जगाद च ।
राणाप्रतापबाधां तु सर्वान् सभ्यान् पदे पदे ॥ ५५

व्याख्यारूपेण सर्वान् च तात्पर्यं संवदन् प्रियम् ।
तस्य पत्रस्य भावार्थौ रेजे संतोषनिर्भरः ॥ ५६

प्रतापस्य स्थितिः सत्यं बहुधा विषमायते ।
अनेन ज्ञायते सभ्याः सन्धिं कर्तुं समीहते ॥ ५७

अस्य हेतुर्महामानी मानसिंहमहीपतिः ।
तस्मादयं प्रशंसार्हः तद्वक्तुं प्रभवाम्यहम् ॥ ५८

श्रुत्वा चैवं सभायां तु चर्चा जाता समाकुला ।
संधिस्तु भविता नूनं निर्जितोऽयं भवेत् ध्रुवम् ॥ ५९

एकत्र चर्चा संजाता सन्धिः तथ्यं भविष्यति ।
प्रतापो भविता नूनं नैकाश्वपतिरेव हि ॥ ६०

अक्बरः सर्वसभ्यान् तु दृष्ट्वा संतोषनिर्भरः ।
अस्मत्स्नेहं प्रतापस्तु काङ्क्षतीव विभाति मे ॥ ६१

पृथ्वीराजं विलोक्यैव जगादाक्बरभूपतिः ।
किमर्थमेवं तस्थौ भोः शान्त्या चोपविशत्विह ॥ ६२

पृथ्वीराजः तदा श्रुत्वा जगादाक्बरभूपतिम् ।
विवच्मि किञ्चित् भूपेन्द्र यज्जानामि तदेव भोः ॥ ६३

लिखितं नैव तत्पत्रं प्रतापेन श्रुणोतु भोः।
दुष्टैश्च कैश्चित् तत्पत्रं लिखितं कीर्तिनाशकैः॥ ६४

यदुच्यते मया तथ्यं भवतीह न संशयः।
यथा च भक्तः स्वाभीष्टं दैवतं कुरुतेऽर्चनाम्॥ ६५

प्रतापोऽसौ करोत्यत्र तद्वत् स्वातन्त्र्यदैवतम्।
यावत् शरीरे प्राणास्तु सन्ति तावत् महाशय॥ ६६

पूर्वां संत्यज्य सूर्यस्तु पश्चिमायामुदेष्यति।
तावकीनः प्रतापस्तु न भवत्यत्र चिन्तय॥ ६७

दास्यं त्विह प्रतापस्य वस्त्रेण जलबन्धनम्।
प्रतीच्यां दिशि सूर्यस्य चोदयं नैव दृश्यते॥ ६८

भौतिकान् विषयान् त्यक्त्वा महात्मा निग्रही स्वयम्।
यदि सो दास एव स्यात् पतेतां चन्द्रभास्करौ॥ ६९

गच्छन्तु लोकाः पातालं त्वं दित्सुः स्तावकीं महीम्।
न काङ्क्षन्ते हि तत् स्प्रष्टुं प्रतापस्तादृशो भुवि॥ ७०

यदि जानाति दिल्लयां तु चर्चा जातेति भूपते।
महात्मनस्तस्य चित्तं सत्यं व्याकुलितं भवेत्॥ ७१

गौरवं विद्यमानं तु त्वयि भूप नशिष्यति।
अक्बरं मतिमन्दं तु मत्वा सो दूषयिष्यति॥ ७२

पृथ्वीराजस्य वाक्यं तु श्रुत्वा भूपतिरेव हि।
किञ्चित् शङ्कापरिव्याप्तः बभाण विपुलं पुनः॥ ७३

जानाम्यहं च माहात्म्यं प्रतापस्य महीतले।
तेषां कुटुम्बं जानामि तं वीरपुरुषैः युतम्॥ ७४

तस्मादेव हि तं दूतं प्रतापस्य सुवर्णके ।
पत्यङ्के तु समासीनं कृत्वाऽहं सार्धम् आऽनयम् ॥ ७५

पत्रेऽस्मिन् दृश्यते साधु हस्ताक्षरममुष्य च ।
सत्यासत्यं तु विज्ञातुं भिल्लं पृच्छन्तु साम्प्रतम् ॥ ७६

विलोक्यतेऽत्र साम्यं तु पत्रे हस्ताक्षरस्य च ।
नैजहस्ताक्षरस्यापि किन्तु तस्य न विद्यते ॥ ७७

प्रतापस्येति पत्रं तत् नाहं विश्वसिमीह भोः ।
तथ्यं ब्रवीमि शृण्वन्तु विना शङ्कां महीभुजाः ॥ ७८

यः कोऽपि वा धनं दत्त्वा सर्वमेतत्चकार च ।
धनेन साध्यते सर्वं भूलोके मानवैः नृप ॥ ७९

यद्यहं भवताऽऽज्ञप्तः तत्क्षणं सेवकं प्रियम् ।
विश्वस्तं प्रेषयेयं चेत् ज्ञायते सर्वमेव हि ॥ ८०

मानसिंहः तदोत्थाय सर्वानेवं जगाद च ।
द्वेष्मि प्रतापं लोकेऽस्मिन् जन्मतः सत्यमेव हि ॥ ८१

चन्द्रसूर्यौ च मार्गाभ्यां चलेतां नु कदापि च ।
प्रतापेण पथः तथ्यं स्वातन्त्र्यान्नैव चाल्यते ॥ ८२

नैकदेशविजेत्रा च मया सार्धं हि संगरः ।
दुष्करो भवति सर्वेषां इदानीं भारतावनौ ॥ ८३

मया सार्धं प्रतापस्तु योद्धुं प्रायततात्र च ।
नान्येषां शक्तिरेवास्ति पुरतो मे स्थातुमेव हि ॥ ८४

अयं राणा प्रशंसार्हः मया सार्धमयुध्यत ।
अधुनाऽसौ बहुश्रान्तः मद्घातैः बहुधा रणे ॥ ८५

मया सार्धं तु युद्धं च तस्य भातीह दुष्करम् ।
यथा कथं चित् युद्धं तु कृतवान् साम्प्रतं रणे ॥ ८६

इतः परं च शक्यं न तथ्यं संधिं करिष्यति ।
योधाः सर्वे हता युद्धे संपत्तिः शून्यतां गता ॥ ८७

क्षुधासंपीडितो भाति गर्वभङ्गोप्यजायत ।
कथं योत्स्यति संग्रामे चाशक्तो निर्धनो भुवि ॥ ८८

अयं योद्धुमशक्तोऽस्ति क्षुत्पिपासादिपीडितः ।
विद्यमानस्य गर्वस्य सत्यं पातो बभूव च ॥ ८९

स्वातन्त्र्यस्य पिपासा तु शशामात्र महावने ।
प्राणमाधुर्यभावेन विश्रान्तिं काङ्क्षते ध्रुवम् ॥ ९०

षण्मासकाले तथ्यं सः बादशा पादसंनिधिम् ।
समेत्य सन्धिं कर्तुं सः यतिताऽत्र तथ्यं न संशयः ॥ ९१

अस्मिन् कालावधौ राणा नूनं राज्ञः पदाम्बुजे ।
धृत्वा मां त्वं क्षमस्वेति प्रार्थयिष्यति सत्वरम् ॥ ९२

भाषणे मानसिंहस्य विश्वासो नैव जायते ।
भोक्ष्यत्यनन्तकष्टानि नैवाश्रयति मानवम् ॥ ९३

कोटिकोटिमहावीरान् पल्लवानीव तत्क्षणम् ।
नखेनैव च कृन्तन् सः रणे योद्धुं प्रशक्ष्यति ॥ ९४

अयं महात्मा सत्त्वेन तस्योपकरणैः किमु ।
सत्त्वेनैव हि सर्वं सः जेष्यतीह श्रुणु प्रियम् ॥ ९५

पृथ्वीराजस्य वाक्यं तु श्रोतव्यं मान विद्यते ।
आत्मबन्धुः प्रतापस्य सर्वथाऽयं विराजते ॥ ९६

प्रतापं प्रविजानाति यथावत् तथ्यमव्ययम् ।
न विद्यतेऽत्र कर्तव्यं सहसा मानभूपते ॥ ९७

पृथ्वीराज भवान् क्षिप्रं प्रेषयित्वा स्वसेवकम् ।
सर्वं ज्ञात्वा प्रतापस्य मह्यं ज्ञापय सत्वरम् ॥ ९८

तावत्पर्यन्तमेनं तु माऽऽगच्छन्त्विति सैन्यकान् ।
आज्ञापयस्व शीघ्रं त्वं मानसिंह महीपते ॥ ९९

रूपितरीत्या मानमहीशं फुल्लितशब्दैः शंसितभावः ।
मन्दिरमेवं दर्शितमार्गः भासुरगत्या याति महीपः ॥ १००

इति श्रीमत्प्रतापराणायनमहाकाव्ये हल्दिघाट्काण्डे 'दिल्ल्यां अकबरराज्यसभा' नाम त्रयोदशः सर्गः समाप्तः ।]

चतुर्दशः सर्गः

१४. भिल्लमुखात् राणाप्रतापस्थितिं विदित्वा जोषीमाता-पृथ्वीराजयोः परितापः ।

सर्वे प्रोत्थाय गताः अकबरस्य सभात्यागानन्तरम् ।
भिल्लेन सार्धं च सः पृथ्वीराजः स्वनिकेतनं ययौ ॥ १

पार्श्वस्थराजभवनं प्रतिगच्छन्तं पृथ्वी-भूमिपतिम् ।
अनुसरन् भिल्लः शनैः विवेश पृथ्वी-भूपागारं सः ॥ २

प्राङ्गणे तमुपावेश्य गत्वा चान्तः पत्नीं जोषीं सः।
राणाप्रतापभिल्लः समागतस्तमत्रानयं च देवि ॥ ३

सपदं परिचारिका कुम्भाण्डपात्रसमस्वर्णपात्रेण।
वस्त्रखण्डं गृहीत्वा वारीण्यापूर्य जगाम च भिल्लम् ॥ ४

तस्मै चानीय जलं प्रददौ पादप्रक्षालनार्थं च।
पानीयं समानीय पीठोपरि खाद्यं स्थापयामास ॥ ५

भिल्लः स्वपादरक्षौ बहिरेव कोणे हि परित्यज्य च।
हस्तस्थितदण्डमपि तु शरीरे विद्यमानोर्णवस्त्रं तु ॥ ६

उष्णीषं नीत्वा सः पीठान्तरे निक्षिप्य शनैः साधु।
सलिलेन हस्तपादं स्वमुखं प्रक्षाल्य स्वच्छं भिल्लः ॥ ७

उपर्णांशुकेन साधु हस्तपादौ मुखं प्रमार्ज्याशु सः।
तत्पानीयं पीत्वा दत्तखाद्यमपि चखाद सानन्दम् ॥ ८

अन्ततः समायातां जोषीमातरं विलोक्य चोत्थाय।
सभक्तिकं सः प्रणतीः विधायासने चोपविष्टः शान्तम् ॥ ९

सपदं पृथ्वीराजः तत्रागत्योपविष्टं श्रोतुं च।
भिल्लोक्तिं सश्रद्धं सपत्नीकः समुचितासने चाशु ॥ १०

सर्वमपि विदित्वा सा भर्तुर्मुखारविन्दात् साश्रुनयना।
प्रश्नान् वर्षयन्तीह कुशलादिकं प्रतापस्य पप्रच्छ ॥ ११

अथि भिल्ल कथय तथ्यं पत्रलेखनसमये तस्य भावम्।
स कथमवर्तत मुखे च द्योतमानं साङ्गोपाङ्गं साधु ॥ १२

किं तस्य वदने तदा विषादच्छायात्तभावाः दृष्टाः।
नोचेत् भावरहितं च जातमाननमुदात्तायुतं किं नु ॥ १३

पाटेश्वरीमाता तु तदा सन्निधे नास्ति वाऽस्ति वाऽरे ।
किमेषा जानाति नोचेदनन्तरं चोक्तवती किम् ॥ १४

कृष्णसिंहादयस्ते विजानन्ति किमेतद्विषयं न वा ।
किममरसिंहादयश्च सन्ति क्षेमेण सुखे सानन्दम् ॥ १५

अरे किं खादन्ति ते सर्वे कानने बालबालिकाश्च ।
राणा पाटेश्वरी च कथं ते संयापयन्ति कथय रे ॥ १६

इत्यादिप्रश्नैः सा तममज्जयत् विषयसागरे तत्र ।
अतिविषादेन भिल्लः प्रत्युत्तरं च दातुं प्रारेभे ॥ १७

सर्वे कुशलिस्तत्र ह्यः परश्वः सायं पर्यन्तं च ।
युध्यन् प्रतापप्रभुः शत्रून् हत्वा च गृहं समागतः ॥ १८

विना चाशनं रात्रौ तदा संजातपर्जन्यवृष्ट्यां तु ।
ते सर्वे तद्रात्रिं शिवरात्रिमिव संयापयामासुः ॥ १९

कल्ये भिल्लः कश्चन मोलूनाम ग्रासं समानीतवान् ।
देवी पाटेश्वरी तु करपोलिकां विधाय प्रददौ तत् ॥ २०

खादन्त्याः कुमार्याश्च वक्षःस्थलं नखैः विलिख्य च ।
हस्ते विद्यमानं गृहीत्वाऽपूपमोतुर्दधावेति ॥ २१

दृश्यं दुर्भरं वीक्ष्य विद्रावितान्तःकरणः सत्वरम् ।
प्रतापप्रभुरेवं हि लिलेख पत्रमिति जगाद सखेदम् ॥ २२

न खिन्नोऽस्म्यहं कदापि युद्धैर्निराहारैर्हेतिभिर्वा ।
किन्तु द्रावितं मनः बुभुक्षितेन शिशुराक्रन्दनेन ॥ २३

प्रभुः बहु रुरोद देवि तद्रोदनमसह्यवेदनं बभौ ।
चराचरं सर्वं खलु स्तब्धं विषादेन मूकीभूतम् ॥ २४

एतत् सर्वं श्रुत्वा जोषीमातापृथ्वीराजौ तौ ।
अश्रूणि विमुञ्चन्तौ विलपन्तावास्तां मौनमाश्रित्य ॥ २५

जोषीमाता श्रुत्वा सर्वं प्रोक्तं भिल्लेन सकरुणम् ।
गद्गदेन दुःखेन प्रोक्तुं प्रारेभे सावाधं सा ॥ २६

राणा महापुरुषः पाटेश्वरी महासाध्वी माता ।
देशस्वातन्त्र्यार्थं युद्ध्यन्ति महाकष्टान्यनुभवन्ति ॥ २७

लोके श्रिया पालिताः धनकनकवाहनादिवस्तुसहिताः ।
अहंभावसंयुताश्च स्त्रियः पतिमार्गं नानुसरन्तीह ॥ २८

काश्चन स्त्रियः विश्वे मध्यन्तरागतश्रिया विभूषिताः ।
अपारगर्वपूर्णाश्च द्रष्टुमशक्ताः सन्ति वर्तमानम् ॥ २९

सर्वदोर्ध्वदृष्टयः धनमदेनान्धाश्च भूत्वा विश्वम् ।
द्रष्टुमपारयन्तीह किं वक्तव्यं तानुद्दिश्य चात्र ॥ ३०

पुरा तु सीता साध्वी वने कष्टान्यन्वभवत् रामेण ।
अधुनाऽनुभवति देवी पाटेश्वरी कष्टानि प्रतापेन हि ॥ ३१

सा दमयन्ती साध्वी नलचक्रवर्तिना सार्धं वने तु ।
बहु कष्टान्यनुभूय च सुखं प्राप चान्ते भर्त्रा सार्धम् ॥ ३२

द्रौपदी भर्तृभिश्च बहुकष्टान्यनुभूय नैकसमाः ।
लब्ध्वा सुखं चान्ततः कालं यापयामास शान्तं सा ॥ ३३

जन्मतः पाटेश्वरी श्रियान्विता वीराङ्गना शान्ता च ।
भर्तृपादनिवासिनी वीरमाता जाताऽधुना तथापि ॥ ३४

भोगभाग्यान्विता सा हंसतूलिकातल्पे शयनीया ।
दुरदृष्टालिङ्गिता च कठिनप्रस्तरेषु स्वपिति पुत्रैः ॥ ३५

सा जीर्णवस्त्रावृता विना खाद्यं वनवासिनी भूत्वा ।
स्तनपान्विता कष्टैश्च विचरति भर्त्रा वनाद्वनं नित्यम् ॥ ३६

एतादृशपतिव्रताः राष्ट्रे नास्यां परिस्थित्यां सन्ति ।
एषाऽद्वितीयास्तीह विभाति सर्वस्त्रीलोकादर्शा ॥ ३७

एवं तयोः दुःखं च विलोकितुमशक्त इव चित्रभानुः ।
अस्तमियाय सत्वरं जोषी शान्तदुःखा बभूव तत्र ॥ ३८

गत्वा पृथ्वीराजः स्वागारे चोपविश्यैकान्ते तु ।
यत्किमपि लिखन्नास्ते भृशं च व्यथाकुलमानसः तदा ॥ ३९

अत्रान्तरे सेवकः समागत्य नत्वा जगाद शीघ्रम् ।
अक्बरचक्रवर्तिनः प्रधानमन्त्रिणः समागताः इति च ॥ ४०

तूर्णं पृथ्वीराजः समुत्थाय च तस्य पुरतो गत्वा ।
सुस्वागतं व्याहृत्य पीठोपर्युपावेश्य प्रोवाच ॥ ४१

द्वावपि मित्रेऽत्र भाषणैः साधु ।
कालमयापयेतां च समेत्य ॥ ४२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' भिल्लमुखात् राणाप्रताप-स्थितिं विदित्वा जोषीमातापृथ्वीराजयोः परितापः ' नाम चतुर्दशः सर्गः समाप्तः ।]

पञ्चदशः सर्गः ।

१५. पृथ्वीराजाब्दुलरेहमानयोः मन्त्रणा ।

रेहमानं समाविष्टं दृष्ट्वा पृथ्वीमहीपतिः ।
कथमास्तेऽधुनारोग्यं वद मित्र सविस्तरम् ॥ १

सभायां भवता चोक्तं नारोग्यं साधु वर्तते ।
तस्मादहं च पृच्छामि माऽन्यथा भावनां कुरू ॥ २

तदाप्रभृति चारोग्यं भवतां प्रष्टुमिच्छुकः ।
कथमास्तेऽधुना मित्र कथयस्व सविस्तरम् ॥ ३

तदोवाचाशु रेहमान् सम्यगास्ते महीपते ।
मदीयमिह चारोग्यं तत्रान्तर्यं वदाम्यहम् ॥ ४

यदाऽश्रौषमपश्यं तत् राणापत्रं महाप्रभो ।
चित्तं मदीयं भिन्नं च दुःखेन भरितं बभौ ॥ ५

महितात्मा प्रतापोऽसौ स्वयं न्यूनं विधाय च ।
आत्मानं भजते दासं सदाऽक्वरपदेऽनिशम् ॥ ६

इति चिन्तां विधायाहं पाताले प्राविशं तदा ।
तस्मादहं तु तत्पत्रं पठितुं नैच्छुकोऽभवम् ॥ ७

असत्यं न कदाप्युक्तं जीवने मम बान्धव ।
किन्तु प्रतापपत्रेण तथाऽसत्यं तदाऽब्रुवम् ॥ ८

असत्यभाषणं सह्यं जायते मम भूतले ।
किन्तु प्रतापदैन्यं तु नाहं सेहे नराधिप ॥ ९

श्रुत्वैव पृथ्विराजोऽत्र विहस्यैव वभाण च ।
तत् पत्रदर्शनेनैव पातालं प्राविशं तदा ॥ १०

स्वर्गपालनदक्षोऽयं महायोद्धा च भूतले ।
अचलोऽयं महामेरुः सूर्यवंशप्रदीपकः ॥ ११

तादृशोऽयं महाराजः पत्रलेखनतत्परः ।
अनया वाधया चित्तं नियतं दूयते मम ॥ १२

अशक्तश्चाभवं तत्र रेहमान् भणितुं स्वयम् ।
प्राप्नुवंश्चाश्मरूपत्वं तदा विस्मृत्य भौतिकम् ॥ १३

रेहमानब्दुलः श्रुत्वा विहस्य नृपतिं प्रति ।
त्वत्कृतिं वीक्ष्य सभ्याश्च त्वां प्रशंसुः तदा भृशम् ॥ १४

सत्यमेतदुतासत्यं भवान् ज्ञातुं महीपतेः ।
तत्रैव सपदं साधु चानुज्ञां प्राप्तवानसि ॥ १५

त्यक्त्वा च सर्वसौख्यानि ग्रासापूपांश्च भक्षयन् ।
स्वच्छानि सलिलान्यत्र पीत्वा चरति गौरिव ॥ १६

सर्वं त्यक्त्वा समागत्य कानने वसति प्रभुः ।
सान्तत्ययुद्धसंलग्नः सत्यदेवोऽयमस्ति मे ॥ १७

यस्यास्ति हृदयं लोके स च नित्यं प्रतापिनम् ।
त्रिवारं पूजयित्वैव भोजनं च करिष्यति ॥ १८

तस्मै च प्रेषितुं चैकां विज्ञप्तिं चानयं प्रभो ।
तां भवान् पश्यतु प्रेम्णा दोषहीनं करोतु च ॥ १९

पृथ्वीराजः स्वयं लेखां गृहीत्वा विस्मयैर्भृशम् ।
भवता लिखितं पत्रं दोषराहित्यमेव हि ॥ २०

विलोक्य सर्वपङ्क्तीश्च दृष्टिक्षेपेण सत्वरम् ।
विषादभावसंव्याप्तः तस्थौ शान्त्या विचारयन् ॥ २१

आमूलाग्रं पठित्वाऽसौ तत् पत्रं साधुसाध्विति ।
अत्यन्तसुन्दराः सन्ति लेखांशाश्चाब्दुलप्रिय ॥ २२

भक्तिरेतादृशी तस्मिन् विद्यते तव हे सखे ।
अनेनैव हि पत्रेण ज्ञायते सम्यगेव हि ॥ २३

हस्ताक्षराङ्कितं पत्रं यदि स्यात् सुन्दरं भवेत् ।
किरीटाञ्चितमूर्धेव कुरु हस्ताक्षरं सखे ॥ २४

श्रुत्वा तद्वचनं तस्य दुःखेनाब्दुल् जगाद च ।
लोकोत्तरमहाराजं नापश्यं तादृशं प्रभो ॥ २५

राजा तु नैव जानाति कोऽहमस्मीति जीवने ।
मतवैरुध्यमत्रास्ति शत्रुपक्षीयसेवकः ॥ २६

यदि हस्ताक्षरं दृष्ट्वा मदीयं क्रुद्धमानसः ।
भवेद्यदि वृथा तस्य चित्तसंक्षोभकारकः ॥ २७

भवेयं माऽस्तु राजेन्द्र करोतु स्वयमेव हि ।
हस्ताक्षरं तु पत्रेऽस्मिन् सुन्दरं प्रीतिकारकम् ॥ २८

अस्मिन् जन्मनि नास्त्येव स्पर्शनं दर्शनं प्रभोः ।
यावज्जीवामि तस्यैव नामोच्चारणमेव हि ॥ २९

कृत्वा मे जीवितं लोके सार्थकं प्रभवामि भोः ।
इत्युक्त्वा तं दिदेशासु स्वाक्षरैराङ्कितं मुदा ॥ ३०

पृथ्वीराजः तदा श्रुत्वा रेहमानस्य भाषणम् ।
विस्मितोऽस्मि महामन्त्रिन् कोऽहं ते गुणगायकः ॥ ३१

त्वदीयवीरपूजा च परधर्मसहिष्णुता ।
माधुर्यहृदयं चात्र पूज्या मे भान्ति सर्वदा ॥ ३२

यस्मिन् कस्मिन् कुले जातः यस्मिन् धर्मेऽपि संस्थितः ।
तत् कुलं सोऽपि धर्मश्च दीप्तिमन्तौ भविष्यतः ॥ ३३

उत्तमो भारतीयस्त्वं अधुना सत्यमेव हि ।
त्वदीयपत्रं राज्ञे च सदाऽङ्गीकारमेव हि ॥ ३४

पत्रमेतत् भवेन्नित्यं प्रतापस्य महीतले ।
कुन्दमालेव सत्यं नु भावनागन्धसंप्लुतम् ॥ ३५

धृत्वा तवाज्ञां मे मूर्ध्नि करोमि स्वाक्षरं सखे ।
धन्यौ स्वः भूतले चावां राणापत्रविलेखने ॥ ३६

हस्ताक्षराणि कृत्वा तौ दत्त्वा भिल्लाय पत्रकम् ।
खाद्यान्नवस्तुवर्गं च तदा प्राहिणुतां सुखम् ॥ ३७

एणवत् बहुवेगेन समेत्यासौ महाप्रभुम् ।
प्रणिपत्य जगादाशु वृत्तं तत् सर्वमेव हि ॥ ३८

युष्मदीयानुजस्यात्र सूकस्य च प्रियंकरः ।
जामाता पृथ्विराण्णाम विशिष्टगुणसञ्जितः ॥ ३९

रेहमानब्दुलो नाम तुर्कमन्त्रिः प्रियंवदः ।
द्वावप्येतौ विलिख्यैतत् ददतुः पत्रमेव हि ॥ ४०

इत्युक्त्वा प्रददौ तच्च प्रतापाय महीभुजे ।
राणा ददौ च तत्पत्रं पठितुं कृष्णमन्त्रिणे ॥ ४१

पत्रं नीत्वा भूपतेः कंजहस्तात् उद्घाट्यैतत् मन्दगत्या तु कृष्णः।
आमूलाग्रं वीक्ष्य दृग्भिः प्रशान्तं तेषामग्रे चापठत् दीर्घपत्रम् ॥ ४२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे 'पृथ्वीराजाब्दुलरेहमानयोः मन्त्रणा' नाम पञ्चदशः सर्गः समाप्तः ॥]

षोडशः सर्गः ।

१६. अब्दुलरेहमानपृथ्वीराजयोः पत्रं श्रीराणाप्रतापाय कृष्णसिंहः श्रावयति ।

अनितरदिव्यशुभाशिषो भवन्तु
प्रकृतिरियं तव वर्धतां प्रकामम्।
इति सितिकण्ठजपं च संविधाय
प्रतिदिनमेव दिनानि यापयावः ॥ १

त्वमसि विभो भुवि भीमरूपराजः
महितनरेन्द्रकृतापराधपुञ्जान्।
अनिशमहितान् तवार्चने प्रसक्तान्
बहुकरुणाकलितः स्वयं क्षमस्व ॥ २

कलियुगभीममहाप्रतापभूप
पटुकटुदास्यविमग्नभूपतीनाम्।
अमितविदग्धमनांसि चिन्तयन्ति
तव पदनीरजगन्धमज्जितानि ॥ ३

प्रथितयशाः प्रियमाशु रक्ष भोस्तम्
नृपतिजनान् च कृतापराधिनो नः ।
भुवि भवदीयसुखोन्नतिं विचिन्त्य
तव बलपक्षयुतान् सदा विजातान् ॥ ४

भरतधरातलराजमण्डलेषु
विनुतधराधिपमण्डलं तु कामम् ।
विलसति तुर्कमहीपतीन्द्रदास्ये
वयमपि तेषु विभो सदा भवामः ॥ ५

वयमिह सौख्यमधुप्रवाहमग्नाः
भवति च नैव शरीरतापवाधा ।
प्रवहति मानसमत्र वन्धुवर्गे
भरतधरातलसंस्कृतिप्रवाहे ॥ ६

परजनहस्तगतोऽस्ति दिव्यदेशः
कलुषितमेव महीपमण्डलं च ।
प्रतिदिनमेति समक्षमेव राष्ट्रं
परजनदास्यगतं शरीरमेवम् ॥ ७

तव चरितं बहुधा वरैः सुगीतम्
बहुविधदीक्षितभव्यभावदीप्तम् ।
सकलजनं नवभावपूर्णचित्तं
कलयति संततमार्यभावपूर्णम् ॥ ८

सुखमयवर्षशतानि भासुराणि
मधुमयतावकजीवने महात्मन् ।
सुपथि भवन्त्विति भक्तिभावभाजः
प्रतिदिनमेव शिवं भजेम भूप ॥ ९

विपिननगेषु वह्नि वत्सराणि
प्रबलपरैश्च वियुध्य यापितानि ।
अमितविपत्सु किमस्ति शीघ्रता ते
व्यवहर चाहवपत्सु युद्धवीर ॥ १०

निरत-रणेषु च जीवितं व्यतीत्य
तव खरखड्गविचालनैः निहत्य ।
परजनयोधभटावलिं प्रभो किं
सुखमिह चैष्यसि कानने प्रशान्तम् ॥ ११

विरतिमवाप्य पुनः स्वयं परैस्तैः
सपदि वियोत्स्यसि किं रणेषु तीव्रम् ।
किमिति मुधा तवकीर्तिमण्डलं तत्
मलिनमहो कुरुषे प्रतापराय ॥ १२

प्रकृतिशिवालयराजमानशूली
प्रतिदिनभारतराष्ट्रकीर्तिगाता ।
परजनदास्यविमग्नलोकशस्ता
त्वमसि महीवलयाधिराजराजः ॥ १३

अनितरभव्यगुणालिराजमानः
तरणिकुलान्वयदिव्यशक्तियुक्तः ।
स्वभरतराष्ट्रसमैक्यताप्रदाता
वयमिह तावककीर्तिराजमानाः ॥ १४

सुमनिचयेषु कृपीटयोनिपातः
पयसि भयङ्करकालकूटपातः ।
अमलिनलोचनधूलिरेणुपातः
इव भवतीह मनःसु पत्रपातः ॥ १५

भरतमहीतलदास्यथामिनीं तु
द्युमणिसमानमहाप्रतापवीरः ।
उदयमवाप्य विनाशयिष्यतीति
प्रतिदिनमेव विभो विचिन्तयामः ॥ १६

अतिघनतोयदमण्डलैश्च छन्नः
रविकिरणोग्रमहाप्रताप भूपः ।
इति नृपमानसमण्डलं च देव
तपति भृशं भवदीयचिन्तनायाम् ॥ १७

सकलमिदं भुवनं ममास्तु तथ्यं
इति मनसा न कदापि चिन्तितं भोः ।
तव धरणीतलमेव शासितुं त्वं
बहु यतसे भुवि लोकशंसितोऽसि ॥ १८

हिमगिरिबालसमा त्वदीयपत्नी
तव पदपङ्कजबंभरायमाना ।
अगणितकष्टसमाकुला स्वपुत्रैः
विचलति वन्यमहीधरान्तरेषु ॥ १९

शशधरखण्डसमानकान्तिपुत्रैः
गहननगाग्रतलेषु हिण्डमानः ।
उदरभरं न कदापि चान्नखादी
भवसि च दुःखमनाः प्रतापदेव ॥ २०

पविसमपत्रविलोकनेन सर्वे
वयमिह संचलिताऽभवाम राजन् ।
सुललितसर्वमनांसि तत्क्षणं भोः
करुणरसार्णवमाप्य भान्ति भावैः ॥ २१

त्यजतु न धैर्यमहःपतिः समान
विचलतु नैव पथश्च तावकीनात् ।
भवति च सर्वमिहैकलिङ्गशक्त्या
ह्यनुगुणमेव निरंतरं तवात्र ॥ २२

अघसमदास्यतमिस्रमज्जिताः भोः
वयमिह निर्गतमार्गदेशभक्ताः ।
स्फुरति च दिव्यममोघविद्युदाभं
अतिमहिमान्वितताव कीनरूपम् ॥ २३

तुरकपतिस्तु भवन्तमत्रलक्ष्म्या
स्वचरणसंनिधिमेव च ग्रहीतुम् ।
बहु यतते नितरां प्रतापराज
विचलितबुद्धिमनाः विचेष्टतेऽत्र ॥ २४

भरतधरित्रिविराजमानभूपैः
यवनकृताखिलपर्ववासरेषु ।
नृपतिसतीमणिमण्डलं तु तस्य
तुरकनरेन्द्रसुखाय देयमेव ॥ २५

बहुविपणीषु चित्तौडुदुर्गमेवं
तुरकजनाय च विक्रयार्थमस्मिन् ।
वितरसि किं बहुधा प्रतापराज
न कुरु तथा भज विक्रमस्वरूपम् ॥ २६

अयि भरतावनिरक्षणे निमग्न
पठ विशदं कथमस्य शासनं तु ।
प्रचलति शारदयामिनीषु हृत्तं
नवयुवतीमदिरात्तनाकसौख्ये ॥ २७

भरतमहीतलदास्यथामिनीं तु
द्युमणिसमानमहाप्रतापवीरः ।
उदयमवाप्य विनाशयिष्यतीति
प्रतिदिनमेव विभो विचिन्तयामः ॥ १६

अतिघनतोयदमण्डलैश्च छन्नः
रविकिरणोग्रमहाप्रताप भूपः ।
इति नृपमानसमण्डलं च देव
तपति भृशं भवदीयचिन्तनायाम् ॥ १७

सकलमिदं भुवनं ममास्तु तथ्यं
इति मनसा न कदापि चिन्तितं भोः ।
तव धरणीतलमेव शासितुं त्वं
बहु यतसे भुवि लोकशंसितोऽसि ॥ १८

हिमगिरिबालसमा त्वदीयपत्नी
तव पदपङ्कजबंभरायमाना ।
अगणितकष्टसमाकुला स्वपुत्रैः
विचलति वन्यमहीधरान्तरेषु ॥ १९

शशधरखण्डसमानकान्तिपुत्रैः
गहननगाग्रतलेषु हिण्डमानः ।
उदरभरं न कदापि चान्नखादी
भवसि च दुःखमनाः प्रतापदेव ॥ २०

पविसमपत्रविलोकनेन सर्वे
वयमिह संचलिताऽभवाम राजन् ।
सुललितसर्वमनांसि तत्क्षणं भोः
करुणरसार्णवमाप्य भान्ति भावैः ॥ २१

त्यजतु न धैर्यमहःपतिः समान
विचलतु नैव पथश्च तावकीनात् ।
भवति च सर्वमिहैकलिङ्गशक्त्या
ह्यनुगुणमेव निरंतरं तवात्र ॥ २२

अघसमदास्यतमिस्रमज्जिताः भोः
वयमिह निर्गतमार्गदेशभक्ताः ।
स्फुरति च दिव्यममोघविद्युदाभं
अतिमहिमान्वितताव कीनरूपम् ॥ २३

तुरकपतिस्तु भवन्तमत्रलक्ष्या
स्वचरणसंनिधिमेव च ग्रहीतुम् ।
बहु यतते नितरां प्रतापराज
विचलितबुद्धिमनाः विचेष्टतेऽत्र ॥ २४

भरतधरित्रिविराजमानभूपैः
यवनकृताखिलपर्ववासरेषु ।
नृपतिसतीमणिमण्डलं तु तस्य
तुरकनरेन्द्रसुखाय देयमेव ॥ २५

बहुविपणीषु चित्तौडुदुर्गमेवं
तुरकजनाय च विक्रयार्थमस्मिन् ।
वितरसि किं बहुधा प्रतापराज
न कुरु तथा भज विक्रमस्वरूपम् ॥ २६

अथि भरतावनिरक्षणे निमग्न
पठ विशदं कथमस्य शासनं तु ।
प्रचलति शारदयामिनीषु हंसं
नवयुवतीमदिरात्तनाकसौख्ये ॥ २७

अतुलमनोज्ञविचित्रविश्वरूपं
मनसि विचिन्त्य सदाऽर्चनां विधत्से ।
अयमिह मत्सरदूषितुर्कभावैः
भुवनमिदं स्ववशं च कर्तुमीहते ॥ २८

धनमिह भौतिकसौख्यदं धरण्यां
न हि भवतोऽस्ति महाप्रभो शृणुष्व ।
विलसति तावककीर्तिरूपलक्ष्मीः
जगति च सर्वदिशासु चित्ररूपा ॥ २९

तुरकमहीपतिरद्य शाश्वतं तु
न निवसतीह चिरं महाप्रताप ।
भरतमहीतलवासिनः सहर्षं
तव रथचालनतत्पराः भवेयुः ॥ ३०

कुलमतधर्मविभिन्नजातिवर्गान्
कलुषितजीवनयापने रतान् त्वम् ।
विगलितपापसमूहभासितान् किं
वद न करोषि सुरापगेव राजन् ॥ ३१

अधिकतमाल्पतमालिवस्तुजालं
पतति विलीनमिवात्र कालवेगे ।
भवति च नैव कदापि वीरकीर्तिः
विलयमुखे ननु भारतावनीन्द्र ॥ ३२

प्रकृतिमतल्लिमहोदरे प्रताप
कति विगतानि भवन्ति भान्ति कानि ।
परमविचित्रमनोहराणि तथ्यं
बहु विकसन्ति लसन्ति नूतनरूपैः ॥ ३३

शिखरिगुहासु निवासमेव चाप्त्वा
दृषदि विभासुररत्नसिंहपीठे ।
पटुतरहिंस्रमृगालिमित्रयूथैः
कटुतरजीवनमेव यापितोऽसि ॥ ३४

अपरिमिताढ्यसुवाहुशक्तिरेव
भरतधरां वहुधा सुरक्षितां च ।
अवनितले ननु नाम कासितं ते
भरतधरेन्द्र चिरं करिष्यतीह ॥ ३५

अनवरताहवसिन्धुमज्जितस्त्वं
प्रलयसमानपरालिपद्गसैन्यम् ।
अवसितमेव विधाय शाश्वतं
वटदलशायिसमं विभाससेऽद्य ॥ ३६

विनुतमहाशयसीरितेषु हृत्सु
प्रथितसुसंस्कृतिभक्तिभाववीजान् ।
वपति भवानिति चिन्त्यते प्रकृष्टान्
न तु हिमवारिमहाप्रतापभूप ॥ ३७

अगणितशक्तियुतः समा ह्यनेकाः
स्वधरणिभारतराष्ट्रमन्दिरेषु ।
विलसितदैशिकभक्तिदीपिकालिं
ज्वलितमिवात्र विधाय राजितोऽसि ॥ ३८

अचलितदीपशिखाः प्रदीपयन्
कथमधुना च विरम्य दुःखतप्तः ।
न हि विरमात्र महोन्नतात्पथः
तव पदमेव सुशाश्वतं हि जातम् ॥ ३९

जगति सदा खलु बुद्बुदेन साम्यं
विलसति जीवनमेव मान्यवृत्त ।
वयमिह शाश्वतिकं भवेम नैव
न कलुषितां च करोतु नैजकीर्तिम् ॥ ४०

अतुलिततावकधैर्यसंपदस्त्वं
त्यज न हि भूप निकृष्टकष्टकाले ।
त्यजसि तथा यदि राष्ट्रमत्र दास्ये
सपदि पतिष्यति चिन्तयावनीन्द्र ॥ ४१

त्वयि निवसन्ति दशावतारभावाः
भुवि खलु साम्बसदाशिवावतारः ।
त्वमसि सुकेन्द्रमिहास्मदीयशक्तेः
विलससि वीररसावतारमूर्तिः ॥ ४२

समयविहीनकुसेवका वयं भोः
जलजपदद्वयपूजने रताश्च ।
तव शुभदर्शनहीनपापिनश्च
वयमिह दास्यरताः प्रतापभक्ताः ॥ ४३

यदि चरणं कण्टकक्षतं भोः
तुदति च मानसमत्र भूपतीनाम् ।
अनितरशौर्यसमेतभूपतिस्त्वं
हृदयगतं खलु नः सदा वृणीष्व ॥ ४४

भुवि नुत मा विरमात्र वीरमार्गं
न विलयकाल इवाद्य भाति कालः ।
अशुभकरं भयदं विरामकालं
कथमिति कामयसे प्रजापतिस्त्वम् ॥ ४५

पटहनिनादसुघोषितैः द्रुतं त्वं
भरतमहीतलभक्तिभावनालिम् ।
अधिकतरं तव निश्चयैः प्रकर्षं
तव जनताहृदि शाधि भूप गाढम् ॥ ४६

बहुकुशलं तव भावनासुनौकां
पटुतरतावकदीक्षितैः स्वतन्त्रैः ।
अनितरसंततबौद्धिकैः प्रयोगैः
अवतु नरेन्द्र विपत्समुद्रमध्यात् ॥ ४७

भरतमही तु भवेच्च तावकीना
सुखमयनैतिकराज्यपालना भोः ।
तव पदनीरजभावबद्धपत्नी
विलसतु पर्वतराजकन्यकेव ॥ ४८

वयमिह तावकसेवकाः सदा स्मः
दिनपतिवंशकलङ्क एव माऽऽस्ताम् ।
धनविजयं नु सिसाधयिष्यसीह
भज तव पूर्वमनोबलं तु राजन् ॥ ४९

विलिखितपत्रममुं विलोक्य देव
व्रज न रुषा परिणद्धरुद्रमूर्तिः ।
इति तव पादजलेजसक्तभक्तौ
विनतिसहस्रमुखैः निवेदयावः ॥ ५०

मृदुमधुरं खलु कृष्णसिंहभूपः
प्रतिपदमत्र पपाठ भावयुक्तम् ।
सकलधरेन्द्रसुसम्मतं च भेजे
सुकविमहत्त्वकवित्वभावनेव ॥ ५१

सप्रश्रयं पठित्वा पत्रमारतिमिव गृहीत्वा च ।
सुषुप्त तत् प्रशान्तं प्रभुपादतले विनिचिक्षिपे ॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये हल्दिघाट्काण्डे ' अब्दुलरेहमानपृथ्वीराजयोः पत्रं श्रीराणाप्रतापाय कृष्णसिंहः श्रावयति ' नाम षोडशः सर्गः समाप्तः।]

सप्तदशः सर्गः ।

१७. पत्रश्रवणानन्तरं प्रतापः न काङ्क्षे विश्रान्तिमिति अब्दुलरेहमानपृथ्वीराजाभ्यां पत्रं प्रेषयति ।

कृष्णसिंहेन पठितं पत्रं श्रुत्वा महीभुजाः ।
सर्वेऽप्यानन्दमग्नाश्च विरेजुः फुल्लिताननाः ॥ १

प्रतापस्तु तदा शान्तं निजगाद सुहृद्वरान् ।
पत्रप्रेषणकालाच्च तप्तं मे हृदयं भृशम् ॥ २

अपराद्धं मया तथ्यं पूर्वजानां महीयसाम् ।
सूर्यवंशजभूपानां महामानाभिमानिनाम् ॥ ३

कलङ्कः सूर्यवंशस्य जातश्च मम कारणात् ।
इति चित्तं व्यथाभिन्नं बहुधा शकलायितम् ॥ ४

अधुना पत्रमेतद्धि मम बाधां व्यपोहयत् ।
मनसे सर्वशक्तिं च प्रददौ शाश्वतीं भृशम् ॥ ५

धातुपुष्टिं मनःशक्तिं परानन्दं च कौतुकम्।
रसायनं बलस्यापि जनयामास सर्वथा॥ ६

दिल्ल्यां भवन्ति तुर्कीयाः राणीयाः नैव सन्ति च।
सर्वाऽपि दिल्ली संजाता तुर्कधर्मेण संवृता॥ ७

परेषां पक्षने तथ्यं यवनानां सभासु च।
निष्पक्षपातिनः सन्ति गुणिनः धर्ममानसाः॥ ८

अधुनैव मया ज्ञातं मित्रपत्रेण साम्प्रतम्।
ज्ञानदीपः समुद्भूतः द्रुतमज्ञानजं तमः॥ ९

स्मरणीयाश्च ते सर्वे लिलिखुः पत्रमेव हि।
ये नाम गुणसंपन्नाः त्रिकालेषु मया ध्रुवम्॥ १०

सर्वदाऽऽहं कृतज्ञोऽस्मि यावज्जीवं स्मरामि च।
तान् सर्वान् संस्मरन् नित्यं पुरोगामी भवाम्यहम्॥ ११

सौख्यं वा यदि वा कष्टं मरणं वा जयोऽस्तु मे।
अहं त्यक्ष्यामि नैवात्र मदीयं चोद्यमं भुवि॥ १२

अहं तु बलवानस्मि नैकदन्तिबलान्वितः।
शरीरं सत्त्वसारेण परिपूर्णं विभासते॥ १३

राष्ट्रसंरक्षणार्थं तु कुटुम्बं सर्वमेव हि।
त्यक्ष्याम्यहं विना दुःखं प्रजासौख्याय केवलम्॥ १४

अशङ्कं यदि राष्ट्रार्थं स्वातन्त्र्याग्नौ प्रहूयते।
शरीरं तद्धि भात्येव शरीरं चान्यथा शवः॥ १५

कोऽपयोगोऽस्ति राष्ट्रेऽस्मिन् शरीरेणामुना नृपाः।
अस्थिरेण शरीरेण चास्थिपञ्जरभासिना॥ १६

प्रजोपकारभूत्यै च दधीचियोंगिपुङ्गवः ।
तत्याजासून् प्रशान्तं योगतप्तानलार्चिषु ॥ १७

रक्षणाय कपोतस्य शिबिराजः महाप्रभुः ।
शरीरं खण्डशः कृत्वा महात्यागी बभूव हि ॥ १८

राष्ट्रस्वातन्त्र्यसिद्ध्यै च सर्वं त्यागं विधाय च ।
अस्थिरेण शरीरेण कीर्तिं क्रेष्येऽधुना भुवि ॥ १९

इयं कीर्तिः सदा भूयात् लोकानां मार्गदर्शिका ।
राष्ट्रभक्तिं दृढां कर्तुं व्यत्ययेषु प्रिया भुवि ॥ २०

मदीयं क्षत्रियं धर्मं लोककल्याणकारकम् ।
स्थितप्रज्ञत्वमापद्य कुर्यां मे मित्रबान्धवाः ॥ २१

प्रतिज्ञां प्रकरोम्यत्र दिवारात्रं रणेषु च
विना विश्रान्तिमेवात्र यापयेयं स्वजीवितम् ॥ २२

भाषणं तु प्रतापस्य श्रुत्वा कृष्णस्तु निश्चलम् ।
जगाद पुष्पितां वाचं प्रहृष्टः प्रभुसंनिधौ ॥ २३

आश्चर्यं जायते भूप विश्वासो नैव जायते ।
यत् द्वेष्यपक्षभूपौ तौ प्रेषयामासतुः स्वयम् ॥ २४

पत्रमेतत् महाकाव्यं चौषधं शक्तिदायकम् ।
क्लीबभावप्रपन्नानां मनोवाक्कायकर्मभिः ॥ २५

द्वावप्येतौ परावेव बुद्धिमन्तौ गुणान्वितौ ।
किन्तु त्वां भक्तिभावेन पूजां च कुरुतः सदा ॥ २६

संत्यज्य चाक्वरं तुर्कं पूजयन्तौ महाबलौ ।
तस्थतुर्भक्तिभावेन मन्वानौ शासकं प्रभुम् ॥ २७

द्वावप्येतौ विभातश्च गुरुतुल्यौ ममात्र भोः ।
कर्पूरार्तिक्यदीपेन तुलितं पत्रमेव हि ॥ २८

कुर्यां पारायणं नित्यं पत्रस्यैव महाबल ।
प्रातः रामायणस्येव तथैवात्र सभक्तिकम् ॥ २९

समानो मम भक्त्या तु नास्ति कुत्रापि भूतले ।
इत्यहं चिन्तयाम्यत्र गर्वभङ्गोऽधुना कृतः ॥ ३०

महानुभावाः लोकेस्मिन् बहवः सन्ति सर्वदा ।
अज्ञात्वा तथ्यमेतद्धि जीवनं यापयाम्यहम् ॥ ३१

पत्रस्य पठनेनैव ज्ञातं लोकस्य जीवनम् ।
तयोर्भक्त्या समा नास्ति मम भक्तिः महाप्रभो ॥ ३२

द्वावप्येतौ महाबाहो तव सेवारतौ ध्रुवम् ।
परराज्ये स्थितौ तथ्यं मम वन्द्यौ धरातले ॥ ३३

इत्येवमुक्त्वा कृष्णस्तु विरराम च भाषणम् ।
सर्वे मौनं समाश्रित्य बभुः शान्ताश्च तत्क्षणम् ॥ ३४

भीमचन्द्रस्तु श्रुत्वा तत् शान्तं तत्क्षणमेव च ।
दृष्ट्वा मौने समाविष्टं सर्वं राजन्यकं तदा ॥ ३५

जगाद मधुरां स्वीयां निःस्वार्थोपेतभावनाम् ।
सान्तत्यसेवा तुभ्यं भोः करवाणि यथामति ॥ ३६

सर्वं मदीयं राज्यं च दत्त्वा मे मन्त्रिणे द्रुतम् ।
नैकयोधान् समासाद्य साहाय्यं ते करोमि भोः ॥ ३७

आदर्शरूपचारित्र्यगुणैः त्रैलोक्यपूजित ।
त्वत्सकाशे रणेष्वेव यापयेयं स्वजीवितम् ॥ ३८

स्वातन्त्र्यसमरे योधैः मरणं सममेव हि ।
मोक्षप्रदं च लोकेश विद्यते नान्यकामना ॥ ३९

परराज्ये स्थिता एवं त्वद्भक्तास्ते सहायकाः ।
विलिख्य पत्रमेनं हि जाताश्चासत्प्रबोधकाः ॥ ४०

न्यूनं न किञ्चिन्नूनं ते वर्तते नृपवन्दित ।
यावत् काये मदीये तु प्राणाः सन्ति महीभुज ॥ ४१

तावत्पर्यन्तमेवाहं शत्रून् जित्वा महारणे ।
उड्डयेयं च कीर्त्यास्ते पताकां रोदसीतले ॥ ४२

भीमचन्द्रस्य वाक्यानि श्रुत्वा सर्वे विराञ्जिताः ।
तथाऽस्त्विति जगादाशु कृष्णसिंह महीपतिः ॥ ४३

तथैव सर्वे स्वीयानि वाक्यानि जगदुर्मुदा ।
राणाप्रतापभूपस्तु शान्तं तस्थौ विचारयन् ॥ ४४

माहुर्जगाद तुष्टात्मा राणाभूपं प्रति स्वयम् ।
अयि स्वातन्त्र्यवीरेन्द्र शृणु मे हार्दिकं वचः ॥ ४५

वयं त्वदीया वन्याश्च न हि संस्कारभाजिनः ।
भवतां च सहायेन वयं जाताश्च नागराः ॥ ४६

साधुसाहाय्यमाप्त्वा च वयं जाता महीतले ।
योद्धाश्च भक्तिभावैश्च भारतार्चनतत्पराः ॥ ४७

सर्वे वयं भिल्लवर्गाः राष्ट्रस्वातन्त्र्यसिद्धये ।
महाराजेन सार्धं तु मिलित्वा शत्रुनाशने ॥ ४८

यथाशक्ति यतिष्यामः माऽस्तु चिन्ता महाप्रभो ।
राष्ट्रस्वातन्त्र्यलब्ध्यै च मरणं चोत्तमं भुवि ॥ ४९

निगद्यैवं स माधुस्तु ववन्दे भिल्लवर्गकैः ।
राणाप्रतापभूपस्तु प्रहृष्टात्मा जगाद च ॥ ५०

इतः परं महायुद्धं भविष्यति पदे पदे ।
विश्रान्तिर्नैव माऽस्त्वत्र गच्छेमात्र वयं द्रुतम् ॥ ५१

सूर्यसौधं तु गच्छेम प्रोत्तिष्ठन्तु महाभुजाः ।
अधुना पत्रमेकं तु प्रेषयेयं महीभुजे ॥ ५२

पृथ्वीराजाय सानन्दं रेहमानाय सादरम् ।
विश्रान्ति नैव काङ्क्षेऽहं युयुत्सुश्च महारणे ॥ ५३

इति पत्रं विलिख्यासौ ददौ भिल्लाय सत्वरम् ।
दातुं तत् पृथ्विराजाय रेहमानाब्दुल्लाय च ॥ ५४

भिल्लो गृहीत्वा तत् पत्रं ययौ दिल्लीं द्रुतं मुदा ।
पृथ्वीराजाय तत्पत्रं दत्वाऽऽयातः स्वभूपतिम् ॥ ५५

पृथ्वीराजो गृहीत्वैतत् राणापत्रं स्वयं मुदा ।
प्रसादमिव भूपस्य चन्द्रिकेव च नेत्रयोः ॥ ५६

विश्रान्ति नैव काङ्क्षेऽहं यावत् प्राणाश्चरान्ति मे ।
पृथ्वीराजेन्द्र देहेऽस्मिन् पत्रं मे पठ निश्चलम् ॥ ५७

राष्ट्रभक्त्या च धर्मेण जीवेयं भारतावनौ ।
अपकीर्तिपदं कर्म नैव कुर्यां च जीवने ॥ ५८

इत्येवमादिपद्यानि पठित्वा तुष्टमानसः ।
आनन्दाश्रुप्रवाहैश्च रेजे शीतांशुबिम्बवत् ॥ ५९

समाहूयाशु रेहानं ददौ पत्रं विलोकितुम् ।
पठित्वा रेहमान् तच्च परमानन्दशोभितः ॥ ६०

धन्यौ चावां महाराज जातावस्मिन् सुकर्मणि ।।
राणाप्रतापभूपस्तु ग्रहणान्मुक्तिमाप च ।। ६१

अधुना पत्रमेतत् त्वं प्रेषयस्व महीपते ।
अक्बराय च भूपाय पत्रवाहेन सत्वरम् ।। ६२

आहूय पृथ्वीराजोऽसौ धीमन्तं पत्रवाहकम् ।
गच्छाधुना च दिल्लीं त्वं यच्छाक्बराय च ।। ६३

इत्युक्त्वा प्रेषयामास तत्पत्रं चाक्बराय च ।
राणाप्रतापभक्तेन रेहमानेन संयुतः ।। ६४

दृष्ट्वा पत्रं पृथ्विराजेन दत्तं वाचं वाचं चाक्बरस्तुर्कभूपः ।
पत्रं बध्वा तत्र पीठे निधाय प्रक्षुब्धात्मा मौनभावेन तस्थौ ।। ६५

[इति श्रीमत्प्रतापराणायनमहाकाव्ये हल्दिघाट्काण्डे 'पत्रश्रवणान्तरं प्रतापः न काङ्क्षे विश्रान्तिमिति अब्दुल्रेहमान् पृथ्वीराजाभ्यां पत्रं प्रेषयति' नाम सप्तदशः सर्गः समाप्तः ।]

इति श्रीसकलभुवनतलबुधजनविनुतकविकुलपादारविन्दमकरन्दपानमत्तभ्रमराय-मानमानसेन श्री ओगेटि कौसल्यासाम्बमूर्तिदम्पत्योः गर्भशुक्तिमुक्ताफलाय-मानसूनुना गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना ललित-गीतालहरी-अक्षयगीतरामायणम्-यशोधरामहाकाव्यम्-परीक्षिन्नाटकचक्रम्-जानपदनृत्यगीतमञ्जरीकाव्यम्-सौन्दर्यमीमांसादि-काव्यसंचयरचयित्रा पण्डित ओगेटि परीक्षित् शर्मणा विरचिते श्रीमत्प्रतापराणायनमहाकाव्ये हल्दिघाट्काण्डं समाप्तम् ।।

विजय-काण्डम् ।

प्रथमः सर्गः ।

१. निर्वेदेन परिणद्धमूर्तिः राणा स्वीयभावम् अनुचरान् प्रति विशदयति ।

उदयपुरस्य समीपभूतले
प्रथितकलिङ्गशिवालयान्तिके ।
विशदशिलातलमण्डपे प्रियैः
अनुचरमण्डलसंवृतो नृपैः ॥ १

इह खलु पर्वतसानुकानने
बहुविधकष्टसमाकुला वयम् ।
अतिबलशक्तियुताः प्रभासिताः
प्रतिदिनमाहवशत्रुकृन्तने ॥ २

कतिपयपूर्णसमा विदारुणे
वनभुवि शान्तिविहीनजीवने ।
न किमपि साधितमस्ति भोर्विना
सततधरित्रिवनाद्रिचालनम् ॥ ३

दरहसिताननदिव्यसुन्दरी
बहुविधहेमचयालिचित्रिता ।
अगणितवैभवसाधुमण्डिता
नृपवररक्षितवैभवावृता ॥ ४

गगनविचुम्बितदुर्गचित्रिता
प्रचतुरशीतिसुपण्यवीथिका ।
अगणितराजकुमाररक्षिता
भवति परा न चितौडुसंनिभा ॥ ५

गगनविचुम्बिसुदुर्गशृङ्गकैः
चतुरवसुप्रयुतापणैः वरैः ।
विलसितमार्गविशालसुन्दरैः
बहुलसहस्रनृपालिमण्डितम् ॥ ६

प्रतिदिनमेति ममाक्षिसंनिधिं
व्यपगतवैभवचित्तडप्रिया ।
अदयकुतुर्ककरावलम्बिनी
विलपति भीतमनाः पदे पदे ॥ ७

कथयति राजमहीतलं कथं
परजनहस्तगतं विराजते ।
महितचितौडसुदुर्गवैभव-
स्त्ववसित एव विलोक्यते प्रभुः ॥ ८

महितविभूतिचयैर्विराजितं
धनकनकावलिराशिमण्डितम् ।
अगणितपत्तनमण्डलैर्युतं
विलसति चाक्बरधाटिचूर्णितम् ॥ ९

ऋतुगुणसंख्यसहस्रवंशजो
नृपतिगणः तुरकस्य हस्तगः ।
किमपि सहायमहोऽत्र नास्ति भोः
किमिति वयं गहनेऽत्र संस्थिताः ॥ १०

तरुणकुमारनृपालिमण्डलं
महितरणेषु परैर्विनाशितम् ।
अतुलितदुर्गकुलानि सर्वतः
परजनहस्तगतानि भान्त्यहो ॥ ११

अहितनृपालिकृतानि सर्वथा
विगलितदुर्गकुलानि मानसम् ।
प्रविकलयन्ति तुदन्ति सन्ततं
विपरिहसन्ति च मां विलोक्य भोः ॥ १२

न च किमपीह सुसाधितं मया
स्वजनविनाशनसंगरं विना ।
किमिति च मूर्खविभावनावृतः
विततवनेषु नगेषु संस्थितः ॥ १३

अतुलितवैभवराजिता प्रिया
असमतलेषु च विस्खलन्ति या ।
प्रियसुतसंयुतविह्वला सदा
विचलति पर्वतमस्तकेषु च ॥ १४

वनचरभिल्लकुमारमण्डलं
रविकुलजातनृपालिमण्डलम् ।
अहरह आहवलग्नभासितं
तदपि न चास्ति जयस्तु सन्ततम् ॥ १५

गुरुतरदुःखमिहास्मदीयकं
विलसति कलाघनान्धकारितम् ।
नृपहयसैनिकबन्धुमण्डलं
लघुतरमेति च संख्यया द्रुतम् ॥ १६

नृपजनभिल्लजनाश्च भान्ति ते
निरशनकष्टदिनानि कानने ।
नयनभरं खलु निद्रया विना
कृशतनुदीप्तकलेवराः परम् ॥ १७

प्रखरशिलातलसानुभूधरे
विदलितसैन्यचयस्तु जीवति ।
पिबति कबन्धममुत्र पल्वले
प्रसति च काननघाससञ्चयम् ॥ १८

अगणितदैशिकभाववेल्लिताः
निरतमहाहवयज्ञदीक्षिताः ।
अनितरसंहतिवैभवावृताः
परमिह दैविकदृष्टिवञ्चिताः ॥ १९

प्रबलसहस्रसमा रणाङ्गणे
यवनचमूचयधाटिघट्टिता ।
अगणितपूर्वजराजरक्षिता
विलसति मञ्जुलमार्वसुन्दरी ॥ २०

विदलितवैभवदुर्गभामिनी
विलपति यावनहस्तवागुरे ।
वितथोऽभूत् खलु यत्नसंचयः
बहुविधयुद्धकृतः परिश्रमः ॥ २१

अचलितराष्ट्रसमैक्यताशयैः
पवनानिबद्धमहार्हमन्दिरैः ।
विगलितदैहिकसर्वशक्तिभिः
वसतिममुत्र विकुर्महे वृथा ॥ २२

अमलिनरत्नचयालिसंवृता
विपणिसमञ्चितनैकपत्तना ।
अमरसमानधराधिपावृता
विलसति राजधरा ह्यनारतम् ॥ २३

बलयुतराजकुमारमण्डलं
परजनसंगरमर्दने गतम् ।
द्रवगतिमाप सुकोशसञ्चयः
शिथिलितसंधिचयाङ्गकं वपुः ॥ २४

धरणिसुखालिविहीनजीवनाः
तरणिकरालिवितापिताऽनिशम् ।
विततरजोगुणचक्रिताशुगे
श्रमणमुपेत्य वसाम नित्यशः ॥ २५

कथामिह जीवनतत्परा भृशं
भुवि निवसेयामितीव सा बभौ ।
जनममुमेत्य दरिद्रदेवता
खरतुरकाक्बरपालने भिया ॥ २६

अनिशितलोचनसंयुता जरा
विचलितधैर्यममुं जनं शनैः ।
स्पृशति च कर्कशहस्तचालनैः
विगलितदैहिकसन्धिमण्डितम् ॥ २७

वलयितकष्टनिबद्धजीवने
विजयसमञ्चितजीवनाः कथम् ।
वयमधुना प्रभवेम निश्चयं
कथयितुमत्र न कोऽपि चार्हति ॥ २८

खरतुरकाक्वरसंयुगाद्रिताः
वयमिह पर्वतसानुवासिनः ।
वनरुहघासफलादिनः परं
रसविधुपूर्णसमाः वनेचराः ॥ २९

अलघुपदालिविचञ्चला जरा
प्रभवति धैर्यविहीनजीवने ।
अनितरहेतिसमञ्चिताङ्गके
जगति च जीवनमेव संशयम् ॥ ३०

यदि खलु कोऽपि भगीरथः स्वयं
भुवि जलमानयितुं समुत्सहेत् ।
सुखकरमत्र न कोऽपि भाति भोः
जगदिदमेव बभूव कर्दमम् ॥ ३१

अपगतसौख्यनिवासभासिताः
लवमपि कीर्तिकणं भजेम न ।
किमिति वृथा खलु जीवितानि भोः
मृगजलसंनिधियापितानि च ॥ ३२

अनितरकष्टसमूहवागुरे
विलुलितकाककुलालिवत् भृशम् ।
प्रगतिविहीनपथीह साम्प्रतं
क्षतिविलपाम विमोचनाय भोः ॥ ३३

अमलिनकीर्तिसुदीप्तभारते
कटुतमराष्ट्रहितैकवर्तनम्।
न किमपि साधयतीति निश्चितं
वसनमपीह न योग्यमस्ति मे॥ ३४

भवति च पूर्वजयज्ञपावितं
परमपवित्रमिहात्र भारतम्।
अगणितगोवधरक्तमज्जितं
क्षणमपि लोकितुमत्र नोत्सहे॥ ३५

खरशरतल्पविलग्नभीष्मवत्
विलसति दृष्टिपथीह भारतम्।
कथमिति तस्य विमुक्तिचिन्तना
शतविधमार्गपरिस्मृताऽस्ति मे॥ ३६

यदि खलु यूयमपीह साम्प्रतं
मम कटुमार्गरता भवन्ति चेत्।
अनुसरताखिलशस्त्रजालकैः
अनुपदमेव हि पारसीभुवम्॥ ३७

वयमतिवेगसमात्तसंपदः
बहुविधशक्तियुताः स्वतन्त्रताम्।
द्रुतमधिगम्य वसेम निश्चयं
खरतुरकेन रणाङ्गणे स्थिताः॥ ३८

बहुविधपुष्पितमस्य भाषणं
श्रवणपुटेन निपीय चाब्रवीत।
तव पदपद्मरताश्च वम्भराः
न हि खलु यान्ति सुमान्तरं विभो॥ ३९

मधुगतिकृष्णनृपः सभक्तिकं
प्रियनृपतिं निजगाद मञ्जुलम् ।
कृतमिह दास्यनिवारणाय भोः
तव भुजशक्तिबलेन पुष्कलम् ॥ ४०

निरशनजीवनभासितप्रभो
न हि खलु कोऽपि चकार चाहवम् ।
प्रतिदिनमुष्करतुर्कखण्डनं
तव सममस्ति न कोऽपि भूतले ॥ ४१

त्रिगुणविधुप्रथिताब्दजीवनं
कृतमपि काननवासदुःखदम् ।
तव कटुजीवनतुल्यजीवनं
न हि खलु भुक्तमपीह पाण्डवैः ॥ ४२

श्रुतिविधुसुप्रथिताब्दजीवनं
वनचरवृत्तिमवाप्य यापितम् ।
दशरथरामधराधिपेन भोः
न भवति च साम्यमहो कदापि ते ॥ ४३

धरणिजशाखलताचयेषु ते
शिशुजनमत्र वने निबन्धनम् ।
रणभुवि शात्रवकण्ठलुण्ठनं
भवति सदा प्रथितं महाप्रभो ॥ ४४

अगणितसैन्यसमायुतोऽपि सः
खरतुरकाक्वरभूपतिः स्वयम्
न भवति सम्मुखमेतुमाहवे
जयमपि साधयितुं च शक्तिमान् ॥ ४५

अनुचरवर्गबलेन सर्वदा
रचयति तावकदास्यमन्त्रणाम् ।
अनुदिनमेति कृशाङ्गकः स्मरन्
तव गुणनामपराक्रमं विभोः ॥ ४६

विततमहीतलमानवालिषु
तव समममस्ति न योधनः कदा ।
विपदसमीरविताडितोऽपि भोः
निजकृतमार्गगर्तिं न लङ्घसे ॥ ४७

अनवरतं भुवि चाक्वरः प्रभुः
धनकनकावलिवाञ्छया स्थितः ।
सततमहो तव देशरक्षणं
परजनमस्तकक्रन्तनं प्रियम् ॥ ४८

ननु सकलैहिकभोगसम्पदा
बहु लसतेऽक्वरभूपतिः स्वयम् ।
तनुमनसौख्यविसर्जनेन भोः
सकलमनस्तु विराजसेऽनिशम् ॥ ४९

अनितरभक्तिधिया भजामहे
हृदि निरतं तव पादपङ्कजम् ।
सुविमलतावकभाषणानुगाः
तव पदपङ्क्तिषु राजभोगिनः ॥ ५०

अगणितकष्टसुखानि जीवने
तव चरणेषु च यापयाम भोः ।
वयमधुना निजसौख्यमार्गणे
कथमवयं विसृजेम भूपतिम् ॥ ५१

आलोच्य सर्वं गतमेव शान्तं
व्यथाविलः सो नृपतिः प्रगाढम् ।
दिदेश सर्वान् स्वपथि प्रवर्तितान्
दिनत्रये त्यक्तुमहो स्वराष्ट्रम् ॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे 'निर्वेदेन परिणद्धमूर्तिः राणा स्वीयभावम् अनुचरान् प्रति विशदयति' नाम प्रथमः सर्गः समाप्तः ।]

द्वितीयः सर्गः ।

२. भामासाहीराणाप्रतापयोः मेलनम् ।

दिनत्रये तत्र यथाऽनुसंज्ञितं
समस्तसामन्तजनाः स्ववाहनैः ।
कुटुम्बयुक्ताः प्रियवस्तुसञ्चयैः
तदा समक्षं नृपतेः समाययुः ॥ १

प्रियाश्च सर्वे करुणास्यराजिताः
विना च शब्दं नवचित्ररञ्जिताः ।
समेत्य सुश्रेणिषु मूकरूपकाः
बभुश्च राणाहृदि भावसन्निभाः ॥ २

समस्तसामन्तकुटुम्बमण्डलं
हयालिमारुह्य शनैः प्रचक्रमे ।
दिशश्च देशस्य विलोक्य भूपतिः
स्वमानसे चिन्तितवान् व्यथाविलः ॥ ३

इयं धरा सर्वमहीतले ध्रुवं
वसुन्धराभारतभव्यसीमसु ।
नितान्तपुष्पैः फलरम्यभूमिजैः
ऋतुप्रसिक्ता मधु भासते प्रिया ॥ ४

विसृज्य गच्छामि च मातृभूतलं
कदापि नैवं खलु चिन्तितं मया ।
इति प्रवाहस्रुतनेत्रयुग्मकात्
कवोष्णधाराश्रु विसर्जयन् परम् ॥ ५

विलोकयन् बाष्पसमञ्चितेक्षणैः
विधाय हस्तौ युगपच्च वन्धनम् ।
उवाच सावाधमनन्तचिन्तया
स्वमातरं मेवडराज्यभार्गवीम् ॥ ६

कृतप्रयत्नाः विफलाश्च भासिताः
सहायलेशं न करोति दैवतम् ।
अशक्नुवं कर्तुमहोऽत्र भूतले
त्वदीयपादाब्जसमर्चनां प्रियाम् ॥ ७

ततः स्वयं यामि कृतापराधकः
क्षमस्व कोपं कुरु नैव साम्प्रतम् ।
अनेककष्टेषु समाश्च यापिताः
मदीय सर्वा विफलाश्च भावनाः ॥ ८

नवं सरत्यत्र पवित्रभारते
दृढं घनं दास्यपरीततामसम् ।
अपास्तुमेतत् घनदास्यतामसं
रवेः प्रतापः खलु शक्त्यभावितः ॥ ९

विहाय सौख्यं खलु भौतिकं धिया
विनिश्चितं कर्तुमहो तवार्चनाम् ।
तथापि नाहं त्वभवं प्रपूजकः
क्षमस्व मातः तव पुत्रकं प्रियम् ॥ १०

त्वदीयदास्यं व्यपनेतुमिच्छुकः
कृतं मया साधु न चात्र साम्प्रतम् ।
रविप्रतापात् बहुशक्तिपूरिताः
प्रतापशौर्यैश्च भवन्ति संभृताः ॥ ११

मदीयहस्तौ बहुपापपङ्किलौ
ततो भृशं तावकपादसेवनम् ।
न मे प्रजातं मम जीवने प्रियम्
न चास्ति भाग्यं न तु राष्ट्रपाललम् ॥ १२

कुरङ्गवत् शैशवखेलनैः प्रियं
विखेलितं भूमितले स्ववन्धुभिः ।
धराधराऽऽरोहणमत्र यौवने
कृतं पुरा मित्रचयैः मुदाऽनिशम् ॥ १३

पुराभिषिक्तः प्रभवान्वितः स्वयं
प्रदेशमेनं बहुधा ह्यरक्षयम् ।
अनेकघाटीचयमत्र संगरे
विजित्य भाम्यत्र समस्तमङ्गलैः ॥ १४

त्रिशूलतीक्ष्णासिसमेतढालुना
स्वयं परानीकमनेकमण्डलम् ।
समेत्य नक्तं दिवमत्र संयुगे
परास्तमेवाकरवं मुहुर्मुहुः ॥ १५

विना च धौताम्बरधारणं मया
सुभोज्यपानीयसुखादिकं प्रिये ।
विशेविताः प्रान्तचराचरात्मनः
त्यजन्ति मां निर्दयरूपभाजिनः ॥ १६

अनेकमित्रावलिबन्धुदैशिकाः
पवित्रदेशेऽत्र दिवं गता रणे ।
अनन्तमा चन्द्रदिवाकरावधि
स्वकीर्तिगन्धं प्रवितेनुरेव हि ॥ १७

प्रयामि चाहं बहुदूरशोभितं
प्रदेशमन्यं विधिना प्रचोदितः ।
अहर्निशं भीतिपरीतमानसः
शनैः शनैः चोर इवात्र साम्प्रतम् ॥ १८

विजित्य यः कोऽपि परालिमायुधैः
स्वतन्त्रयुद्धे विजयेन शोभिताम् ।
विधाय तूर्णं भवतीं समुद्धरेत्
तदेष भव्यं मम जीवने शुभे ॥ १९

पलायमाने मयि माऽस्तु भावना
कथाप्रसङ्गेष्वपि मा स्मरात्र माम् ।
संरक्षितुं त्वामहमस्मि दुर्बलो
क्षमस्व देवि प्रणमामि शाश्वतम् ॥ २०

इति प्रियं तत्र धरातलावृतं
धरापरागं विलपन् शनैः शनैः ।
प्रचित्य वस्त्राञ्चलबन्धनेन तं
विधाय नेत्रारतिमाशु निर्गतः ॥ २१

तथैव सर्वेऽपि तदीयबान्धवाः
विरच्य वस्त्राञ्चलबन्धनैः ध्रुवम् ।
धरापरागं विनयान्विताः प्रियाः
प्रणम्य धात्रीं व्यथया विचक्रमुः ॥ २२

विहाय गन्तव्यमहो स्वमातरं
प्रियां च जन्मानि सुदायिनीं शुभाम् ।
इतीव दुःखाकुलमानसेन्द्रियाः
शनैश्च वायव्यदिशं प्रतस्थिरे ॥ २३

ययुश्च ते दीप्तविमौनमुद्रिताः
वितीर्य तत्रस्थधराधरं शनैः ।
सुरम्यनैसर्गिकरामणीयकं
विलोकयन्तः सहसा महीभुजाः ॥ २४

करालमारावलिसात्पुडावृतम्
वनं महाभीलचतुष्पदावृतम् ।
अनेकवृक्षावलिगुल्मचित्रितं
धराधरश्रेणिपरीतसुन्दरम् ॥ २५

प्रशान्तवातावरणे महावने
न कोऽपि जीवः कुरुते च चालनम् ।
कदापि शब्दश्च न जायते शनैः
बभूव सर्वं खलु शान्तमञ्जितम् ॥ २६

अथाश्वमारुह्य विवेश पूरुषो
दृढः शरीरेण सुतीक्ष्णलोचनः ।
विलोलभावावलिचित्रिताननो
विशोधयन् भूधरकन्दरान् मुदा ॥ २७

प्रियं शिरोवेष्टनरम्यमण्डनैः
विशालफाले वलितैः मनोहरैः ।
विराजमानः फलितैः शिरोरुहैः
भ्रुवा भृशं गुप्तसुतीक्ष्णवीक्षणैः ॥ २८

विराजितः श्मश्रुविचित्रिताननः
सुदीर्घघोणोदितदिव्यभावनः ।
व्रजन्तमेनं वरघोटकाश्रितं
प्रतापराणां तु जुहाव दूरतः ॥ २९

विचारमग्नः पृथिवीपतिस्स्वयं
प्लुतं तदीयं वनवृद्धघोषितम् ।
तृणाय मत्वा स्वचमूचयैः शनैः
व्यथावृतः प्रस्थितवानधोमुखः ॥ ३०

अनुव्रजन् तं नृपतिं व्यथावृतं
द्रुतं नु पप्रच्छ पुनः पदे पदे ।
प्रतापराणाऽत्र कथं विवर्धते
वदस्व कुत्रास्ति वने गुहासु च ॥ ३१

पुरः प्रतापस्य तुरङ्गमस्य च
गतः सुतीक्ष्णं निजगाद तद्वचः ।
प्रतापभूपः कथमस्ति कानने
भण प्रियं कर्णरसायनं विभो ॥ ३२

अहं विदेशात् बहुदूरपत्तनात्
समागतोऽस्मीह विलोकितुं नृपम् ।
अशीतिवर्षीयजराभरानतः
प्रतापराणां मम लोचनप्रियम् ॥ ३३

तदीयवाक्यं करुणापरिप्लुतं
निशम्य तच्चित्रवदत्र निश्चलम् ।
प्रतापराणा मृदुवाक्यसंचयैः
उवाद् पान्थं प्रविलोकयन् परम् ॥ ३४

त्वमत्र कोऽसीति कुतः समागतः
वदस्व ते नाम किमस्ति भूपते ।
अनेन राज्ञा तव किं प्रयोजनं
प्रब्रूहि सान्तं बहुदूरयात्रिक ॥ ३५

उवाच पान्थः प्रियमञ्जुलस्वनैः
मदीयमाता खलु भारताम्बिका ।
वणिक्कुले जातममुं च विद्धि भोः
समस्तवाणिज्यकलासु शिक्षितम् ॥ ३६

धनार्जनं कर्तुमहं गतोऽस्मि भोः
सुपारसीकं मम मित्रमण्डलैः ।
प्रतापराणा मम नेत्रचन्द्रमाः
मदीयनामास्ति च भामसाही ॥ ३७

तदीयवाक्यं तु तुषारशीतलं
निशम्य राणा तुरगात् सभक्तिकम् ।
हयावतीर्णो बहुनम्रमूर्तिमान्
ननाम चानन्दपरीतमानसः ॥ ३८

तदैव सर्वेऽनुचराश्च सत्वरं
तुरंगमेभ्यः सहसाऽवतीर्य तम् ।
प्रणेमुरानन्दभरैश्च मानसैः
विनम्रगात्राः क्रमशिक्षणाञ्चिताः ॥ ३९

श्रुतं हि सानन्दभरेण चेतसा
स भामसाही तुरगादवातरत् ।
विकम्पमानो विचलन् धराधिपं
समालिलिङ्ग प्रसभं महाभुजाः ॥ ४०

भवान् हि मे दैविकशक्तिरस्ति भोः
मदीयवंशस्य विजातदैवतम् ।
अहं यथार्थं तव सेवकः सदा
ध्रुवं स्वजन्मात्र सुसार्थकं बभौ ॥ ४१

भवादृशो वीरवरश्च भूतले
न चास्ति कुत्रापि सुवीरमण्डले ।
समस्तविश्वे तव कीर्तिचन्द्रिका
चकास्ति देवोऽसि पवित्रभारते ॥ ४२

त्वदीयनेत्राञ्चलदिव्यकान्तयः
मनोज्ञसुश्मश्रुविराजितानन्म् ।
विशालभाले विलसन् च कुङ्कुमो
वितन्वते भारतसंस्कृतिं प्रभो ॥ ४३

त्वदीयदेहः कवचप्रभासितः
त्रिशूलशूलं तव हस्तराजितम् ।
लालटदेशे विलसत्प्रभावालिः
त्रयीतनोर्धाम तनोति सर्वतः ॥ ४४

श्रुतं मया विंशतिवत्सरात्मके
भवान् प्रकामं समरे विमर्जितः ।
तदाप्रभृत्येव भवन्तमेकदा
विलोकितुं मे हृदयं समीहते ॥ ४५

अनन्यकार्येषु विमग्नमानसः
कृतोऽस्मि नाहं तव दर्शनं विभो ।
सुदैवयोगादधुनैव वीक्ष्य भोः
प्रमोदभावं भजतेऽत्र मानसम् ॥ ४६

अनीक्षमाणस्य ममापि नाभवत्
भवन्तमुद्दिश्य कदापि चिन्तनम् ।
सुयोगजालानुगुणेन साम्प्रतं ।
बभूव पूज्यागमनं महाप्रभो ॥ ४७

विचिन्तितं त्वां प्रति कानने मया
तथापि दत्तः समयस्तु नैव हि ।
विवर्धमानेषु रणेषु मज्जितः
समस्तविश्वं खलु विस्मृतं मया ॥ ४८

भवादृशानां वसनाद्धि भारतं
विभाति नित्यं बहुशक्तिपूरितम् ।
नितान्तमस्मिन् जगति प्रभाविणां
प्रभावजं भाति जनानुकीर्तितम् ॥ ४९

पुरातनानां मम वंशजन्मनां
भवादृशाः शाश्वतमार्गदर्शकाः ।
बभूवुरित्याकलनेन नर्तितो
ममान्तरङ्गः शतधा महाप्रभो ॥ ५०

विलोक्य तावन्मम नेत्रयुग्मकं
भवन्तमत्रैव विफुल्लितं भृशम् ।
मुदः प्रमातुं तव दर्शनोद्भवे
न चास्ति पात्रं मम संनिधौ प्रभो ॥ ५१

विहस्य भामा परमाप्तभावनः
प्रतापभूपं निजगाद मञ्जुलम् ।
क्व यासि भोस्त्वं परिवारवेष्टितो
वद प्रशान्तं मम भूप साम्प्रतम् ॥ ५२

त्वमेव साक्षात् चणकस्य पुत्रवत्
पितामहानां मम सूर्यवंशिनाम् ।
प्रियं चिरं मन्त्रिपदे स्वपालने
वसन् परं देशहिताय चाकरोः ॥ ५३

पुरा प्रभूणां तपसां प्रभाववत्
समागतं वीक्ष्य भवन्तमेव मे ।
भवन्ति चित्ते नवभावमालिकाः
विशालसिन्धाविव चोर्मिमालिकाः ॥ ५४

पदारविन्दं भवतः समेत्य भोः
भवत्कृपाशीर्वचनैः प्रभावितः ।
स्वातन्त्र्यपूर्णं पृथुलं महोज्ज्वलं
पवित्रपंजाबधरित्रिसंनिधौ ॥ ५५

प्रशान्तवातावरणे विनिर्मितुं
समीहते भारतनव्यमण्डलम् ।
तदर्थमेवायममोघसेनया
व्रजन् भवन्तं प्रविलोकते प्रभो ॥ ५६

सुपञ्चविंशत्यतिघोरवत्सराः
प्रयुध्य सान्तं महदाशया परम् ।
अदृष्टहीनोऽस्मि निराशयावृतो
व्रजामि सैन्येन परं महाप्रभो ॥ ५७

हरे प्रभो त्वद्वदनाद्विनिःसृतं
निशम्य शब्दं मम कम्पते तनुः ।
प्रमोदपूर्णं हृदयं प्रभिद्यते
तथा न भूयात् शृणु मां धराधिप ॥ ५८

समस्तराष्ट्रस्य निदानराजितं
प्रशस्तसूर्याग्वयनाशनं विभो ।
कथं सहेयं मम जीवने शृणु
विनाशयेयं द्रुहिणस्य निर्णयम् ॥ ५९

मदीयबुद्धया चतुरं महीतले
निरंतरं देशहिताय निश्चयम् ।
इनस्य वंशस्य महोन्नतं प्रियं
प्रभो विधास्यामि परारिभीकरम् ॥ ६०

भवादृशो धर्मविवेचकः पुरा
न जात एवात्र पवित्रभारते ।
समस्तलोकाः त्वयि दत्तदृष्टयो
जहासि किं धर्मपरीतदृक्पथम् ॥ ६१

त्वमेव लोके खलु कर्मतत्परः
यदि त्वमेवापजयेन मण्डितः ।
स एव धर्मापजयो भवत्यहो
वाचक्ष्व धर्मः कथमन्यमाश्रयेत् ॥ ६२

सुदूरदेशे निवसन् मुदा प्रियं
त्वदीयदीक्षां बहुधा च शुश्रुवे ।
रणेषु दीक्षां पटुसाहसश्रियं
त्वमेव कष्टेषु सुधैर्यवानिति ॥ ६३

शृणु प्रभो देशहिताय पूर्वजाः
मदीयवंशोद्भवधन्यजीविनः ।
चण्डस्य राज्ञः परिपालनात् ध्रुवं
वयं च सर्वे भवदीयमन्त्रिणः ॥ ६४

विना च राष्ट्रस्य महोन्नतस्थितिं
प्रचिन्तनां नैव करोम्यहर्निशम् ।
मदीयदेहो मम सर्वसम्पदो
भवन्ति नूनं तव वंशजन्मनाम् ॥ ६५

भवादृशो भारतराष्ट्रभूतले
महानुभावोऽत्र न जात एव भोः ।
अहं जराग्रस्तधिया भणामि ते
शृणु प्रहर्षं हितकारिमद्वचः ॥ ६६

विहाय मेवाडतलं धराधिप
प्रयोजनं किं वद दूरचालने ।
परिस्थितिं सान्तमनूह्य सत्वरं
तथा प्रयाणे न हि शान्तिरास्ति भोः ॥ ६७

अशान्तता यत्र विराजते भुवि
तदैव सत्यं जयते धरातले ।
सहायकौ सत्यमनन्यसाहसं
सहस्व तावत् तव धर्मरक्षणे ॥ ६८

निशम्य तद्वाक्यममन्दनन्दितः
प्रतापराणा विपुलं जगाद तम् ।
प्ररक्षणार्थं मम धर्मभावनां
त्वदीयरूपे खलु दैवमागतम् ॥ ६९

त्वदीयसूक्तिं शिरसाऽभिधारणं
विधाय कुर्यां मम देशरक्षणम् ।
प्रशाधि मां तावकशिष्यभूपतिं
चलामि नाहं शृणु धर्मकर्मणः ॥ ७०

शृणु प्रहर्षं मम भाषणं नृप
प्रतिक्षणं कार्यरतेन भूतले ।
त्वया हि भाव्यं न भजस्व निस्पृहां
समेहि सार्धं तव कृष्णमन्त्रिणा ॥ ७१

त्रयः तदा शान्तमयैः स्वभाषणैः
शनैः शनैः भूमिजवल्लरीचयैः ।
मनोहराच्छादितसान्द्रशीतलं
सुसानुदेशं प्रतिजग्मुरेव ते ॥ ७२

उपाविशन् भ्राजितशौचवह्नयो
वनस्य निम्बस्य तरोरधस्त्रयः ।
वणिक् स भामा मधुरं प्रचक्रमे
सुराजनीतिं वरदैशिकं शनैः ॥ ७३

दुर्गमित्राणि च राजमन्त्रिणः
लसन्ति देशाः धनसैन्यनामकाः ।
यदीह सप्तप्रकृतिप्रपूर्णता
तदैव शक्यो भवतीह संगरः ॥ ७४

उदात्तभावैः गुणसंयुतो भवान्
महाकुलीनोऽसि जनाधिपः स्वयम् ।
विशालभावैः खलु कृष्णभूपतिः
प्रराजते मन्त्रिपदाभिभूषितः ॥ ७५

सविक्रमो राष्ट्रहितैषिभैमिकः
सुराजभक्त्या पटुधैर्यसाहसी।
नितान्तसोत्साहलसन्महामनाः
सुखाय ते स्नेहमयः प्रतिष्ठति॥ ७६

विशाललोकस्य सुखाय जीवने
समस्तकार्यस्य निदानराजितम्।
धनं हि नित्यं पुरुषार्थसाधने
अनादिकालात् विदितं महाजनैः॥ ७७

तवास्ति लोपोऽयममुत्र जीवने
विभाति मन्त्रः प्रभुशक्तिरादिकम्।
त्वमेव लोके खलु केवलं परैः
चकर्थ संग्रममनन्तशक्तिभिः॥ ७८

न साधितं किञ्चिदपीह शाश्वतं
वृथा हि जाता तव सर्वयातना।
अहं प्रदास्ये च धनं मयाऽर्जितं
गृहाण राजन् कुरु वाहिनीं दृढाम्॥ ७९

अहो प्रशस्तं भवतः प्रशासनं
प्रसूनमालामिव मूर्ध्नि धारयन्।
अनुक्षणं नव्यचमूचयं दृढं
प्रशस्तशस्त्रास्त्रयुतं करोमि भोः॥ ८०

विना धनं किञ्चिदपीह मेदिनीं
पुराप्रभृत्येव दरिद्रजीवने।
विलुठ्यमानं भवदीयसम्पदा
कृतोऽसि मां शाश्वतभाग्यभूषितम्॥ ८१

पूर्वं मदीयाः चरणाश्रिते जने
समस्तधान्यादिसुखालिसञ्चयम् ।
वितीर्य संतुष्टमना विचक्रिरे
अहं हि गृह्णामि पराद्य सांप्रतम् ॥ ८२

त्वमत्र मे भूमिजकल्पसंनिभः
समस्तराष्ट्रस्य हिताय राजसे ।
त्वमेव साक्षादवतीर्णवृत्रहा
मदीयसौभाग्यनिदानदैवतम् ॥ ८३

त्वयीह भाग्यं खलु देशरक्षणे
समर्पणं तद्धनमर्जितं पुरा ।
पितामहानां तव वंशजन्मनां
प्रसेवया यद्धनमत्र जीविते ॥ ८४

मतल्लिकायै मम जन्मदायिने
धरित्रिणे यन्मम सर्वसम्पदम् ।
न चैव दास्यामि विपत्करस्थितौ
निरर्थका मे खलु जन्मसम्पदः ॥ ८५

धनं गृहीत्वा सपदं स्वमण्डले
स्वसैनिकानेकबलायुधायुतान् ।
सुशिक्षितान् सक्रमवर्तनायुतान्
दृढं प्रकुर्वन्तु हयालिमण्डितान् ॥ ८६

सहोदराः किं सततं सुखावृताः
विलोक्य देशं परहस्तभाजिनम् ।
विना च बाधां नखकृन्तने रताः
सुमयमत्ताः परपालने मृताः ॥ ८७

ग्रहैव हारावलिकन्दराङ्गणे
महारणे विंशतिवत्सरान् भृशम् ।
उपत्यकायां वरसानुरञ्जिते
प्रयुध्य गच्छत्यविमृश्य दैशिकम् ॥ ८८

अनेककष्टानि वितीर्य साम्प्रतं
न चैव युक्तं खलु युद्धजीवनम् ।
विहाय यानं तव भीरुवद् ध्रुवं
परत्र राज्यं च विनिर्मितुं प्रभो ॥ ८९

पवित्रदेशं वरधेनुमण्डलं
पतिव्रतास्ताश्च ललामकन्यकाः ।
प्रदाय लज्जारहिताः सदाऽरये
प्रयाणमेवं न हि योग्यमेव भो ॥ ९०

हयालिभिर्नव्यबलान्विताः स्वयं
परान् विजित्यैव यशोविभूषिताः ।
भवन्तु लोके मधुदेशजीवना
इति स्वयं तान् परमादिदेश सः ॥ ९१

आशीर्वादान् प्राप्य सर्वे सहर्षं
नव्योत्पन्नैर्दैशिकैः सूत्रभावैः ।
आबद्धास्ते भामसाहिं भणन्तो
जीवत्वेवं शाश्वतं राष्ट्रभक्त्या ॥ ९२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे 'भामासाहीराणाप्रतापयोः मेलनम्' नाम द्वितीयः सर्गः समाप्तः ॥]

तृतीयः सर्गः ।

३. प्रतापस्य विजययात्रा ।

महावेगकाले स राणाप्रतापः
स्वयं सर्वसेनाचयं शस्त्रयुक्तम् ।
विधायैव पूर्णं कृपाणैश्च शूलैः
तनुत्राणबद्धं पदत्राणसक्तं ॥ १

पदातिं हयालिं गजालिं नृपालिं
महायुद्धयोग्यां विधायाशु तस्मिन् ।
महाशक्तियुक्तः स्वयं मित्रवर्यैः
समेतः सहर्षं बभौ भीमरूपी ॥ २

सहेलं स कृष्णः सवेगं स्वशङ्खं
प्रदध्मौ महान्तं सदाऽरिप्रभीलम् ।
निशम्यैव शान्तं तदीयध्वनिं ते
समेताः सबालाश्च पौराः प्रमोदम् ॥ ३

प्रयाताः प्रभूताः प्रहर्षेण लोकाः
समीपं प्रतापस्य शस्त्रास्त्रयुक्ताः ।
नमन्तो रटन्तो ब्रुवन्तः सहर्षं
तमेवं प्रभेणुः सबालाश्च पौराः ॥ ४

किमत्र प्रमोदेन शङ्खध्वनिस्ते
प्रयात्येव शून्ये दिगन्तान्तराले ।
ददात्येव वार्तां प्रयुद्धाय नूनं
वदाशु प्रभो किं तदेतज्जनालिम् ॥ ५

निशम्यैव तेषां पदालिं स कृष्णो
जगाद प्रियं तान् प्रफुल्लाक्षिभाजः ।
सशान्तं स्वभावं मदीयोक्तिरम्यं
नितान्तं यथार्थं धरन्तु प्रकामम् ॥ ६

स राणाप्रतापः प्रभूतां धनालिं
परं भामसाहीसहायेन लब्ध्वा ।
प्रहर्षं सहेलं ससैन्यः सवेगं
प्रतस्थे च राष्ट्रस्य भूत्यै महात्मा ॥ ७

जना ये च सैन्ये निवेष्टुं यतन्ते
द्रुतं ते प्रविश्यैव नव्यां च शिक्षाम् ।
गृहीत्वा स्वमातुः पदाब्जे नितान्तं
द्विरेफाश्च भूत्वा विराजन्तु भक्त्या ॥ ८

तदर्थं जनालिं प्रमत्तं प्रबोद्धुं
सुसैन्यं सदा देशरक्षाविलग्नम् ।
शिरस्त्राणशस्त्रास्त्रवर्गैः प्रयुक्तं
बलात्तं महान्तं प्रयत्नं विधास्ये ॥ ९

भवन्तश्च शक्तिप्रपूर्णाः स्वयं भोः
प्रतापस्य सैन्ये समायान्तु वेगम् ।
धनं दीयते सर्वसैन्यस्य भुक्त्यै
महान्तं प्रतापं तु तूर्णं प्रयान्तु ॥ १०

मुदा नव्यसैन्येन शत्रोः सकाशात्
परं वैभवेनैव सर्वांश्च दुर्गान् ।
विजित्यैव राष्ट्रं सदाऽखण्डितं भोः
विधास्याम नाकीयसौख्ये प्रियालुम् ॥ ११

न याचामहे भोः श्रियं वा वरं वा
प्रियं वा सुखं वा जनन्याः सुखार्थम् ।
अखण्डं स्वराष्ट्रं विधातुं भवामो
त्वदीयां पदालिं व्रजामो महात्मन् ॥ १२

उदीर्यैव सद्यः प्रजालिः प्रमोदे
प्रपेदे च कृष्णस्य भावं महान्तम् ।
प्रतापस्य भूयाज्जयः सम्पराये
इदं भारतं स्वर्गतुल्यं विभातु ॥ १३

मुदा सर्वपौराः प्रियं तेन सार्धं
ययुः सर्वरक्षास्त्रसंभारयानैः ।
प्रतापस्य सैन्ये मिलित्वा मनोज्ञाः
कुमारा इवात्रैव रेजुः सहेलम् ॥ १४

विलोक्यैव सर्वान् वयोवृद्धबालान्
अजस्रं प्रतापः प्रहर्षेण राजन् ।
भवद्भिः कृता न धरित्र्यै महार्हा
प्रसेवा च सैन्ये समाविष्टयोगात् ॥ १५

प्रतापस्य पत्नी स्फुरद्दिव्यरूपा
ललासेन्दुतुल्याऽऽस्यरम्या लताङ्गी ।
विलोक्यैव राणाप्रतापस्य रूपं
स्फुरन्मञ्जुलास्थं जगादैनमेवम् ॥ १६

न ते वर्तनं पूर्णमेवं विरेजे
मुदा पूर्णरूपं लसत्यत्र राजन् ।
सदा जीवने कामयेऽहं भवन्तं
चिदानन्दरूपं स्वराष्ट्रस्य भक्तम् ॥ १७

सहेलं परालिं निरस्तां विधाय
महद्राष्ट्रमेनं प्रशान्तं विरच्य ।
जनालिं स्वराष्ट्रैकभक्त्या लसतीं
चिरंजीव राजन् सुखेषु स्वराष्ट्रे ॥ १८

प्रहेलं च तस्मै ददौ सा मतल्ली
प्रभक्त्या च नीरांजनं दीपकान्तिम् ।
विरच्यैव भाले सुसिन्दूररेखां
जयोऽस्त्वत्र नित्यं रणे भो महात्मन् ॥ १९

तनूजान् गृहीत्वा विचुम्बन् प्रहर्षं
प्रमोदेन खेलन्तमेनं विलोक्य ।
सती तस्य पाटेश्वरी साश्रुपूर्णा
विरेजे प्रियातिप्रियं मोदभारा ॥ २०

जगादैनमेवं हसन्ती लपन्ती
प्रभो तावकीनं मुखं पूर्णचन्द्रम् ।
विलोक्यैव जाताः समा नैकसंख्याः
शुभाः साधुमार्गाः समीपे लसन्ति ॥ २१

अनेकैश्च रत्नप्रदीपैः सुपुष्पैः
सुगन्धाक्षतैर्भव्यकर्पूरदीपैः ।
मनोज्ञारतिं सा ददौ वीरमूर्त्यै
शुभास्ते च मार्गाः सदा सन्तु लोके ॥ २२

तमेवं शुभाशीर्वचोधारया सा
ब्रुवन्ती नमन्ती नवोत्साहशक्त्या ।
अजय्यं च शत्रुं विजित्यैव तूर्णं
समायातु लक्ष्मीसनाथश्च भूप ॥ २३

तदा साऽमरं सिंहबालं प्रहर्षं
ज्वलद्रत्नदीपैः प्रदायाऽऽरतिं तम् ।
अलङ्कृत्य सा वीरगन्धेन देहं
चुचुम्बार्द्रभावा प्रियं वीरमाता ॥ २४

सपुत्रो भवान् युद्धभूमौ सहेलं
परान् मर्दयित्वा नवानीकयूथैः ।
अखण्डं विशालं करोत्वत्र राष्ट्रं
सुखं नूतनाश्वेन मित्रेण युक्तः ॥ २५

अनन्तप्रमोदार्द्रभावा मतल्ली
शुभामाशिषं सा ददौ वीरपत्नी ।
प्रतापस्तु पत्न्याः कपोलं दयार्द्रः
स्वकार्कश्यहस्तेन पस्पर्श भावैः ॥ २६

तदा तस्य पत्नी जगादेनमातं
कदापि त्वदीयं कुटुम्बं विचार्य ।
वृथा मा कुरुष्वात्र कालं महान्तं
लभस्वाशु मेवाडलक्ष्मीं प्रभो मे ॥ २७

प्रतस्थे प्रतापः ससैन्यः सहर्षं
प्रजाः पुष्पलाजानवाकीर्य गीतैः ।
सुवाद्यैः सुनादैश्च भिल्लालिनाट्यैः
प्रमोदेन पूर्णं विचक्रुः सुयात्राम् ॥ २८

प्रतापः प्रविश्यात्र दुर्गं निशार्धे
विलोक्यैव सुप्तं परानीकजालम् ।
बभाण स्वकीयं चमूमण्डलं तद्
न कोऽप्यत्र शत्रुं निहन्तुं प्रभूयात् ॥ २९

प्रपीतं प्रसुप्तं च बालं च नारीं
विशस्त्रं च भीरुं सुसंभोगलग्नम् ।
न वध्यादिति प्राहुरस्मत्प्रबुद्धाः
क्षणं पौरुषेणात्र कुर्वन्तु घोषाम् ॥ ३०

अनेकैर्विरावैः कुरावैश्च वाद्यैः
प्रहासप्रभूताट्टहासैश्च घोरैः ।
महावीरयोग्यैः सदा शत्रुभीतैः
वचोभिः समस्तां निशां ते वितेरुः ॥ ३१

किमेवं स्वपन्तो भवन्तोऽत्र रात्रौ
कुतुर्कस्य सेवां विहायैव मत्ताः ।
पिबन्तो रटन्तो सुखेष्वेव मग्नाः
भवन्त्वाशु युद्धाय सर्वेऽत्र सिद्धाः ॥ ३२

इदं पूर्वजानां पवित्रस्थलं भोः
न यातव्यमस्माभिरेवं निशीथे ।
परं दुष्टभावेन चोरा इवास्मिन्
परालिं प्रहन्तु प्रमन्तान् सुषुप्तान् ॥ ३३

तदानीं च सर्वे स्वकीयानुचाराः
प्रदध्मुः स्वशङ्खान् प्रहर्षेण तूर्णम् ।
तथा भीमचन्द्रः सभीलं स्वशङ्खम्
पपाराशु पूर्णं महोग्रं सुदीर्घम् ॥ ३४

कुमारामरो नामकश्चाश्वयुक्तः
प्रशान्तं विवेशाग्रयामी च भूत्वा ।
प्रतापादिकृष्णाश्च दुर्गं ससैन्यं
प्रविष्टाः सवेगं रणोद्गारनादैः ॥ ३५

रणोद्गारवः प्रतिध्वानितेऽस्मिन्
सुदेवेरिदुर्गे प्रसुप्ताश्च सर्वे ।
परास्त्रस्तभावैः सवेगं स्वशस्त्रान्
समानेतुकामाः ययुः सुप्तमुद्राः ॥ ३६

अधावन् विलोक्यैव भीताश्च काष्ठाः
समायातमेनं प्रतापाधिभूपं ।
कृतान्तेन तुल्यं महाभीलराणां
झटित्याशुगास्ते महावातरूपाः ॥ ३७

समक्षं गताः तत्र ते राजपुत्राः
परानीकजालं कृपाणाभिघातैः ।
विधायैव खण्डोपखण्डान् प्रकामं
विरेजुश्च सौदामिनीतुल्यरूपाः ॥ ३८

करालातिगाढान्धकारे निशीथे
मुगालायिसैन्यानभिज्ञा स्वकीयान् ।
भटान् सर्वसंचारसंडीनसक्तान्
विजघ्नुः कृपाणालिधाराप्रघातैः ॥ ३९

परं वीतिहोत्रोऽमरो नाम भूपः
चकाराशु दुर्गं स्मशानं मृताङ्गैः ।
शिरोभिः परेषां शरीराङ्गभावैः
सुतीक्ष्णं च निस्त्रिंशधाराप्रघातैः ॥ ४०

स सव्यापसव्यं स्वनिर्स्त्रिंशघातैः
परालिं मृतालिं विकुर्वन् प्रहेलम् ।
प्रतापस्तु सूर्यध्वजेनाऽऽयुतश्च
तुरङ्गेण सार्धं विहारं विचक्रे ॥ ४१

तदा काद्रवेयोपमानान् प्रभूतान्
मुगालायिसैन्यान् त्रिशूलाभिघातैः ।
विदीर्यैव रेजुः तदा वैनतेयाः
प्रतापस्य सैन्याः प्रहृष्टाः स्वपक्षैः ॥ ४२

प्रविश्यैव पूर्वाद्रिजातं च मित्रं
नमस्कृत्य भक्त्या जगत्साक्षिरूपम् ।
द्रुतं मञ्जुलां प्राहिणोत् साधुवार्तां
प्रतापः स्वपत्न्यै प्रमोदाक्तचित्तः ॥ ४३

समक्षं च कोमलूमियर्दुर्गमेनं
विलोक्यैव भक्त्या नमस्कृत्य शान्तम् ।
समा नैकसंख्या व्यतीता, मतल्लि
मुदात्वां प्रयुध्यन् परेभ्यो ग्रहिष्ये ॥ ४४

वदन् लङ्घयन् शत्रुसैन्यं सवेगं
स्वकीयेन सैन्येन सर्वासु दिक्षु ।
अरौत्सीच्च दावाग्निरूपेण राणा
ज्वलन् तं विनष्टं च चक्रे प्रभीलम् ॥ ४५

प्रपुङ्खानुपुङ्खं स्वबाणानमोघान्
ससर्ज्जुः कृपाणाश्च विद्युत्प्रवेगान् ।
तदा युद्धधात्री तु रागेण युक्ता
प्रकीर्णा पयोदाभ्रपूर्णा विरेजे ॥ ४६

परं यावनीयार्तनादाः प्रसूताः
प्रतापाधिपस्यास्य सैन्यस्य रावाः ।
मिलित्वाऽभ्रमेघालिगर्जानिनादान्
समुत्पादयन्तीव रेजुः प्रघोषैः ॥ ४७

तदा जैत्रयात्रासमुद्भूतयुद्धै-
ष्वनेकांश्च दुर्गान् विजित्यैव राणा ।
पुनाराजपुत्रस्य संस्थानकानि
परं वैभवाक्रान्तरूपाणि चक्रे ॥ ४८

चितौडाजमीरा-सुमण्डादिदुर्गान्
विना सर्वदुर्गान् जिगायात्र राणा ।
परं मोदमानः तुराषाडिवासौ
विकृन्तन् महासौरशक्त्या च तुर्कान् ॥ ४९

तदानीं प्रतापस्य गाथा वहन्त्यः
प्रतीर्याशु राज्यस्थपल्लीप्रदेशान् ।
प्रविष्टात्र दिल्लीश्वरस्यास्य कर्णे
व्यथापूर्णभावैश्च चित्तं तुदन्त्यः ॥ ५०

अधुना खलु दुर्गमण्डलं सकलं यत् रिपुणा पुरा जितम् ।
निरतं बहुयत्नसम्पदा पुनरेवात्र मया जितं खलु ॥ ५१

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे 'प्रतापस्य विजययात्रा' नाम तृतीयः सर्गः समाप्तः ।]

चतुर्थः सर्गः ।

४. राणाविजयोत्सवं समाकर्ण्य अकबरः स्वमन्त्रिमण्डलैः मन्त्रयति ।

उन्मत्तोऽभूत् किमपि करणे रक्तपीडाप्रकोपी
श्रुत्वा राज्ञः सकलविजयं श्रोत्रशूलं स तुर्कः ।
सर्वानाप्तान् चतुरधिषणान् ज्येष्ठसेनापतींश्च
प्राहूयाशु व्यथितहृदयो मन्त्रणां तैर्विचक्रे ॥ १

मृत्वा सर्वैः मम भटवरैः सङ्गरे हल्दिघाट्यां
त्यक्त्वा राष्ट्रं परिचरचयैः नूत्नराष्ट्रं विधातुम् ।
पंजाबप्रान्ते विगतगरिमाशक्तिबुद्धिः प्रतापः
प्रत्यावृत्तः कथमिति पुनः भारतं मामकीनम् ॥ २

राणासिन्धुः प्रखरकिरणैः वीरखड्गालिपातैः
पातालान्तं गमित इति संनिश्चितं सर्ववीरैः ।
लब्ध्वा वेगं पुनरपि पुनः तुङ्गकल्लोलघोषैः
रुद्राकारे विशति चपलं सर्वतुर्कान् प्रमार्ष्टुम् ॥ ३

लब्ध्वा सद्यः प्रबलचमुना सत्त्वसारं प्रताप-
श्चौर्वे रूपं प्रलयगतिना क्राम्यतीवास्ति शक्त्या ।
सर्वं चैतत् कथमिति वरं गूढचारप्रवर्गैः
वारं वारं निपुणमतिभिः सर्वथा श्रावितं मे ॥ ४

राणावंशे तरणिमहिते बुद्धिशाली सुमन्त्रिः
भामासाही धनदतुलितो देशभक्तो महात्मा ।
पार्सीदेशादधिगतधनो स्वीयवाणिज्यतन्त्रात्
अस्मै प्रादात् सकलनिचयं सैन्यवृद्धयै धनं तत् ॥ ५

भ्रामं भ्रामं भरतधरणीमण्डलं ज्ञानगत्या
देशे वृत्तं सकलचरितं सर्वदिक्षु प्रभूतम् ।
मह्यं सर्वे विशदमतयो गुप्तचारा व्यथाभिः
ज्ञात्वा सर्वं रहसि निकटे दृश्यरूपं प्रभेणुः ॥ ६

नित्यं गाढं मनसि विभुना निर्जितोऽहं त्वया भोः
दासं क्षुद्रं शरणगमितं त्वत्पदाम्भोजसक्तम् ।
इत्येवं तं सततभणितं कारयेयं कदाऽहं
भावस्वप्ने मुदितमनसा यापयामीह कालम् ॥ ७

आशाः सर्वाः गलितविभवाः नामरूपं विहाय
शत्रुः पुष्टिं व्रजति चमुना सर्वशस्त्रास्त्रसृष्ट्या ।
राजा सर्वानतुलसुभटान् युद्धतन्त्रेण मित्रैः
सैन्यैः हीनः चतुरगमनो द्रावयामास सान्तम् ॥ ८

आनन्त्यास्त्रैः महितगतिना दार्ढ्यसैन्यैः प्रयुक्तः
दृप्तो नित्यं विविधगरिमा वज्रिभोगैः प्रतापः ।
रुद्राभीलः चलति विपिने दावकीलालरूपे
सर्वं तथ्यं सकलभुवनं दाहयेन्नास्ति शङ्का ॥ ९

अक्ष्वर्भूपः सकलनृपतीन् वीक्षमाणः सबाधम्
नष्टं यद्यत् समरजनितं वर्णनातीतमेव ।
इत्येवं सो हृदयलसितां वेदनां श्रावयंस्तान्
दीर्घोच्छ्वासैः कथमपि कथं भाषणं चारु चक्रे ॥ १०

तुष्टोऽस्मीह प्रथमकथने देशमेनं विहाय
राणा राजा विकलहृदयो देशमन्यं प्रयाति ।
मध्ये मार्गं चतुरवणिजः सर्वगाथां समूलां
चोत्पाट्यैवं हृदयकुहरे ज्वालयामास वह्निम् ॥ ११

श्रुत्वा सर्वं व्यथितहृदयस्याकबरस्यैव दुःखं
रेहमान् शान्तं मधुरवचसा कीर्तयन् तस्य कीर्तिम् ।
राणा राज्ञः धरणिविनुतां देशभक्तिं विलोक्य
प्रारेभेऽसौ भणितमतुलं सत्यवृत्तं यथार्थम् ॥ १२

राजा देशे भवसि विशदं दैवदत्तैः प्रभावैः
सर्वं तुभ्यं विचतुरबलानीकदत्तं स्वराज्यम् ।
सर्वान् क्रीत्वा बलयुतभटान् राजपुत्रांश्च राजन्
वीरो भूत्वा लसासि भुवने नैव धृत्वा कृपाणम् ॥ १३

राजन् देशे तव गुणगणः प्रत्यहं नन्दितोऽहं
त्वामेवाहं विमलमतिना पूजयाम्यत्र भक्त्या ।
त्वत्क्षेमं मे भवति कुशलं शाश्वतस्थानमत्र
वच्मीहाप्तं तव सुखकरं यत्र बुद्ध्यां ममास्ति ॥ १४

चिन्ताक्रान्तो भवसि हृदये संस्मरन् राजमूर्तिं
राणां वीरं विमलभरते सूर्यवंशस्य देवम् ।
राष्ट्रे चास्मिन् भुजबलयुतं युद्धभूमौ कुमारं
योग्यं नास्ति प्रबलपृतनायुक्तसंपन्नराज्ञः ॥ १५

नैकैर्लक्षैः गजहयबलानीकयुक्तो भवान् हि
राणापद्गैः लघुतरहयानीकसंख्यासहायः ।
तं दृष्ट्वाऽस्मिन् भरतधरणी राज्यभारे किमर्थं
चिन्ताऽऽक्रान्तो भवसि निरतं तस्य हेतुं न जाने ॥ १६

गत्वा राणां शृणु मम धरां तुभ्यमेवास्मि दातुं
चोद्युक्तोऽहं कदनविजयश्रीसमेताय तुभ्यम् ।
त्वय्यायत्ता भरतजनता सत्यमेव प्रभो हे
चेत्युक्तोऽपि प्रथितयशसा सैव नाङ्गीकरोति ॥ १७

एवं नूनं भरतपुरुषेषूत्तमो नैव जातः
शक्त्या बुद्ध्या विमलमनसा देशभक्त्या समेतः ।
शूलं धृत्वा चटुलतुरगे श्मश्रुयुक्तः प्रतापः
गच्छेत्, द्रष्टुं वयमिह विभुं शक्तिहीना भवेम ॥ १८

पृच्छाम्यग्रे विशदधिषणं प्रश्नमेकं भवन्तं
राणा तुभ्यं कथमिति नतः प्रत्यहं भो नमांसि ।
कुर्यान्नूनं शरणवचनैः शान्तभावैः किमर्थं
नाहं जाने कथयतु भवान् शब्दशक्त्यर्थपूर्णम् ॥ १९

राणाकीर्तिप्रचलितधरामण्डले नित्यसौख्ये
सर्वे वीराः वयमतिसुखं जीवयात्राविमग्नाः ।
इत्याख्याने भवति च सुखं गौरवं चोन्नतत्वं
राणाकाले वयमपि समं तेन देशे वसामः ॥ २०

तस्य क्षेमे भवति महिता देशरक्षा महात्मन्
नाहं काङ्क्षे मनसि भावितुं तस्य हानिं कदापि ।
सौख्यं तस्य प्रजनयति भोः लोककल्याणमेव
तस्मात् देवं दिनकरनिभं चार्चनं शान्तिहेतुः ॥ २१

मेघाच्छन्ने तमसि भवने तावकीने प्रविश्य
चैकाकी सः शयनसमये दृष्टिमार्गे भवेच्चेत् ।
किं त्वं राणामभिमुखगतं मूर्तिमन्तं महान्तं
तथ्यं जेतुं हिमनगनिभं शक्तियुक्तोऽसि राजन् ॥ २२

नाहं सेहे जलधिकलितासेतुशीताद्रिभूमौ
यो वा को वा भवतु नृपतिः सूर्यवंशीयराणाम् ।
किञ्चित् द्रोहैः तुदितमनसं कारयेत्तं प्रकामम्
द्वेष्यो नित्यं भवति च सखाऽप्येवमाशास्मि भूप ॥ २३

सर्वे धर्माः निखिलजनतामुक्तिमार्गप्रसक्ताः
राज्ये सर्वे मिलितहृदयाः वन्धुभावे लसन्ति ।
उद्याने भोः निहितविटपाः स्वीयसूनैश्च पर्णैः
तद्वत् सर्वे घिषणजनितैः भावपुष्पैर्लसन्तु ॥ २४

राजस्थाने सकलधरणीशासनस्था धरेन्द्राः
तेषां शौर्यं ज्वलनसदृशं शत्रुसंहारयोग्यम् ।
प्राणान् त्यक्तुं सुलभमतयः किन्तु माने रतास्ते
राणाऽजय्यो भवति नृपते माऽस्तु युद्धं तवात्र ॥ २५

ज्येष्ठोऽसि त्वं जनकसदृशः शैशवे मां गृहीत्वा
सानुक्रोशं सकलमधुरानन्नलेह्यादिखाद्यान् ।
दत्त्वा प्रेम्णा सकलविदितं मामकीनं तु नाम
चाब्दुल्रेहमानिति च कृतवान् लोकमोदं महात्मन् ॥ २६

तस्मात् देहे रुधिरममलं भूपतिं त्वामजस्रं
मन्दं मन्दं भरतभुवने तावकीनां च कीर्तिम् ।
प्रेम्णा शंसन् विशदयति हे भूपते सत्यमत्र
त्वय्यायत्ता तनुरिति सदा स्वान्तपूर्वं भणामि ॥ २७

श्रुत्वा तस्य प्रथितकथनं सर्वसभ्याः प्रकामं
वाढं वाढं मधुरमधुरैः शब्दभावैः सहर्षम् ।
शंसुः सत्यं भवति निखिलं रेहमानेन चोक्तं
फारिस्ताद्याश्चकितनयना हस्ततालैः प्रगाढम् ॥ २८

दृष्ट्वा तीक्ष्णं निशितवचनैस्तत्र सर्वान् सभास्थान्
क्रोधेनासौ दलितहृदयो मानसिंहः सवेगम्।
ये ये सर्वे चपलमतयो भूपराणां प्रशंसुः
तान् तान् सर्वान् निधनपतये प्रेषयेयं सहेलम्॥ २९

हल्दीघाट्यां भयदसमरे मां विहायैव शूरं
भ्रामं भ्रामं स्वभटनिवहे घोटकाधिष्ठितैस्तैः।
आत्मानं सो वनचरवरैः रक्षयित्वा प्रभूतं
चादृश्योऽभूत् विनुतसमरे भीरुरेव प्रतापः॥ ३०

राणातत्त्वं भयपरिहितं नैव जानन्ति भूपाः
संग्रामेऽसौ चकितनयनैः व्याघ्ररूपश्च धेनुः।
दृष्ट्वा सैन्यं हयगजयुतं घर्मजालैः प्रसिक्तः
मित्रैः सर्वैः सहितवलयैरेति संग्रामभूमिम्॥

बन्धे युद्धे मम शरचयैः गाढमेवात्र विद्धः
रक्तासिक्तो रणभुवि चिरं नैव शक्तश्च योद्धुम्।
तस्मात् युद्धात् मम भटचयात् दूरमेव प्रतापः
भीतिग्रस्तो विचलिततनुः चेतके नैवयातः॥ ३२

नित्यं सर्वे विपिनलसितं दुर्विदग्धं प्रतापं
तस्याधिक्यं मधुरवचनैः वर्णयन्ति प्रहर्षम्।
मत्तः सोऽयं कथमिति महान् राजलोके वदन्तु
युद्धे राणां शमनवसतिं प्रापयेयं नखेन॥ ३३

पृथ्वीराजः परमकुपितो मानसिंहं विलोक्य
किं वा किं वा वदसि चतुरं मेरुतुल्यं च मत्वा।
पूज्यार्हं तं भुवनविदितं वर्णयेयुः परं ते
देशे भक्ताः चतुरधिषणा लेखकाः पुस्तकेषु॥ ३४

जाताः सर्वे वयमिह सदा द्रोहिणो भारतस्य
स्वार्थैरेव प्रकृतचरिते यापयामो कुटुम्बान् ।
देशद्रोही भवति चरिते मानसिंहस्तु तथ्यं
चेत्येवं ते मलिनचरितं तावकीनं लिखेयुः ॥ ३५

सौरे वंशे प्रथितपुरुषं तादृशं युद्धवीरं
क्षुद्रो भूत्वा मदभररुषा निन्द्येत् कोऽपि मूर्खः ।
सोऽप्यत्रास्ते स्वकुचघरणे मर्दने तत्परः सन्
तस्यास्त्येव प्रियतमपदं नाटकीयं प्रभूतम् ॥ ३६

कासौ राजा क च तव रणे पाटवं पश्य मान
नैके लक्षाः समरचतुराः मानसिंहादिभूपाः ।
साम्यं युद्धे स्थिरमतियुताः नैव यास्यन्ति तेन
सत्यं लोके जयति न तु ते भाषणं स्थायिहीनम् ॥ ३७

यावज्जीवं किमिति भुवने सर्वदाडम्बरोक्तिं
कृत्वा पूर्णं कदनसुमुखं सर्वलोकं करोषि ।
राणामूलो लसति भुवने राजवंशः पवित्रो
नत्वन्येषां मलिनमनसां मानसिंह शृणु त्वम् ॥ ३८

पृथ्वीराजे गदति निशितं मानसिंहो रुषा तं
स्वेच्छाचारैः मलिनवचनैः पादमुद्धृत्य हन्तुम् ।
उत्थायाशु प्रखरगलितैः विस्फुलिङ्गाक्षिदृग्भिः
गर्जाभीलं क्षुभितमनसा सिंहरूपो ललङ्घे ॥ ३९

दृष्ट्वा दृश्यं प्रलयभयदं मानसिंहस्य दौष्ठ्यम्
तूर्णं राजा चकितनयनः शान्तशब्दैर्वभाण ।
सर्वेषां च प्रियतमपदस्वाधिकारप्रभूणां
भावं ज्ञातुं विमलशुभदाऽकारि रम्या सभाऽत्र ॥ ४०

राणा राजा भवति च महावीररुद्रावतारः
यद्वैवोक्तं विशदमनसा पृथ्विराजेन भूपाः।
तथ्यं सर्वं भवति च न मे चास्ति शङ्काऽपि नूनं
सत्यं लोके मलिनवचनैः नैव गुप्तं भवेद्धि ॥ ४१

सेव्यः तथ्यं विपुलमनसा शौर्यसिंहः प्रतापो
मादक्भूपैः दशशतधरापालकैः बादशाहैः।
बुद्ध्या तस्मै विविधगतिभिः कारितं कष्टजालं
भीतिश्चित्ते भवति च नृपाः स्मर्तुमेनं महान्तम् ॥ ४२

सर्वं शेषं विमललसितं जीवितं मे च तस्मै
राणायाहं विमलमनसा चार्पयित्वा प्रशान्तम्।
तुर्को राजा सततमनृणी सर्वथा श्रीसमेतः
धर्मो भाति स्वजनसहितं पालनं तस्य राष्ट्रम् ॥ ४३

पञ्चाशन्मे प्रचलति मुदा वत्सरो राज्यपीठे
पुत्रौ द्वौ मे नयनपुरतः पञ्चभूतेषु लीनौ।
सालींराजा मदिरवनितासक्तचित्तो बभूव
शेषं कालं सुखमयधिया यापयेयं प्रशान्तम् ॥ ४४

चत्वारिंशत् प्रबलपृतना वत्सराण्येव युद्धं
कारं कारं भरतधरणीं शान्तिमार्गे निवेश्य।
इष्टान् योगानिह सुखयुतान् प्राप्य सर्वान् स्वकामं
चाल्लापूजां नियमितपथा प्रत्यहं भो विधास्ये ॥ ४५

इत्युद्गीतं विरसवचनं मानसिंहो विशृण्वन्
राजन् देशे कुसुमितवने तावकीनेऽभिरम्ये।
जीवन्तं तं प्रखरमनुजं कण्टकाकारराणां
नाहं शक्ष्ये तव पथिगतं द्रष्टुमेवात्र भूप ॥ ४६

राणां शत्रुं भुवनविदितं कण्टकाकारदीप्तं
मन्योद्याने कुसुमितलतावोष्टिते तावकीने ।
राष्ट्रे गाढं विषमयसमीरान् सदा व्याप्नुवन्तं
रूढं वृक्षं सुनिशितकुठारेण सान्तं करिष्ये ॥ ४७

यद्येवं तं समरदलितं नैव कुर्यां प्रतापं
भूपाः सर्वे मलिनवचनैर्मां सदा दूषयन्तु ।
एवं रुष्टो गदितवचनो मानसिंहः सवेगं
खड्गं चास्यत् शपथवचनैः रुद्ररूपः सभायाम् ॥ ४८

अक्बर्राजा कुपितहृदयं मानसिंहं चचक्षे
शान्तं पश्यन् प्रशमितमनाः साधुमार्गे नियोक्तुम् ।
अन्दुल् रेहमान् जगति विदितः शीलवान् नित्यसत्यः
श्रोतव्यानि प्रविमलसुधास्यन्दिवाक्यानि तस्य ॥ ४९

पृथ्वीराजः परमविशदः शीलवान् लोकवन्द्यः
राज्ञस्तथ्यं हृदयमपरं बुद्धिमान् साधुमूर्तिः ।
द्वावप्येतौ निशिदिनममोघेन बुद्ध्या नितान्तं
मह्यं सर्वं मधुरवचनैः राजकीयं प्रमेणुः ॥ ५०

सर्वे गाढं हृदयवचनं मामकीनं प्रशान्तं
श्रुत्वा सम्यक् प्रबलपृतनां प्रेषयन्तु प्रदेशम् ।
मेवाड्देशे समरमसुना वार्तया संविरम्य
क्षिप्रं दिल्लीं सकलचमुनाऽऽयान्तु मौनेन वीराः ॥ ५१

शक्त्या हीना गजतुरगसैन्याश्च सर्वे विपत्तिं
लब्ध्वा योद्धुं पुनरपि पुनः नैव यान्तु प्रसन्नाः ।
राणां जेतुं भवति निरतं कष्ट एवात्र राज्ये
राणा साक्षात् समरतरणिः नैव योद्धुं च काङ्क्षे ॥ ५२

इति प्रकामं व्यथया भणित्वा तत्याज तां सत्वरमेव तुर्कः ।
सभां महायोधविभासितां सः प्रशान्तभावैः परिपूतचेताः ॥ ५३

[इति श्रीमत्प्रतापराणायनमहाकाव्ये विजयकाण्डे ' राणाविजयोत्सवं समाकर्ण्य अक्बरः स्वमित्रमण्डलेन मन्त्रयति ' नाम चतुर्थः सर्गः समाप्तः ।]

पञ्चमः सर्गः ।

५. स्वातन्त्र्योत्सवः ।

संगराङ्गणविखेलनविवशा
वाजिदन्तिचयचालनचतुरा ।
नैकशस्त्रयुतपद्गविलसिता
तुर्कशासननिरस्तविचलना ॥ १

युद्धमेव हि विरम्य च सहसा
शान्तिभावनिचयैः खलु सहिता ।
मन्दमन्दचलनेन च कलिता
वाहिनी चलति हेतिविलसिता ॥ २

लज्जया व्रजति कुञ्चितवदना
राजपुत्रभटनिर्जितगरिमा ।
हस्तपादविकलाङ्गकसहिता
मृत्युगह्वरविनिर्गतसरणी ॥ ३

काननव्रतदरीगृहवसितैः
भूपपूरुषपराजितमहिमा ।
नैकयुद्धकरणैर्बहुगलिता
बाधया चलति दर्शितविमना ॥ ४

अल्पकालसमयेऽक्वरपृतना
दिल्लिमार्गमविलम्बितचलनैः ।
प्राययौ गजहयावलिमहती
संविहाय गिरिकाननधरणीम् ॥ ५

स्वप्रतापबलसाधितविजया
सुप्रभातकृतमञ्जुलविभवा ।
याति भारतचमूं बहुलसिता
कल्यसूर्यकिरणावलिमिलिता ॥ ६

युद्धसाधितमहाविजयभरः
सुप्रसन्नवदनो विनुतयशाः ।
स प्रतापनृपतिर्मुदुमधुरं
संजगाद च चमूं प्रति सपदम् ॥ ७

सर्वदुर्गनिचयं खलु समरे
भूपतीन्द्रवशगं बहुचपलम् ।
वीक्ष्य सर्वभटसंहतिकरणात्
तान् जगाद हृदयोद्गतवचनैः ॥ ८

मित्रबान्धवजना मम हृदये
शाश्वताश्च जननीजयचरिते ।
युष्मदीयभुजविक्रमकलिता
भाति भारतमही सुखभरिता ॥ ९

अद्य भाति खलु जीवनसुषमा
नर्तनाभिनयसारितरमणी ।
सर्वदिक्षु नवरङ्गविलुलितैः
भङ्गिमाकलितसुंदरचलनैः ॥ १०

साम्प्रतं विजयसूचितसमयः
राजते परमतोषणभरितः ।
पार्श्वपत्तनविसारितविपणीः
प्रेत्य खाद्यनिचयं खलु कुशलम् ॥ ११

प्राप्य सर्वसुखभासितमतयो
वीरपानमधुसेवनरतयः ।
ध्वस्तमत्र न हि यत् किमपि तदा
माऽऽचरन्तु भवतां कृतिनिचयैः ॥ १२

मा करोतु जनसंततिनिचयं
त्रासभावपरिसर्पितहृदयम् ।
मातृभूमिनिजसंततिचरितं
पालयन्विति दिदेश च नियमैः ॥ १३

अस्मदीयऋजुवर्तनमनिशं
लोकमङ्गलकरं भवति नुतम् ।
वृत्तबद्धपरिधावधिकरणं
योग्यमस्ति ननु भारतचरिते ॥ १४

साम्प्रदायममलं भुवि विनुतं
पूर्वजैर्बहुवर्धितमधुना ।
मा मलं कुरुत कश्मलकरणैः
भाति राष्ट्रममरं भुवि सुगुणैः ॥ १५

एवमेव वहुधा स तु नृपतिः
सर्वसैन्यनिचयं नवगतिभिः ।
संजगाद विपणीस्थितनिचयं
संग्रहीतुमखिलं खलु कुशलम् ॥ १६

गृह्यसूत्रकृतकर्मसु निरतः
संविधाय वहुलानि च नृपतिः ।
धौतवस्त्रपरिवन्धनलसितः
भस्मलेपितसुभालविभासुरः ॥ १७

वीतिहोत्र इव चोज्ज्वलसुषमा-
व्याप्तराजसलसत्तमवपुषा ।
भूतले चलनपावितमहिमा
रूपदीपित इवात्र च विवभौ ॥ १८

वन्धुमित्रपरिवेष्टितनृपतिः
मन्त्रिमण्डलविराजितसुमतिः ।
भार्यया विनुतसंततिसहितः
पार्वतीनिलयमानतशिरसा ॥ १९

प्राययौ विविधगंधिलकुसुमैः
नारिकेलकदलीफलनिचयैः ।
गन्धपाद्यभरितैः वहुकलशैः
गाङ्गवारिपरिवाहितशकटैः ॥ २०

अर्चनां खलु विधातुममलिनां
नागवीरुदिरुहैर्दलनिवहैः ।
पूगजातिफलदैवतकुसुमैः
रत्नसंततिविनिर्मितमुकुटैः ॥ २१

संविधाय बहुवैभवविनुतां
गन्धलेपनसुमावलिभरिताम् ।
मन्त्रपूतमभिषिक्तमधुजलैः
अर्चनां विजयसूचकलसिताम् ॥ २२

देवतायतनमन्दिरनिचये-
ष्वाशु मण्डपतलस्थितदृषदि ।
भित्तिकुड्यतलपार्श्वभुवि नवैः
हेमरत्ननिवहैः खलु मधुरम् ॥ २३

राजवंशचरितानि सुविपुलं
कुड्याभागरचितानि च विमलम् ।
तूलिकाविलिखितानि च चतुरं
सर्वलोकविनुतानि च सततम् ॥ २४

संविधाय बहुवैदिकलसितैः
भारतागमपदावलिकथितैः ।
वेदिकां कुशलसैनिकरचितां
चक्रुरेव नियमैः खलु लसिताम् ॥ २५

भामसाहिनृपकृष्णसमुचितं
चासनं नवरुचा सुलसितम् ।
मन्त्रपूतजलसेचनलसितं
मञ्जुदीप्तिबहुचित्रितवलयम् ॥ २६

दम्पती व्रतविधानविलसितौ
वैभवैर्भुवि शचीपतितुलितौ ।
सर्वलोकजनतानुतचरितौ
स्वाभिषिक्ततनुदीपितमहितौ ॥ २७

वन्दिमागधनुतामलचरितौ
राजपुत्रकृतमण्डनलसितौ ।
हेमरत्नरजतावलिभरितौ
मौक्तिकाञ्चितसुभूषणसहितौ ॥ २८

राजपुत्रपरिवेष्टितनृपतिः
तूर्णमासनतलात् बहु विनयम् ।
प्रोद्दतिष्ठदतिकौतुकलसितः
सोदरान् प्रति जगाद सुमधुरम् ॥ २९

अस्मदीयगुरुदैशिकमननं
देशभक्तिपरिपूरितचरितम् ।
स्वीयधाटिचयमूलकमतुलम्
चाक्वरेण बहुवर्धितमनिशम् ॥ ३०

कारणेन खलु तेन हि चरितं
देशगौरवमजस्रममलिनम् ।
देशभक्तकुलजाधिपमननं
सर्वदैशिकहिताय खलु कृतम् ॥ ३१

अस्मदीयविजयास्पदपुरुषान्
प्राणदाननिरतान् बहु चतुरान् ।
वैरिमर्दनमृतान् निजपुरुषान्
संस्मराम शुभसूचकदिवसे ॥ ३२

मोक्ष एव भुवि मानवचरिते
चान्तिमः परमपावनलसितः ।
साध्यते स तु विरागगुणयुतो
राष्ट्ररक्षणविधौ ननु मरणे ॥ ३३

राष्ट्ररक्षणविधौ खलु पूतनाः
शत्रुभिः कृतरणाङ्गणदहने ।
पेतुरेव समिदाकृतिलसिताः
मोक्षमार्गमविलम्बितुमनिशम् ॥ ३४

तादृशीयपृतनावरगरिमा
वीक्षिता कदनसीम्नि च निरतम् ।
शत्रुमर्दनरता कुशलयुता
चास्मदीयजयसाधनविनुता ॥ ३५

आत्मशान्तिवसनाय सुमनसा
चैकलिङ्गमिह सादरमधुना ।
प्रार्थयामि खलु दैवतममरं
देशरक्षणकृतां ननु सुमनसाम् ॥ ३६

आमुखं कृतमिहात्र च समरे
साम्प्रतं परजनैः कृतविकटे ।
अस्ति नाटकमहो भुवि लसितं
भाविभारतजनावलिचरितम् ॥ ३७

आतपत्रगतमत्र निजजनं
कर्तुमस्ति नववौद्धिकगरिमा ।
तद्विधाय खलु भारतममरं
स्वेच्छया मधुसदागतिलसितम् ॥ ३८

जीवने मम करोमि जनमिमं
राष्ट्रभक्तियुतमेव हि चपलम् ।
तेन साधयितुमेव च सहसा
शात्रवोपरि जयं मम विनुतम् ॥ ३९

सर्वदुर्गनिचयाः शयवशगाः
शत्रुशृङ्खलयुताः खलु शतधा ।
इन्दिरायुतचितौडितिं महितः
दुर्ग एव हि विभाति नयनयोः ॥ ४०

एवमेव बहुरञ्जितमनसा
भामसाहिनममोधितवचसा ।
वर्णयन् नवरसोत्कटमधुरैः
भावसञ्जितसुगन्धिलसुपदैः ॥ ४१

तावकीनपदनीरजरजसा
भूषयामि निटलं मम सततम् ।
मातृभूमिभरतावननिरतं
तावकीनशुभनाम च धनद ॥ ४२

प्रातरेव हि जपामि च शुभदं
चैकलिङ्गसममेव च सुखदम् ।
नामधेयमिह तावकममलं
जीवितान्तमथि मामकहृदये ॥ ४३

आकलय्य मधुवाक् वननृपते
भक्तिपूर्णलसितं श्रवणपथा ।
भामसाहि विनयावृतवदनः
संजगाद मधुसारितवचनैः ॥ ४४

तावकीनकरुणामयवचसा
शान्तराजितदृगञ्चलमनसा ।
राजलोकमिह मञ्जुलचरितैः
पासि देव भुवि भारतधरणीम् ॥ ४५

त्वादृशोऽत्र भुवि कीर्तितनृपते
नैव जात इति साधु विकथने ।
गौरवास्पदमहो जनविनुत
ते भवन्तु नवशोभनदिवसाः ॥ ४६

एवमत्र विनतं पटुविनुतं
राजचन्द्रमविलम्बितमतुलम् ।
भामसाहि नृपमण्डलशशिनं
व्याजहार बहुधामलवचसा ॥ ४७

भूपतीन्द्र तव पावनचरितं
भारतस्य निरतं रसभरितम् ।
रक्षितुं महितभारतधरणीं
प्रेषितोऽस्ति हरिणा जनविनुत ॥ ४८

तावकीनसितकीर्तितसुषमा-
भ्राजिताऽमलसुधामयभुवने ।
गौरवास्पदमितीह निवसने
भारतीयजनता खलु मुदिता ॥ ४९

मन्दमेत्य विनयावृतनृपतिः
कृष्णसिंहचरणौ मृदुमनसा ।
भावयन् नवजलेजविलुलिते
चाननाम पुलकाञ्चितवपुषा ॥ ५०

आबभाण नृपते मम जनक
मह्यमस्ति कुलदैवतमनिशम् ।
नीतिपूर्णविविधोत्तमचरितैः
मार्गदर्शनकरः खलु विपदि ॥ ५१

त्वां विलोक्य नवविक्रमभरितं
कीर्तनीयममलं तव चरितम् ।
युद्धमत्र बहुधा कृतमधुना
केवलं त्वमसि संगरविजयी ॥ ५२

भीमचन्द्र समराङ्गणविनुत
छायया सममहो मम परिघौ ।
पञ्चविंशतिसमा निरवधिकं
कष्टनष्टनिचये मम भवसि ॥ ५३

भिल्लमित्र निवहान् स्वजनचरान्
बन्धुपुत्रपरिवारसहयुतान् ।
अस्मदीयजयकारणलसितान्
नौमि हार्दिकपुरस्सरममलान् ॥ ५४

अत्रान्तरे केचन भिल्लवर्गाः
संतोषभारेण सुवाद्ययुक्ताः ।
स्वातन्त्र्यसंराजितराजवर्गैः
नाट्यं विचक्रुः विजयाभिधानम् ॥ ५५

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे 'स्वातन्त्र्योत्सवः' नाम पञ्चमः सर्गः समाप्तः।]

षष्ठः सर्गः ।

६. युवराजामरसिंहस्य राज्याभिषेकः ।

आज्ञापालननिरतं विषादमग्नं
तुर्कानीकमखिलमेव चाशु यातम् ।
दिल्लीपत्तनमवनीपतेः समक्षं
निःशब्दं प्रणतिपरं सलामकृत्यैः ॥ १

स्वातन्त्र्योत्सवसमयेषु कीर्तितस्तु
राणासर्वजननराधिपैश्च शान्तम् ।
लाजैः पुष्पनवपरागरङ्गचूर्णैः
संलिप्तः लसति विभाकरेण तुल्यम् ॥ २

सर्वे भिल्लवनचराः सुपुष्पहारैः
सर्वान् योधगणनृपान् मुदा विहारैः ।
खाद्यान्नैः मधुरपदार्थचारुपेयैः
संतृप्तानपरिमिताशयान् विचक्रुः ॥ ३

स्वातन्त्र्येण स धरणीपतिस्तु दीप्तः
आनन्दावृतपृतनापरीतरूपः ।
सर्वे वीरवरसुयोधमण्डलं तु
हस्तान्दोलनविनुतं विधाय रेजे ॥ ४

किञ्चित् साश्रुनयनभासुराननश्च
दीर्घापाङ्गलसितभावनाऽभिषिक्तः ।
चैतन्यालसितसुचेतकाख्यवाजिं
संभाव्यात्र मनसि दुःखपीडितोऽसौ ॥ ५

तद्दृश्यं प्रबलमनोविकारयुक्तं
चालोक्यात्र विनुतशक्तिसिंहभूपः ।
आगत्याशु नृपतिपादसन्निधिं सः
प्राचष्टे भुवि मम देव मा त्वरोदीः ॥ ६

विस्मर्तव्यमिह गतं सदा तु सम्यक्
स्मर्तव्यं भवति नवं सचेतनं हि ।
येनास्माकमिह विजायते सुमार्गः
चैतन्यायुतबहुधर्मयुक्तरूपः ॥ ७

स्वातन्त्र्ये विपिनतले हयाधिराजः
चैतन्यं मम कठिनेषु संगरेषु ।
प्रादान्मे नयनसमक्षमेति दिव्यं
चोड्डीनैर्मधुरनवरूपचेतकोऽयम् ॥ ८

स्यादश्वोऽयमिह शुभेऽस्मिन् चेतकाख्यः
आनन्दस्य मम तु नावधिर्भवेच्च ।
आनन्दाम्बुधौ सततं विमज्जितोऽस्मि
दुर्गान् शत्रुनिचयहस्तबन्धनस्थान् ॥ ९

स्वायत्तं परजनमर्दनं विधाया-
हं सैन्यैः यमभटतुल्यवीरयोधैः ।
सार्धं भामि सपरिवारमेव सर्वैः
मित्रैः श्रीयुत मम भामकृष्णभीमैः ॥ १०

स्वातन्त्र्यं भुवि ननु चैकलिङ्गदत्तं
मह्यं चालसति सदा पवित्ररूपम् ।
नैकाब्दाहवफलितं भटैर्गृहीतं
चारुक्लावविपुलरूढमत्र भाति ॥ ११

कोमल्मीयरवरदुर्गमन्दिरे सः
मेने पुत्रममरसिंहमाशु कर्तुम् ।
राणां तं यवनचमूचयं विधातुं
चित्तौडं स्ववशमिमं विधातुमेव ॥ १२

शक्त्या भासितयुवकाः खलु स्वदेशं
शत्रुभ्यः भुजबलबुद्धिशक्तियुक्ताः ।
संत्रातुं जगति भवन्ति योग्यरूपाः
मत्वा चैवमिह महीपतिः तदानीम् ॥ १३

सान्द्रश्मश्रुयुतयुवानमीक्ष्य राणा
चानन्दामृतमधुशीकरैः प्रसिक्तः ।
स्नायुर्भांखिततनुयष्टियुक्तपुत्रं
मेने तं हरिशिशुतुल्यभूपतीशम् ॥ १४

आदित्यांशुनिभतनुप्रकाशपुञ्जैः
पीनोरःस्थलविपुलाङ्गसन्धिबन्धैः ।
संयुक्तो मदभरलोचनान्तदृग्भिः
सानन्दं विलसति भारमूर्तिरूपे ॥ १५

साक्षात् भूतलवरसूर्यवंशजातं
वीक्ष्यासावमरकुमारचारुमूर्तिम् ।
स्वात्मानं तनयमनोहराङ्गदीप्त्यां
चानन्दे परमसुखे विभाति भूपः ॥ १६

आत्मा वै तनय इतीव साधु शंसन्
आश्चर्यैः बहुविधनव्यभावपुञ्जैः ।
आदर्शे निजतनुभावभङ्गिमादीन्
संपश्यन्निव स तु भाति पुत्रदेहे ॥ १७

प्राज्ञद्दोर्बलयुतभीममूर्तितुल्यं
मध्ये संगरनुतसव्यसाचिभान्तम् ।
मत्तेभावलिघटभेदनेषु सिंहं
नेत्रैः पानमिह करोति भूपतीन्द्रः ॥ १८

उद्युक्तः चरमदशां समागतः सः
सान्तत्यं भयदरणेषु शत्रुहारी ।
राजा तं तनयममोघशक्तियुक्तं
राजानं भरतधरातले विधातुम् ॥ १९

पुत्रं यौवनमधिरूढमाशु राणां
कर्तुं चामलधिषणावृतः प्रतापः ।
भामासायुतसकलावनीन्द्रपूर्वं
चर्चां कर्तुममरशक्तिकृष्णभूपैः ॥ २०

सर्वे भूपतिकुलभासुराः प्रकामं
संहृष्टाः द्रुतमिह लोकमङ्गलार्थम् ।
पारंपर्यमिनकुलक्रमागतार्थान्
संकर्तुं वयमिह चानुज्ञां ददामः ॥ २१

भूयादेव नरपते शुभस्य शीघ्रं
आलस्येन च भवतीह चामृतं श्रीः ।
तस्मादत्र तनयराज्यभारकार्यं
कुर्वन्त्वाशु जनमनोरथानुसारम् ॥ २२

भिल्लान् राजकुलकुमारमण्डलं सः
तूर्णं मङ्गलमयवाद्यवादकांश्च ।
आहूयान्यपुरजनावलिं प्रतापः
नैकाहारमधुरभक्ष्यभोज्यकर्तॄन् ॥ २३

विप्रान् तान् परमपवित्रवैदिकाग्रान्
नानाशास्त्रनिचयसारपारगान् सः ।
पूजायागकरणसव्यमार्गभाजः
पौरोहित्यविकसितात्मसौख्यसक्तान् ॥ २४

सानन्दं वनचरवीरयोधवर्गैः
पत्नीपुत्रपरिजनैः समं समेत्य ।
कोमल्दुर्गभवनकुड्यवप्रभागान्
चक्रे सुन्दरमनुलेपनैः सुधात्तान् ॥ २५

संमृज्याशु परिसराणि शोधनीभिः
सप्तार्चिद्युतिसमदिव्यरङ्गभाभिः ।
कुम्भान्निर्गतसलिलप्रसेचनैस्ते
कोमल्मियरधरणीं नवां विचक्रुः ॥ २६

गाङ्गं वारि विविधजीववाहिनीभ्यः
वारीणीह शकटपूर्णपात्रकेभ्यः ।
पारावारसलिलमेव वाहनेभ्यः
चानीयाद्विवनविहारभिल्लवर्गाः ॥ २७

निक्षिप्यामरयुवराजमण्डनार्थं
नानारत्नचयमनोहरमण्डनानि ।
आनीयाखिलनृपकुलयोग्यकानि
जग्मुस्तत्र नवसभागृहाणि कर्तुम् ॥ २८

द्राघिष्ठामलवरपीतकङ्कपत्रैः
वैशाल्यायुतनवमण्डपं सुकाष्ठैः ।
निर्मायाशयसमदीर्घतालपत्रैः
आच्छाद्याशु गहनभिल्लवर्गपुत्राः ॥ २९

नानावर्णललितसुन्दरांशुकाक्तं
चक्रुश्चाखिलजनमानसानि रम्यम् ।
चाकृष्टानि यथा भवन्ति कृत्यैः
सान्तत्यं मधुरमनोहरं तथा ते ॥ ३०

आश्रीमञ्जुलनवपर्णतोरणैस्ते
द्वाराणि प्रविमलकुङ्कुमाञ्चितानि ।
हारिद्राकलितसुगन्धरम्यलिप्तैः
पुष्पालंकरणमनोहराणि चक्रुः ॥ ३१

सिंहद्वारतलसुनारिकेलपर्णैः
रम्भास्तम्भहरितपीतदीर्घपर्णैः ।
नानारङ्गसुमलतालिवेष्टिताभैः
रत्नालङ्कृतनववेदिका विरेजे ॥ ३२

आनन्देन परमभक्तिभावपूर्णाः
भिल्लाः राजतनयमण्डलैश्च युक्ताः ।
गायन्त्यः महितमहाप्रतापकीर्तिं
चाकुर्वन्त्यखिलशुभानि कार्यलग्नाः ॥ ३३

पौरोहित्यकरणतज्ज्ञभूसुरास्तु
पुत्रं चामरनृपतिं शुभे मुहूर्ते ।
सौवर्णाञ्चितरजतासने सुखासी-
नं कृत्वा विविधजलाघनादिमन्त्रैः ॥ ३४

प्राभातारुणतुलितारुणाभरम्यं
चोष्णीषं रजतलतासुचित्रिताभम् ।
सौवर्णामलसिततन्तुवेल्लिताङ्गं
तारुण्याञ्चितसुकुमारराजयोग्यम् ॥ ३५

सौवर्णाञ्चितनवपीतवस्त्रयुक्तं
शिञ्जाचित्रितकलनिःस्वनाभिसक्तम् ।
केकीवर्हविलसिताभमञ्जुरूपं
चोष्णीषं शिरसि महार्घकान्तिभान्तम् ॥ ३६

निक्षिप्याक्षतसुमपूर्वकं शुभाङ्गैः
चानन्त्यं सुभगकवन्धशीकरैस्तम् ।
मन्त्रापूतममलसुगन्धप्रसूनै
श्चित्राङ्गे प्रविमलवर्णवस्त्रभान्तम् ॥ ३७

खड्गं काञ्चननवरत्नमुष्टियुक्तं
कालीभीकररसनासमानभान्तम् ।
श्यामध्यामरनृपदेहमध्यभागे
क्षिप्त्वा कुङ्कुमवरवर्णदीपरेखाम् ॥ ३८

आशीर्वादभरितसुस्वरात्तमन्त्रैः
आचन्द्रार्कलसितकालमानमत्र ।
सर्वं भारतमनिशं सुपालनेन
राष्ट्रं धारयतु भवान् सुशक्तियुक्तः ॥ ३९

पौरोहित्यनिपुणभूसुरान् प्रतापः
चाह्वयात्र विविधविधानतः शुभेऽस्मिन् ।
लग्ने दिव्यशुभमुहूर्ते राजते सः
शास्त्रेष्वागमनिपुणैस्तदेव कर्तुम् ॥ ४०

आतृप्तान् बहुविधदक्षिणाप्रदानैः
भास्वद्भूसुरपरिवारवैदिकान् सः ।
कृत्वाऽऽशीर्वचनसुमाक्षतान् प्रपूतान्
लब्ध्वा चाशयपरिपूर्णमानसोऽभूत् ॥ ४१

रेजे भारविगलितः प्रतापराणा
मत्तेभेन्द्र इव निरस्तदानधारः ।
शान्तात्माऽचलगतिनव्यरूपमाप्तः
प्राभातीह मनसि नैकभावमग्नः ॥ ४२

राणाऽभूदमरसुतः पराक्रमी सः
मेवाडस्तु परशये विभाति लग्नः ।
स्वप्नान् मे सुमधुररूपभासमानान्
राष्ट्रं भारतमिह दीप्तिमच्च कुर्यात् ॥ ४३

इत्येवं बहुविधभावभासमानः
राणाभूपतिरिह भामसाहियुक्तः ।
श्रीकृष्णेन मिलितभीमचन्द्रपृक्तः
पुरं वीक्ष्य च बहुधा मुदा विरेजे ॥ ४४

राज्ञः ताः नवविधरत्नदीप्तिदीप्ताः
हरिद्राऽक्षतसुमकुङ्कुमादिभिश्च ।
संपृक्ताः बहुलसुवर्णपुष्परागैः
कर्पूरारतिमिह मङ्गलादिगीतैः ॥ ४५

तस्मै प्राददुरवनीभृते सहर्षं
कल्याणीललितपहाडिरागरङ्गैः ।
आनन्दामृतपदवर्षिणीरसैस्ताः
नाट्यैः दीपलसितहावभावयुक्तैः ॥ ४६

भिल्लाः डिंडिमपणवानकैः समेताः
चागत्यात्र ललितचालनैः सुगीतैः ।
वाद्यादीन् पटुतमवादनैः प्रयुक्तान्
कृत्वा चाशु मधुरनाट्यैः विभान्ति ॥ ४७

मातङ्गाश्वपदचयैः सभक्तिकं नु
सैन्याङ्गैः प्रकटितराजगौरवैश्च ।
मुद्रापूर्वकरणवन्दनैः सुरम्यं
चक्रे स द्युमणिपताकवन्दनं तु ॥ ४८

सर्वाण्यत्र तरुणवीरमण्डलानि
संडीनैः बहुलकृपाणचालनैश्च ।
अभ्यारोहणमवरोहणानि चक्रुः
राणामण्डलपरिवारतोषणानि ॥ ४९

नैकैर्गीतकलिततालवाद्यगानैः
गेष्णुनिचयनर्तकीवृन्दैः ।
राजस्थानललितनाट्यमण्डलैः
संगीतायतनमिवाबभौ सभाऽत्र ॥ ५०

राणाभूपतिरिह काश्यदैहिकाङ्गैः
सान्तत्याहवलुलिताङ्गसन्धिबन्धैः ।
अनन्त्याहतिततिनुन्नशक्तिहीनः
रेजे पुत्रकयुवराजमूर्तिमीक्ष्य ॥ ५१

कोमल्यः ललितशरीरवल्गुदीप्ताः
पुष्पालङ्करणविभासुराङ्गरम्याः ।
मन्दाक्षालसितनिशाकरोज्ज्वलास्याः
नृत्यन्त्यत्र बहुविधाङ्गिकास्यभावैः ॥ ५२

एवं राज्यभारं पुत्रे निक्षिप्य राणाप्रतापः ।
कर्तव्यं ब्रूते तं चरमशासनमिव सर्वयोधान् प्रति ॥ ५३

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे 'युवराजामरसिंहस्य राज्याभिषेकः' नाम षष्ठः सर्गः समाप्तः ॥]

सप्तमः सर्गः ।

७. राष्ट्रपुरुषस्य राणाप्रतापस्यान्तिमसन्देशः ।

तोषैरनस्तैः परिनिष्ठितां चमूं
चालोक्य राणा प्रियबन्धुवर्गकैः ।
उत्तेजभावावृतभाषणं तदा
कर्तुं च तेभ्योऽनुपदं व्यचारयत् ॥ १

सर्वान् समाहूय महाधराधिपो
राणाप्रतापः स्वबलान् जयावृतान् ।
कोमल्मियर्पर्वतमस्तके द्रुतं
संबोधयामास विषादभाषणैः ॥ २

अनन्तकालाद् वहतीह संस्कृतिः
धरातले राजितभारतावनौ ।
तां संस्कृतिं नाशयितुं पराः सदा
धाटीभिरेवात्र समागता भृशम् ॥ ३

हे राजपुत्रा भुवि भारतं प्रियं
स्वर्गश्रिया भूषितमेव सर्वदा ।
एषा धरा सर्ववसुन्धरा मुदा
सस्यैरनन्तैः प्रतिभाति भूतले ॥ ४

पीयूषतुल्यैः सलिलैः प्रपूरितैः
नैकैस्तटाकैः सुरसैः सरोवरैः ।
उत्तुङ्गशैलाग्रशिखालिपर्वतैः
कासारशोभालसितैश्च भूमिभिः ॥ ५

आभाति चानन्त्यमहार्हसंपदा
लोकं समस्तं स्ववशं विधाय सा ।
सर्वेषु कालेषु समोष्णशीतला
नैसर्ग्यसौन्दर्यविलाससंयुता ॥ ६

गङ्गानदीत्यादिमतल्लिकायुता
सस्यैः प्रपूर्णा लसतीह मेदिनी ।
संपूर्णवेदान्तकथाविलासिता
धर्मार्थमोक्षादिविचारदायिनी ॥ ७

कुत्रापि नास्त्येव धरातले नृपाः
चैतादृशी भूतलनाकदेवता ।
आयान्ति मर्त्या इव देवताः प्रियाः
मर्त्याश्च देवा इव भान्ति सर्वशः ॥ ८

अन्यैर्विदेशीयगणैश्च भारतम्
चाक्रामितं ध्वस्तमनेकमन्दिरम् ।
क्रौर्यैः विचारैः कटुकृत्यनाशितं
गोहिंसया सर्वमिदं ह्यपावितम् ॥ ९

पाषण्डभावैः परिनिष्ठिताः पराः
आनन्त्यनष्टं प्रविधाय भारते ।
अस्माभिरेवं सहवासिनोऽपि ते
मे मातृभूमिः खलु भारतं भुवि ॥ १०

इत्यादिशब्दान् बहुधाऽपि जीवने
व्याहृत्य देशीयपथि प्रवर्तकाः ।
आभान्ति नैवात्र कृतघ्नजीविनः
भावैरुदारैः जननीं स्तुवन्ति ते ॥ ११

अस्मासु नास्त्येव समैक्यभावना
देशीयभक्तिः प्रखरा महीतले ।
सर्वेऽपि देशीयजनाः प्रयान्ति तं
तुर्कं महीपं धनलोलुपाः भृशम् ॥ १२

आहारवेषैः स्वविहारभाषणैः
प्रत्येकदेशस्य विभाति संस्कृतिः ।
को नाम संत्यक्ष्यति नैजसंस्कृतिम्
संक्रामितां पूर्वजभावपावितम् ॥ १३

यः कोऽपि संत्यजति सैव भूतले
भ्रष्टो हि भूत्वा भजते स्वनाशनम् ।
धर्मे स्वकीये निधनं वरं प्रजाः
देशं स्वकीयं परिरक्षणे रताः ॥ १४

सन्त्येव केचिच्च परान्नलोलुपाः
दास्ये तु संलग्नमनःप्रवृत्तयः ।
संध्यात्रये स्वोदरपूर्णभक्षकाः
काका इवात्रैव जना धरातले ॥ १५

तेषां न चैवास्ति पवित्रबन्धनं
देशीयभावैरुत काव्यगोष्ठिभिः ।
गीतैरमोघैर्नवभावसंश्रुतैः
नाट्यैः परं धामपथि प्रवर्तकैः ॥ १६

ते यावनाः पाशवशक्तिसंयुताः
संतक्ष्य तीक्ष्णैः खरखड्गचालनैः ।
वैचित्र्यरूपं प्रविकल्प्य सन्ति ते
त्रैलोक्यवन्द्यां भरतावनीं खलाः ॥ १७

ऐक्यं विना भारतदेशवासिनः
सान्तत्यवैषम्यपरीतमानसाः ।
आनन्त्यघाटीरयताडितास्तदा
ते धर्मशालां विदधुश्च भारतम् ॥ १८

क्रौर्येण ते तौर्किकवंशजाः शनैः
मोहम्मदीया रुधिरान्नलोलुपाः ।
देवालयादीन् बहुशिल्पमण्डितान्
विद्यालयादीन् शतधा ह्यनाशयन् ॥ १९

तत्रैव तेष्वेव मशीदुदर्गकान्
निर्माय राज्यं भरतावनौ स्वयम् ।
हिंसाप्रवृत्त्या खलु कर्मभिः प्रजाः
धर्मान्तरे ताः परिवर्तयन्ति ते ॥ २०

रेजुः प्रजाः स्वार्थसुखाय संततं
धर्मान्तरं प्राप्य समस्तसंपदा ।
तुर्काधिकारस्य नतोत्तमाङ्गकाः
विस्मृत्य राष्ट्रं नुतसंस्कृतिं प्रियाम् ॥ २१

आक्रम्य देशं भरतावनीं खलाः
प्रारेभिरे पालयितुं च दैशिकान् ।
के नाम ते भारतवर्षपालने
देशीयधर्माश्च विभिन्नधार्मिकाः ॥ २२

जानन्ति नैवास्य सुराष्ट्रगौरवं
कीर्तिं महिम्नो वृहदीयसंस्कृतिम् ।
शास्त्राणि धर्मान् च कथासुभाषितान्
अन्यांश्च ते पाशवशक्तिसंयुताः ॥ २३

सूर्यस्य रङ्गा इव भारतं भुवि
नानाप्रकारैर्मनुजैः प्रसारितम् ।
सर्वे मिलित्वा वरशुक्लधामवत्
आभान्ति देशे ननु चैकभावुकाः ॥ २४

स्वातन्त्र्यसंपादनमेव मामकं
ध्येयं विभात्यत्र न चैव पालनम् ।
यः कोऽपि राजा भरतावनीं नयैः
चाशास्तु सुक्षत्रिय एव भारते ॥ २५

आन्ध्रीं नताङ्गीं नृपवंशशोभिनीं
वीराङ्गनां भारतराष्ट्रभार्गवीम् ।
एकात्मतां साधयितुं स्वभारते
राणाप्रतापः परिणीतवान् स्वयम् ॥ २६

तस्याश्च पुत्रोऽमरसिंहभूपतिः
राणाप्रतापस्य च रूपमाश्रितः ।
जातोऽधुना सर्वनृपावलिप्रभुः
समस्तराष्ट्रस्य च भाविशासकः ॥ २७

सर्वे महीपा मिलिताः सदा भृशं
दृष्ट्यां विनिक्षिप्य समग्रभारतम् ।
तुर्कस्य भूपस्य कुभावनां सुतैः
चितौडदुर्गस्य कृते यतन्तु भोः ॥ २८

सान्तत्यरूपे भवितव्यमेव तत्
युद्धं तु तुर्केण विनिश्चितं महत् ।
अन्तं प्रयात्वत्र परस्य पालनं
नैकैर्प्रयत्नैः भुवि भारतावनौ ॥ २९

स्वातन्त्र्यमेवात्मविकासकारणं
दास्यं विभात्येव घनान्धकारवत् ।
राजेन्द्रभानोरुदयान्निरन्तरं
स्वातन्त्र्यमेवात्र भविष्यति ध्रुवम् ॥ ३०

स्वातन्त्र्यभावो भरतावनौ पुरा
जातो महीयान् पुरुषोत्तमात् ध्रुवम् ।
तस्माच्च कालात् प्रसृता सुभावना
वृद्धिं जगामात्र मदीयजीवने ॥ ३१

आनन्त्यधाटीनिवहाच्च संगरात्
वार्ताप्रसाराय विहीनमध्यमात् ।
देशे च सर्वत्र विभिन्नमन्त्रणात्
भ्रष्टा स्वदेशीयमहोन्नतिः प्रिया ॥ ३२

पामस्वरूपेण विशालभारते
व्याप्नोति तुर्कीयबलेन शासनम् ।
तच्छासनस्यात्र कृतावधिर्मया
कुर्वन्तु यूयं बहुधा विनाशनम् ॥ ३३

अस्मादृशाः केचन दक्षिणे भुवि
प्रोद्भूय देशीयकथाप्रबोधिताः।
अन्तं विधास्यन्ति च तुर्कशासनं
एषा तु दीर्घा निशिता प्रणालिका॥ ३४

स्वातन्त्र्यसंपादनतत्परा भृशं
राणाप्रतापादिमहीश्वराः पुरा।
चक्रुश्च घोरं ननु हल्दिघाद्रणं
चान्तं विधातुं परपालनां खलु॥ ३५

इत्यादिशब्दैः नृपपुत्रमण्डलं
देशस्य चारित्र्यमहत्त्ववर्णनम्।
कृत्वा च दिव्यं खलु काव्यसंततिं
लोके विभान्त्येव कवीश्वरा ध्रुवम्॥ ३६

नाहं प्रवक्ष्यामि च भावि मामकं
कालं कियन्तं निवसामि भारते।
अस्तित्वमेवंविधमत्र मामकाः
शङ्का विभात्येव च देशबान्धवाः॥ ३७

सर्वे वयं भीकरवन्यजीवनं
चालम्ब्य पञ्चाधिकविंशतीस्समाः।
स्वातन्त्र्यसिद्धयै प्रविधाय चाहवान्
दुर्गान् पराणां करगान् पुनः स्वयम्॥ ३८

अप्राप्य हस्ते विलसाम भारते-
ऽप्यत्युन्नतिं चित्तडदुर्गभूपतिम्।
देशे भृशं शान्तिविहीनमानसाः
दुर्गाधिराजाय यतन्तु जीवने॥ ३९

पाटेश्वरी जीवनमार्गदर्शिनी
जाता च हेतुः जयसाधने मम ।
संतानजालं नगमस्तकाद् वनं
घोरातिघोराद् विपिनाच्च पर्वतात् ॥ ४०

नीत्वा प्रशान्तं बहुकष्टमिश्रितं
रात्रिंदिवं सा खलु भोजनं विना ।
संयापयामास दिनानि कानने
स्वातन्त्र्यदीक्षामवलम्ब्य मानिनी ॥ ४१

भिल्ला मया सार्धममुत्र कानने
सर्वेषु युद्धेषु च भागदायिनः ।
भूत्वा च मह्यं विजयं ददुर्भृशं
तेभ्यो ददाम्यत्र नमांसि नित्यशः ॥ ४२

भीमाभिचन्द्रो मम कृष्णभूपतिः
भिल्लप्रवीरो वनराजचन्द्रमाः ।
ते साधयामासुरहो स्वयं जयं
स्वातन्त्र्यवीरा ननु सर्वयोधकाः ॥ ४३

अन्ये सुवीराः रणरङ्गसैंहिकाः
शत्रून्निहत्याहवरङ्गघातिताः ।
तेभ्यः प्रशान्तात्मसुखाय मौनिनो
भूत्वा वयं वन्दनमाविधेम भोः ॥ ४४

यश्चेतको मामकजीवने प्रियो
मां हल्दिघाट्यां बहुधा ह्यरक्षयत् ।
तस्मै वयं सर्ववनेचरैः समं
चात्मप्रशान्त्यै विदधेम वन्दनम् ॥ ४५

अस्माभिरेवं स च तुर्कभूपतिः
योद्धुं विरक्तः सुखहीनशासकः ।
जाता वयं शल्यसमानतेजिताः
शय्यातळे शाश्वतचित्ततोदकाः ॥ ४६

तस्माच्च तुर्कः सहसा स्वयोधकान्
युद्धान्निवृत्तान् भवितुं ह्यशासयत् ।
राणा बभूवाद्य महाघृणिः स्वयं
जेतुं च तं नाहमहोऽस्मि साम्प्रतम् ॥ ४७

शक्तः तथेत्यत्र विषादमज्जितः
मानेन नित्यं कुरुते स्म मन्त्रणाम् ।
तस्मात् वयं प्राप्य जयं तु शाश्वतं
संराजमानाः प्रभवाम भूतळे ॥ ४८

तुर्को यदा स्वीयचमूश्च संगरात्
दिल्लीं समायातुमिमाः समाह्वयत् ।
ज्ञातं च लोके सपदं प्रतापराट्
तथ्यं विजेता ननु तुर्कभूपतिः ॥ ४९

राष्ट्राय यद्यत् करणीयमस्ति मे
दीक्षायुतेनात्र कृतं मुदा मया
तुच्छं वपुः सर्वमिदं समर्पितं
स्वातन्त्र्यसंपादनकारणाय वै ॥ ५०

गात्रं मदीयं रणहेतिमण्डितं
शक्त्या विहीनं गलितं विकम्पते ।
संवर्धते दैहिकरक्तपीडनं
कर्तव्यमद्यैव समाप्तमत्र मे ॥ ५१

इति पुलकितगात्रो किञ्चिदानन्दगत्या
प्रविमलमधुभावैः सैनिकान् बोधयित्वा ।
कृततनयशरीरालिङ्गनात् प्राप्तसौख्यः
अविदितरससिन्धौ मज्जनं प्राप राणा ॥ ५२

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे ' राष्ट्रपुरुषस्य राणाप्रतापस्य अन्तिमसन्देशः ' नाम सप्तमः सर्गः समाप्तः ।]

अष्टमः सर्गः ।

८. राणावीरस्वर्गाधिरोहणम् ।

व्याधिपूरितवपुर्मनुजपतिः
राज्यभारममरे निजतनये ।
न्यक्षिपद् बहुधुरां विजयभराम्
मन्त्रिमण्डलपुरः शुभसमये ॥ १

आरवालिनगमध्यविलसिते
कोमळेति गिरिमस्तकशिखरे ।
शक्तिसिंहतनयामरसहितो
भार्यया वसति भूपतिरतुलम् ॥ २

हल्दिघाट्भुवि रणे क्षतदलितैः
नैककष्टभरितैः बहुविषयैः ।
छिद्रितं दृढतनुः कुलिशसमं
चालिनीव लसितं खलु नृपतेः ॥ ३

आयुषः कटुतमे ननु समये
चाकरोत् स तु महीधरविपिने ।
शैलखण्डशयनं भुवि नृपतिः
हंसतूलशयनं न च कृतवान् ॥ ४

सर्वगात्रपरिपीडनदलितः
चिन्तया व्यथितबौद्धिकसरणिः ।
भूतले कुशलवाकलितकटे
व्याधिपूरितनृपः खलु विबभौ ॥ ५

कालचक्रचलनेन शिथिलितं
देहदार्ढ्यमतुलं ननु नृपतेः ।
तेन मृत्युशयनं खलु स ययौ
पाण्डुरोगपरिपीडितवपुषा ॥ ६

औषधादिनिचयैः कटुकलितैः
पथ्यपानकयुतैः फलभरितैः ।
तस्य सेवनमहर्निशमतुलं
चक्रुरेव निभृतं बहुभिषजः ॥ ७

भूपतेर्विशदभालतलतटं
हैमखण्डयुतवस्त्रसुपिहितम् ।
मस्तकात् पदतलं ज्वरकिरणैः
तापितं च विशदं महितवपुः ॥ ८

तालवृन्तकृतशीतलपवनैः
वीजयन् लसति कश्चन नृपतिः ।
पानपात्रपरिपूरितसुरसं
यच्छतीह धरणीपतिरमलं ॥ ९

आविलोक्य नृपतेः स्थितिमशुभां
दुःखतप्तहृदयाः प्रियसुहृदः ।
अश्रुपूर्णनयनैर्बहुकलिताः
शब्दहीननिनदैः खलु रुरुदुः ॥ १०

बन्धुमित्रपरिवारयुतकुलैः
मन्त्रिमण्डलविसर्पितनिवहैः ।
शोकदीप्तपटुगद्गदकलितैः
शोकपूरितमिदं ननु सदनम् ॥ ११

भिल्लवर्गनिचयं ननु विपिने
चाम्लतिक्तकटुमिश्रितगुळिकैः ।
औषधान् मधुलतावलिकुसुमैः
संविधाय च ददुर्नरपतये ॥ १२

आविलोक्य तनयं मुदितनृपो
हर्षपूर्णनयनो बहु विलसन् ।
एहि मामकतनूभव तनय
मामकीनमरणोत्तरसुविधिम् ॥ १३

धर्मशास्त्रकथितैर्गतिकरणैः
भारतीयविहितं कुरु तनय ।
पुत्रपार्श्वमरणं मम सहजं
स्वर्गलोकगमनाय च भवति ॥ १४

एहि देवि मम जीवनलसिते
सर्वकष्टवहनक्षमदयिते ।
अत्र मा विलप भूपतितनये
सर्वमत्र सुखशोभनलसितम् ॥ १५

रामनामपदगुंफितभजनैः
कृष्णकृष्णभणितैर्मधुनिनदैः ।
चक्रुरेव बहुधाऽन्तिमसमयं
शान्तिमङ्गलमयं वरनृपतेः ॥ १६

आकलय्य मधुकीर्तनमतुलं
संजगाद नृपतिः क्वणनसमं ।
भक्तिभावपिहितं मधुभरितं
कीर्तनादिकमहो भवति भृशम् ॥ १७

रामकृष्णमननादिकमधुना
माऽस्तु मे प्रियमिदं भुवि सततम् ।
चित्तदुःप्रियपुरं खलयवनात्
नास्मि शक्त इति मोचितुममरम् ॥ १८

चिन्तया हृदयमत्र च नितरां
क्रूयते भजनगायननिनदैः ।
किं प्रयोजनमहो भुवि वसने
साधनीयमिह साधितमिति न ॥ १९

अन्तिमं मम हृदिस्थमिह दृढं
वाञ्छितं सफलमेव हि कुरुत ।
अन्यतन्त्रनिवहावलिकरणे
आत्मशान्तिरिह मे न च भवति ॥ २०

भावनां च भवतां हृदयगतं
व्याहरन्तु चरमां नृपनिचयम् ।
युष्मदीयचरणार्चननिरताः
सेवका वयमिहाशयसहिताः ॥ २१

मामकीनवचनं विशदमिदं
निश्चलं शृणुत भोः प्रियसुहृदः ।
अन्तिमं कठिनमाचरितुमिह
घोरयुद्धकरणेन च सपदम् ॥ २२

एकवाक्यपरिसर्पितहृदय-
रेककण्ठगतभीकरभणितैः ।
एकवारमसिसंगमनिनदैः
साधयाम भुवि चित्तडुममरम् ॥ २३

एवमत्र भरतावनिजननीं
पारकीयपटुकश्मलछलनात् ।
रक्षितुं वयमतीव च निभृतं
तत्परा इति वदन्तु सुमधुरम् ॥ २४

आत्मशान्तिमयपानकसदृशं
श्रोत्रपेयममलं बहुमधुरम् ।
वीरपूरुषजनावलिसुहितं
व्याहरन्तु पटुदीक्षितवचनम् ॥ २५

आनिशम्य विनिमीलितनयनः
मञ्जुहासपरिसर्पितवदनः ।
स्वर्गधामचलनोत्सुकहृदयः
सत्यमेव हि भवामि नृपतयः ॥ २६

दृश्यतेऽत्र मम लोचननिकटे
खिन्नभावयुतचित्तडजननी ।
मुक्तिमाप्तुमिह यावनहस्तात्
रोदतीव पटुदुःखितमनसा ॥ २७

शक्तिसिंह मम पुत्रकममरं
पश्य तावककुमार इव सदा ।
चित्तडस्य विजयेन सपदं
शूलखड्गनिचयं मम जयदम् ॥ २८

जाह्नवीयसलिले खलु विनुतं
पातयाहवकृपाणनिचयम् ।
भातु भव्यमिह कश्मलकलितं
जाह्नवीसलिलमज्जनविमलम् ॥ २९

मा विलापमिह मामकनिकटे
हे प्रियाः कुरुत चाप्रियमहितम् ।
राजपुत्रकुलभूषणममरं
सर्वदा प्रियमिहात्र च विमलम् ॥ ३०

सुध्वजं रविकुलावलिजयदं
सूर्यचिह्नलसितं मम पुरतः ।
राजते बहुनमांसि च शपथैः
संवितीर्य विचलामि सुरपदम् ॥ ३१

मानसं मम तु चित्तडनिकटे
मेवडं च परितो बहु लसते ।
एकलिङ्गविभुपद्मपदतले
भ्राजते च मधुवम्भरतुलितम् ॥ ३२

एहि सूर्यकुलदीपकतनय
शारदाम्बुजनिभाननलसित ।
मामकीनवचनं फलभरितं
भव्यभारतरणाङ्गणमधवन् ॥ ३३

आकुरुष्व शपथं मम निकटे
सत्वरं खलु मनोरथममलम् ।
साधयेयमिति दीक्षितमनसा
सूर्यकेतनसमं पटुवचसा ॥ ३४

राजशासनमिदं जनविनुतः
पालयन् ननु चकार सुशपथम् ।
सूर्यकेतनधरः प्रियभणितैः
सर्वबन्धुधरणीपतिसुमुखे ॥ ३५

साधयेयमिह चित्तडवसुधां
चाज्मिरेण युतमण्डलधरणीम् ।
सर्वबान्धवयुतो मम जनक
शान्तचित्तलसितो व्रज नृपते ॥ ३६

उत्तमाङ्गभवनीपतिरमले
पुत्रकोरुतलकल्पितशयने ।
शान्तिभावभरसौख्यदमिह सं-
स्थाप्य तृप्तिमवलम्बितमनसा ॥ ३७

पुत्रकेन निहितं नवतुलसी
स्वर्णदीजलयुतं खलु सलिलम् ।
वक्त्रकण्ठगलितं मधुररसम्
चागिलन् व्रजति तन्मयमतुलम् ॥ ३८

अश्रुपूर्णनयनाञ्चललसिता
भाति तस्य महिषीविनुतगुणा ।
राजपुत्रनुतकर्मणि निरता
पादपद्मविहितार्चनकलिता ॥ ३९

धन्यमत्र तव जीवनममलं राष्ट्रभक्तियुतपावनचरितम् ।
तच्चमेव नृप सर्वजनहितं जायते तव सुरालयवसतिः ॥ ४०

पञ्चभूतनिचये खलु मिलितं प्राणपञ्चकमहो भुवि नृपतेः ।
तस्य भौतिकवपुर्मुदिगलितं कीर्तिरूपममरं नृपचरितम् ॥ ४१

स्तात्पुडावलिनगाश्रितपतगाः वृक्षकुञ्जनगकंदरविरुतैः ।
बोधयन्ति जनतां नृपचरितं हल्दिघाट्विचलितं रणलिखितम् ॥ ४२

घोषयन्ति बहुकीर्तितचरितं तत् शिशोदियकुलोदधिशाशिनः ।
दूषयन्ति शतधाऽक्वरचरितं मानसिंहनृपतेरपचरितम् ॥ ४३

भामसाहिकृतकाञ्चननिधयो त्यागभावभरभारतविजयाः ।
पृथ्विराजराहिमादिकसुहृदां कृष्णसिंहधिषणाकृतसमयाः ॥ ४४

भारतस्य नवभूषणललिता कीर्तिता भुवि रणप्रभुललना ।
वीरमातृपदभूषितजननी लोकवन्द्यललनाकुललना ॥ ४५

भामसाहिनृपभीमकसुहृदः स्वामिभक्तिपरिपूरितचरिताः ।
कृष्णसिंहनृप-माडुवरभटाः घोषिता हि जनता हृदि निरतम् ॥ ४६

आकोशैस्तत्र शक्तस्तु सोरस्ताडं रुदन् परम् ।
मातृपादौ प्रगृह्यांशु बभाणेदं व्यथाविलः ॥ ४७

चित्तौडसिंह राणा त्वं चित्तौडं मोचितुं स्वयम् ।
मन्त्रणां कर्तुमिन्द्रेण गतवानसि निश्चयम् ॥ ४८

इति प्रजल्पन् शक्तस्तु रोदनैश्च सगद्गदैः ।
राणापदारविन्दे तु शीर्षं क्षिप्त्वा मुमूर्छ च ॥ ४९

सप्तपञ्चाशद्वब्दान् सः युध्यन् राणा विना सुखम् ।
स्वतन्त्रभारतार्थाय यापयामास जीवितम् ॥ ५०

स्वररत्नमहाप्राणविधुसंवत्सरे प्रभुः।
प्रतापः प्राप पञ्चत्वं परवीरभयङ्करः॥ ५१

सकलनृपतिवर्गाः दुःखपूर्णैश्च हृद्भिः
नयनसलिलपूर्णैः दृग्भिरेवात्र तस्थुः।
नरपतिललनास्ताः तीव्रदुःखार्तितप्ताः
कटुविचलितनादैः शब्दितं रवं विचक्रुः॥ ५२

"त्यागेनैके अमृतत्वमानशुः"
(तै आ १०.१०)

ओं शान्तिः शान्तिः शान्तिः॥

[इति श्रीमत्प्रतापराणायन-महाकाव्ये विजयकाण्डे 'राणावीरस्वर्गाधिरोहणम्' नाम अष्टमः सर्गः समाप्तः।]

इति श्रीसकलभुवनतलबुधजनविनुतकविकुलपादारविन्दमकरन्दपानमत्तभ्रमराय-मानमानसेन श्री ओगेटि कौसल्यासाम्बमूर्तिदम्पत्योः गर्भशुक्तिमुक्ताफलाय-मानसूनुना गीर्वाणान्ध्रभाषाप्रवीणेन गीर्वाणगेयकविमण्डलचक्रवर्तिना ओगेटि-गीतालहरी-अक्षयगीतरामायणम्-यशोधरामहाकाव्यम्-परीक्षित्नाटकचक्रम्-जानपदनृत्यगीतमञ्जरीकाव्यम्-सौन्दर्यमीमांसादि-काव्यसंचयरचयित्रा पण्डित ओगेटि परीक्षित् शर्मणा विरचिते श्रीमत्प्रतापराणायनमहाकाव्ये विजयकाण्डं समाप्तम्॥

इति मेवाडोदयारण्यदिल्लीहल्दिघाट्विजयाख्यषट्काण्डयुतम्, अशीतिसर्गात्मकं, चतुस्सहस्राधिकश्लोकाक्तं, त्रयस्त्रिंशतिछन्दोभिः सुबद्धं, श्रीमत्प्रतापराणायनं महाकाव्यं परिसमाप्तम्।

ॐ तत् सत्

शुद्धिपत्रम्

पृष्ठम्	श्लोकः	अशुद्धम्	शुद्धम्
५	२५	व्यवहारेषु कौशलः	सुव्यवहारकौशलः
२६	४८	लक्ष्म्री	लक्ष्मी
३८	९	कर्मादि	मादि
४४	९	सा स्वराष्ट्रे	साऽजनि भारतेऽस्मिन्
९५	५	पन्नग	पतग
९७	२५	सुफलम	सुकलम
९९	४८	मण्डलैः	मण्डलमण्डनैः
११२	७	भावनैः	धावनैः
११२	११	जचणम्	चणम्
१२१	५५	सर्वदा	सदा
१४७	३६	स्वमानसैः	मानसैः
१५३	१	उद्युक्तः	उद्युक्तश्च
१६०	१४	वगात्	वर्गात्
१६८	४७	पाशम	पाशव
१८३	३७	चव	चैव
१८४	५६	चावश्यक	चावश्य
१८५	१	माहुः	माहु
२१५	१२	कुशलीं	कुशली
२३१	८	लौकैः	लोकैः
२४१	१०	युतः	भरितः

पृष्ठम्	श्लोक	अशुद्धम्	शुद्धम्
२४९	५	शान्तनामकम्	शक्तनामकम्
२७७	११	पद्शात्रव	परशात्रव
२७७	१२	यादचमुत्र	यावदिहैव
२९८	४१	मलन्ति	गुवन्ति
३०५	३७	ह्व	हि चा
३०८	८	पातुं	पातुमहोऽत्र
३०९	१५	भाति	भान्ति
३१३	२	गोठकैः	घोटकैः
३१४	४	स्वानुमण्डलं	रवानुमण्डलं
३१५	१३	पदालिभिः	गजालिभिः
३३१	३७	तदा भवत्तथा	तदाऽभवत्तथा
३३१	३७	प्रलयवीर	प्रशस्तवीर
३३५	३	यूथान्विक्ताः	यूथान्विता
३३५	३	रावैर्युताः	रावैर्युता
३३७	११	दीप्तिमन्त्रममरं	दीप्तिमन्तममरं
३४०	३१	दिव्यममुत्र	दिव्यमिहैव
३४२	४४	तद्दुःखस्थ	तद्दुरवस्थ
३६१	२	जयश्रियां	जयश्रियं
३६३	२०	देवं	दैवं
३६७	२	वर्षम	वर्षे
३६८	१३	धात्री	धात्रीं
३७६	१	विलासलासैः	विलासलास्यैः
३८३	४४	चयं	चयं च
३८६	१४	भाग्यराशिम	भाग्यराशे

पृष्ठम्	श्लोकं	अशुद्धम्	शुद्धम्
३८८	३२	स्वराष्ट्रं	स्वकीयराष्ट्रं
३९९	९१	षष्मास	षण्मास
३९९	९१	सः	तु
४१६	४४	चरणं	चरणं तव
४२०	२७	प्रशान्तं	प्रशास्तं च
४४९	९०	भो	भोः
४५७	४६	प्रपुङ्खानुङ्खं	प्रपुङ्खानुपुङ्खं
४६४	३२	चेतके नैव	चेतकेनैव
४७२	२४	कुंड्याभाग	कुड्यभाग
४७३	२८	मोक्तिक	मौक्तिक
४८६	५०	गेष्णु	रम्यगेष्णु
४८६	५०	वृ दैः	सुवृन्दैः
४९६	३	दृढतनुः	दृढवपुः

Rashtriya Sanskrit Sansthan